दक्षिणालक्षणबन्धत्रयसद्भावात्। प्राकृतो हि बन्धः आत्माऽनात्मविवेकाऽभावस्वभावः, विषयाऽऽसङ्गस्वरूपस्तु वैकारिकः, भोगाधिरूढधर्माधर्मलक्षणश्च दक्षिणाबन्धः। अनेन च बन्धत्रयेण आमूलादीश्वर एवाऽस्पृष्टः, मुक्तात्मानस्तु एतानि त्रीण्यपि बन्धनानि विवेकज्ञानेन माध्यस्थ्येन कर्मफलोपभोगेन च निर्मूल्यैव कैवल्यं प्राप्ताः। अयं तु भगवान् ईश्वरः सदैव मुक्तः सदैवेश्वरः न तस्य पूर्वा कोटिरस्ति यथा संसारिमुक्तात्मनाम्, नाप्यपरा यथा प्रकृतिलीनतत्त्वज्ञानानां योगिनाम्, ते हि मुक्तिं प्राप्यापि पुनर्बन्धभाजो भवन्ति। ऐश्वर्यञ्चास्य निरतिशयोत्कृष्टसत्त्वाया बुद्धेर्योगात् सिद्धम्, निरतिशयसत्त्वोत्कर्षश्चास्याः शासनत्राणलक्षणशास्त्रोपादानात्। नन्वेवमितरेतराश्रयः–सिद्धे हि निरतिशयसत्त्वोत्कर्षे तल्लक्षणशास्त्रोपादानसिद्धिः, तत्सिद्धौ च निरतिशयसत्त्वोत्कर्षसिद्धिरिति; तदसमीक्षिताभिधानम्; ईश्वरे शास्त्र-निरतिशयसत्त्वोत्कर्षयोः अनादिसम्बन्धसंभवात्।

तच्चैश्वर्यम् अष्टविधम्–अणिमा, लघिमा, महिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम्, वशित्वम्, यत्रकामावसायिता चेति। तत्र अणिमा–यदणुशरीरो भूत्वा सर्वभूतैरदृश्यः सर्वलोके सञ्चरति। लघिमा–यल्लघुत्वाद्वायुवद् विचरति। महिमा–यत्सर्वलोकपूजितो महद्भ्योऽपि

१ "स च बन्धस्त्रिविधः प्रकृतिबन्धो वैकारिकबन्धो दक्षिणाबन्धश्च। तत्र प्रकृतिबन्धो नाम अष्टासु (प्रकृतिबुद्ध्यहङ्कारतन्मात्रेषु) प्रकृतिषु परत्वेनाभिमानः। वैकारिकबन्धो नाम ब्रह्मादिस्थानेषु श्रेयोबुद्धिः। दक्षिणाबन्धो नाम गवादिदानेज्यानिमित्तः।" सां० माठर वृ० पृ० ६२। तत्त्वयाथा० पृ० ८१। "प्रकृतिलयः प्रकृतिबन्धः इत्युच्यते, यज्ञादिभिः दक्षिणाबन्ध इत्युच्यते, ऐश्वर्यादिनिमित्तो भोगो वैकारिक इत्युच्यते।" सां० माठर वृ० पृ० ६३। योगसू० तत्त्ववैशा० १।२४। सांख्यसं० पृ० २४। २ "अविद्यादयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणा वासना आशयः। ते च मनसि वर्त्तमाना पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति, यथा जयः पराजयो वा योद्भृषु वर्त्तमानः स्वामिनि व्यपदिश्यते। यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः। कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः, ते हि त्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः। ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी। यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य। यथा वा प्रकृतिलीनस्य उत्तरा बन्धकोटिः संभाव्यते नैवमीश्वरस्य। स तु सदैव मुक्तः सदैव ईश्वर इति। योऽसौ प्रकृष्टसत्त्वोपादानात् ईश्वरस्य शाश्वतिक उत्कर्षः स किं सनिमित्त अहोस्विन्निर्निमित्त इति? तस्य शास्त्रं निमित्तम्। शास्त्रं पुनः किन्निमित्तम्? प्रकृष्टसत्त्वनिमित्तम्। एतयोः शास्त्रोत्कर्षयोः ईश्वरसत्त्वे वर्त्तमानयोः अनादिः सम्बन्धः।" योगसू० व्यासभा० १।२४। ३ "ऐश्वर्यम् ईश्वरभावेन इत्यष्टविधम्–अणिमा, लघिमा, गरिमा, महिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम्, वशित्वम्, यत्रकामावसायित्वमिति।" सां० माठरवृ० पृ० ४१। "तत्राणिमा भवत्यणुः, लघिमा लघुर्भवति, महिमा महान् भवति, प्राप्तिः अङ्गुल्यग्रेण स्पृशति चन्द्रम्, प्राकाम्यम् इच्छानभिघातो भूमावुन्मज्जति निमज्जति यथोदके, वशित्वं भूतभौतिकेषु वशी भवति अवश्यञ्चान्येषाम्, ईशितृत्वम्–तेषामप्रभवाप्यव्यूहानामीष्टे, यत्रकामावसायित्वम् सत्यसङ्कल्पता, यथा सङ्कल्पः तथा भूतप्रकृतीनामवस्थानम्।" योगसू० व्यासभा० ३।४५। "विक्रियागोचरा ऋद्धिः अनेकविधा–अणिमा, महिमा, लघिमा, गरिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम्, वशित्वम्, अप्रतिघातः, अन्तर्धानम्, कामरूपित्वम्, इत्येवमादि। त० राजवा० पृ० १४४। ४–पूजिते म–ब०, ज०।

महत्तमो भवति । प्राप्तिः—यद् यद् मनसा चिन्तयति तत्तत्प्राप्नोति । प्राकाम्यम्—यत्प्रचुरकामो भवति, 'विषयान् भोक्तुं शक्नोति' इत्यर्थः । ईशित्वम्—यत् त्रैलोक्यस्य प्रभुर्भवति । वशित्वम्—यद् भूतानि स्थावरजङ्गमानि वशं नयति, वश्येन्द्रियश्च भवति । यत्रकामावसायिता—यद् ब्राह्म-प्राजापत्य-दैव-गान्धर्व-यक्ष-राक्षस-पित्र्य-पैशाचेषु मानुष्येषु तैर्यग्योनिषु च स्थानान्तरेषु च यत्र यत्र कामयते तत्र तत्र आवसतीति । ५

एतेषाञ्च ज्ञानैश्वर्यादीनां प्रकृष्ट-प्रकृष्टतमद्वारेण तारतम्यदर्शनात् यत्र विश्रान्तः प्रकर्षः स ईश्वर इति संभावनाऽनुमानेन असौ व्यवस्थाप्यते । तथाहि—यस्तारतम्यप्रकर्षः स क्वचिद् विश्राम्यति यथा परिमाणप्रकर्षो व्योम्नि, तारतम्यप्रकर्षश्च ज्ञानैश्वर्यादिधर्माणामिति । तस्य चेत्थं प्रसिद्धस्वरूपस्येश्वरस्य निःशेषसंसार्यनुग्रहार्थमेव प्रवृत्तिः, स हि कल्पप्रलयमहाप्रलयेषु 'समग्रं जगदुद्धरिष्यामि' इति प्रतिज्ञावान् अवतिष्ठते । स च ध्यायिभिश्चिन्त्यमानो वाचकेन प्रणवादिना जप्यमानः तेभ्योऽभिमतं फलं प्रयच्छति । कालेनाऽनवच्छेदाच्चासौ पूर्वेषामपि कपिलमहर्षिप्रभृतीनां गुरुः, ते हि कल्पमहाकल्पादिना कालेन अवच्छिद्यन्ते, नतु ईश्वर इति । १०

अत्र प्रतिविधीयते । यत्तावदुक्तम्—क्लेशेत्यादि; तदविचारितरमणीयम्; यतः क्लेशादिभिरपरामृष्टत्वमात्रं तस्य स्वरूपम्, तस्मिन् सति अशेषज्ञत्वं वा ? प्रथमपक्षे मुक्त एवासौ स्यात् तैरपरामृष्टत्वात् तदन्यमुक्तवत् न पुनरीश्वरः, तदन्यमुक्तात्मनामपि तत्त्वप्रसङ्गात् । सर्वदा बन्धेनाऽस्पृष्टत्वाऽभावान्न तेषां तत्प्रसङ्गः; इत्यपि श्रद्धामात्रम्; ईश्वरस्यापि सर्वदा बन्धेनाऽस्पृष्टत्वाऽसंभवात्, तदसंभ- १५

तत्प्रतिविधानम्—

१ "यत्रकामावसायित्वं सत्यसङ्कल्पता इति । विजितगुणार्थवत्त्वो हि योगी यद् यदर्थतया सङ्कल्पयति तत् तस्मै प्रयोजनाय कल्प्यते । विषमपि अमृतकार्यं सङ्कल्प्य भोजयन् जीवयति ।" योगसू० तत्त्ववै० ३ । ४५ । २ "अष्टविकल्पो देवः तैर्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥" तद्यथा—ब्राह्मं प्राजापत्यम् ऐन्द्रं पैत्रं गान्धर्वं याक्षं राक्षसं पैशाचमित्यष्टविधो दैवसर्गः । तैर्यग्योनश्च पञ्चधा भवति अत्र तुल्यलिङ्गत्वाद्भवति—पशु-पक्षि-मृग-सरीसृपस्थावरान्तश्च इति । मानुष्य एकविधस्तुल्यलिङ्गत्वात् ब्राह्मणादिचाण्डालान्तः ।" सां० मा० वृ० पृ० ७० । ३—स पै—ब०, ज०, भां० । ४—चेषु तै—ब०, ज०, भां० । ५ "तत्र निरतिशयं सर्वज्ञबीजम् ।" योगसू० १ । २५ । "अस्तिकाष्ठाप्राप्तिः सर्वज्ञबीजस्य सातिशयत्वात् परिमाणवदिति । यत्र काष्ठाप्राप्तिः ज्ञानस्य स सर्वज्ञः ।" व्यासभा० । ६ "तस्य आत्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम् । ज्ञानधर्मोपदेशेन, कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामि इति । तथा चोक्तम्—आदिविद्वान्निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिः आसुरये जिज्ञासमानाय धर्मं प्रोवाच इति ।" योगसू० व्यासभा० १ । २५ । ७ समस्तम् ब०, ज० । ८ "तस्य वाचकः प्रणवः ।" "तज्जपस्तदर्थभावनम् ।" योगसू० १ । २७,२८ । ९ "पूर्वेषामपि गुरुः कालेनानवच्छेदात् ।" योगसू० १।२६ । "पूर्वे हि गुरवः कालेनावच्छेद्यन्ते, यत्र अवच्छेदार्थेन कालो नोपावर्त्तते स एष पूर्वेषामपि गुरुः ।" व्यासभा० । १० पृ० १०९ पं० ८ । ११ "यतः क्लेशादिभिरपरामृष्टत्वमात्रं तस्य स्वरूपं तस्मिन्सति अशेषज्ञत्वं वा ?" स्या० रत्ना० पृ० ४५४ । १२ ईश्वरत्व ।

वश्च मोक्षप्ररूपणावसरे प्रतिपादयिष्यते। अथ तदस्पृष्टत्वे सति अशेषज्ञत्वं तस्य स्वरूपम्, तत्कुतः सिद्धम् अशेषकर्तृत्वात्, ऐश्वर्याश्रयत्वाद्वा ? तत्राद्यपक्षोऽनुपपन्नः; यौगाभिमतेश्वरपक्ष-निक्षिप्तदूषणगणप्रसङ्गात्। कर्तृत्वाभ्युपगमे चास्य "*अकर्ता निर्गुणः शुद्धः*" [ ] इत्यादेरात्मलक्षणस्याऽनुपपत्तिः। अथ अन्यात्मनामेवैतल्लक्षणं नेश्वरस्य, अस्याऽतो विशिष्ट-
५ त्वात् तेनाऽयमदोषः; नन्वेवं शुद्धत्वादेरपि ईश्वरस्वरूपत्वाऽभावप्रसङ्गात् अतीव तस्य तेभ्यो विशिष्टत्वं स्यात् !

अस्तु वाऽस्य कर्तृत्वम्, तथाप्यसौ[1] स्वतन्त्रः कार्यं कुर्यात्, प्रकृतितन्त्रो वा ? यदि स्व-तन्त्रः; तदा यौगोपकल्पितेश्वरान्न विशिष्यते इति तद्दोषेणैव दुष्टताऽस्य प्रतिपत्तव्या। अथ प्रकृतितन्त्रः; तन्न; प्रकृतेः स्वरूपत एवाऽसिद्धेः, तदसिद्धिश्च अग्रे निराकरिष्यमाणत्वात् सिद्धा।
१० तत्तन्त्रता चास्य अनयोऽतिशयाधानात्[2], मिलित्वैककार्यकारित्वाद्वा स्यात् ? तत्राद्यकल्पनाऽ-युक्ता; सर्वथा नित्यत्वेन अविकारिणोऽस्य अतिशयाधानाऽसंभवात्। द्वितीयकल्पनाप्यनुपपन्ना; कार्याणां यौगपद्यप्रसङ्गात् अप्रतिहतसामर्थ्यस्य ईश्वरप्रधानाख्यकारणद्वयस्य सर्वत्र सर्वदा सन्निहितत्वेनाऽविकलकारणत्वात्तेषाम्। यद् यदाऽविकलकारणं तत्तदा भवत्येव यथा अन्त्य-क्षणप्राप्तसामग्रीतोऽङ्कुरः, अविकलकारणञ्च नित्यव्यापीश्वर-प्रधानाख्यकारणद्वयाधीनमशेषं
१५ कार्यमिति।

ननु कारणद्वयस्याऽस्य सर्वत्र सर्वदा सन्निहितत्वेऽपि न सर्वत्र सर्वदा कार्योत्पत्तिः, तस्थि-त्युत्पत्तिविनाशविधाने सत्त्वरजस्तमसामुद्भूतवृत्तीनां यथाक्रमं सहकारित्वात्, तेषाञ्च तथा-विधानां क्रमभावित्वादिति; तदप्यपेशलम्; यतः[3] प्रकृतीश्वरयोः स्थित्युत्पत्तिप्रलयानां मध्ये अन्यतमोत्पादनसमये तदपरोत्पादने सामर्थ्यमस्ति, न वा ? यद्यस्ति; तर्हि सृष्टिसमयेऽपि
२० स्थितिप्रलयप्रसङ्गः अविकलकारणत्वादुत्पादवत्, एवं स्थितिकालेऽपि उत्पाद-विनाशयोः विना-शकाले च स्थित्युत्पादयोः[4] प्रसङ्गः। न चैतद् युक्तम्। नहि परस्परपरिहारेणावस्थितानामुत्पादा-दिधर्माणाम् एकत्र धर्मिण्येकदा सद्भावो युक्तः प्रतीतिविरोधात्। अथ नास्ति सामर्थ्यम्; तदा

---

१ "अशेषकर्तृत्वात् ऐश्वर्याश्रयत्वाद्वा ?" स्या० रत्ना० पृ० ४५४। २ "स किं स्वतन्त्रः सर्वं कार्यं कुर्यात् प्रकृतिपरतन्त्रो वा ?" स्या० रत्ना० पृ० ४५४। ३ "साहित्यं सहकारित्वात् एतयोः कल्प्यते च यत्। तत् स्यादतिशयाधानादेकार्थक्रिययापि वा ॥ ९५ ॥ न युक्ता कल्पनाद्यस्य निर्विकारतया तयोः। न द्वितीयस्य कार्याणां यौगपद्यप्रसङ्गतः ॥ ९६ ॥" तत्त्वसं० पृ० ५९। प्रमेयक० पृ० ८४ पू०। स्या० रत्ना० पृ० ५५४। ४ "इहोच्यते तयोरेकक्रियाकाले समस्ति किम्। तदन्यकार्यनिष्पत्तिसामर्थ्यं यदि वा न तत् ॥१०१॥ यद्यस्ति सर्गकालेऽपि द्वयमप्यपरं भवेत्। एवमन्यस्य सद्भावे द्वयमन्यत् प्रस-ज्यते ॥ १०२ ॥" तत्त्वसं०पृ० ६०। प्रमेयक० पृ० ८४ उ०। स्या० रत्ना० पृ० ४५५। ५–योः पुनः प्रसङ्गः भां०।

एकमेव स्थित्यादीनां मध्ये कार्यं सदा स्यात् यज्जनने तयोः सामर्थ्यमस्ति, नापरं तज्जनने तयोः सामर्थ्याऽसंभवात्। अविकारिणोश्चाऽनयोः पुनः सामर्थ्योत्पत्तिविरोधात्, अन्यथा नित्यैकस्वभावताव्याघातः।

ननु चानयोः तत्सामर्थ्यसंभवेऽपि यदोद्भूतवृत्तिरजः सहकारि भवति तदोत्पत्तिविधायकत्वम्, यदा सत्त्वम् तदा स्थितिकारित्वम्, यदा तु तमः तदा प्रलयोत्पादकत्वम्; इत्यप्यसाम्प्रतम्; यतस्तेषामुद्भूतवृत्तित्वं नित्यम्, अनित्यं वा स्यात्? न तावन्नित्यम्; कादाचित्कत्वात्, स्थित्यादीनां यौगपद्यप्रसङ्गाच्च। अथ अनित्यम्; कुतो जायते प्रकृतीश्वरादेव, अन्यतो वा कुतश्चित्, स्वातन्त्र्येण वा? प्रथमपक्षे सदाऽस्य सद्भावप्रसङ्गः, प्रकृतीश्वराख्यस्य हेतोर्नित्यरूपतया सदा सन्निहितत्वात्। अथ अन्यतः; तन्न; प्रकृतीश्वरव्यतिरेकेण अपरकारणस्य भवताऽनभ्युपगमात्। तृतीयपक्षे तु देश-कालनियमेनाऽस्य आविर्भावविरोधः स्वातन्त्र्येण भवतः तन्नियमानुपपत्तेः। स्वभावान्तरायत्तवृत्तयो हि भावाः कादाचित्काः स्युः तद्भावाभावप्रतिबद्धत्वात् तत्सत्त्वाऽसत्त्वयोः, नान्ये तेषामपेक्षणीयस्य कस्यचिदप्यभावात्, अपेक्षणीयसद्भावे वा स्वातन्त्र्येणोत्पादविरोधात्। अतः कर्तृत्वस्य ईश्वरे विचार्यमाणस्य कथञ्चिदप्यनुपपत्तेर्नातः तस्याशेषज्ञत्वसिद्धिः।

नाप्यैश्वर्याश्रयत्वात्, तत्रैश्वर्यस्यापि विचार्यमाणस्यानुपपत्तेः, तद्धि तत्र स्वाभाविकम्, प्रकृतिकृतं वा स्यात्? न तावत् स्वाभाविकम्; बुद्धिधर्मतया साङ्ख्यैस्तस्याभ्युपगमात्, चैतन्यमेव हि तैः आत्मनि स्वाभाविकं स्वरूपमभ्युगतम्। अथ प्रकृतिकृतम्; तथा हि—यदा प्रकृतिर्बुद्धिलक्षणेन विकारेण परिणमते तदा तदवस्थाविशेषाः धर्म-ज्ञान-वैराग्य-ऐश्वर्यादयः प्रादुर्भवन्तीति;

---

१ तथाहि—यदोद्भूतवृत्तिना रजसा युक्तो भवति महेश्वरः तदा सर्गहेतुः प्रजानां भवति प्रसवकार्यत्वाद्रजसः। यदा तु सत्त्वं समुद्भूतवृत्ति संश्रयते तदा लोकानां स्थितिकारणं भवति सत्त्वस्य स्थितिहेतुत्वात्। यदा तु तमसोद्भूतशक्तिना समायुक्तो भवति तदा प्रलयं नाशं सर्वजगतः करोति तमसः प्रलयहेतुत्वात्। यथोक्तम्—रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमस्पृशे। अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः। (कादम्बरी पृ० १) तत्त्वसं पं० पृ० ५९। प्रमेयक० पृ० ८४ पू०। स्या० रत्ना० पृ० ४५४। २ "उत्कटं शक्तिरूपञ्च यदि तन्मात्रकारणम्। सर्वदा तद्भवेद्धेतोर्नित्यरूपस्य सन्निधेः ॥ १०५ ॥ न चापरं परैरिष्टमतो नैवान्यतोपि तत्। नापि स्वतन्त्रमेवेदं कादाचित्कत्वसंभवात् ॥ १०६ ॥ स्वतो भावे ह्यहेतुत्वं स्वक्रियायाः विरोधतः। अपेक्षया हि भावानां कादाचित्कत्वसंभवः ॥ १०७ ॥" तत्त्वसं०। प्रमेयक० पृ० ८४ उ०। स्या० रत्ना० पृ० ४५५। ३ "ततश्चास्य भावः कदाचित् प्रकृतीश्वरादेव कारणात्, अन्यतो वा हेतोः स्वतन्त्रो वा स्यात्?" तत्त्वसं० पं० पृ० ६१। ४ "ऐश्वर्यं हि तत्र स्वाभाविकम्, प्रकृतिकृतं वा स्यात्?" स्या० रत्ना० पृ० ४५५। ५ "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विरागमैश्वर्यम्। सात्त्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम् ॥ २३ ॥ तत्र बुद्धेः सात्विकं रूपं चतुर्विधं भवति धर्मो ज्ञानं विरागमैश्वर्यमिति।" सां० माठरवृ०।

तदसमीक्षिताभिधानम्; एवम् ईश्वरस्य भवतैव ऐश्वर्याऽभावप्रतिपादनात्, न हि बुद्धिपरिणामस्यैश्वर्यस्य संभवे ततोऽर्थान्तरस्यास्य तद् युक्तम्, अन्यात्मनोऽपि तत्प्रसङ्गात्। अथ बुद्ध्या सह सम्बन्धसद्भावात् 'तस्यैव तत् नान्यस्य' इत्युच्यते; ननु[1] कोऽयं तेनास्याः सम्बन्धः–समवायः, संयोगादिः, तदुद्देशेन प्रवृत्तिमात्रं वा ? न तावत् समवायः; अन्यधर्मस्यान्यत्र समवायानुपपत्तेः, यो यद्धर्मः स ततोऽन्यत्र न समवैति यथा चिद्रूपता, प्रकृतिधर्मश्च बुद्धिः, तस्मात्ततोऽर्थान्तरेऽस्मिन् न समवैतीति। न च स्फटिकादिसमवेतेन रक्तादिधर्मेणाऽनेकान्तः; जपापुष्पसन्निधाने स्फटिकादेरेव तथा परिणमनात्। एतच्च प्रतिबिम्बोदयसिद्धौ सप्रपञ्चं प्रपञ्चयिष्यते। आत्मनोऽपि बुद्धिरूपतया परिणतप्रकृतिसन्निधाने तथा परिणामाभ्युपगमे *"चिच्छक्तिरपरिणामिन्यप्रतिसङ्क्रमा"*[2] [व्यासभा० पृ० १५] इत्यादिग्रन्थविरोधः। तन्नेश्वरेण सह बुद्धेः समवायः सम्बन्धो घटते। नापि संयोगः; बुद्धेरद्रव्यत्वात् अतिप्रसङ्गाच्च; सर्वैरपि हि आत्मभिर्नित्यव्यापिभिः तस्याः संयोगो विद्यत एव। एतेन संयुक्तसमवायादिरपि प्रत्याख्यातः; असंभवस्य अतिप्रसङ्गस्य चात्राप्यविशेषात्। अथ तदुद्देशेन प्रवृत्तिमात्रमेवास्यास्तेन सम्बन्धः; तदप्यसाम्प्रतम्; ईश्वरोद्देशेन अस्याः प्रवृत्तेरेवासंभवात्, पुरुषार्थकर्त्तव्यतावशेन हि प्रकृतेः प्रवर्तमानायाः बुद्ध्यादयो विकाराः व्यक्तिमासादयन्ति, न चेश्वरस्य कश्चित्पुरुषार्थः कर्त्तव्योऽस्ति, नित्यनिर्मुक्तत्वेन कृतकृत्यत्वात् तत्कथं तमुद्दिश्य प्रकृतिः प्रवर्तेत ? अप्रवृत्तायां वास्यां कथमैश्वर्यसंभवः ?

किञ्च, ऐश्वर्यं स्वाभिमतकार्यसम्पादने द्रव्यसहायादिसम्पन्नत्वमुच्यते, कार्यञ्चेत् स्वाभिमतं न किञ्चिदसौ सम्पादयति केवलं वस्तु यथावज्जानाति, कथं तर्हि तावतास्य ऐश्वर्यम् ? नहि यो यत् जानाति स तत्र 'ईश्वरः' इत्युच्यते, अतिप्रसङ्गात्। अथ कालेनानवच्छिन्नं तज्ज्ञानम् तेनासौ ईश्वरः नान्यः; ननु कालेनाऽनवच्छिन्नत्वं नित्यत्वे गमकम् नैश्वर्ये। एतेन संभावनानुमानं प्रत्युक्तम्; ततो हि बुद्ध्यादिगुणानां परमप्रकर्षः सिद्ध्येत् नैश्वर्यम्।

किञ्च, पुरुषार्थकर्त्तव्यतानुरोधेन प्रकृतितः प्रवर्तमानायाँ निरवशेषभोगपूर्वकं विवेकख्यातिपर्यन्तं पुरुषार्थं सम्पाद्य विनिवृत्तकर्तृत्वभोक्तृत्वाद्यभिमानायाः बुद्धेः स्वकारणे लयः सम्पद्यते, ततश्च ईश्वरं प्रत्यस्याः कृतार्थता स्यात्, न वा ? कृतार्थत्वे बुद्धेः स्वकारणे लीनत्वात् गतमस्यैश्वर्यम्। अकृतार्थत्वे अद्यापि बन्धलेशस्य सद्भावाद् योगितुल्यत्वमस्य स्यात्, नेश्वरत्वमिति। ततो जगत्कर्तृत्वादिप्रकारेण अशेषज्ञसद्भावाऽसिद्धेः सुनिश्चितासंभवद्बाधकप्रमाणत्वादेव तत्सद्भावसिद्धिरभ्युपगन्तव्या।

---

१ "ननु कोऽयमीश्वरेण साकं बुद्धेः सम्बन्धः–समवायः, संयोगादिः, ईश्वरोद्देशेन प्रवृत्तिमात्रं वा ?" स्या० रत्ना० पृ० ४५६। २ "चितिशक्तिरपरिणामिन्यप्रतिसङ्क्रमाऽदर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयम्।" योगसू० व्यासभा० १।२। "तथा चोक्तं पञ्चशिखेन–अपरिणामिनी हि भोक्तृशक्तिः अप्रतिसङ्क्रमा च।" योगसू० तत्त्ववैशा० २।२०। ३–मानाय नि–ब०

ननु बाधकाभाववत् साधकस्यापि प्रमाणस्य तत्राऽभावात् सन्देहोऽस्तु, इत्यारेकां निह्नुवानाह—

'साधक' इत्यादि। **साधकबाधकप्रमाणाभावात्** कारणात् **तत्र** अतीन्द्रियप्रत्यक्षे **संशीतिः अनेन 'यावज्ज्ञेय'** इत्यादिना ग्रन्थेन **प्रत्युक्ता** निरस्ता। कुत एतत्? इत्याह—**बाधकस्यैवाऽसंभवात्** न साधकस्य।

विवृतिव्याख्यानम्—

यदि नाम बाधकस्यैवाऽसंभवः किमेतावता अतीन्द्रियप्रत्यक्षस्य सद्भावो भविष्यति? इत्यत्राह— ५

'सर्वत्र' इत्यादि। **सर्वत्र** दृश्येऽन्यत्र वा विषये **बाधकाभावेतराभ्यां भावाऽभावव्यवहारसिद्धिः** बाधकस्याभावेन हि वस्तुनि भावव्यवहारसिद्धिः, भावेन च अभावव्यवहारसिद्धिरिति। कुतस्तर्हि सन्देहः? इत्याह—**'तद्'** इत्यादि। **तयोः** बाधकेतरयोः **सन्देहादेव सन्देहः सर्वत्रेति**। ननु न बाधकाभावाद् भावव्यवहारसिद्धिः अपि तु प्रतीतेः इत्याशङ्क्याह—**'तत एव'** इत्यादि। **तत एव** बाधकाभावादेव **अनुभवस्य** सुखादिसंवेदनस्य **प्रामाण्यव्यवस्थापनात्** १० **इति एवम् अलमतिप्रसङ्गेन**।

ननु च इन्द्रियाऽनिन्द्रियप्रत्यक्षस्य वर्तमानमात्रपर्यवसितत्वेन हेयोपादेयाऽविषयत्वात् कथं संव्यवहारनियुक्तत्वम्? इत्यारेकायामाह—

अक्षार्थयोगे सत्तालोकोऽर्थाकारविकल्पधीः।
अवग्रहो विशेषाकाङ्क्षेहावायो विनिश्चयः॥ ५॥ १५

विवृतिः—विषयविषयिसन्निपातानन्तरमाद्यं ग्रहणम् **अवग्रहः**। **विषयस्तावत् द्रव्य-पर्यायात्मार्थः, विषयिणो द्रव्यभावेन्द्रियस्य**। ❀ **द्रव्येन्द्रियं पुद्गलात्मकम्। लब्ध्युपयोगौ भावेन्द्रियम्। अर्थग्रहणशक्तिः लब्धिः, उपयोगः पुनरर्थग्रहणव्यापारः।** ❀

---

१ "साधकबाधकप्रमाणाभावात् सर्वज्ञे संशयोऽस्तु इत्ययुक्तम्; यस्मात् साधकबाधकप्रमाणयोः निर्णयाद् भावाभावयोरविप्रतिपत्तिः बाधकनिर्णयात्त्वसत्तायाम्।" अष्टश०, अष्टसह० पृ० ४९। २—भावात्तत्र भां०। ३—त्राह—सर्वत्र दृश्ये—आ०। ४—त्र बाध—भां०। ५ बाधकाभावेतरयोः सन्देहाभावादेव भां०। ६ इन्द्रियप्रत्यक्षस्य भां०। ७ "विषय-विषयिसन्निपातसमयानन्तरमाद्यग्रहणमवग्रहः।" सर्वार्थसि० पृ० ६२। त० राजवा० पृ० ४२। "अक्षार्थयोगजाद्वस्तुमात्रग्रहणलक्षणात् जातं यद्वस्तुभेदस्य ग्रहणं तदवग्रहः॥ २॥" तत्त्वार्थश्लो० पृ० २१९। "अत्थाणमुग्गहणमवग्गहं तह वियालणमीहम्। ववसायं च अवायं धरणं पुण धारणं वेति॥ ९॥" आ० नि०। "सामण्णत्थावग्गहणमुग्गहो भेयमग्गणमहेहा। तस्सावगो वाओ अविच्चुई धारणा तस्स॥ १८०॥" विशेषा० भा०। "तत्र अव्यक्तं यथास्वमिन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः। अवग्रहो ग्रहो ग्रहणमालोचनमवधारणमित्यनर्थान्तरम्।" तत्त्वार्थाधिग० भा० पृ० १८। प्रमाणनयतत्त्वा० २।७। "अक्षार्थयोगे दर्शनानन्तरमर्थग्रहणमवग्रहः।" प्रमाणमी० १।१।२७। ८—यम् आ० वि०। ❀ एतत्तारकान्तर्गतः पाठः आ० विवृतौ नास्ति।

अर्थग्रहणं योग्यतालक्षणम्, तदनन्तरभूतं सन्मात्रदर्शनं स्वविषयव्यवस्थापनविकल्पम् उत्तरपरिणामं प्रतिपद्यते अवग्रहः। पुनः अवग्रहीकृतविशेषाऽऽकाङ्क्षणम् ईहा। तथेहितविशेषनिर्णयोऽवायः कथञ्चिदभेदेऽपि परिणामविशेषाद् व्यपदेशभेदः।

अक्षाणां चक्षुरादीन्द्रियाणां **अर्थानां** घटादीनां **योगे** सम्बन्धे योग्यतालक्षणे सति, न तु संयोगादिलक्षणे तस्य प्रागेव प्रतिक्षिप्तत्वात्, **सत्तालोकः** सकलहेयोपादेयसाधारणसत्त्वमात्रस्य **आलोको** दर्शनम् आत्मनः प्रथमतः प्रादुर्भवति, तदनु स एवाऽऽलोकः **अर्थाकारविकल्पधीः** भवति। **अर्थः** व्यवहारिणा हेयत्वेन उपादेयत्वेन वा प्रार्थ्यमानो भावः तस्य **आकारः** सत्त्वसामान्यादवान्तरो जातिविशेषो मनुष्यत्वादिः तस्य **विकल्पधीः** निर्णयरूपा बुद्धिः आविर्भवति तद्रूपतया दर्शनं परिणमत इत्यर्थः। तस्याः किन्नाम ? इत्यत्राह— **'अवग्रह'** इति। अयमपि **विशेषाकाङ्क्षा** भवति। अन्यस्याऽप्रकृतत्वादश्रूयमाणत्वाच्च अर्थाकारस्यैव **विशेषो** बलाकादिभेदो गृह्यते तस्य **आकाङ्क्षा** भवितव्यताप्रत्ययरूपतया ग्रहणाभिमुख्यम्। तस्याः नाम कथयति **ईहा** इति। सापि **अवायो** भवति आकाङ्क्षितविशेष-**विनिश्चयो** भवति। ततश्च ज्ञानज्ञेययोः कथञ्चित्कालान्तरानुवृत्तिमत्त्वप्रसिद्धेः सिद्धम् इन्द्रियाऽनिन्द्रियप्रभवप्रत्यक्षस्य संव्यवहारनियुक्तत्वं हेयोपादेयार्थविषयत्वसंभवात्, सर्वथाऽननुवृत्तिमत एव तदसंभवतः तन्नियुक्तत्वाऽनुपपत्तेः।

कारिकाविवरणम्—

कारिकां विवृण्वन्नाह—**'विषय'** इत्यादि। ननु कारिकायां दर्शनं पूर्वमुक्तम् पश्चाद् अवग्रहः, वृत्तौ तु विपर्ययः किमर्थम् ? इति चेत् अवग्रहाद् दर्शनस्य कारिकायां पूर्वं प्रतिज्ञातस्य अनुमेयत्वख्यापनार्थम्। यथैव हि अवान्तरजातिग्रहणपूर्वकम् उत्तरं विशेषज्ञानं तत्त्वात्, तथा तत एव अवान्तरजातिग्रहणं सत्ता-

विवृतिव्याख्यानम्—

---

१ अवग्रहगृहीतवि—आ० वि०। अवग्रहीत—ज० वि०। "अवग्रहगृहीतेऽर्थे तद्विशेषाकाङ्क्षणमीहा।" सर्वार्थसि० पृ० ६३। अवगृहीतेऽर्थे···राजवा० पृ० ४१। तत्त्वार्थश्लो० पृ० २२०। "अवगृहीतेऽर्थे विषयार्थैकदेशाच्छेषानुगमनं निश्चयविशेषजिज्ञासा चेष्टा ईहा। ईहा ऊहा तर्कः परीक्षा विचारणा जिज्ञासा इत्यनर्थान्तरम्।" तत्त्वार्थाधि० भा० पृ० १८। "अवगृहीतार्थविशेषाकाङ्क्षणम् ईहा" प्रमाणनयतत्त्वा० २।८। प्रमाणमी० १।१।२८। जैनतर्कप० पृ० ११६। २ "विशेषनिर्ज्ञानाद्याथात्म्यावगमनमवायः" सर्वार्थसि० पृ० ६३। राजवा० पृ० ४२। तत्त्वार्थश्लो० वा० पृ० २२०। "अवगृहीते विषये सम्यगसम्यगिति गुणदोषविचारणाध्यवसायापनोदोऽपायः। अपायोऽपगमः अपनोदः अपव्याधः अपेतमपगतमपविद्धमपनुत्तमित्यनर्थान्तरम्।" तत्त्वार्था० भा० पृ० १८। "ईहितविशेषनिर्णयोऽवायः।" प्रमाणनयतत्त्वा० २।९। प्रमाणमी० १।१।२९। जैनतर्क० पृ० ११६।

दर्शनपूर्वकम्; न च सत्तायाः परं सामान्यमस्ति यतोऽनवस्था स्यात्। **विषयः** घटादिः **विषयी** चक्षुरादिः तयोः **समीचीनः** यथार्थज्ञानजनको **निपातः** योग्यदेशाद्यवस्थानम् तस्य **अनन्तरम्** **आद्यं ग्रहणं** ज्ञानम् **अवग्रहः** अवान्तरमनुष्यत्वादिजातिपरिच्छेदः। तत्र **'विषयः'** इत्यादिना विषयस्वरूपं निरूपयति। **तावत्** शब्दः क्रमवाची **विषयो** गोचरः **अर्थः** किंविशिष्टः? **द्रव्यपर्यायात्मा**। तत्र **द्रव्यम्** पूर्वोत्तरविवर्त्तवर्त्यन्वयप्रत्ययसमधिगम्यम् ऊर्द्ध्वतासामान्यम्, ५ तत्र क्रमभुवो विवर्त्ताः **पर्यायाः** ते **आत्मा** स्वभावो यस्य स तथोक्तः।

ननु ज्ञानस्वरूपातिरिक्तस्याऽर्थस्य सद्भावे प्रमाणाभावात् कस्य द्रव्यपर्यायात्मकत्वविशिष्टस्य विषयत्वं प्ररूप्यते? प्रतिभासमानस्याऽशेषस्य वस्तुनो ज्ञानस्वरूपान्तःप्रविष्टत्वप्रसिद्धेः संवेदनमेव पारमार्थिकं तत्त्वम्।

संवेदनाद्वैतवादिनो योगाचारस्य पूर्वपक्षः—

तथाहि—यदवभासते तज्ज्ञानमेव यथा सुखादि, अवभासन्ते च १० भावा इति। न चैषां परतोऽवभासो घटते। स हि परतः सम्बद्धात्, असम्बद्धाद्वा भवेत्? न तावदसम्बद्धात्; अतिप्रसङ्गात्। अथ सम्बद्धात्; किं तादात्म्येन, तदुत्पत्त्या वा? यदि तादात्म्येन तदा ज्ञानरूपताऽर्थानाम् जडस्वभावता वा ज्ञानस्य स्यात्, तादात्म्यस्य अन्योन्यस्वरूपस्वीकारस्वभावत्वात्। ज्ञानस्वरूपत्वे चार्थानां सिद्धं ज्ञानाद्वैतम्। जडस्वभावत्वे तु ज्ञानस्य अर्थव्यवस्थावार्तोच्छेदः जगतो विवेकविकलतया आन्ध्यप्रसक्तेः। १५

अथ तदुत्पत्त्या; कुतः किमुत्पद्येत ज्ञानादर्थः, अर्थाद्वा ज्ञानम्? प्रथमपक्षे अर्थस्य ज्ञानरूपताप्रसङ्गः ज्ञानादुत्पद्यमानत्वात् उत्तरज्ञानक्षणवत्। अथ अर्थाज्ज्ञानमुत्पद्यते; किं समकालात्, भिन्नकालाद्वा? न तावत् समकालात्; समसमयभाविनोः सव्येतरगोविषाणवत् कार्यकारणभावाऽभावात्, अन्यथा अर्थं प्रति ज्ञानस्यापि कारणत्वप्रसङ्गः अविशेषात्। भिन्नकालात्तस्तदुत्पत्तौ ज्ञानस्याऽहेतुकत्वप्रसक्तिः, तत्कालेऽर्थस्याऽसत्त्वात्, यदसन् न ततः किञ्चिदुत्पत्तुमर्हति यथा मृताच्छिखिनः केकायितम्, असंश्च ज्ञानकाले अर्थ इति। किञ्च, अर्थो ज्ञानस्य जनको नित्यः संभवेत्, अनित्यो वा? नित्यत्वे सर्वं ज्ञानमेकदैवोत्पादयेत् नित्यैकरूपतया तस्यैकदेव तज्जननसामर्थ्यसंभवात्, अन्यथा नित्यैकरूपताव्याघातः स्यात्। अनित्यस्य च समकालस्य भिन्नकालस्य वा तज्जनकत्वं प्रतिषिद्धम्। तथा एकरूपः, अनेकरूपो वाऽसौ स्यात्? एकरूपत्वे दूरासन्नानां स्पष्टाऽस्पष्टप्रतिभासभेदो न स्यात्। अनेकरूपत्वे परमाणुशो २५ भेदात् न कस्यचित् स्फुटतया अस्फुटतया वा स्थूलैकप्रतिभासः स्यात्।

किञ्च, असौ निराकारज्ञानग्राह्यः, साकारज्ञानग्राह्यो वा? निराकारज्ञानग्राह्यत्वे प्रतिकर्म-

---

१—र्थाया: आ—भां०। २—त्मा भा—ब०, ज०। ३ प्ररूप्येत ज०, भां०। ४ "अनिर्भासं सनिर्भासमन्यनिर्भासमेव च। विजानाति न च ज्ञानं बाह्यमर्थं कथञ्चन॥ १९९९॥" तत्त्वसं० पृ० ५५९। ५—न्यरूप—आ०। ६ ज्ञानरूपत्वे ब०, ज०, भां०।

व्यवस्थाविलोपः, तथा च 'इदं नीलस्य ग्राहकम् इदं पीतस्य' इति प्रतिनियतकर्मव्यवस्थापकाऽभावात् प्रतिनियतविषये प्रतिनियता प्रवृत्तिरपि दुर्लभा। साकारत्वे च ज्ञानस्य अर्थकल्पनावैयर्थ्यम् तत्रैव ग्राह्य-ग्राहकभावस्य परिसमाप्तत्वात्।

ननु ज्ञानगताकारस्य कादाचित्कस्य परिदृश्यमानकारणेभ्यः उपपद्यमानत्वात् कारणाभावे च कार्यसद्भावाऽनुपपत्तेः तदुपपत्तये तदाकारोऽर्थः कल्प्यते, यस्तथा ज्ञानं जनयतीति; तदप्यसाम्प्रतम्; वासनासामर्थ्यात् तथाभूतज्ञानोत्पत्तेर्नाऽतोऽर्थसद्भावसिद्धिः, अर्थाच्च तथाभूतज्ञानसंभवे स्वप्नेन्द्रजालगन्धर्वनगरादौ तदभावः स्यात्। न हि स्वप्नादौ प्रतिभासमानोऽर्थः अस्ति, यः स्वगतमाकारं विज्ञाने विदध्यात्, अतो ज्ञानाभावे गन्धर्वनगराद्याकारानुपलम्भात् तत्सद्भावे चोपलम्भात् अन्वय-व्यतिरेकाभ्यां ज्ञानस्यैवायमाकारोऽवसीयते।

किञ्च, अर्थो ज्ञानाधिरूढ़ एव अर्थतामासादयति, ज्ञानं पुनरर्थनिरपेक्षं स्वप्नादौ स्वसामर्थ्येनैव असतोऽप्यर्थान् अवभासयदर्थक्रियां निर्वर्तयति, अतो ज्ञानादभिन्नोऽर्थः।

किञ्च, द्वयोर्दर्शने 'अनेनाऽयं सदृशः' इति प्रतिपत्तिर्युक्ता, न च ज्ञानव्यतिरिक्तोऽर्थः कदाचिद् दृष्टः येन 'अर्थस्यायमाकारो न ज्ञानस्य' इत्यध्यवसायः स्यात्। ततो[1] नीलादेः परतः प्रकाशानुपपत्तेः सिद्धं स्वयं प्रकाशनियतत्वम्, तस्माच्च ज्ञानादभिन्नत्वम्। तथाहि—यत् स्वयं प्रकाशते तज्ज्ञानादनन्यत् यथा सुखादि, स्वयं प्रकाशन्ते च नीलादय इति।

सहोपलम्भनियमाच्च, यद्धि येन नियमेन सहोपलभ्यते तत् ततो न भिद्यते यथा तैमिरि-

---

१ "तस्माद् विभक्त आकारः सकलो वासनाबलात्। बहिरर्थत्वरहितस्ततोऽनालम्बना मतिः॥ अत एव सर्वे प्रत्यया अनालम्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवदिति प्रमाणपरिशुद्धिः। तथाहि इदमेव अनालम्बनत्वं यदात्माकारवेदनत्वम्।" प्रमाणवा० अलं० पृ० २२। २—नोपपत्ते—भां०, ज०। ३ "ननु नीलं कथमात्मस्वरूपं प्रकाशयति? नहि प्रकाश्या घटादयः प्रदीपादिना स्वप्रकाशकाः आत्मनि क्रिया विरुद्ध्यते नहि सैवासिधारा तयैव छिद्यते। अत्र परिहारः—प्रकाशमानस्तादात्म्यात् स्वरूपस्य प्रकाशकः। यथा प्रकाशोऽभिमतः तथा धीरात्मवेदिनी।" प्रमाणवा० पृ० १४। ४ "सकृत् संवेद्यमानस्य नियमेन धिया सह। विषयस्य ततोऽन्यत्वं केनाकारेण सिद्ध्यति॥३८६॥" "विषयस्य हि नीलादेः धियो सह सकृदेव सम्वेदनं धिया सह (?), न पृथक् ततः संवेदनादपरो विषय इति कथम्? तथाभूतमेव संवेदनमिति स्यात् विवेचयितुमशक्यम् इति प्रतिपादितम्। भेदावभासनं भवतीति चेत्—भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये।" प्रमाणवा० अलं० पृ० ९१। "यत्संवेदनमित्यादिना नीलतद्धियोरभेदसाधनाय निराकारज्ञानवादिनं प्रति प्रमाणयति—यत्संवेदनमेव स्याद्यस्य संवेदनं ध्रुवम्। तस्मादव्यतिरिक्तं तत् ततो वा न विभिद्यते॥२०३०॥ यथा नीलधियः स्वात्मा द्वितीयो वा यथोडुपः। नीलधीवेदनञ्चेदं नीलाकारस्य वेदनात्॥ २०३१॥... एतदुक्तं भवति—यस्मादपृथक् संवेदनमेव तत्तस्मादभिन्नं यथा नीलधीः स्वस्वभावात्, यथा वा तैमिरिकज्ञानप्रतिभासी द्वितीय उडुपः—चन्द्रमा, नीलधीवेदनञ्चेदम् इति पक्षधर्मोपसंहारः। धर्म्यत्र नीलाकारतद्धियौ तयोरभिन्नत्वं साध्यधर्मः यथोक्तः सहोपलम्भनियमो हेतुः। ईदृश एव आचार्यीये सहोपलम्भनियमादित्यादौ प्रयोगे हेत्वर्थोऽभिप्रेतः।" तत्त्वसं० पृ० ५६७।

कोपलभ्यमानादेकस्माच्चन्द्राद् द्वितीयश्चन्द्रः, नियतसहोपलम्भश्च ज्ञानेनार्थ इति। भेदे हि नियमेन सहोपलम्भो न दृष्टः यथा घटपटयोः, तथा च भेदः सहोपलम्भाऽनियमेन व्याप्तः, तद्विरुद्धश्च सहोपलम्भनियमो दृश्यमानः स्वविरुद्धमनियमं निवर्त्तयति, स च निवर्त्तमानः स्वव्याप्यं भेदं निवर्त्तयति, ततोऽयं हेतुः विपक्षाद्भेदात् स्वविरुद्धव्याप्तात् निवर्त्तमानो रौश्यन्ताभावाद् अभेद एवावतिष्ठते इत्यविनाभावसिद्धिः। तथा[1] यद्वेद्यते तद्धि ज्ञानादभिन्नम् यथा विज्ञानस्वरूपम्, वेद्यन्ते च नीलादय इत्यतोऽपि विज्ञानाद्वैतसिद्धिरिति।

संवेदनाद्वैतवादिमतखण्डनम्—

अत्र प्रतिविधीयते। यत्तावदुक्तम्[3]—'यदवभासते तज्ज्ञानम्' इत्यादि; तत्र अर्थानामवभासमानत्वं स्वतः, परतो वा स्यात्? स्वतश्चेत्; असिद्धम्, नहि परनिरपेक्षप्रतिभासा घटादयः कस्यचित् स्वप्नेऽपि प्रसिद्धाः, अन्यत्र महामोहाक्रान्तचेतसो योगाचारात्। परतश्चेत् विरुद्धम्, तथावभासमानत्वस्य जडत्वे सत्येव संभवात्, स्वसिद्धौ परमुखप्रेक्षित्वलक्षणत्वाज्जडत्वस्य। 'यद् येनोपलब्धिलक्षणप्राप्तेनाकारेण न प्रतिभासते न तत् तदात्मकम् यथा घटाकारेण पटः, न प्रतिभासते च ज्ञानाकारेण घटाद्यर्थः' इत्यनुमानाच्च घटादेर्जडत्वप्रसिद्धेः अनुमानबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वेन कालात्ययापदिष्टत्वम्। ननु ज्ञानाद् भिन्नस्यार्थस्य उक्तप्रकारेणाऽप्रसिद्धेः कथं परतः प्रतिभासः यतो विरुद्धत्वं हेतोः स्यात्? तदयुक्तम्; ज्ञानार्थयोर्भेदस्याध्यक्षत एव प्रसिद्धेः, प्रत्यक्षेण हि पुरोवर्तिस्फुटविकटाकारो नीलधवलादिरूपो दिक्प्रदेशविशेषनियतोऽनात्मनिष्ठोऽर्थः प्रतीयते, प्रतीयमानस्य चापह्नवे अन्तःसंवेदने कः समाश्वासः? इति सर्वापह्नव एव स्यात्, नहि विज्ञानस्य सुखादेर्वा प्रतीतेरन्यतः सत्त्वम्। न च विज्ञानरूपतया अर्थसत्त्वमिष्टमेव इत्यभिधातव्यम्; विज्ञानव्यतिरिक्तस्यैवास्य प्रतिभासमानत्वात्। तथा च, यद् यत्रोपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तत्र नास्ति यथा क्वचित्प्रदेशविशेषे घटः, नोपलभ्यते च उपलभ्यमाने घटादौ तथाभूतं ज्ञानस्वरूपमिति। न चेदमसिद्धम्; तत्स्वरूपस्यानहङ्कारास्पदाद् बाह्यार्थस्वरूपाद्विलक्षणस्य अन्तरहङ्कारास्पदस्यानुभवात्। ततश्च यो विरुद्धरूपानुभवो नासौ एकस्वरूपार्थविषयः यथा सुख-दुःखानुभवः, अस्ति च अर्थ-ज्ञानयोः परस्परपरिहारस्थितस्वरूपत्वेन विरुद्धयोः स्वरूपानुभव इति। ग्राहकस्वरूपं हि विज्ञानमन्तः ग्राह्यस्वरूपं तु नीलादिकं बहिः परिस्फुटं प्रति-

१ वाभ्यन्तराभावात् ब०, ज०। गत्यन्तराभावात् भां०। २ "तदनेन प्रबन्धेन वेद्यत्वलक्षणो हेतुः समर्थितो विज्ञानवादिनां स चैवं प्रयोगमर्हति—यद् वेद्यते येन वेदनेन तत् तस्मान्न भिद्यते यथा ज्ञानस्य आत्मा।" विधिवि० न्यायकणि० पृ० २६०। ज्ञानाद्वैतविषयकः विस्तृतः पूर्वपक्षः शाबरभाष्यस्य बृहतीपञ्जिकायां (५।१।१) द्रष्टव्यः। ३ पृ० ११७ पं० १०। ४ "क्षणिकत्वमनन्यवेद्यत्वं नानासन्तानत्वमिति स्वतः तावन्न सिद्धयति भ्रान्तेः।" अष्टश०, अष्टसह० पृ० २४१। "यत्तु संवेदनाद्वैतं पुरुषाद्वैतवन्न तत्। सिद्ध्येत् स्वतोऽन्यतो वापि प्रमाणात् स्वेष्टहानितः॥ ८५॥" आप्तपरी०। ५ अर्थस्य सत्त्व—ज०, भां०। ६—द्धस्वरूपानु—भां०।

भासते, तथापि अनयोरभेदे न किञ्चित् कुतश्चिद्विद्येत, प्रतिभासभेदं विरुद्धधर्माध्यासञ्च विहाय अन्यस्य भेदकस्याऽसंभवात्। तथा, 'यद् द्वयाकारतया प्रतिभासते तत् तत्त्वतो भिन्नम् यथा सुखदुःखे, द्वयाकारतया प्रतिभासेते च विषय-ज्ञानाकारौ' इत्यनुमानाच्चानयोर्भेदः। अभेदे वा ज्ञानरूपाग्रहणे नीलादेरप्यग्रहणप्रसङ्गः; यादृशं हि पारमार्थिकं यस्य रूपं तस्याग्रहणे तदपि न गृह्यते यथा पीतस्य पीतरूपाग्रहणे पीतम्, न गृह्यते च ज्ञानस्वरूपं नीलादेरिति। ननु प्रकाशव्यतिरिक्तस्य नीलादेरूपलम्भे स्यादेतत्, न चासौ तद्व्यतिरिक्तः कदाचिदप्युपलभ्यते; तदयुक्तम्; यतः कोऽयं प्रकाशो नाम 'अहम्' इति बुद्धिः, नीलादेर्दृश्यता वा? प्रथमपक्षे सिद्धो नीलादेस्ततो भेदः, न हि भिन्नमुपलभ्यमानमेव अभिन्नं युक्तम् सुखदुःखादेरप्यभेदापत्तेः। एतेन द्वितीयपक्षोऽपि प्रतिक्षिप्तः; दृश्यताया दर्शननिबन्धनत्वात्, अत एव दर्शनात् पूर्वमप्यस्य सत्त्वसिद्धिः।

किञ्च, अर्थाभावोऽनुपलब्धेः नान्यतः, *"एकः प्रतिषेधहेतुः"* [न्यायवि० पृ० ३६।] इत्यभिधानात्। नचोपलभ्यमानस्यैव अनुपलब्धिर्वक्तुं युक्ता, प्रतीतिविरोधात्। न च वक्तव्यम् पुरोवर्तिज्ञानाकार एवोपलभ्यते, तत्कथमर्थोपलब्धिः? यतो न ज्ञानाकारतया पुरोवर्तिन्यर्थे कस्यचित्प्रतीतिरस्ति, 'नीलमर्थमुपलभामहे' इति सामानाधिकरण्येन अर्थे प्रतीत्युत्पत्तेः। साकारता च विज्ञानस्य अग्रे निराकरिष्यते। अस्तु वाऽसौ; तथापि तत्प्रतिबिम्बित आकारः कादाचित्कत्वात् कार्यः। यत खलु कादाचित्कम् तत्कार्यं दृष्टम् यथा घटादि, कादाचित्कश्च ज्ञानस्य नीलाद्याकार इति। कार्यत्वञ्च अन्यापेक्षया व्याप्तम्, यच्चान्यत् तद्विज्ञानसामग्रीतोऽधिकम् तस्यां सत्यामपि तदनुत्पत्तेः। यस्यां सत्यामपि यन्नोत्पद्यते तत् ततोऽधिककारणजन्यम् यथा भूम्यादिकारणसामग्रीतोऽभवन्नङ्कुरः तदधिकबीजाख्यकारणजन्यः, सत्स्वपि चक्षुरादिषु नोत्पद्यते च नीलाकार इति। यत् तदधिकं तज्जनकं कारणम् सोऽर्थः।

वासनारूपं चक्षुरादिभ्योऽधिकं कारणमत्र भविष्यतीति चेत्; किम् आलम्बनत्वेन, अधिपतित्वेन, समनन्तरत्वेन वा? प्रथमपक्षे अर्थ एव नामान्तरेणोक्तः स्यात्। उत्तरपक्षद्वये तु चक्षुरादिवत् तस्याः ग्राह्याकारकारणानुपपत्तिः। यदि च बाह्यमर्थमन्तरेण रूपादिज्ञानं स्यात; तदा कथं प्रतिनियतदेश-काल-प्रमातृनिष्ठतया तत्स्यात् नियामकाऽभावतः सर्वत्र सर्वदा सर्वेषामनियमेनैव तत्प्रसङ्गात्? कथं वा तत्रैव देशे तस्यैव प्रमातुः कदाचित्तदुत्पद्येत कदाचिन्नेति? कथं वा तैमिरिकस्यैव सन्ताने खे केशपाशदर्शनं नान्येषाम्, तदुपलब्धैश्च केशादिभिः कार्यं न क्रियते नान्यैः तुल्येऽप्यर्थाभावे? स्वप्नदृष्टान्तमात्रेण अर्थाभावे देशादिनियमस्य कल्पने निरंशै-

१–नस्वरूपा–भां०। २–स्य स्वरूपं भां०। ३ चत्वारः प्रत्यया उक्ताः। हेतुप्रत्ययः, समनन्तरप्रत्ययः, आलम्बनप्रत्ययः, अधिपतिप्रत्ययश्च। अभिधर्म को० २।६१। ४ कदाचिदुत्प–भां०। ५ "देशादिनियमः सिद्धः स्वप्नवत् प्रेतवत् पुनः। सन्तानानियमः सर्वैः पूयनद्यादिदर्शने ॥ ३ ॥ स्वप्नोपघातवत् कृत्यक्रिया नरकवत् पुनः। सर्वं नरकपालादिदर्शने तैश्च बाधने ॥ ४ ॥" विंश० विज्ञप्तिमा०।

कपरमब्रह्मसिद्धिप्रसङ्गः, जलचन्द्रवत् तस्यैव भेदेन प्रतिभाससंभवात्। यथा च अनादिवासनासामर्थ्यप्रतिनियमात् एवंविधो विज्ञानाद्वैते भेदप्रतिभासप्रपञ्चः, तथा नित्यनिरंशैकरूपे ब्रह्मण्यपि अनाद्यविद्यासामर्थ्यप्रतिनियमात्।

किञ्च, भ्रान्तिः सर्वत्र साधर्म्यदर्शनाज्जायते, यथा अनुदकरूपासु मरीचिकासु उदकभ्रान्तिः, न च विज्ञप्तिमात्रवादिनः नचित् (केनचित्) साधर्म्यदर्शनमस्ति यद् भेदभ्रान्तेर्निमित्तं स्यात्। ननु स्वापादौ अर्थाभावे साधर्म्यदर्शनाभावे च भेदभ्रान्तिरुपलभ्यते ततोऽयमदोषः; तदसत्; तत्रापि पारम्पर्येण बाह्यार्थोपयोगात्, न ह्यननुभूतेऽर्थे स्वप्नः कदाचित् क्वचिदप्युदेति, अतोऽनुभूतार्थसापेक्षजन्मत्वात् स्वप्नस्य कथमर्थाभावे संभवः ? नन्वननुभूतेऽपि स्वशिरश्छेदादौ ज्ञानमुपजायते; तन्न; तत्रापि परशिरश्छेदो दृष्टः, स्वशरीरञ्चानुभूतम्, तत्र मनोदोषवशाद् विवेकमपश्यन् आत्मशरीरे शिरश्छेदमभिमन्यते, अतस्तत्रापि अनुभूतोऽर्थ एव कारणम्। नहि अननुभूतपरशिरश्छेदस्य तदपि ज्ञानमुपजायते। गन्धर्वनगरप्रत्ययेऽपि परमार्थसन्तो बाह्यार्था जलधराः कुतश्चिदन्याकारतयाऽवभासन्ते। कथञ्च बाह्यार्थापह्नवे जातिनैयत्यसिद्धिः ? ज्ञानमात्रे हि जगति नियामकाभावात् मनुष्योऽश्वः, अश्वोऽपि मनुष्यः, हस्त्यपि पिपीलिका, पिपीलिकापि हस्ती स्यात्। बाह्यार्थाभ्युपगमे तु तन्नैयत्यं सुघटमेव; येन हि मनुष्यत्वजात्युपभोग्यसुखदुःखादिनिमित्तं कर्म समाचरितं स तत्परिपाकवशात्तामेव जातिं प्रतिपद्यते, एवमन्येऽपि प्राणिनः स्वोपार्जितसाधारणकर्मबलात् तास्ताः जातीः प्रतिपद्यन्ते।

किञ्च, अर्थस्याऽसत्त्वम् इच्छामात्रेण, साधकप्रमाणाभावात्, संवादासत्त्वात्, अर्थक्रियाकारित्वाऽभावात्, बाधकप्रमाणसद्भावाद्वा ? यदीच्छामात्रेण तदाऽतिप्रसङ्गः, तदद्वैतादेरपि अतोऽसत्त्वानुषङ्गात्। नापि साधकप्रमाणाभावात्; प्रत्यक्षस्यैव अनात्मभूताऽबाधितार्थक्रियाप्रसाधकोदकाद्यर्थसंसाधकस्य सद्भावात्। संवादासत्त्वमपि असिद्धम्; प्रत्यक्षप्रतिपन्ने जलादौ अनुमानादेः संवादकस्य संभवात्। अर्थक्रियाकारित्वाभावोऽपि अनुपपन्नः; बाह्याऽऽध्यात्मिकार्थक्रियायाः तन्निबन्धनत्वात्। बाधकञ्चार्थस्य न किञ्चित्प्रमाणमुपलभ्यते।

यच्चात्र बाधकमुक्तम्–'परतः सम्बद्धात्, असम्बद्धाद्वा' इत्यादि; तत्र सम्बद्धादेव ज्ञानार्थस्य प्रतिभासः, सम्बन्धश्च योग्यतालक्षणः, न तादात्म्य-तदुत्पत्तिलक्षणः तस्य क्षणक्षयादिना चक्षुरादिना चाऽनेकान्तात्। योग्यस्य चार्थस्य समकालस्य भिन्नकालस्य वा ग्रहणमविरुद्धम्।

---

१ आदर्शे ब०, ज०, प्रतौ च त्रुटितमेतत्स्थलम्, भां० प्रतौ तु 'नचित्' इति पाठः। २ कदाचिदप्युदे–भां०। ३ "न चार्थाभावः प्रत्यक्षाधिगम्यः बाह्यार्थप्रकाशकत्वेनैवास्योत्पत्तेः। प्रमेयक० पृ० २१ पू०। सन्मति० टी० पृ० ३४९। ४ "अयं वक्ति, चलतीत्यादिरूपा बाह्या, अहं सुखी दुःखीत्यादिस्वरूपा आध्यात्मिका अर्थक्रिया।" ५ पृ०११७ पं० ११। ६ "सम्बन्धो हि योग्यतास्वभाव एव ज्ञानार्थयोः ग्राह्यग्राहकभावाङ्गं न तु तादात्म्यादिः।" स्या० रत्ना० पृ० १६३। ७ क्षणक्षयस्य ज्ञानेन तादात्म्येऽपि ज्ञानस्य प्रतिभासो न क्षणक्षयस्य, चक्षुरादेर्ज्ञानमुत्पद्यते न च ज्ञानात् तत्प्रतिभासः। स्या० रत्ना० पृ०...

ननु तथाभूतस्यार्थस्य यावज्ज्ञानं ग्राहकं तावदर्थोऽपि ज्ञानस्य ग्राहकः कुतो न स्यादिति चेत्? स्वभावभेदात्। न खलु य एवैकस्य स्वभावः स एवान्यस्यापि, अन्यथा प्रदीपवत् घटस्यापि प्रकाशकत्वप्रसङ्गः, तथा प्रतीतिः अन्यत्रापि समाना। नहि अर्थस्य ज्ञानवत् ग्राहकत्वेन प्रतीतिरस्ति। 'नीलाद्याकाराणां वा यावद् बुद्धिर्व्यापिका तावन्नीलादयः किन्नास्या व्यापकाः, नियतानाञ्चैषां यावदसौ व्यापिका तावत् सर्वेषां किन्न व्यापिका?' इति चोद्ये भवतोऽपि नातः स्वभावभेदप्रतीतेः अन्यदुत्तरम्।

यदप्यभिहितम्–'अर्थो नित्योऽनित्यो वा एकरूपोऽनेकरूपो वा' इत्यादि; तदपि अखिलार्थानामनेकान्ताभ्युपगमान्निरस्तम्, नहि सर्वथा नित्योऽनित्यो वा एकरूपोऽनेकरूपो वा बहिरन्तर्वाऽर्थोऽस्ति इत्यनेकान्तसिद्धौ प्ररूपयिष्यते।

यदप्युक्तम्–'अर्थो ज्ञानाधिरूढ एवार्थतामासादयति' इत्यादि; तत्र कोऽधिरूढार्थः–व्यवस्थितिः, अपेक्षा वा? न तावद्व्यवस्थितिः; तस्य ज्ञानाऽनात्मभूतस्य स्वपराप्रकाशकस्य आत्मप्रकाशे परमुखप्रेक्षकस्य जडव्यवहारविषयस्य अध्यक्षादितो बहिर्व्यवस्थितत्वप्रतीतेः, अन्यथा जाड्यव्यवहारेण बहिश्छिदादिक्रिया न स्यात्। द्वितीयपक्षे तु ज्ञानार्थयोर्भेद एव स्यात्, अपेक्षायाः स्वामि-भृत्यवत् भेदे सत्येव संभवात्। 'ज्ञानापेक्षाऽर्थस्य सिद्धिः' इत्येतावता अर्थस्य ज्ञानात्मकत्वे कार्यस्यापि कारणात्मकत्वप्रसङ्गात् कारणाद्वैतमप्यनुषज्येत, न हि कारणनिरपेक्षा कार्यस्य सिद्धिरिति। यच्चान्यदुक्तम्–'यत् स्वयं प्रकाशते तज्ज्ञानादनन्यत्' इत्यादि; तदपि श्रद्धामात्रम्; स्वयं प्रकाशमानत्वस्य अर्थे प्रागेव प्रतिषेधात्।

यच्चोक्तम्–'सहोपलम्भनियमात्' इत्यादि; तदप्युक्तिमात्रम्; अनैकान्तिकत्वात्, भिन्ना-

---

१ पृ० ११७ पं० २१। २ "तथाहि–न तावत् पृथिव्यादिबाह्योऽर्थः अस्य ग्राह्यो विद्यते तस्य एकानेकस्वभावशून्यत्वात्"। भासमानः किमात्माऽयं बाह्योऽर्थः प्रतिभासते। परमाणुस्वभावः किं किं वावयविलक्षणः ॥१९६७॥" तत्त्वसं० पृ० ५५०। ३ पृ० ११८ पं० १०। ४ अपेक्षायाः प्रागेव प्रतिषेधात् भां०। ५–स्यापि सि–भां०। ६ पृ० ११८ पं० १४। ७ पृ० ११८ पं० १६। ८ "स्यादेतत्–यद्यपि विपक्षे सत्त्वं न निश्चितं सन्दिग्धं तु ततश्चानैकान्तो हेतुः सन्दिग्धविपक्षव्यावृत्तिकत्वात्।" तत्त्वसं० पं० पृ० ५६९। "यश्च सहोपलम्भनियम उक्तः सोऽपि विकल्पं न सहते। यदि ज्ञानार्थयोः साहित्येन उपलम्भः ततो विरुद्धो हेतुः नाभेदं साधयितुमर्हति साहित्यस्य तद्विरुद्धभेदव्याप्तत्वात् अभेदे तदनुपपत्तेः। अथ एकोपलम्भनियमः; न; एकत्वस्य अवाचकः सहशब्दः। अपि च किमेकत्वेन उपलम्भः आहो एक उपलम्भः ज्ञानार्थयोः। न तावदेकत्वेन उपलम्भ इत्याह–बहिरूपलब्धेश्च विषयस्य। अथ एकोपलम्भनियमः तत्राह–अत एव सहोपलम्भनियमोऽपि प्रत्ययविषययोः उपायोपेयभावहेतुको नाभेदहेतुक इत्यवगन्तव्यम्।" शां० भा०, भामती २।२।२८। "इदमत्राऽऽकूतम्–सहोपलम्भनियमश्च वेद्यत्वञ्च हेतू सन्दिग्धव्यतिरेकतया अनैकान्तिकौ·····विस्तरतस्तु न्यायकणिकायाम् (पृ० २६४) अनुसरणीय इति।" योगसू० तत्त्ववैशा० ४।१४। "सहोपलम्भनियमान्नाभेदो नीलतद्धियोः। विरुद्धाऽ-

स्वपि हि कृत्तिकासु सहोपलम्भनियमो वर्तते । विरुद्धत्वश्च भेदेनैव सहोपलम्भस्य व्याप्तत्वात्, सहशब्दो हि भेदाधिष्ठानः, अभेदे सहशब्दार्थानुपपत्तेः, न हि स एव तेनैव 'सह' इति व्यपदेशमर्हति । व्याप्तिशून्यत्वश्चास्य; तथाहि–हेतोर्विपक्षे बाधकप्रमाणसद्भावाद् व्याप्तिरवसेया, अभेदस्य च भेदो विपक्षः, ततो नियतसहोपलम्भस्य व्यावृत्तौ दर्शितायां गत्यन्तराभावाद् अभेदेनैव व्याप्तिः सिद्ध्येत्, न चायं भेदाद् व्यावृत्तः, भिन्नास्वपि हि कृत्तिकासु नियतसहोपलम्भस्य दृष्टत्वात् । कालात्ययापदिष्टश्चायम्; संवित्-संवेद्य-संवेदकानां परस्परविविक्तस्वरूपाणामबाधितप्रत्यक्षेण प्रतीयमानत्वात् । न च एतेनैव बाध्यमानत्वाद् अबाधितत्वमसिद्धम्; प्रत्यक्षविरोधे एतस्यानुमानस्य आत्मलाभस्यैवाऽसंभवात्, लब्धात्मलाभश्च साधकं बाधकं वा तत्स्यात् ।

सहोपलम्भशब्देन च किमत्राभिप्रेतम्–किमर्थद्वये उपलम्भद्वयस्य सहभावः, एकस्मिन्नेवोपलम्भे अर्थद्वयस्य युगपत्प्रतिभासित्वं वा ? प्रथमपक्षे असिद्धो हेतुः प्रतिविषयं ज्ञानभेदाऽसंभवात् । साधनविकलश्च दृष्टान्तः; न हि द्विचन्द्रप्रतिभासे प्रतिभासद्वयसाहित्यमस्ति, एकस्यैव ज्ञानस्य उभयाकारोल्लेखितयाऽध्यक्षतोऽध्यवसायात् । द्वितीयपक्षे तु विरुद्धत्वम्, एकत्रोपलम्भे सहार्थद्वयप्रतिभासत्वस्य भेदे सत्येव संभवात् । अथ 'यदेकस्मिन्नेव संवेदने स्फुरति तत् संवेदनादभिन्नम् यथा संवेदनस्वरूपम्, स्फुरन्ति च तत्रैव संवेदने नीलादयो भावाः' इत्यतोऽनुमानाद् भेदे प्रतिभास्यत्वाऽसंभवान्नास्य विरुद्धत्वम्; तन्न; संवित्-संवेद्ययोर्भेदस्य प्रत्यक्षादिप्रसिद्धत्वेन प्रतिपादितत्वात् । किञ्च, संवेदनस्य स्वपरावभासस्वभावत्वात् परस्य चाऽभावे तत्स्वभावसंवेदनस्वरूपस्यासंभवेन संवेदनस्याप्यसंभवात् कस्य केनाऽभेदः ?

यच्चोक्तम्–'यद्वेद्यते तद्विज्ञानादभिन्नम्' इत्यादि; तत्र किमिदं वेद्यत्वम्–वेदनकर्मत्वम्, तत्सम्बन्धित्वमात्रम्, तत्स्वभावत्वं वा ? यदि वेदनकर्मत्वम्; तदा विरुद्धो हेतुः कर्मत्वस्य भेदेनैव व्याप्तत्वात्, न हि छिदिक्रियायाः कर्मभूतानि काष्ठानि अभिन्नान्युपलभ्यन्ते, अतः क्रिया-कारकयोर्भेदे सत्येवोपलब्धेः भेदेनैव कर्म-क्रियाभावस्य व्याप्तत्वात् अभेदविपरीतार्थसाधनत्वाद् अभेदे

सिद्धसन्दिग्धव्यतिरेकानन्वयत्वतः ॥८४॥" न्यायवि० पृ० १९२ पू० । अष्टश०, अष्टसह० पृ० २४२ । प्रमेयक० पृ० २१ । सन्मति० टी० पृ० ३५२ । "कृत्तिकाभिश्च व्यभिचारः प्रकृतहेतौ, तथाहि–तासु युगपदुपलम्भनियमोऽस्ति न चाभेदः, तद्भेदस्य सर्वाविसंवादेन प्रसिद्धत्वात् ।" स्या० रत्ना० पृ० १५७ ।

१ "तत्र भदन्तशुभगुप्तस्त्वाह–विरुद्धोऽयं हेतुर्यस्मात् "सहशब्दश्च लोकेऽन्यो (स्या) न्वैवाने (न्ये) न विना क्वचित् । विरुद्धोऽयं ततो हेतुर्यद्यस्ति सहवेदनम् ।" इति । पुनः स एवाह–यदि सहशब्द एकार्थः तदा हेतुरसिद्धः । तथाहि–नटचन्द्रमल्लप्रेक्षासु न ह्येकेनैवोपलम्भो नीलादेः ।" तत्त्वसं० पं० पृ० ५६७ । २ राश्यन्तराभावाद् ब०, ज०, आ० । ३ सद्भावः आ० । ४–यं विज्ञान– भां०, ज० । ५ नहि चन्द्र–आ० । ६ स्युरिति ब०, ज० । ७ पृ० ११९ पं० ५ । ८ "तथा किं यद् वेद्यते इति कर्मणि प्रयोगात् वेदनकर्तृकविदिक्रियारूपं वेदनकर्मत्वं वेद्यत्वं हेतुरिष्यते, किं वा यद्वेद्यते इति यच्छब्दस्य वेदनक्रियया सामानाधिकरण्ये भावनिर्देशात् विदिक्रियारूपवेदनस्वभावत्वम् ?" स्या० रत्ना० पृ० १६७ । ९–तुस्तस्य भां० ।

साध्ये विरुद्धो हेतुः । अभेदे चानयोः किं संवेदनादर्थस्याऽभेदः, अर्थाद्वा संवेदनस्य ? प्रथमविकल्पे संवेदनमेव स्यात् नार्थः तस्य तत्रैवानुप्रविष्टत्वात्, तथा च 'संवेद्यत्वात्' इत्यसिद्धो हेतुः । द्वितीयविकल्पे तु अर्थ एव न संवेदनम्, इति कुतोऽस्य अभेदः साध्येत ? भेदस्यानयोः प्रत्यक्षप्रतिपन्नत्वात् कालात्ययापदिष्टत्वञ्च । संवित्स्वरूपस्य चाऽभिन्नत्वेन अकर्मकत्वे साधनविकलो दृष्टान्तः । अथ संवित्सम्बन्धित्वमात्रं वेद्यत्वम्; तथापि विरुद्धत्वम् सम्बन्धित्वस्य भेदे सत्येव संभवात्, भेदाश्रयो हि सम्बन्धः तदभावे तस्याप्यभावात् संवित्सम्बन्धित्वस्यासिद्धिः इत्यसिद्धत्वञ्च । अथ वेद्यत्वं संवित्स्वभावत्वं विवक्षितम्, तदसिद्धमेव अर्थस्याऽसंवित्स्वभावत्वसमर्थनात् । ततो निर्बाधबोधाद् वस्तुव्यवस्थामभ्युपगच्छता तत्संवेदनमिव असंवेदनस्वभावो बाह्यार्थो नीलसिताद्यनेकाकारः प्रतिपत्तव्यः ।

चित्राद्वैतवादिनो बौद्धैकदेशिनः पूर्वपक्षः—

ननु ज्ञानमेवेदं चित्रं नीलसुखाद्यनेकाकारखचितमाभासते न पुनर्बाह्योऽर्थः तत्सद्भावे प्रमाणाऽभावात्, यस्य सद्भावे प्रमाणं नास्ति तन्नास्ति यथा खरविषाणम्, नास्ति च बाह्यार्थसद्भावे किञ्चित्प्रमाणमिति । न चेदमसिद्धम्; तथाहि—तत्सद्भावावेदकं निराकारम्, साकारं वा प्रमाणं स्यात् ? न तावन्निराकारम्; तस्य सर्वत्राऽविशेषतः प्रतिकर्मव्यवस्थानिबन्धनत्वानुपपत्तेः । साकारत्वे तु सिद्धं ज्ञानमेव नीलाद्यनेकाकाराक्रान्तं चित्रमेकम्, न पुनः तद्व्यतिरिक्तो जडोऽर्थः तद्व्यवस्थाहेतोः कस्यचिदप्यभावात् । नचाकारविशिष्टं ज्ञानमेव तद्व्यवस्थाहेतुः; तस्य स्वाकारानुभवमात्रेणैव चरितार्थत्वात् । तदुक्तम्—

"धियोऽनीलादिरूपत्वे बाह्योऽर्थः किंनिबन्धनः ।
धियो नीलादिरूपत्वे बाह्योऽर्थः किंनिबन्धनः ॥" [प्रमाणवा० ३।४३३] इति ।

१–त्वसंभवात् आ० । २ नीलपीताद्यनेका– भां० । अस्य च विज्ञानाद्वैतवादस्य विविधरीत्या पर्यालोचनं निम्नग्रन्थेषु द्रष्टव्यम्–अभिसमयालंकारालोक पृ० ३७४ । शाबरभा०, बृहती, पञ्जिका, शास्त्रदी० सू० १।५ । मीमांसाश्लो० निरालम्बनवाद । ब्र० सू० शांकरभा०, भामती २।२।२८। बृहदारण्यकभा० वा० ४।३, पृ० १४५८ । योगसू० व्यासभा०, तत्त्ववै० ४।१४। वि० प्रमेयसं० पृ० ७५ । विधिवि० न्यायकणिका पृ० २५४ । न्यायमं० पृ० ५३६ । आप्तमी०, अष्टश० अष्टसह० पृ० २४२ । युक्त्यनु० पृ० ४५ । न्यायवि० टी० पृ० १२६ । तत्त्वार्थश्लो० पृ० ३६ । आप्तपरी० पृ० ४५ । प्रमेयक० पृ० २० उ० । शास्त्रवा० श्लो० ३७५–४१३ । सन्मति० टी० पृ० ३४९ । स्या० रत्ना० पृ० १४९ । स्या० मं० का० १६ । ३ "तरङ्गा हयुदधेर्यद्वत् पवनप्रत्ययोदिताः । नृत्यमानाः प्रवर्त्तन्ते व्युच्छेदश्च न विद्यते ॥५६॥ आलयौघस्तथा नित्यं विषयपवनेरितः । चित्रैस्तरङ्गविज्ञानैः नृत्यमानः प्रवर्त्तते ॥५७॥" लंकावतार पृ० २७१ । ४ धियो नीलादिरूपत्वे बाह्योऽर्थः किं प्रमाणकः । धियोऽनीलादिरूपत्वे स तस्यानुभवः कथम् ॥" प्रमाणवा० । "यदि संवेदनमेव नीलाकारमात्मप्रकाशकं बाह्योऽर्थः किं प्रमाणमादाय विदितो भवेत् । नहि तत्र प्रत्यक्षं तस्य स्वसंवेदनमात्र एव पर्यवसानात् । न च ततः परं नीलमाभासते

किञ्च, प्रमेयात् पूर्वकालभाविज्ञानं तद्व्यवस्थापकं स्यात्, उत्तरकालभावि वा ? प्रथमपक्षे कथमस्येन्द्रियार्थसन्निकर्षप्रभवता प्रमेयमन्तरेणैवोत्पद्यमानत्वात् ? यत्प्रमेयमन्तरेणैवोत्पद्यते न तदिन्द्रियार्थसन्निकर्षजम् यथा खपुष्पविज्ञानम्, प्रमेयमन्तरेणैवोत्पद्यते च प्रमेयात् पूर्वकालभावि तद्व्यवस्थापकत्वेनाभिमतं ज्ञानमिति । द्वितीयपक्षे तु प्रमाणात् पूर्वकालवृत्तित्वं प्रमेयस्य कुतश्चित् प्रतिपन्नम्, न वा ? यदि न प्रतिपन्नम्; कथं सद्व्यवहारविषयः ? यत् कुतश्चिन्न प्रतिपन्नम् न तत् सद्व्यवहारविषयः यथा गगनेन्दीवरम्, कुतश्चिदप्रतिपन्नश्च प्रमाणात्पूर्वकालवृत्तित्वं प्रमेयस्येति । अथ प्रतिपन्नम्; किं स्वतः, परतो वा ? यदि स्वतः; कथमस्य ज्ञानाद्भेदः तस्यैव स्वतोऽवभासलक्षणत्वात् ? यत् स्वतः प्रसिद्धम् न तज्ज्ञानाद्भिद्यते यथा ज्ञानस्वरूपम्, स्वतः प्रसिद्धश्च ज्ञानात्पूर्वं प्रवर्तमानं प्रमेयत्वेनाभिमतं वस्त्विति । अथ परतः; तन्न; प्रमाणाद् व्यतिरिक्तस्य प्रमेयव्यवस्थाहेतोः परस्याऽसंभवात्। अथ प्रमाणमेव तस्य तद्वृत्तित्वं प्रकाशयति ; तन्न ; तस्य स्वयं तत्कालेऽसतः तत्प्रकाशकत्वाऽयोगात्, यद् यत्काले नास्ति न तत्तस्य प्रकाशकम् यथा स्वोत्पादात्पूर्वकालवृत्तिपदार्थकालेऽसन् प्रदीपो न तत्प्रकाशकः, नास्ति च पूर्वकालविशिष्टस्य प्रमेयस्य काले ज्ञानमिति ।

समकालत्वे तु ज्ञानज्ञेययोः सव्येतरगोविषाणवत् ग्राह्यग्राहकभावाभावः, न च ज्ञाने नीलाद्याकारानुरागप्रतीत्यन्यथानुपपत्त्या तदनुरञ्जको बहिरर्थोऽस्तीत्यभिधातव्यम् ; स्वप्नावस्थायां तदभावेऽपि तदनुरागप्रतीतेः, न हि तदशाभाविनि करितुरगादिप्रत्ययेऽनुरञ्जको बहिरर्थोऽस्ति, स्वप्नेतरप्रत्ययानामविशेषप्रसङ्गात् । अतो बुद्धिरेवार्थनिरपेक्षा स्वसामग्रीतो विचित्राकारच्छायाछुरिता यथाऽत्रोत्पद्यते तथाऽन्यत्रापि । ननु एवमपि एकस्या बुद्धेः विचित्राकाररूपतया प्रतिभासमानायाः कथमेकत्वं युक्तम् ? इत्यप्यचोद्यम् ; अशक्यविवेचनत्वतः तस्यास्तदविरोधात् । उक्तञ्च —

"नीलादिश्चित्रविज्ञान-ज्ञानोपाधिरनन्यभाक् ।
अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥" [प्रमाणवा० ३।२२०]

नीलाकारद्वयाप्रवेदनात् । अथ तदर्थस्य रूपं तदा संवेदनमन्येन रूपेण विदितमविदितं वा भवेत् । यद्यविदितं स तस्यानुभवः कथं स्वरूपेणाज्ञातम् अस्य संवेदनमिति कथं संगच्छते विदितञ्चेत् तथापि···।" प्रमाणवार्तिकालं० । "धियोऽसितादिरूपत्वे सा तस्यानुभवः कथम् । धियः सितादिरूपत्वे बाह्योऽर्थः किं प्रमाणकः ॥ २०५१ ॥" तत्त्वसं० । उद्धृतञ्चैतत्–प्रमेयक० पृ० २२ उ० । स्या० रत्ना० पृ० १६३ । 'तथाचाहुः कीर्तिपादाः' इति कृत्वा अद्वयवज्रसंग्रह तत्त्वरत्नावली पृ० १८ ।

१–हकभावः आ० । २–र्थोस्ति आ० । ३–विज्ञानो ब०, ज० । 'विज्ञाने' स्या० रत्ना० पृ० १७३ । प्रमाणवा० । ४–नस्थं हि प्रमाणवा० । ५ विवेचयेत् ब०, ज० । "अत्र देवेन्द्रव्याख्या–चित्रज्ञाने हि यो नीलादिः प्रत्यवभासते ज्ञानोपाधिः ज्ञानविशेषणः अनुभवस्वात्मभूत इति यावत्, स एव एकोऽनन्यभाक् तज्ज्ञानस्वभावत्वात् अन्यमर्थं ज्ञानवदेव न भजते, तादृशश्च सन्नसौ तच्चित्रदर्शनप्रतिभासी

चित्रप्रतिभासाप्येकैव बुद्धिः बाह्यचित्रविलक्षणत्वात्, शक्यविवेचनं हि बाह्यं चित्रम् अशक्यविवेचनास्तु बुद्धेर्नीलादय आकारा इति। ननु चित्रपट्यादौ चित्ररूपता प्रतीयते तस्याः कुतो ज्ञानधर्मतेति चेत्? अर्थधर्मत्वानुपपत्तेः। तथाहि–चित्रपट्यादिकमेकमवयविरूपं निरंशं वस्तु स्यात्, तद्विपरीतं वा? प्रथमपक्षे नीलभागे गृह्यमाणे पीतादिभागानामग्रहणं न स्यात्, तेषां ततो भेदप्रसङ्गात्, यस्मिन् गृह्यमाणे यन्न गृह्यते तत् ततो भिन्नं यथा सह्ये गृह्यमाणे विन्ध्यः, गृह्यमाणे नीलभागे न गृह्यते च पीतभागादिकमिति। तथा च अवयविनोऽप्येकरूपतानुपपत्तिः विरुद्धधर्माध्यासात्, यस्य विरुद्धधर्माध्यासो न तस्यैकरूपता यथा जलाऽनलादेः, ग्रहणाऽग्रहणलक्षणविरुद्धधर्माध्यासश्च अवयविनः इति। नीलभागस्य पीतादिभागात्मकत्वाद्वा पीताद्यग्रहे तस्याप्यग्रहणमेव स्यात्। यद् यदात्मकम् तस्याऽग्रहे तदपि न गृह्यते यथा पीतादेरग्रहे न तत्स्वरूपम्, पीताद्यात्मकश्च नीलमिति। तद्विपरीतत्वे तु चित्रपट्यादेः सिद्धः स्वयमेव चित्रतायाः विभिन्नाश्रयवृत्तिनील-पीतादिवत्। तन्नार्थधर्मश्चित्रता किन्तु ज्ञानधर्मः, स्वकारणकलापाद् विज्ञानमुपजायमानम् अनेकाकारखचितमेवोपजायते अनुभूयते च। अतः तथाभूतं ज्ञानमेव एकं तत्त्वम्, इति चित्राद्वैतसिद्धिः।

अथ अचेतनस्य सुखादेर्ज्ञानस्वरूपताविरहात् कथं चित्रप्रतिभासं ज्ञानमेवैकं तत्त्वं स्यात् यतश्चित्राद्वैतं सिद्ध्येत इत्युच्यते; तदप्युक्तिमात्रम्; यतः सुखादेरपि ज्ञानाऽभिन्नहेतुजत्वेन ज्ञानात्मकत्वोपपत्तेः। तथाहि–ज्ञानात्मकाः सुखादयः ज्ञानाभिन्नहेतुजत्वात् ज्ञानान्तरवत्। तदुक्तम्—

"*तदेतद्रूपिणो भावाः तदतद्रूपहेतुजाः।*
तत्सुखादि किमज्ञानं विज्ञानाऽभिन्नहेतुजम्॥" [प्रमाणवा० ३।२५१] इति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[2]–'साकारं निराकारं वा ज्ञानं बहिरर्थसद्भावे प्रमाणं स्यात्' इत्यादि, तत्र[3] निराकारमेव ज्ञानं तत्सद्भावे प्रमाणम् साकारपक्षस्य निराकरिष्यमाणत्वात्। न च निराकारसंवेदनस्य सर्वत्राऽविशेषात् प्रतिकर्मव्यवस्थाहेतुत्वाभावः; योग्यतातो निराकारत्वेऽपि तद्धेतुत्वस्य समर्थयिष्यमाणत्वात्।

चित्राद्वैतवादिमतखण्डनम्–

तदन्यपीतादिप्रतिभासविवेकेन न केवलः शक्यते द्रष्टुं तस्मिन् प्रतिभासमाने सर्वेषामेव तज्ज्ञानतया तदन्येषामपि नियोगतः प्रतिभासनात्। तस्माद् यदैवैकं नीलादिकमाकारं तदन्येभ्यः पीतादिभ्यो 'अयं नीलः' इति ज्ञानान्तरेण विवेचयति प्रमाता, तदैव तथा विवेचयन्नसौ न तज्ज्ञानमामृशति अतद्रूपत्वात्तस्य, किं तर्हि? अर्थे पतति, अर्थ एव तज्ज्ञानं प्रवृत्तं भवतीत्यर्थः। तस्मादेकस्मिन्नप्याकारे प्रतिभासमाने 'सर्वमाभाति, न वा किंचिदपि' इति अशक्यो विवेकतो दर्शने नीलादिप्रतिभास इति।" स्या० रत्ना० पृ० १७३। उद्धृतश्चैतत्–सि० वि० टी० ५४ उ०। शास्त्रवा० टी० पृ० १८२ पू०।

१ उद्धृतश्चैतत्–अभिसमयालंकारालोक पृ० ४४२। हेतुबिन्दुटी० पृ० ९७। तत्त्वोपप्लव० पृ० ५८। अष्टसह० पृ० ७८। जैनतर्कवा० पृ० १५। मीमांसाश्लो० काशिका पृ० २३९। स्या० रत्ना० पृ० १७४। न्यायमं० पृ० ७४। व्योमवती पृ० ६२७। २ पृ० १२४ पं० १३। ३ "साकारवादप्रतिक्षेपेण निरा-

यदप्युक्तम्[1]–'प्रमेयात् पूर्वकालभावि प्रमाणम्' इत्यादि; तदप्यसमीक्षिताभिधानम्; प्रकाशैकस्य पूर्वापरसहभावनियमाऽभावात्। तथाहि–क्वचित् पूर्वं विद्यमानः पश्चाद्भाविनां प्रकाशको भवति, यथा आदित्यः समुत्पद्यमानानाम्। क्वचिच्च पूर्वं सतां प्रकाश्यानां पश्चाद्भवन् प्रकाशकः यथा प्रदीपः अपवरकान्तर्वर्त्तिघटादीनाम्। क्वचित्तु सहभाविनां प्रकाशकः, यथा कृतकत्वादिः अनित्यत्वादीनाम्। अतः प्रमाणं पूर्वापरसहभावनियमनिरपेक्षं वस्तु प्रकाशयति, प्रकाशकत्वात्, आदित्यादिवत्।

यच्चान्यदुक्तम्[3]–'स्वप्नावस्थायां बहिरर्थाभावेऽपि नीलाद्यनुरागः प्रतीयते' इत्यादि; तदप्युक्तिमात्रम्; स्वप्नज्ञाने अनन्तरमेव माध्यमिकमतविचारावसरे बाह्यार्थविषयत्वस्य प्रसाधयिष्यमाणत्वात्।

यदप्युक्तम्[4]–'चित्राकारतया प्रतिभासमानस्यापि ज्ञानस्य अशक्यविवेचनत्वादेकत्वम्' इति; तत्र किमिदम् अशक्यविवेचनत्वं नाम–ज्ञानाऽभिन्नत्वम्[5], सहोत्पन्नानां नीलादीनां ज्ञानान्तरपरिहारेण तज्ज्ञानेनैवाऽनुभवः, भेदेन विवेचनाऽभावमात्रं वा ? प्रथमपक्षे साध्यसमो हेतुः, यदुक्तं भवति ज्ञानादभिन्ना नीलादयः ततोऽभिन्नत्वात्, तदेवोक्तं भवति 'अशक्यविवेचनत्वात्' इति। द्वितीयपक्षे तु अनैकान्तिकत्वम्[6], सचराचरस्य जगतः सुगतज्ञानेन सहोत्पन्नस्य ज्ञानान्तरपरिहारेण तज्ज्ञानेनैव ग्राह्यस्य तेन सहैकत्वाऽभावात्। एकत्वे वा सुगतस्य संसारित्वम्, संसारिणां वा सुगतत्वं स्यात्, संसारेतररूपता चैकस्य ब्रह्मवादं समर्थयते। ज्ञानान्तरपरिहारेण तज्ज्ञानेनैवानुभवश्च असिद्धः, नीलादीनां ज्ञानान्तरेणाप्यनुभवात्। ज्ञानरूपत्वात्तेषां तत्सिद्धौ च अन्योन्याश्रयः–ज्ञानरूपत्वसिद्धौ हि तेषां ज्ञानान्तरपरिहारेण तज्ज्ञानेनैवाऽनुभवसिद्धिः, तत्सिद्धौ च ज्ञानरूपत्वसिद्धिरिति। भेदेन विवेचनाऽभावमात्रमप्यसिद्धम्; बहिरन्तर्देशसम्बन्धित्वेन नील-तज्ज्ञानयोर्विवेचनप्रसिद्धेः। न चेत्थं विवेच्यमानयोरप्यनयोः विवेचनापह्नवो युक्तः; सर्वापह्नवप्रसङ्गतः सकलशून्यतानुषङ्गात्।

कारादेव प्रत्ययात् प्रतिकर्मव्यवस्थोपपत्तेः प्रतिपादयिष्यमाणत्वात्।" प्रमेयक० पृ० २३ पू०। "निराकारत्वे कुतो विषयनियम इति चेत्; स्वहेतुप्रयुक्तादेव शक्तिनियमादिति ब्रूमः। न्यायवि० टी० पृ० १२७ पू०।

१ पृ० १२५ पं० १। २ "उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावाऽनियमाद् यथादर्शनं विभागवचनम्। क्वचिदुपलब्धिहेतुः पूर्वं पश्चाद् उपलब्धिविषयो यथा आदित्यस्य प्रकाशः उत्पद्यमानानाम्। क्वचित् पूर्वमुपलब्धिविषयः पश्चादुपलब्धिहेतुः यथा अवस्थितानां प्रदीपः। क्वचिदुपलब्धिहेतुरुपलब्धिविषयश्च सह भवतो यथा धूमेन अग्नेर्ग्रहणमिति। न्यायभा० २।१।११। स्या० रत्ना० पृ० १७४। ३ पृ० १२५ पं० १५। ४ पृ० १२५ पं० १८। ५ ज्ञानादभिन्नत्वम् ब०, ज०। एभिरेव विकल्पैश्चित्रज्ञानस्य खण्डनम् प्रमेयकमलमार्तण्डे (पृ० २५ पू०) प्रकारान्तरेण च तत्त्वार्थश्लोक वा० पृ० ३५। न्यायविनि० टी० पृ० २४० पू० इत्यादिषु च द्रष्टव्यम्। ६ "अशक्यविवेचनत्वं साधनमसिद्धमुक्तं नीलतद्वेदनयोः अशक्यविवेचनत्वासिद्धेः अन्तर्बहिर्देशतया विवेकेन प्रतीतेः।" अष्टसह० पृ० २५४।

किञ्च, अन्तस्तत्त्वस्य अनेकाकाराक्रान्तस्यापि अशक्यविवेचनत्वाद् एकत्वाऽविरोधे बहिस्तत्त्वस्यापि अवयव्यादेः अत एव एकत्वाऽविरोधोऽस्तु विशेषाऽभावात्। बुद्ध्या तत्स्वरूपविवेचनम् अन्यत्राप्यविशिष्टम्, चित्रज्ञानेऽपि नीलाद्याकाराणाम् अन्योन्यदेशपरिहारेण स्थितत्वाऽविशेषात्। एकदेशत्वे च एकाकारे एवाशेषाकाराणामनुप्रवेशप्रसङ्गतः तद्वैलक्षण्याऽभावात् तच्चित्रता विरुद्ध्येत्। यदेकदेशं न तस्य आकारवैलक्षण्यम् यथा एकनीलाकारस्य, एकदेशाश्च चित्रज्ञाने नीलाद्याकारा इति। तथा, यत्र आकाराऽवैलक्षण्यम् न तत्र चित्ररूपता यथा एकनीलज्ञाने, आकाराऽवैलक्षण्यञ्च एकदेशतयाऽभिमतानां नीलाद्याकाराणामिति।

किञ्च[1], एते आकाराः चित्रज्ञाने सम्बद्धाः सन्तस्तद्व्यपदेशहेतवः, असम्बद्धा वा ? न तावदसम्बद्धाः; अतिप्रसङ्गात्। अथ सम्बद्धाः; किं तादात्म्येन, तदुत्पत्त्या वा ? न तावत्तदुत्पत्त्या; समसमयवर्त्तिनां नारीनयनयुग्मवत् तदसंभवात्। नापि तादात्म्येन; ज्ञानस्य अनेकाकाराऽव्यतिरिच्यमानत्वेन एकरूपत्वाऽभावप्रसङ्गात्। यदनेकाकाराऽव्यतिरिच्यमानस्वरूपं तदनेकम् यथा अनेकाकारस्वरूपम्, अनेकाकाराऽव्यतिरिच्यमानस्वरूपञ्च चित्रज्ञानस्वरूपमिति। अनेकाकाराणाञ्च एकस्माज्ज्ञानस्वरूपादव्यतिरेकेऽनेकत्वानुपपत्तिः। यदेकस्मादव्यतिरिक्तं न तदनेकम् यथा तस्यैव ज्ञानस्य स्वरूपम्, एकस्माज्ज्ञानस्वरूपादव्यतिरिक्ताश्च अनेकत्वेनाभिमता नीलादय आकारा इति।

यदप्युक्तम्[4]–'ग्रहणाऽग्रहणलक्षणविरुद्धधर्माध्यासान्नार्थधर्मश्चित्रता' इति; तदप्यसुन्दरम्; प्रत्यक्षविरोधेऽनुमानाऽप्रवृत्तेः, बाह्यार्थधर्मतया हि अबाधिताध्यक्षप्रत्यये चित्राकारः प्रतिभासते, न तस्य ज्ञानधर्मता युक्ता अतिप्रसङ्गात्। यो यद्धर्मतया प्रतीयते न स ततोऽन्यधर्मा यथा अग्निधर्मतया प्रतीयमाना भास्वरोष्णता[5] न जलधर्मः, बाह्यार्थधर्मतया प्रतीयते च चित्रतेति। कथं तद्धर्मत्वे ग्रहणाऽग्रहणयोरुपपत्तिः इति चेत्[6] ? चित्रप्रतिपत्तेः अनेकवर्णप्रतिपत्तिनिबन्धनत्वात्, प्रतिपन्नेऽपि नीलभागे पीतादिभागाऽप्रतिपत्तौ चित्रताऽप्रतिपत्तिरुपपन्नैव। विरोधश्च ज्ञानधर्मत्वेऽपि चित्रतायाः तुल्य एव; तथाहि[7]–ज्ञानमेकमनेकाकारम्, तद्विपरीतं वा ? न तावदाद्यविकल्पो युक्तः; परस्परव्यावृत्तत्वेनाऽऽकाराणाम् एकत्रानंशे ज्ञाने वृत्त्यनुपपत्तेः, येषां परस्परव्यावृत्तिः न तेषामेकत्राऽनंशे वृत्तिः यथा गवाश्वादीनाम्, परस्परव्यावृत्तिश्च नीलाद्याकाराणामिति। न चैकस्याऽनंशस्याऽस्य परस्परविरुद्धाकारैस्तादात्म्यं युक्तम्, तावद्धा तस्यापि भेदप्रसङ्गात्। प्रयोगः–यद् एकमनंशं न तस्य परस्परविरुद्धाकारैः सह तादात्म्यम् यथा उत्पन्नस्य क्षणस्य उत्पत्त्यनुत्पत्तिभ्यां सत्त्व-विनाशाभ्यां वा, एकमनंशञ्च[8] चित्रज्ञानं भवद्भिर-

---

१ "किञ्चैते नीलाद्याकाराः चित्रज्ञाने सम्बद्धाः सन्तः तद्व्यपदेशहेतवः असम्बद्धा वा ?" स्या०रत्ना० पृ० १७७। २ ज्ञानस्वरूपम् ब०, ज०, आ०। ३ अनेकत्वाभि–ब०, ज०, आ०। ४ पृ० १२६ पं० ८। ५ भासुरोष्ण–आ०। ६ "तथाहि–तदेकं वा सदनेकाकारं तद्विपरीतं वा ?" स्या० रत्ना० पृ० १७७। ७–द्धाकारता–ब०, ज०। ८–त्तिभ्यां वा आ०। ९–श्च ज्ञानं भां०।

भिप्रेतमिति। तत्तादात्म्ये च आकाराणां भेदवार्ताऽपि दुर्लभा इति कथं तच्चित्रता ? अथ नीलाद्याकारवत् तज्ज्ञानमप्यनेकमिष्यते, तदाऽपि किं कथञ्चित्, सर्वथा वा ? यदि सर्वथा; तदा तज्ज्ञानानां परस्परमत्यन्तभेदात् चित्रप्रतिपत्तिः स्वप्नेऽपि न प्राप्नोति। येषां परस्परमत्यन्तभेदो न तेषां चित्रप्रतिपत्तिः यथा सन्तानान्तरज्ञानानाम्, परस्परमत्यन्तभेदश्च आकारवत् तज्ज्ञानानामिति। कथञ्चिदभेदे तु ज्ञानवद् बहिरर्थस्यापि स्वाकारैर्विचित्रैः कथञ्चित्तादात्म्यमनुभवतः प्रत्यक्षादिप्रमाणेन प्रतीयमानस्य चित्रस्वभावता इष्यताम्, किं दुराग्रहग्रहाभिनिवेशेन आक्षेप-समाधानयोः बहिरन्तर्वा चित्रतायां समानत्वात् ? ५

यदप्यभिहितम्[1]—'ज्ञानात्मकाः सुखादयः, ज्ञानाऽभिन्नहेतुजत्वात्' इत्यादि; तत्र किं सर्वथा ज्ञानाभिन्नहेतुजत्वं तेषामभिप्रेतम्, कथञ्चिद्वा ? प्रथमपक्षे असिद्धो[2] हेतुः; सुखादीनां सदसद्वेद्योदय-स्रग्वनितादिनिमित्तनिबन्धनत्वात्, ज्ञानस्य च ज्ञानावरणक्षयोपशम-इन्द्रियादिकारणकलापप्रभवत्वात्। विभिन्नस्वरूपत्वाच्च अमीषां सर्वथाऽभिन्नहेतुजत्वमनुपपन्नम्; येषां विभिन्नस्वरूपत्वं न तेषां सर्वथाऽभिन्नहेतुजत्वम् यथा जलानलादीनाम्, विभिन्नस्वरूपत्वञ्च ज्ञानसुखादीनामिति। न चेदमसिद्धम्; सुखादेः आह्लादनाद्याकारत्वात्, ज्ञानस्य च प्रमेयानुभवस्वभावत्वात्। उक्तञ्चैं— १०

"सुखमाह्लादनाकारं विज्ञानं मेयबोधनम्। १५
शक्तिः क्रियानुमेया स्याद् यूनः कान्तासमागमे ॥ ? ॥" [ ] इति।

विभिन्नस्वरूपाणामपि अभिन्नोपादानत्वे सर्वं सर्वस्योपादानं स्यात्। अथ कथँञ्चिद् विज्ञानाऽभिन्नहेतुजत्वं विवक्षितम्; तद् रूपाऽऽलोकादिनाऽनैकान्तिकम्, यथैव हि ततो विज्ञानस्योत्पत्तिः तथा रूपाऽऽलोकादिक्षणान्तरस्यापि।

---

१ "अथ नीलाद्याकारवत् तज्ज्ञानमप्यनेकमिष्यते तदापि किं कथञ्चित्, सर्वथा वा ?" स्या० रत्ना० पृ० १७८। २ पृ० १२६पं० १६। ३ "सर्वथा विज्ञानाभिन्नहेतुजत्वाऽसिद्धत्वात् सुखादीनां सद्वेद्योदयादिनिमित्तत्वात् विज्ञानस्य ज्ञानावरणान्तरायक्षयोपशमादिनिबन्धनत्वात्।" अष्टसह० पृ० ७८। स्या० रत्ना० पृ० १७८। "सुखादीनां विज्ञानाभिन्नहेतुजत्वेन विज्ञानत्वादशक्यं व्यावर्त्तनमिति चेत्; न; अभिन्नहेतुजत्वाऽसिद्धेः। न खलु यैव चन्दनस्पर्शज्ञानस्योत्पत्तौ सामग्री सैव सुखस्यापीति।"....न्यायवा० ता० टी० पृ० १२३। "अत्र शाक्याश्चोदयन्ति...ज्ञानरूपाः सुखादयः तदभिन्नहेतुजत्वादिति; तदिदमनुपपन्नम्; प्रत्यक्षविरुद्धत्वाद्धेतोः।" न्यायमं० पृ० ७४। "नचानयोर्विज्ञानाभिन्नहेतुजत्वम्; ज्ञानस्य अर्थाकारादुत्पत्तेः, तस्माच्च वासनासहायात् सुखदुःखयोरुत्पादात् अन्यथा उपेक्षाज्ञानाभावप्रसङ्गात्।" प्रशस्त० कन्दली पृ० ९०। ४ "कथमन्यथा न्यायविनिश्चये 'सहभुवो गुणाः' इत्यस्य—'सुखमाह्लादनाकारं विज्ञानं मेयबोधकम्। शक्तिः क्रियानुमेया स्याद्यूनःकान्तासमागमे।' इति निदर्शनं स्यात्।" सिद्धिवि० टी० पृ० ९६ उ०। अष्टसह० पृ० ७८। सन्मति० टी० पृ० ४७८। 'उक्तञ्च स्याद्वादमहार्णवे' इति कृत्वा न्यायवि० टी० पृ० २३० उ०। स्या० रत्ना० पृ० १७८। प्रमेयरत्नमा० पृ० १८२। ५ "कथञ्चिद् विज्ञानाभिन्नहेतुजत्वं तु रूपालोकादिनाऽनैकान्तिकम्।" अष्टसह० पृ० ७८। स्या० रत्ना० पृ० १७८।

किञ्च, उपादानकारणापेक्षया सुखादीनां विज्ञानाऽभिन्नहेतुजत्वमुच्यते, सहकारिकारणापेक्षया वा ? तत्राद्यविकल्पे किमेषामभिन्नमुपादानम्-आत्मद्रव्यम्, ज्ञानक्षणो वा ? न तावदात्मद्रव्यम्; अनभ्युपगमात्। अभ्युपगमे वा किमेतेषामुपादानापेक्षया अभेदः साध्यते, स्वरूपापेक्षया वा ? यद्युपादानापेक्षया; तदा सिद्धसाधनम् चेतनद्रव्यार्थादेशात् सुखादीनामभेदाभ्युपगमात्, सुखज्ञानादिप्रतिनियतपर्यायार्थादेशादेव अमीषामन्योन्यं भेदाऽभ्युपगमात्। स्वरूपापेक्षया तु अभेदाऽभ्युपगमे घटादिभिर्व्यभिचारः, न ह्यभिन्नोपादानानां घट-घटी-शरावोदञ्चनादीनां स्वरूपतोऽभेदोऽस्ति। अथ ज्ञानक्षणोपादानत्वं विज्ञानाभिन्नहेतुजत्वमभिप्रेतम्; तदसिद्धम्; आत्मद्रव्योपादानत्वात्तेषाम्, न खलु पर्यायाणां पर्यायान्तरोत्पत्तौ उपादानत्वं क्वचिद् दृष्टम् द्रव्यस्यैव अन्तर्बहिर्वोपादानत्वोपपत्तेः। तदुक्तम्-

"त्यक्ताऽत्यक्तात्मरूपं यत् पौर्वापर्य्येण वर्तते।
कालत्रयेऽपि तद्द्रव्यमुपादानमिति स्मृतम्॥" [ ]

आत्मद्रव्यसिद्धिश्च सन्तानविचारावसरे प्रसाधिता, जीवसिद्ध्यवसरे प्रसाधयिष्यते च। अथ सहकारिकारणापेक्षया विज्ञानाभिन्नहेतुजत्वं सुखादीनां विवक्षितम्; तदपि विवक्षामात्रम्; तस्य चक्षुरादिभिरनैकान्तिकत्वप्रतिपादनात्। यदि च सुखादयो ज्ञानात् सर्वथाऽभिन्नाः तर्हि तद्देव एषामप्यर्थप्रकाशकत्वं स्यात्, न चात्र तदस्ति स्वरूपप्रकाशनियतत्वात्तेषाम्। 'ज्ञानं हि स्वपरप्रकाशनियतम्, सुखादिकं तु स्वप्रकाशनियतम्' इति प्रतिप्राणि प्रसिद्धम्, अतो विरुद्धधर्माध्यासात् कथमत्राऽभेदः ? यत्र विरुद्धधर्माध्यासो न तत्राऽभेदः यथा जलाऽनलादौ, विरुद्धधर्माध्यासश्च ज्ञानसुखादाविति। तदेवं सुखादीनां ज्ञानरूपत्वाऽप्रसिद्धेः "नीलसुखादिविचित्रप्रतिभासापि एकैव बुद्धिः, अशक्यविवेचनत्वात्" [ ] इत्येतद्वचः सत्यम् अभिप्रायमात्रमेव सूचयतीति।

'संवेदनमात्रमेव आलम्बनप्रत्ययरहितं वास्तवं तत्त्वम्' इति बौद्धैकदेशिमाध्यमिकस्य पूर्वपक्षः-

ननु चित्रज्ञाने नीलाद्याकारप्रतिभासस्य अविद्याशिल्पिकल्पितत्वादवास्तवत्वमेव, ज्ञानस्यैवानुभवपथप्राप्तस्य एकस्य मध्यक्षणस्वभावस्य वास्तवत्वम्, ततो नीलाद्याकाराणामभेदेऽनेकत्वविरोधात्, भेदे प्रतिभासाऽसंभवात्, संभवे वा संवेदनान्तरत्वापत्तेः कथं तच्चित्रता स्यात् ? तदुक्तम्-

"किं स्यात् सा चित्रतैकस्यां नैं स्यात्तस्यां मतावपि।
यदीदं स्वयमर्थेभ्यो रोचते तत्र के वयम्॥" [प्रमाणवा० ३।२१०] इति।

---

१ उद्धृतश्चैतत्-अष्टसह० पृ० २१०। युक्त्यनुशा० टी० पृ० ७९। स्या० रत्ना० पृ० १७९। २ ज्ञानाभिन्नाः आ०। ३ स्वप्रकाशम् आ०। ४ अस्य चित्राद्वैतवादस्य समर्थनपरं प्रमाणवार्तिकस्य तृतीयपरिच्छेदे चित्रैकत्वसिद्धान्ताख्यं प्रकरणं द्रष्टव्यम्। खण्डनपराश्च-तत्त्वार्थश्लो० पृ० ३५। प्रमेयक० पृ० २५ पू०। न्यायवि० टी० पृ० २०४। स्या० रत्ना० पृ० १७४। इत्यादयो ग्रन्थाः समवलोकनीयाः। ५ न सान्यस्यां आ०। ६-मर्थानां रो-स्या० रत्ना० पृ० १८०। प्रमाणवा०। "अत्र

नं च ज्ञाने चित्ररूपतापाये तत्स्वरूपप्रतिपत्तिः विरुद्ध्यते; तदपायेऽपि स्वंरूपस्य स्वतो गतेरुपपत्तेः, संवेदनमात्रतापाये एव तद्विरोधात्। न च अनेकत्वप्रतिभासो वास्तवाऽनेकत्वे सत्येवोपपद्यत इत्यभिधातव्यम्; स्वप्नावस्थायां तदभावेऽपि तद्दर्शनात्। अतः संवेदनमात्रमेव आलम्बनप्रत्ययरहितं वास्तवं तत्त्वम् सकलप्रत्ययानां निरालम्बनस्वभावत्वात्, तत्स्वभावत्वञ्चैतेषां प्रत्ययत्वेन हेतुना प्रसाध्यते, स्वप्नादौ प्रत्ययत्वस्यं निरालम्बनत्वेनाऽविनाभावप्रतिपत्तेः। ५
तथा च प्रयोगः–सर्वे प्रत्यया निरालम्बनाः प्रत्ययत्वात् स्वप्नेन्द्रजालादिप्रत्ययवत् इति। नचाऽनुभूयमानमध्यक्षणरूपसंविद्व्यतिरिक्तेऽर्थे किञ्चित्प्रमाणं क्रमते; समकालस्य भिन्नकालस्य वा तत्र तस्य प्रवृत्त्यनुपपत्तेः। सैव परमार्थसती मध्यमा प्रतिपत्तिः सर्वधर्मनिरात्मता सकलशून्यता चोच्यंते। तदुक्तम्– १०

"मध्यमा प्रतिपत्ं सैव सर्वधर्मनिरात्मता।
भूतकोटिश्च सैवेयं तंथता सैवं शून्यता॥" [ ] इति।

सर्वधर्मरहितता चार्थानाम् एकानेकस्वरूपविचाराऽसहत्वात् सिद्धा। तथाहि–ये एकानेकस्वरूपविचाराऽसहाः न ते परमार्थसन्तः यथा खरविषाणादयः, एकाऽनेकस्वरूपविचाराऽसहाश्च परपरिकल्पिता आत्मादयो भावा इति। आत्मादिभावानां हि एकरूपतयोपगतानां क्रमवद्विज्ञानादिकार्योपयोगित्वाऽभ्युपगमे तावद्वा भेदप्रसङ्गात् नैकरूपताऽवतिष्ठते, अनेकरूपतां तु १५

देवेन्द्रव्याख्या–यदि नाम एकस्यां मतौ न सा चित्रता भावतः स्यात्, किं स्यात्–को दोषः स्यात्? तथा च भावतः चित्रया मत्या भावा अपि चित्राः सिद्ध्यन्ति, तद्वदेव च सत्या भविष्यन्तीति प्रष्टुरभिप्रायः। शास्त्रकार आह–'न स्यात्तस्यां मतावपि' इति, व्याहतमेतत्–'एका, चित्रा च' इति, एकत्वे हि सत्यनानारूपापि वस्तुतो नानाकारतया प्रतिभासते, न पुनर्भावतस्ते तस्या आकाराः सन्ति इति बलादेष्टव्यम् एकत्वहानिप्रसङ्गाद्। न हि नानात्वैकत्वयोः स्थितेरन्यः कश्चिदाश्रयः, अन्यत्र भाविकाभ्यामाकारभेदाऽभेदाभ्याम्, तत्र यदि बुद्धिः भावतो नानाकारा एका चेष्यते तदा सकलं विश्वमप्येकं द्रव्यं स्यात्, तथा च सहोत्पत्त्यादिदोषः, तस्मान्नैका अनेकाकारा, किन्तु यदीदं स्वयमर्थानां रोचते अतद्रूपाणामपि सतां यदेतत् तादृष्येण प्रख्यानम् तदेतद् वस्तुत एव स्थितं तत्त्वम्, तत्र के वयं निषेद्धारः 'एवमस्तु' इत्यनुमन्यते इति।" स्या० रत्ना० पृ० १८०। उद्धृतश्चायं निम्नग्रन्थेषु–सिद्धिवि० टी० पृ० ५१ पू०। अष्टसह० पृ० ७७। प्रमेयक० पृ० २५ उ०। सन्मति० टी० पृ० २४१। न्यायवि० टी० पृ०२०९ पू०। स्या० रत्ना० पृ० १८०।

१ ननु आ०। २ "....स्वरूपस्य स्वतोगतेः" प्रमाणवा० २।४। ३ "अत एव सर्वे प्रत्यया अनालम्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवदिति प्रमाणस्य परिशुद्धिः।" प्रमाणवार्तिकालंकार पृ० २२। ४ "तथता भूतकोटिश्चानिमित्तः परमार्थिकः। धर्मधातुश्च पर्यायाः शून्यतायाः समासतः॥" मध्यान्तवि०सू० टी०पृ० ४१। ५ प्रतिपित्सैव ज०। ६ 'मध्यता सैव शून्यता' स्या० रत्ना० पृ० १८१। ७ सैव कथ्यते भां०। ८ "प्रयोगः–यदेकानेकस्वभावं न भवति न तत् सत्त्वेन ग्राह्यम् प्रेक्षावता यथा व्योमोत्पलम् एकानेकस्वभावरहिताश्च पराभिमताः पृथिव्यादयः इति व्यापकानुपलब्धिः।" तत्त्वसं० पं०पृ०५५०। ९ तानुमित्यै–ब०,ज०।

नित्यैकरूपतयोपगतत्वात् नितरां नावतिष्ठते। अतो भावा यथा यथा विचार्यन्ते तथा तथा प्लवन्त एव केवलम् इति सिद्धं तेषां तद्विचाराऽसहत्वम्। उक्तञ्च—

"भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः।
यस्मादेकमनेकं च रूपं तेषां न विद्यते॥" [प्रमाणवा० ३।३६०]

"तदेतन्नूनमायातं यद्वदन्ति विपश्चितः।
यथा यथाऽर्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा॥" [प्रमाणवा० ३।२०६] इति।

तथा, उत्पादादिधर्मरहिताश्चैते तद्रूपतयाऽपि विचाराऽसहत्वाविशेषात्। तथाहि—न स्वतो भावाः समुत्पद्यन्ते कारणनैरपेक्ष्येणोत्पद्यमानानां देशादिनियमाऽभावप्रसङ्गात्। परतोऽपि सतः, असतः, सदसद्रूपस्य वोत्पत्तिः स्यात्? न तावत् सतः; कारणवत् तथाविधस्योत्पत्तिविरोधात्। नाप्यसतः; खरविषाणवत्। नापि सदसद्रूपस्य; विरोधादेव। नाप्युभाभ्यामेषामुत्पत्तिः; उभयदोषानुषङ्गात्। अहेतुका तूत्पत्तिर्न केनचिदिष्टा। तदुक्तम्—

"न स्वतो नापि परतः न द्वाभ्यां नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन॥" [माध्यमिकवृ० प्रत्ययप० कारि० १] इति।

एतेन स्थितिभङ्गावपि चिन्तितौ, तयोरपि 'स्वतः परतो वा' इत्यादिप्रकारेण सद्भावाभ्युपगमे उक्तदोषानुषङ्गात्। अतो मरीचिकादौ तोयादिप्रतीतिवत् भावेषु उत्पादादिप्रतीतिर्भ्रान्तिरेव। उक्तञ्च—

"यथा माया यथा स्वप्नो गन्धर्वनगरं यथा।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतः॥" [माध्यमिकवृ० संस्कृतपरी० कारि० ३४] इति।

यद्येवम् असतां कथं तेषां प्रतिभासः इति चेत्? अनाद्यविद्यावासनाप्रभावात्, करितुरगादीनामसतां मन्त्राद्युपप्लवसामर्थ्यात् मृच्छकलादौ केषाञ्चित् प्रतिभासवत्। तदुक्तम्—

---

१ उद्धृतश्चैतत् अष्टसह० पृ० ११५। तत्त्वार्थश्लो० पृ० १४५। सन्मति० टी० पृ० ३७६। शास्त्रवा० टी० पृ० २१५ पू०। स्या० रत्ना० पृ० १८१। २ "इदं वस्तुबलायातं यद्वदन्ति विपश्चितः। यथा यथार्था विद्यन्ते विविच्यन्ते तथा तथा॥" प्रमाणवा०। सिद्धिवि० टी० पृ० ७७ उ०। न्यायवि० टी० पृ० ४०८ उ०। स्या० रत्ना० पृ० १८१। ३ स्या० रत्ना० पृ० १८१। ४ स्या० रत्ना० पृ० १८२। "यथा मायादयः स्वभावेन अनुत्पन्ना अविद्यमाना मायादिशब्दवाच्या मायादिविज्ञानगम्याश्च लोकस्य। एवमेतेऽपि लोकप्रसिद्धिमात्रेण उत्पादादयः स्वभावेन अविद्यमाना अपि भगवता तथाविधविनेयजनानुग्रहचिकीर्षुणा निर्दिष्टा इति। अत एवोक्तम् (समाधिराजसूत्रे) 'यथैव गन्धर्वपुरं मरीचिका यथैव माया सुपिनं यथैव। स्वभावशून्या तु निमित्तभावना तथोपमान् जानथ सर्वधर्मान्॥" माध्यमिकवृ० संस्कृतपरी० पृ० १७७। "यत्तूक्तं भगवता मायोपमा धर्मा यावत् निर्वाणोपमा इति।" महायानसूत्रालं० पृ० ६२। "एतदुक्तं भगवता—अनुत्पन्नाः सर्वभावा मायोपमाश्च इति।" लंकावतार सू० द्वि० भा० पृ० १११।

"मैन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवाऽवभासन्ते तद्रूपरहिता अपि ॥" [प्रमाणवा० ३।३५५]

तथा ग्राह्य-ग्राहकभावादिरपि अविद्याविनिर्मित एव, तदविपर्यासितदर्शनानां तथाप्रतिभासाऽभावात्। उक्तञ्च—

"अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ५
ग्राह्य-ग्राहक-संवित्तिभेदवानिव लक्ष्यते ॥" [प्रमाणवा० ३।३५४] इति ।

रविकिरणसंस्पृष्टनीहारनिकरवत् तत्त्वज्ञानात् निखिलाविद्याविलासविलये तु ग्राह्य-ग्राहकभावाद्यखिलधर्मविकलं संवित्स्वरूपमात्रमाभासते । तदुक्तम्—

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥" [प्रमाणवा० ३।३२७] इति । १०

अत्र प्रतिविधीयते । यत्तावदुक्तम्-'नीलाद्याकारप्रतिभासस्य अविद्याशिल्पिकल्पितत्वादवास्तवत्वम्' इत्यादि; तत्र कुतोऽयं नीलादिप्रतिभासोऽविद्याप्रभवः बाध्यमानत्वात्, तद्गोचरस्यार्थक्रियाकारित्वाऽभावाद्वा ? प्रथमपक्षे न सर्वत्र जल-नीलादिप्रतिभासस्याऽविद्याप्रभवत्वसिद्धिः, यत्र हि असौ बाध्यमानः तत्रैवाऽविद्याप्रभवः यथा मरीचिकायां जलप्रतिभासः शुक्तिकाशकले च रजतप्रतिभासः, न पुनः सत्ये जले जलप्रतिभासः रजते वा रजतप्रतिभास इति । किञ्च, अत्र १५

प्रोक्तस्य माध्यमिकमतस्य प्रतिविधानम्-

१ उद्धृतश्चैतत्-सिद्धिवि० टी० पृ० ५७ पू०, १६५ उ०, २१६ उ० । न्यायवि० टी० पृ० १६८ पू० । स्या० रत्ना० पृ० १८२ । २ तद्विपर्या-आ० । ३ उद्धृतश्चैतत्-न्यायमं० पृ० ५४० । सिद्धिवि० टी० पृ० १६५ उ०, ३१३ उ० । अष्टसह० पृ० ९३ । न्यायवि० टी० पृ० १६८ पू० । स्या० रत्ना० पृ० १८२ । शास्त्रवा० टी० पृ० २१५ उ० । मी० श्लोकवा० टी० पृ० २७२ । सर्वदर्शनसं० पृ० ३२ । 'अभिन्नोऽपि हि बुद्धयात्मा' इति पाठान्तरेण बृहदारण्यकभा० वा० ४।३ पृ० १४५८ । ४ नान्योनुभाव्यस्तेनास्ति तस्या नानुभवोऽपरः । तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते ॥ बुद्धया योऽनुभूयते स नास्ति परः, यथा अन्योऽनुभाव्यो नास्ति तथा निवेदितम् । तस्याः तर्हि परोऽनुभवो बुद्धेरस्तु; न; तत्रापि ग्राह्यग्राहकलक्षणाभावः । परं हि संवेदनस्वरूपे अवस्थितं कथं परस्यानुभवः साक्षात्करणादिकं प्रत्याख्यातम् । तत्संवेदनानुप्रवेशे च तयोरेकत्वमेव स्यात् तथा च स्वयं सैव प्रकाशते न ततः पर इति स्थितम् ।" प्रमाणवार्त्तिकालंका० ३।३२७ । तत्त्वार्थश्लो० वा० पृ० १२१ । आप्तपरी० पृ० ४७ । प्रमेयक० पृ० २४ पू० । न्यायवि० टी० पृ० १३२ उ० । सन्मति० टी० पृ० ४८३ । 'नान्योनुभाव्यो' 'स्वयमेव प्रकाशते' इति पाठान्तरेण न्यायमं० पृ० ५४० । मी० श्लोकवा० टी० पृ० २७५ । सर्वदर्शनसं० पृ० ३१ । षड्दर्शनसमु० बृह० पृ० ४० । स्याद्वादमं० पृ० १३९ । ५ पृ० १३० पं० २१ । ६ "कुतोऽयं नीलाद्याकारप्रतिभासोऽविद्यानिबन्धनः-किं बाध्यमानत्वात्, गोचरस्य अर्थक्रियाकारित्वाभावाद्वा ?" स्या० रत्ना० पृ० १८३ ।

बाधकं मध्यक्षणरूपं संविन्मात्रञ्चेत्; कुतस्तत्सिद्धिः ? नीलादिप्रतिभासानामवास्तवत्वाच्चेत्; इतरेतराश्रयत्वम्–सिद्धे हि मध्यक्षणरूपे संविन्मात्रे तत्त्वे तत्प्रतिभासानामवास्तवत्वसिद्धिः, तत्सिद्धौ च तथाविधसंविन्मात्रतत्त्वसिद्धिरिति । अन्यच्च यत् संविन्मात्रप्रसाधकं प्रमाणं तत् प्रागेवाऽपास्तम् । तद्गोचरस्य अर्थक्रियाकारित्वाभावस्तु असिद्धः; जलानलादेस्तद्गोचरस्य स्नानपानाद्यर्थक्रियाकारित्वेन सदा सुप्रसिद्धत्वात्, तस्याश्च अनर्थक्रियात्वे काऽपरा अर्थक्रिया स्यात् ? स्वरूपानुभवनं सा इति चेत्; तदपि ज्ञानगतानां नीलाद्याकाराणामस्त्येव, नहि निराकारस्य मध्यक्षणरूपस्य संविन्मात्रस्यानुभवनं कदाचिदप्यस्ति, बहिरन्तर्वाऽनेकाकारस्यैवार्थस्य अनुभवनात् ।

अथ नीलाद्यनेकाकारानुभवो मिथ्या; ननु संवित्-नीलाद्याकारयोः एकानेकस्वभावयोः प्रतिभासाऽविशेषेऽपि कुतो वास्तवेतरत्वप्रविवेकः ? एकाकारस्य अनेकाकारेण विरोधात्तस्य अवास्तवत्वे कथमेकाकारस्यैवाऽवास्तवत्वं न स्यात् ? स्वप्नज्ञाने अनेकाकारस्याऽवास्तवस्य प्रसिद्धेः चित्रज्ञानेऽपि तस्य अवास्तवत्वे केशादौ एकाकारस्याप्यवास्तवस्य प्रसिद्धेः अन्यत्राप्येकाकारस्यैव अवास्तवत्वं किन्न स्यात् ? यथा च अनेकाकारस्य एकाकारादभेदेऽनेकत्वं विरुद्ध्यते, भेदे तु संवेदनान्तरत्वमनुषज्यते; तथा एकाकारस्यापि अनेकाकारादभेदेऽनेकत्वम्, भेदे तु संवेदनान्तरत्वमनुषज्यत इति । यदि च एकस्याऽनेकाकारता नेष्यते तदा प्रत्याकारं ज्ञानस्य सन्तानान्तरवद्भेदः स्यात्, तेषाञ्चाकाराणां नीलाकारेणाऽनुपलम्भतः तद्वदेवाऽसत्त्वं स्यात् । नीलांशस्यापि प्रतिपरमाणु भेदात् नीलाणुसंवेदनैः परस्परं भिन्नैर्भवितव्यम्, तेषाञ्च एकनीलाणुसंवेदनेनाऽनुपलम्भादसत्त्वम्, एकनीलाणुसंवेदनस्याप्येवं वेद्य-वेदक-संविदाकारभेदात् त्रितयेन भवितव्यम्, वेद्याकारादिसंवेदनत्रयस्यापि प्रत्येकमपरस्ववेद्याकारादिसंवेदनत्रयेण इत्यनवस्था, अतो नेष्टतत्त्वसिद्धिः स्यात् । तथाभूतस्य चास्य अनुपलम्भतोऽभावप्रसङ्गात् सकलशून्यतैव स्यात् । ततः प्रतीतितो वस्तुव्यवस्थामभ्युपगच्छद्भिः बहिरन्तर्वा एकानेकप्रतिभासात् तथाविधं वस्तु प्रेक्षादक्षैः प्रतिपत्तव्यम् ।

---

१ स्नानादिक्रियायाः । २–र्थक्रियाकारित्वे भां० । ३ "अथ स्वरूपानुभवनमर्थक्रिया" स्या० रत्ना० पृ० १८३ । ४–रूप संवि–आ० । ५–षे कुतो भां० । "कथमेकानेकाकारयोः प्रतिभासाऽविशेषेऽपि वास्तवेतरत्वप्रविवेकः एकाकारस्य अनेकाकारेण विरोधात् तस्य अवास्तवत्वे कथमेकाकारस्यैव अवास्तवत्वं न स्यात् ? स्वप्नज्ञाने अनेकाकारस्य अवास्तवस्य प्रसिद्धेः चित्रज्ञानेऽपि तस्य अवास्तवत्वं युक्तं कल्पयितुमिति चेत्; केशादावेकाकारस्यापि अवास्तवत्वसिद्धेः तत्रावास्तवत्वं कथमयुक्तम् ?" अष्टसह० पृ० ७६ । स्या० रत्ना० पृ० १८४ । ६ "नन्वेवं नीलवेदनस्यापि प्रतिपरमाणुभेदात् नीलाणुसंवेदनैः परस्परं भिन्नैः भावितव्यं तत्र एकनीलपरमाणुसंवेदनस्याप्येवं वेद्यवेदकसंविदाकारभेदात् त्रितयेन भवितव्यं वेद्याकारादिसंवेदनत्रयस्यापि प्रत्येकमपरस्ववेद्यादिसंवेदनत्रयेण इति परापरवेदनत्रयकल्पनादनवस्थानात् न क्वचिदेकवेदनसिद्धिः संविदद्वैतविद्विषाम् ।" अष्टसह० पृ० ७७ ।

यच्चान्यदुक्तम्–'सर्वे प्रत्यया निरालम्बनाः' इत्यादि; तदप्यविचारितरमणीयम्; जाग्रत्प्रत्ययानां स्वरूपव्यतिरिक्तस्थिरस्थूलसाधारणस्तम्भकुम्भाद्यर्थोद्योतकत्वेन प्रत्यक्षतः प्रतीतेः। तथा च 'अश्रावणः शब्दः सत्त्वात्' इत्यादिवत् प्रत्यक्षबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वेन कालात्ययापदिष्टं प्रत्ययत्वम्। असिद्धश्च; प्रत्ययेभ्यो व्यतिरिक्तस्य प्रत्ययत्वस्य भवताऽनभ्युपगमात्, तेषामेव च हेतुत्वे प्रतिज्ञार्थैकदेशाऽसिद्धता। आश्रयासिद्धता च; तद्ग्राहकप्रमाणस्य प्रत्यक्षत्वतो निरालम्बनत्वेनाश्रयस्याऽतोऽप्रसिद्धेः। स्वरूपासिद्धता च; हेतुस्वरूपग्राहकप्रत्ययस्यापि अत एव निरालम्बनत्वात्। अथ एतद्दोषपरिजिहीर्षया पक्षादिप्रसिद्धये तद्ग्राहकप्रत्ययस्य सालम्बनत्वमङ्गीक्रियते, तर्हि तेनैव प्रत्ययत्वमनैकान्तिकम्। विरुद्धश्च; सालम्बनत्वे सत्येव हि प्रत्ययानां प्रत्ययत्वमुपपद्यते, यतः प्रतीयते स्वरूपं पररूपं वा यैः ते प्रत्ययाः तद्भावः प्रत्ययत्वम्, *तत् कथं निरालम्बनत्वविरुद्धेन सालम्बनत्वेन न व्याप्येत यतो विरुद्धं न स्यात्?*

दृष्टान्तश्च साध्यविकलः; स्वप्नादिप्रत्ययानामपि बाह्यार्थालम्बनत्वेन निरालम्बनत्वाभावात्। "द्विविधो हि स्वप्नः–सत्यः, असत्यश्च। तत्राद्यो देवताविशेषकृतो धर्माऽधर्मकृतो वा कश्चित् साक्षादर्थाऽव्यभिचारी, यद्देशकालाऽऽकारतया स्वप्ने प्रतिपन्नोऽर्थः तद्देशकालाकारतया जाग्रद्दशायां तस्य प्राप्तिप्रसिद्धेः। कश्चित्तु परम्परया; राजादिदर्शनेन स्वप्नाध्यायनिगदितार्थस्य कुटुम्बवर्द्धनादेः प्राप्तिहेतुत्वात् अनुमानवत्, क्वचिद्व्यभिचारस्य अनुमानेऽपि समत्वात्। योऽपि वातपित्तादिद्रेकजनितोऽसत्यत्वेन प्रसिद्धः स्वप्नः सोऽपि नार्थमात्रव्यभिचारी, न हि किञ्चिज्ज्ञानं सत्तामात्रं व्यभिचरति तस्यानुत्पत्तिप्रसङ्गात्, विशेषं तु यत एव व्यभिचरति अत एव 'असत्यः' इति। न च स्वप्नादौ बौद्धेन बोधोऽभ्युपगम्यते इति कस्य दृष्टान्तता? अभ्युपगमे वा साध्यसाधनधर्मग्राहकप्रत्ययस्य निरालम्बनत्वे साध्यसाधनोभयविकलता दृष्टान्तस्याऽनुषज्यते। दृष्टान्तग्राहकस्य च प्रत्ययस्य निरालम्बनत्वे दृष्टान्तस्यैवाऽसत्त्वाद् अनन्वयत्वम्। धर्मिधर्मोभयप्रत्ययानां निरालम्बनत्वे वा अप्रसिद्धविशेष्यः अप्रसिद्धविशेषणः अप्रसिद्धोभयश्च पक्षः स्यात्। प्रतिज्ञा-हेत्वोर्विरोधश्च; सर्वप्रत्ययानां निरालम्बनत्वे साध्ये हेतूपादाने तत्प्रत्ययत्वस्य सालम्बनत्वाऽभ्युपगमात्, अन्यथा किंसाधनः साध्यमयं साधयेत्?

किञ्च, स्वप्नदृष्टान्तेन अखिलप्रत्ययानां बहिर्मिथ्यात्वाभ्युपगमे स्वरूपेऽपि तत्प्रसङ्गः। तथाहि–यत् प्रतिभासते तन्मिथ्या यथा अर्थः, प्रतिभासते च विज्ञानस्वरूपमिति। प्रतिभासाऽवि-

---

१ पृ० १३१ पं० ६। २–गमत्वात् भां०। ३ सत्येव बहि आ०। ४ च ब०, ज०, भां०। ५ "द्विविधो हि स्वप्नः सत्योऽसत्यश्च। तत्र सत्यो देवताकृतः स्यात् धर्माधर्मकृतो वा कस्यचित् साक्षाद् व्यवसायात्मकः प्रसिद्धः स्वप्नदशायां यद्देशकालाकारतया अर्थः प्रतिपन्नः पुनर्जाग्रद्दशायामपि तद्देशकालाकारतयैव तस्य व्यवसीयमानत्वात्। कश्चित् सत्यः स्वप्नः परम्परया अर्थव्यवसायी स्वप्नाध्यायनिगदितार्थप्रापकत्वात् तदुक्तम्–यस्तु पश्यति राज्यन्ते राजानं कुञ्जरं हयम्। सुवर्णं वृषभं गाञ्च कुटुम्बं तस्य वर्द्धते॥ प्रमाणपरी० पृ० ५८। स्या० रत्ना० पृ० १८६। ६ प्रति हे– आ०। ७ व्यभिचारीति भां०। ८ स्वापादौ ब०, ज०, आ०।

शेषेऽपि प्रतीतितः स्वरूपप्रतिभासस्य सत्यत्वाभ्युपगमे प्रत्ययत्वाऽविशेषेऽपि जाग्रद्दशाबहिरर्थप्रत्ययानां प्रतीतितः सत्यत्वं किन्नाभ्युपगम्येत विशेषाभावात् ?

यानि च 'एकाऽनेकस्वरूपविचाराऽसहत्वात्' इत्याद्यनुमानानि उपन्यस्तानि[1]; तान्यपि पक्ष-हेतु-दृष्टान्तदोषैरेतैरेव प्रतिव्यूढानि प्रतिपत्तव्यानि । तद्विचाराऽसहत्वञ्च सर्वथाऽप्य[2]
५ सिद्धम्; आत्माद्यर्थानामेकानेकस्वरूपविचारसहत्वात् । न हि क्रमवद्विज्ञानादिकार्योपयोगित्वम् आत्मादेः भेदप्रसाधकम्; तत्सामर्थ्यभेदस्यैव अतः प्रसिद्धेः । ननु सामर्थ्यस्य स्वभावभूतस्य भेदे कथन्न तद्वतो भेदः ? इत्यप्यसमीचीनम्; स्वभावभेदस्य भावभेदं प्रत्यनङ्गत्वात्, कथमन्यथा चित्रमेकं ज्ञानं स्यात् ? तदनभ्युपगमे च सकलशून्यता प्रागेव प्रतिपादिता। कथं[3] वा ग्राह्याकारविवेकरूपतया परोक्षतां संविद्रूपतया च प्रत्यक्षतां बिभ्रतो ज्ञानस्य स्वभावभेदसंभ-
१० वाद् एकत्वं स्यात् ?

यदप्युक्तम्[4]–'उत्पादादिधर्मरहिताश्चार्थाः' इत्यादिः; तदप्यसाम्प्रतम्; द्रव्यरूपतया सतां पर्यायरूपतया चाऽसतां तेषामुत्पादादिधर्मसद्भावोपपत्तेः, न हि सर्वथा सतोऽसतो वा तद्धर्माणामुपपत्तिः इति यथास्थानं निवेदयिष्यामः । यदि च उत्पादादिधर्माः सर्वथा न सन्ति, तदा चिन्मात्रस्य असत्त्वमनुषज्यते कार्यकारित्वाऽभावात् खपुष्पवत्, नित्यत्वं वा स्यात् सदा[5]
१५ कारणवत्त्वादाकाशादिवत्। तेषामसत्त्वे च कथं विशदप्रतिभासगोचरता ? यत्सर्वथाप्यसन्न तद्विशदप्रतिभासगोचरः यथा खपुष्पम्, सर्वथाऽप्यसन्तश्च भवद्भिः परिकल्पिता उत्पादादयो धर्मा इति । तद्गोचरत्वे वा सर्वथाप्यसत्त्वानुपपत्तिः, यद्विशदप्रतिभासगोचरः न तत् सर्वथाप्यसत् यथा संवित्स्वरूपम्, विशदप्रतिभासगोचराश्च उत्पादादयो धर्मा इति । न चेदमसिद्धम्; सुवर्णादौ कटकाद्युत्पादादेः आबालं विशदप्रतिभासगोचरचारितया सुप्रसिद्धत्वात्। तत्र
२० तेषां सर्वथाऽसत्त्वे च संवेदनमात्रमपि न प्राप्नोति, यद् यत्र सर्वथाप्यसत् न तत्तत्र संवेद्यते यथा दुःखे सुखम् नीलाकारे वा पीताकारः, सर्वथाऽप्यसन्तश्चोत्पादादयो धर्मा अर्थेष्विति।

ननु मरीचिकाचक्रे जलस्याऽसत्त्वेऽपि संवेदनसंभवात् अनेकान्तः; इत्यप्यसत्; तत्र तस्य सर्वथाऽसत्त्वस्याऽसंभवात्। द्रव्यक्षेत्रकालाकारतया हि असत्त्वं सर्वथाऽसत्त्वमुच्यते, तच्चास्य अत्र नास्ति वीचीतरङ्गाद्याकारेण सदृशात्मना तत्र तस्य सत्त्वात्, अन्यथा काष्ठपा-
२५ षाणादिवत् तच्चक्रेऽपि तत्संवेदनोत्पत्तिर्न स्यात्। अस्तु वाँ असतामप्येषां संवेदनम्; तथापि मुख्यम्, गौणं वा तत् स्यात् ? तत्राद्यपक्षोऽयुक्तः; ज्ञानस्यैव हि स्वात्मभूतोऽसाधारणो धर्मो मुख्यं संवेदनम्, तत्कथम् अज्ञानरूपाणामुत्पादादीनां स्यात् ? प्रयोगः–यदज्ञानरूपं न तस्य

---

१ पृ० १३१ पं० १२ । २–था असिद्धम् भां० । ३ "क्षणस्थायिनः कस्यचिदेव ग्राह्यग्राहकाकारवैश्वरूप्यानभ्युपगमेऽपि संविदितज्ञानस्य ग्राह्यग्राहकाकारविवेकं परोक्षं विभ्राणस्य सामर्थ्यप्राप्तेः (अष्टश०) संवेदनस्यैकस्य प्रत्यक्षपरोक्षाकारतया वैश्वरूप्यसिद्धेः ।" अष्टसह० पृ० ९१ । ४ पृ० १३२ पं० ७ । ५ "सदकारणवन्नित्यम् ।" वैशेषिकसू० ४।१।१। ६–थाप्यसत्त्वे ब०, ज०, भां० । ७ वाऽसतामसीषाम् भां० ।

मुख्यं संवेदनम् यथा शशशृङ्गस्य, अज्ञानरूपाश्च असत्त्वेनोपगता उत्पादादयो धर्मास्तदुपलक्षिताश्चार्था इति। द्वितीयपक्षोऽप्यनुपपन्नः; यतः स्वाकारनिर्भासिज्ञानोत्पादनमेव गौणं संवेदनमुच्यते, तच्च अश्वविषाणवदसतामुत्पादादीनामयुक्तम् सर्वसामर्थ्यविरहलक्षणत्वादसत्त्वस्य। यत् सर्वसामर्थ्यविरहितं न तस्य गौणं संवेदनम् यथा अश्वविषाणस्य, सर्वसामर्थ्यविरहिताश्च असत्त्वेनाभिमता उत्पादादयो धर्माः तद्वन्तश्चार्था इति। ५

किञ्च, उत्पादादीनां ज्ञानेन सार्द्धं कः सम्बन्धः येन तस्मिन् संवेद्यमाने नियमेन ते संवेद्येरन्–किं तादात्म्यम्, तदुत्पत्तिर्वा ? न तावत्तादात्म्यम्; ज्ञानवत् तेषामपि सत्त्वप्रसङ्गात्। नापि तदुत्पत्तिः; उत्पादाद्याकाराणां नीरूपत्वे जन्यत्वस्य जनकत्वस्य चाऽसंभवात्। अतः सम्बन्धाऽभावात् कथं तेन तेषां संवेदनम् ? यस्य येन सम्बन्धो नास्ति तस्मिन् संवेद्यमाने नियमेन स न संवेद्यते यथा ज्ञानात्मनि संवेद्यमाने वन्ध्यासुतः, नास्ति च तादात्म्य-तदुत्पत्ति- १०
लक्षणः सम्बन्धो ज्ञानेन सह असत्त्वभूतानामुत्पादाद्याकाराणामिति। अस्ति चैतेषां ज्ञाने संवेद्यमाने नियमेन संवेदनम्, अतोऽस्ति कश्चित् तेषां तेन सम्बन्धः, स च परमार्थसत्त्वमन्तरेण न संभवतीति सिद्धं तेषां परमार्थसत्त्वम्। यस्मिन् संवेद्यमाने यन्नियमेन संवेद्यते तत् तेन सम्बद्धम् परमार्थसच्च यथा ज्ञाने संवेद्यमाने तत्स्वरूपम्, संवेद्यन्ते च ज्ञाने संवेद्यमाने नियमेनोत्पादादयः तद्वन्तश्चार्था इति। संवेद्यमानानामप्येषामसत्त्वे ज्ञानस्वरूपेऽप्यसत्त्वानुषङ्गात् सकल- १५
शून्यताप्रसङ्गः स्यात्।

इष्टत्वान्न तत्प्रसङ्गो दोषाय इति चेत्; ननु केयं सकलशून्यता नाम यदिष्टिर्दोषाय न स्यात्-सकलपदार्थाऽभावमात्रम्, ग्राह्यग्राहकभावादिरहितं संविन्मात्रं वा स्यात् ? प्रथमविकल्पे किं तस्याः सद्भावावेदकं किञ्चित्प्रमाणमस्ति, न वा ? यदि नास्ति; कथं तत्सिद्धिः प्रमाणनिबन्धनत्वाद् वस्तुसिद्धेः। अथ अस्ति; कथं सकलशून्यता प्रत्यक्षादिप्रमाणस्य तज्जनकस्येन्द्रियादेश्च सद्भावे सकलशून्यताविरोधात् ? २०

किञ्च[2], सकलशून्यता प्रमाणप्रमेययोः ग्राहकप्रमाणाऽभावात्, अनुपलब्धेः, विचारात्, प्रसङ्गाद्वा स्यात् ? प्रथमपक्षे कोऽयं तद्ग्राहकप्रमाणाऽभावः–दुष्टेन्द्रियप्रभवप्रत्ययाः संशयादयः, ज्ञानानुत्पादो वा ? तत्राद्यविकल्पोऽनुपपन्नः; संशयादिसद्भावाभ्युपगमे[3] सकलशून्यताहानिप्रसङ्गात्। ज्ञानानुत्पादोऽपि ज्ञातः सर्वाभावं गमयति, अज्ञातो वा ? न तावदज्ञातः; अति- २५
प्रसङ्गात्। योऽभावः स ज्ञातोऽन्याभावं गमयति यथा क्वचिद् धूमाऽभावोऽग्न्यभावम्, अभा-

१ "अभूतपरिकल्पोऽयं द्वयं तत्र न विद्यते। शून्यता विद्यते त्वत्र तस्यामपि स विद्यते॥ यस्माद् द्वयं तत्र न विद्यते। अभूतपरिकल्पो हि ग्राह्यग्राहकरहितः शून्य इति न सर्वथा स्वभावतो नास्ति…।" मध्यान्तवि० सू० टी० पृ० ९। २ "किञ्च, सकलशून्यता प्रमाणप्रमेययोरनुपलब्धिवः, विचारात्, प्रसङ्गसाधनाद्वा स्यात्।" स्या० रत्ना० पृ० १८९। ३ "यस्यापीष्टं न निर्णीतं क्वचित्तस्य न संशयः। तदभावे न युज्यन्ते परपर्य्यनुयुक्तयः॥ १४४॥" तत्त्वार्थश्लो० पृ० ८०।

वश्चायं ज्ञानानुत्पाद इति । अथ ज्ञातः; कुतस्तज्ज्ञप्तिः–अन्यतः प्रमाणाभावात्, स्वतो वा ? प्रथमपक्षे अनवस्थातः प्रकृताऽभावाऽप्रतिपत्तिः । स्वतस्तज्ज्ञप्तौ सर्वाऽभावस्यापि स्वतो ज्ञप्तिप्रसङ्गात् प्रमाणाभावो व्यर्थः स्यात् । अस्तु, का नो हानिरिति चेत् ? सकलशून्यताव्याघातः तथाभूतस्यास्यैव प्रमाण-प्रमेयरूपत्वप्रसङ्गात् । 'प्रमाण-प्रमेयपदाऽव्यपदेश्यः सर्वाऽभावः' इति चाऽयुक्तम्; स्वतः स्वरूपं प्रति(ती)यतः तद्रूपप्रतिषेधविरोधात् । तत्पदाऽव्यपदेश्यत्वे वाऽस्याऽसत्त्वप्रसङ्गः । तथाहि–यत्प्रमाणप्रमेयपदाव्यपदेश्यम् तन्नास्ति यथा खरविषाणम्, तत्पदाव्यपदेश्यश्च सर्वाऽभाव इति ।

नाप्यनुपलब्धेः प्रमाणप्रमेययोरभावात् सकलशून्यतासिद्धिः; प्रतिज्ञा-हेत्वोर्विरोधात् सिद्धसाध्यताप्रसङ्गाच्च, प्रध्वस्ताऽनुत्पन्नानामसत्त्वाभ्युपगमात् । कालात्ययापदिष्टता च; धर्मिहेतुदृष्टान्तानां सत्त्वे अनुपलब्धेः तज्ज्ञप्तिसाधनैर्निरस्तविषयत्वात्, तत्सत्त्वाऽनभ्युपगमे आश्रयासिद्धतादिदोषानुषङ्गात् कथं सकलशून्यतासिद्धिः ? अभावधर्मत्वादनुपलब्धेः आश्रयासिद्धताद्यनुपपत्तिः; इत्यप्यसुन्दरम्; अनुपलब्धेरभावधर्मत्वे प्रमाणाऽभावात् । किञ्च, अनुपलब्धिः स्वरूपेणाधिगता अन्यप्रतीतये प्रयुज्यते, अनधिगता वा ? न तावदनधिगता; ज्ञापकत्वात्, यज् ज्ञापकं तत् स्वरूपेणाधिगतमन्यप्रतीतये प्रयुज्यते यथा धूमादि, ज्ञापिका च अनुपलब्धिः सर्वाभावस्येति । नाप्यधिगता; तत्स्वरूपाधिगमे प्रत्यक्षस्य अनुमानस्य वा प्रमाणस्य प्रवृत्तौ सकलशून्यताविरोधानुषङ्गात् । न च लिङ्गत्वेन स्वयमनिश्चितायाः दृष्टान्ते क्वचिदप्रतिपन्नप्रतिबन्धायास्तस्याः स्वसाध्यसिद्धौ गमकत्वं युक्तम् अतिप्रसङ्गात् ।

अथ विचारात् सर्वाभावः प्रसाध्यते; ननु विचारो वस्तुभूतोऽस्ति, न वा ? यद्यस्ति; कथं सकलशून्यता ? नाऽस्ति चेत्; कुतः सर्वाऽभावः सिद्ध्येत् ? अथ प्रसङ्गसाधनात् तदभावः साऽध्यते; न; सर्वाऽसत्त्ववादिनः स्वपरविभागाऽसंभवे प्रसङ्गसाधनस्यैवाऽसंभवात्, परस्येष्ट्याऽनिष्टापादनलक्षणत्वात्तस्य । कथञ्च प्रमाणप्रमेयप्रपञ्चं प्रतीतिभूधरशिखरारूढमनभ्युपगम्य स्वप्नेऽप्यप्रतीयमानं सर्वाऽभावमभ्युपगच्छन् प्रामाणिकः स्यात् ? स्वप्ने करितुरगादिवत् मिथ्यैव तत्प्रपञ्चः प्रतिभातीति चेत्; क इदानीं सत्यता स्यात् ? घटादिपदार्थाऽसत्त्वे चेत्; कुतस्तस्य सत्यता ? बाधारहितप्रतिभासाच्चेत्; तदितरत्र समानम् । यथैव हि क्वचिद्देशे काले वा पदार्थानामसत्त्वे बाधारहितप्रतिभासोऽस्ति, तथा सत्त्वेऽपि । यदि च प्राक्-प्रध्वंसाभाववत् मध्येऽप्यर्थाऽ-

---

१ ज्ञानानामुत्पाद ज० । २ स्वरूपप्रतिपत्तिः ज० । स्वरूपं प्रतिनियतः भां० । ३ चा भां० । ४ धर्मिहेतुदृष्टान्तादिज्ञप्तिसाधनैः । ५ प्रयुज्येत ब०, भां० । ६ "नहि विचारस्याभावे कस्यचिद् विचारेणानुपपत्तिः शक्या वक्तुं नापि शून्यवादिनः किञ्चिन्निर्णीतमस्ति यदाश्रित्य क्वचिदन्यत्र अनिर्णीतेऽर्थे विचारः प्रवर्तते तस्य सर्वत्र विप्रतिपत्तेः । तथा चोक्तं तत्त्वार्थश्लोकवार्तिके (पृ० ८० श्लो० १४०) किञ्चिन्निर्णीतमाश्रित्य विचारोऽन्यत्र वर्तते । सर्वविप्रतिपत्तौ तु क्वचिन्नास्ति विचारणा ॥" अष्टसह० पृ० ११६ । ७ साध्येत आ० । ८ मध्ये पदार्था–ब०, ज० ।

नामसत्त्वं स्यात्; तदा स्थितिकालेऽपि 'गौरयम्' 'शुक्लः' 'चलति' इति जाति-गुण-क्रियाव्यपदेशो न स्यात् असतः तद्व्यपदेशाऽसंभवात्। अस्ति चायं व्यपदेशः, अतो मध्यावस्थायां पदार्थानामसद्रूपादर्थान्तरं सद्रूपं प्रतिपत्तव्यम्। तन्न सकलार्थाऽभावः सकलशून्यता।

अथ 'ग्राह्य-ग्राहकभावादिशून्यं संविन्मात्रं सा' इत्युच्यते; ननु सा तथाविधा कुतः सिद्धा—अभ्युपगममात्रात्, प्रतीतेर्वा ? प्रथमपक्षे कुतोऽप्रतिपक्षा पक्षसिद्धिः सर्वस्य स्वेष्ट- ५
तत्त्वसिद्धेः तथा संभवात् ? द्वितीयपक्षोऽप्यनुपपन्नः ; यतो ग्राह्य-ग्राहकभावादिशून्यस्य संविन्मात्रस्य कदाचिदप्यप्रतीतितः कथं तल्लक्षणा तच्छून्यता प्रतीतितः सिद्धयेत् ? प्रतीत्या च वस्तुव्यवस्थां कुर्वता बहिरन्तर्वाऽनेकान्तात्मकं वस्तु उररीकर्तव्यम्, बाह्याध्यात्मिकार्थानां ग्राह्य-ग्राहकाद्यनेकाकाराक्रान्ततयैव प्रतीतौ प्रतिभासनात्। न चेयं मिथ्या बाधकाऽभावात्, विपरीतार्थोपलम्भो हि बाधकः, न चात्र सोऽस्ति, तद्विपरीतस्य मध्यक्षणस्थायिनः संविन्मात्रस्य १०
स्वप्नेऽप्युपलम्भाऽभावात्। असताऽपि बाधाकल्पने नित्य-निरंश-व्यापिपरब्रह्मोपलम्भेनाऽसतापि मध्यक्षणस्थायिसंविन्मात्रस्य बाधा किन्न स्याद् विशेषाभावात् ? ततः प्रतीतिनिबन्धनां वस्तुव्यवस्थामभ्युपगच्छता बहिरन्तर्वा अनेकान्तात्माऽर्थः प्रमाणगोचरः प्रतिपत्तव्यः, इति सिद्धो बाह्योऽप्यर्थः प्रमाणस्य गोचर इति।

एतेन ब्रह्माद्वैतवाद्यपि बाह्यमर्थमपलपन् प्रत्याख्यातः, ब्रह्मणः सद्भावे प्रमाणाभावात्। १५

शब्दब्रह्मवादे भर्तृहरेः पूर्वपक्षः—

ननु किंरूपस्य ब्रह्मणः सद्भावे प्रमाणाऽभावः—शब्दस्वभावस्य, परमात्मरूपस्य वा ? द्विविधं हि ब्रह्म, शब्द-परमब्रह्मविकल्पात्। उक्तञ्च—"*शब्दब्रह्मणि निष्णातः परमब्रह्माधिगच्छति*" [ब्रह्मबिन्दूपनि० २२] इति। तत्राद्यविकल्पोऽनुपपन्नः; शब्दस्वभावब्रह्मसद्भावे प्रत्यक्षस्य अनुमानस्य च प्रमाणस्य सद्भावात्। तथाहि—सकलं योगजमयोगजं वा प्रत्यक्षं शब्दब्रह्मोल्लेख्येवाऽवभासते २०

---

१ "असतः क्रियागुणव्यपदेशाभावादर्थान्तरम्।" सदिति सूत्रशेषः। वैशेषिक सू० ९।१।३। २ "ग्राह्यग्राहकशून्यत्वं ग्राह्यं तद्ग्राहकस्य चेत्। ग्राह्यग्राहकभावः स्यात् अन्यथा तदशून्यता ॥१४९॥" तत्त्वार्थश्लो० पृ० ८१। ३ "तस्मान्नैकान्ततो भ्रान्तिर्नासत्संवृतिरेव वा। अतश्चार्थबलायातमनेकात्मप्रशंसनम् ॥ ९१ ॥" न्यायवि० पृ० २०६ उ०। अस्य च शून्यवादस्य 'निरालम्बनवादः' 'बाह्यार्थनिषेधवादः' इत्यादिरूपेण प्रतिविधानं निम्नग्रन्थेषु द्रष्टव्यम्—मीमांसासूत्र १।१।५। शाबरभा०, बृहती, पञ्जिका, शास्त्रदी०, मीमांसाश्लो० शून्यवाद। विधिवि० न्यायकणिका पृ० १८६। न्यायसूत्र, भाष्य, ४।२।२६। न्यायवा० पृ० ५१९। न्यायवा० ता० टी० पृ० ६५३। न्यायमं० पृ० ५४७। आप्तमी० कारि० १२, अष्टश०, अष्टसह०, पृ० ११५। युक्त्यनु० पृ० ५२। तत्त्वार्थश्लो० पृ० १४३। प्रमेयक० पृ० २५ उ०। सन्मति० टी० पृ० ३६६। स्या० रत्ना० पृ० १७९। स्या० मं० कारि० १७। ४—त्मस्वरूपस्य भां०। ५ द्वे विद्ये वेदितव्ये शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। ब्रह्मबिन्दूपनि० २२। 'द्वे ब्रह्मणी'—न्यायमं० पृ० ५३६। तत्त्वार्थश्लो० पृ० १०५।

बाह्याध्यात्मिकार्थेषूत्पद्यमानस्याऽस्य शब्दानुविद्धत्वेनैवोत्पत्तेः, तत्संस्पर्शवैकल्ये प्रत्ययानां[1] प्रकाशमानताया दुर्घटत्वात्। वाग्रूपता हि शाश्वती प्रत्यवमर्शिनी च, तदभावे तेषां नापरं रूपमवशिष्यते। तदुक्तम्—

"न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिवाऽऽभाति सर्वं शब्दे प्रतिष्ठितम्[2]॥
वाग्रूपता[3] चेदुत्क्रामेद् अवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥" [वाक्यप० १।१२४-२५।] इति।

सकलव्यवहारोऽपि शब्दानुविद्ध एवाऽनुभूयते, न हि 'भोक्ष्ये, दास्यामि' इत्याद्यनुल्लिखितशब्दः कश्चिदपि स्वयं कार्यनिर्वर्त्तनाय यतते, परं वा 'देहि' इत्यादिशब्दं विना प्रवर्तयति। जीवेतररूपाविर्भावोऽपि शब्दायत्त एव; तथाहि—सुप्तावस्थायामनुल्लिखितशब्दरूपत्वात् मृतान्न कश्चिद्विशिष्यते, तदुत्तरकालं तु कुतश्चिच्छब्दात् प्रबुद्धः पुरुषः शब्देनैवाऽन्तर्जल्पात्मना आत्मानमनुदधानो जीवितमुपयाति, तदुपहितजीवितात् सकलाः शब्दभावनाः 'अहमिदमनुतिष्ठामि' इत्यादिरूपा विवर्तन्ते, ताश्च नानाविषया विवर्तमानाः स्वस्वविषयानर्थान् आविर्भावयन्ति। यदा तु पुरुषेणोच्चारितः शब्दः समाविर्भूय तिरोभवति तदा स्वग्रन्थिभूतमर्थमपि तिरोभावयति ज्योत्स्नामिव शशाङ्कः। ननु च अद्वयरूपे तत्त्वे कथमाविर्भाव-तिरो-

---

१ प्रत्ययानाम्। २ 'अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।' वाक्यप० १।१२४। सन्मति० टी० पृ० ३८०। स्या० रत्ना० पृ० ७९। शास्त्रवा० टी० पृ० २३६ पू०। स्याद्वादमं० पृ० १०६। न्यायवि० टी० टि० पृ० २०। 'सर्वं शब्देन वर्तते' तत्त्वसं० पं० पृ० ६८। 'सर्वं शब्देन जायते' अनेकान्तजय० पृ० ४१ उ०। प्रकृतपाठश्च—तत्त्वार्थश्लो० पृ० २४०। प्रमेयक० पृ० ११ उ०। 'अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते' न्यायमं० पृ० ५३२। स्पन्दका० व्या० पृ० ५१। 'अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते' मीमां० श्लो० टी० प्रत्यक्षसू० श्लो० १७६। ३ 'वाग्रूपता चेद् व्युत्क्रामेत्' सन्मति० टी० पृ० ३८०। अनेकान्तजय० पृ० ४१ उ०। नयोप० वृ० पृ० ७५ उ०। शास्त्रवा० टी० पृ० २३६ पू०। 'न हि बोधः प्रकाशेत' स्या० रत्ना० पृ० ८९। प्रकृतपाठस्तु—तत्त्वार्थश्लो० पृ० २४०। न्यायमं० पृ० ५३२। स्पन्दका० व्या० पृ० ५१। प्रमेयक० पृ० ११ उ०। न्यायवि० टी० टि० पृ० २०। "·····वाग्रूपतायां च सत्यां उत्पन्नोऽपि प्रकाशो विशेषवाग्रूपतामस्वीकुर्वन् प्रकाशक्रियासाधनतायां न व्यवतिष्ठते। सा हि वाग्रूपता हि प्रत्यवमर्शः सविकल्पकज्ञानं तत्सम्पादिका इत्यर्थः। तदेव च प्रकाशनक्रियासाधनमित्यर्थः।" वाक्यप० टी० १।१२५। ४—व्दस्वरूप—ब०, ज०। ५ कुतश्चिद् बुद्धः भां०। "सा सर्वविद्याशिल्पानां कलानाञ्चोपबन्धिनी। तद्वशादभिनिष्पत्तौ सर्वं वस्तु विभज्यते॥ १२६॥ सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते। तन्मात्रामप्यतिक्रान्ते चैतन्यं सर्वजन्तुषु॥ १२७॥ अर्थक्रियासु वाक् सर्वा समीहयति देहिनः। तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्॥ १२८॥" वाक्यप० प्र० कां०।

भावादिरूपो भेदप्रपञ्चप्रतिभासः स्यात् ? इति न चेतसि विधेयम्; अविद्यातः तत्र तत्प्रतिभासाऽविरोधाद् आकाशवत्। यथैव हि तिमिरोपहतलोचनो जनो विशुद्धमप्याकाशं विचित्ररेखानिकरकरम्बितमिव मन्यते तथा अनादिनिधनमभिन्नस्वभावमपगतनिखिलभेदप्रपञ्चमपि शब्दब्रह्म अविद्यातिमिरोपहतो जनः आविर्भावादिभेदप्रपञ्चान्वितमिव प्रतिपद्यते। उक्तञ्च—

"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः । ५
सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥
तथेदममलं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं प्रपश्यति ॥" [बृहदा० भा० वा० ३।५।४३,४४।] इति।

सकलाऽविद्याविलासविलये तु योगिनः तत्प्रपञ्चानन्वितं यथावत्तत्स्वरूपं प्रतिपद्यन्ते। यथा च वीचीतरङ्गबुद्बुदफेनरूपो नीरविकारः सारभूतममलं जलम् आविर्भाव-तिरोभावार्थमपेक्षते, तथा व्यावहारिकः स्थूलोऽयमकारादिशब्दभेदप्रपञ्चः परमसूक्ष्मप्रतिभासमात्रैकरूपं सर्वशब्दविषयविज्ञानप्रसवनिमित्तं क्वापि अनियमितैकनिजस्वभावं शब्दमयं ब्रह्मापेक्षते। उक्तञ्च— १०

"अनिबद्धैकरूपत्वाद् वीचीबुद्बुदफेनवत् ।
वाचः सारमपेक्षन्ते शब्दब्रह्मोदकाऽद्वयम् ॥" [ ] १५

एवमध्यक्षतः प्रतीयमानमपि शब्दब्रह्म ये अविद्यातिमिरोपहतचेतसः 'तथा' इति नाभ्युपगच्छन्ति विपर्यस्यन्ति च, तान् प्रति इदमुच्यते—ये यदाकारानुस्यूताः ते तन्मयाः यथा घटशरावोदञ्चनादयो मृद्विकारा मृन्मयाः, शब्दाकारानुस्यूताश्च सर्वे भावा इति। न चायमसिद्धो हेतुः; प्रत्यक्षत एवाऽशेषार्थानां शब्दाकारान्वयप्रसिद्धेः प्रतिपादितत्वात्। तत्सिद्धौ च तेषां तन्मयत्वं सिद्धमेव तन्मात्रभावित्वात्तस्य। तद्व्यतिरेकस्य च प्रमाणबाधितत्वात्; तथाहि—न शब्दाद् व्यतिरिच्यतेऽर्थः, तत्प्रतीतावेव प्रतीयमानत्वात्, यत्प्रतीतावेव यत्प्रतीयते न तत्ततो व्यतिरिच्यते २०

१ इति च न चेतसि निधेयम् ब०, ज०। २—चनो वि—आ०, भां०। ३ 'चित्राभिरुपलक्ष्येत्।' बृहदा० भा० वा० पृ० १२४६। 'भिन्नाभिरभिमन्यते' शास्त्रवा० श्लो० ५४४। अष्टसह० पृ० ९३। प्रकृतपाठस्तु तत्त्वसं० पं० पृ० ७२। प्रमेयक० पृ० १२ उ०। न्यायवि० टी० पृ० १६८ पू०। स्या० रत्ना० पृ० ९। नयोप० वृ० पृ० ७६ पू०। ४ 'भेदरूपं प्रकाशते' बृहदा० भा० वा० पृ० १२४६। शास्त्रवा० श्लो० ५४५। 'तथेदममृतं ब्रह्म' 'भेदरूपं विवर्ततः' तत्त्वसं० पं० पृ० ७२। 'भेदरूपं विवर्तते' सन्मति० पृ० ३८३। 'निर्विकल्पमविद्यया' शास्त्रवा० श्लो० ५४५। अष्टसह० पृ० ९३। 'भेदरूपं तु पश्यति' स्या० रत्ना० पृ० ९१। प्रकृतपाठस्तु—प्रमेयक० पृ० १२ उ०। नयोप० वृ० पृ० ९६। ५—दिभेदशब्दप्र—ब०, ज०। ६ उद्धृतश्चैतत्—स्या० रत्ना० पृ० ९१। शास्त्रवा० टी० पृ० २३७ उ०।

यथा शब्दस्यैव स्वरूपम्, शब्दप्रतीतावेव प्रतीयते चार्थः, अतः ततो न व्यतिरिच्यत इति। ततः सिद्धः शब्दस्वभावब्रह्मसद्भावे प्रत्यक्षादिप्रमाणसद्भावः।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[1]–'शब्दस्वभावब्रह्मसद्भावे' इत्यादि; तदसमीचीनम्; यतस्तत्सद्भावः किमिन्द्रियप्रभवप्रत्यक्षतः प्रतीयेत्, अतीन्द्रियात्, स्वसंवेदनाद्वा? तत्राद्यविकल्पोऽयुक्तः; यतः सकलदेशकालार्थाकारनिकरकरम्बितस्वभावं शब्दब्रह्म भवद्भिरभिप्रेतम्। तथाविधस्यैं चास्य सद्भावः श्रोत्रप्रभवप्रत्यक्षात्, इतरेन्द्रियजनिताध्यक्षाद्वा प्रतीयेत्? न तावत् श्रोत्रप्रभवप्रत्यक्षात्; तस्य शब्दस्वरूपमात्रगोचरचारितया अगोचरेण तदाकारनिकरेणान्वितत्वस्य तद्ब्रह्मणि प्रतिपत्तुमसमर्थत्वात्। यद् यदगोचरो न तत्तेनान्वितत्वं कस्यचित् प्रतिपत्तुं समर्थम् यथा चक्षुर्ज्ञानं रसेन, अगोचरश्च तदाकारनिकरः श्रोत्रज्ञानस्येति। तदगोचरेणापि तेन तदन्वितत्वप्रतिपत्तौ अतिप्रसङ्गः, सर्वस्य सर्वेणान्वितत्वप्रतिपत्तिप्रसक्तेः। एतेन इन्द्रियान्तरजनिताऽध्यक्षादपि तत्प्रतिपत्तिः प्रत्युक्ता; शब्दाऽगोचरतया तस्यापि तत्प्रतिपत्तावसमर्थत्वात्। तन्न इन्द्रियप्रत्यक्षात् प्रतिनियतरूपादिविषयव्यतिरेकेण अपरं शब्दब्रह्म प्रतीयते।

५ शब्दाद्वैतस्य प्रतिविधानम्–

नाप्यतीन्द्रियप्रत्यक्षात्; तस्यैवात्राऽसंभवात्। योगिनां योगजं तत्संभवतीति चेत्; न; योगि-योग-तत्प्रभवप्रत्यक्षाणां संभवे अद्वैताऽभावप्रसङ्गात्। न तत्प्रसङ्गः योग्यवस्थायाम् आत्मज्योतीरूपस्यास्य स्वयं प्रकाशनात्; इत्यपि मनोरथमात्रम्; तदवस्था-रूप-प्रकाशनत्रयसद्भावे अद्वैताऽभावस्य तदवस्थत्वात्। किञ्च, योग्यवस्थायां तस्य तद्रूपप्रकाशनेन ततः प्राक् तद्रूपं प्रकाशते, न वा? यदि प्रकाशते; तदाऽयत्नसिद्धः सर्वदा सर्वेषां मोक्षः स्यात्, ज्योतिःस्वभावब्रह्मप्रकाशो हि मोक्षः, स च अयोग्यवस्थायामपि एवं प्रसज्येत। अथ न प्रकाशते; तदा तत्किमस्ति, न वा? यदि नास्ति; कथं तन्नित्यम् कादाचित्कत्वात्? यत् कादाचित्कम् न तन्नित्यम् यथा अविद्या, कादाचित्कश्च ज्योतिःस्वरूपं ब्रह्मण इति। तदनित्यत्वे च शब्दब्रह्मणोऽप्यनित्यत्वप्रसङ्गः तन्मयत्वात्तस्य, अतो द्वैतसिद्धिरप्रतिहतप्रसरा प्रसज्यते, अद्वैतविनाशे द्वैतसिद्धेरवश्यम्भावित्वात्। अथास्ति; कस्मान्न प्रकाशते–ग्राहकाभावात्, अविद्याभिभूतत्वाद्वा? तत्राद्यपक्षोऽनुपपन्नः; ब्रह्मण एव तद्ग्राहकत्वात्, तस्य च नित्यतया सदा सत्त्वात्।

---

१ पृ० १३९ पं० १९। २ "न तत् प्रत्यक्षतः सिद्धमविभाव्यमभासनात्। नित्यादुत्पत्त्ययोगेन कार्यलिङ्गञ्च तत्र न ॥ १४७ ॥" तत्त्वसं०। "ब्रह्मणो न व्यवस्थानमक्षज्ञानात् कुतश्चन। स्वप्नादाविव मिथ्यात्वात् तस्य साकल्यतः स्वयम् ॥ ९६ ॥" तत्त्वार्थश्लो० पृ० २४०। प्रमेयक० पृ० ११ उ०। सन्मति० टी० पृ० ३८४। स्या० रत्ना० पृ० ९८। ३–विधस्यास्य आ०। ४ "यद्येवं प्रागयोगित्वावस्थायां किं तस्य रूपमिति वाच्यम्? यदि सदैव ज्योतीरूपं तदा तर्हि न कदाचिदयोगित्वावस्थाऽस्ति सदैव आत्मज्योतीरूपत्वाद् ब्रह्मणः। ततश्च अयत्नतः सर्वेषां मोक्षप्रसङ्गः।" तत्त्वसं० पं० पृ० ७४। सन्मति० टी० पृ० ३८५। स्या० रत्ना० पृ० ९९।

द्वितीयपक्षोऽप्यसुन्दरः; अविद्याया विचार्यमाणाया अनुपपद्यमानत्वात्। सा[1] हि ब्रह्मणो व्यतिरिक्ता, अव्यतिरिक्ता वा ? यदि व्यतिरिक्ता; किमसौ वस्तु, अवस्तु वा स्यात् ? न तावदवस्तु; अर्थक्रियाकारित्वाद् ब्रह्मवत्, तत्कारित्वेऽप्यस्याः 'अवस्तु' इति नामान्तरकरणे नाममात्रमेव भिद्येत। अथ अर्थक्रियाकारित्वमप्यस्या नेष्यते तत्कथं वस्तुत्वापत्तिः ? कथमेवम् *'अविद्यया कलुषत्वमिवापन्नम्'* इत्यादिवचो घटेत ? आकाशे[2] च वितथप्रतिभासहेतुभूतं वास्तवमेव तिमिरं प्रसिद्धम्, अविद्यायाश्च अवास्तवत्वेन विचित्रप्रतिभासहेतुत्वाऽनुपपत्तितो दृष्टान्त-दार्ष्टान्तिकयोः साम्याऽसंभवात् *'यथा विशुद्धमाकाशम्'* इत्याद्यपि दुर्घटमेव। नै[3] चाऽनाधेयाऽप्रहेयातिशयस्य ब्रह्मणः तद्वशात् तथाप्रतिभासो युक्तोऽतिप्रसङ्गात्। नाप्यवस्तुवशाद् वस्तुनोऽन्यथाभावो भवति, अतिप्रसङ्गादेव। अथ वस्तु; तन्न; अभ्युपगमक्षतिप्रसक्तेः, ब्रह्मा-ऽविद्यालक्षणवस्तुद्वयप्रसिद्धितोऽद्वैताऽभावप्रसङ्गाच्च। अथाऽव्यतिरिक्ता; तर्हि ब्रह्मणोऽपि मिथ्यात्वप्रसक्तिः, मिथ्यारूपायाः अविद्यातोऽव्यतिरिक्तत्वात् तत्स्वरूपवत्, इति लाभमिच्छतो मूलोच्छेदः स्यात्। अविद्याया वा सत्यत्वप्रसङ्गः; सत्यस्वभावाद् ब्रह्मणोऽव्यतिरिक्तत्वात् तत्स्वरूपवत्, अतः कथमस्याः मिथ्याप्रतीतिहेतुत्वम् ? यत् सत्यम् न तन्मिथ्याप्रतीतिहेतुः यथा ब्रह्म, सत्या च ब्रह्मणोऽव्यतिरिक्तत्वेनाऽविद्येति। अस्तु वा यथाकथञ्चिदविचारितरमणीयस्वभावा अविद्या, तथापि न तया तत्स्वभावस्यास्य अभिभवः; दुर्बलस्य हि बलवताऽभिभवो दृष्टः यथा सवित्रा तारानिकरस्य, न चाऽविद्याया बलवत्त्वमस्ति अवस्तुत्वात् वाजिविषाणवत्। अतोऽसत्त्वादेव अयोग्यवस्थायाम् आत्मज्योतिःस्वरूपस्य शब्दब्रह्मणोऽप्रतिभासः। तत्र[4] तद्रूपस्यास्याऽसत्त्वे च योग्यवस्थायां कुतः सत्त्वं स्यात् यतोऽतीन्द्रियप्रत्यक्षात् तत्प्रतीयेत ?

एतेन स्वसंवेदनादपि[5] तत्प्रतिपत्तिः प्रत्याख्याता; आत्मज्योतिःस्वभावस्यास्य स्वप्नेऽपि संवेदनाऽगोचरत्वात्, तद्गोचरत्वे वा अनुपायसिद्ध एव अखिलप्राणिनां मोक्षः स्यात्, तथाविधस्य हि शब्दब्रह्मणः स्वसंवेदनं[6] यत् तदेव मोक्षो भवतामभिमतः। न च घटादिशब्दोऽर्थो

---

१ "सा हि शब्दब्रह्मणः सकाशाद् भिन्ना भवेदभिन्ना वा ? भिन्ना चेत् किमसौ वस्तु, अवस्तु वा स्यात् ?" स्या० रत्ना० पृ० ९९। शास्त्रवा० टी० २३७ उ०। २ "आकाशे च वितथप्रतिभासहेतुभूतं वास्तवमेवास्ति तिमिरमिति न दृष्टान्तदार्ष्टान्तिकयोः साम्यम्।" प्रमेयक० पृ० १३ पू०। स्या० रत्ना० पृ० ९९। ३ "अथ व्यतिरिक्ताऽविद्या अङ्गीक्रियते एवमपि नित्यत्वाद् अनाधेयातिशयस्य ब्रह्मणः सा न तत् किञ्चित् करोति इति न युक्तम् अविद्यावशात् तथा प्रतिभासनम्।" तत्त्वसं० पं० पृ० ७४। सन्मति० टी० पृ० ३८५। स्या० रत्ना० पृ० ९९। ४ तत्र चैतद्रूप–भां०। ५ स्यादेतत्–स्वसंवेदनप्रत्यक्षत एव तत्सिद्धं ज्ञानात्मरूपत्वात्; तथाहि–ज्योतिः तदेव शब्दात्मकत्वात् चैतन्यरूपत्वाच्च इति, तदेतत् स्वसंवेदनविरुद्धम्……" तत्त्वसं० पं० पृ० ७३। प्रमेयक० पृ० ११ उ०। सन्मति० टी० पृ० ३८४। ६ स्वयं संवेदनं ब०, ज०।

वा स्वसंविदितस्वभावः, यतस्तदन्वितत्वं स्वसंवेदनतः सिद्धयेत्, अस्वसंविदितस्वभावतयैवास्य प्रतिप्राणि प्रसिद्धत्वात्।

किञ्च, शब्दार्थयोः सम्बन्धे सति शब्देनान्वितत्वमर्थस्य कुतश्चित् प्रमाणात् प्रतीयेत, असति वा? न तावदसति; अतिप्रसङ्गात्, 'यद् येनासम्बद्धं न तत्तेनाऽन्वितम् यथा सह्येन विन्ध्यः, असम्बद्धश्च अर्थेन शब्दः' इत्यनुमानविरोधानुषङ्गाच्च। अथ सति सम्बन्धे; ननु कोऽयं तस्य तेन सम्बन्धः—संयोगः, तादात्म्यम्, विशेषणीभावः, वाच्यवाचकभावो वा? न तावत् संयोगः; विभिन्नदेशत्वात्, ययोर्विभिन्नदेशत्वं न तयोः संयोगः यथा मलय-हिमाचलयोः, विभिन्नदेशत्वञ्च शब्दाऽर्थयोरिति। न चेदमसिद्धम्; शब्दस्य श्रोत्रप्रदेशे अर्थस्य च पुरोदेशे प्रतिभासमानत्वात्, तत्सम्बन्धाभ्युपगमे च अनयोर्द्रव्यान्तरत्वसिद्धिप्रसङ्गात् कथं तदद्वैतसिद्धिः स्यात्?

तादात्म्याभ्युपगमोऽप्ययुक्तः; विभिन्नेन्द्रियग्राह्यत्वात्, ययोर्विभिन्नेन्द्रियग्राह्यत्वं न तयोस्तादात्म्यम् यथा रूप-रसयोः, विभिन्नेन्द्रियग्राह्यत्वञ्च शब्दार्थयोरिति। न चेदमसिद्धम्; शब्दाकाररहितस्य घटादेः लोचनविज्ञाने प्रतिभासनात् तद्रहितस्य तु शब्दस्य श्रोत्रज्ञाने। तथाभूतयोरप्यनयोस्तादात्म्याभ्युपगमे अतिप्रसङ्गात्। शब्दात्मकत्वे चार्थानां शब्दप्रतीतौ सङ्केताऽग्राहिणोऽपि अर्थे सन्देहो न स्यात् तद्वत् तस्यापि प्रतिपन्नत्वात्, अन्यथा तत्तादात्म्यानुपपत्तिः। क्षुरा-ऽग्नि-पाषाणादिशब्दश्रवणाच्च कर्णस्य कर्त्तन-दाहा-ऽभिघातादिप्रसङ्गः, अन्यथा तत्तादात्म्यविरोधः। यो यत्साध्यप्रयोजनं न निर्वर्तयति नासौ तेन तादात्म्यमनुभवति यथा रूपेण रसः, न निर्वर्तयति च अर्थसाध्यप्रयोजनं दाहादिकं शब्द इति। तथा, नास्ति शब्दार्थयोस्तादात्म्यं विभिन्नदेश-काल-आकारत्वात्, यत् तथाविधं न तत्र तादात्म्यम् यथा घट-पटादौ, तथाविधौ च शब्दार्थाविति। न च विभिन्नदेशत्वं तत्रासिद्धम्; प्राक् प्रसाधितत्वात्। नापि विभिन्नकालत्वम्; घटाद्यर्थानां तच्छब्देभ्यः प्रागपि सत्त्वप्रतीतेः। नापि विभिन्नाकारत्वम्; तत्र तस्य सकलजनप्रसिद्धत्वात्। ननु तत्तादात्म्यासम्भवे कथमतोऽर्थप्रतीतिः? इत्यप्यसाम्प्रतम्; तदभावेऽप्यस्याः सङ्केतसामर्थ्यादुपपद्यमानत्वात्। वृद्धैंपरम्परातो हि शब्दानां सहजयोग्यतायुक्तानामर्थप्रतीतिप्रसाधकत्वम् काष्ठादीनां पाकप्रसाधकत्ववत्। तन्न तत्र तादात्म्यं घटते।

नापि विशेषणीभावः; सम्बन्धान्तरेणासम्बद्धानां सह्यविन्ध्यादिवत् तद्भावस्यानुपपत्तेः। वाच्यवाचकभावस्तु शब्दार्थयोः भेदमेव प्रसाधयति, तमन्तरेण अनयोः तद्भावाऽनुपपत्तेः। तदेवं

---

१ तत्सम्बन्धार्थाभ्युपगमे वा तयोः भां०। २ "न च शब्दस्य अर्थविशेषणत्वेन प्रतीतेस्तदात्मकता; देशभेदेन शब्दार्थयोः उपलब्धेः।" सन्मति० टी० पृ० ३८६। ३ शब्दार्थयोश्च तादात्म्ये क्षुराग्निमोदकादिशब्दोच्चारणे आस्यपाटनदहनपूरणादिप्रसक्तिः।" सन्मति० टी० पृ० ३८६। शास्त्रवा० टी० पृ० २३७ पू०। "यदाहुर्भद्रबाहुस्वामिपादाः—अभिहाणं अभिहेयाउ होइ भिण्णं अभिण्णं च। खुरअग्गिमोयगुच्चारणम्मि जम्हा उ वयणसवणाणं॥ नवि छेओ नवि दाहो ण पूरणं तेण भिन्नं तु।" स्या० मं० कारि० १४। ४ शब्दपरंपरा—आ०।

शब्दार्थयोः अद्वैताविरोधिनः सम्बन्धस्य कस्यचिदपि विचार्यमाणस्याऽनुपपत्तेः न शब्देनान्वितत्वमर्थस्य घटते। प्रतीत्या च शब्दान्वितत्वं ज्ञाने परिकल्प्यते[1], सा चेदन्यत्राप्यस्ति तदपि परिकल्प्यताम्[2] अविशेषात्, तथा च *'न सोऽस्ति प्रत्ययो लोके'* इत्याद्ययुक्तम्। प्रसाधितञ्च लोचनाद्यध्यक्षे शब्दसंस्पर्शाभावेऽपि स्वार्थप्रकाशकत्वं सविकल्पकसिद्धिप्रघट्टके[4] इत्यलमतिप्रसङ्गेन।

यदप्युक्तम्[5]–'सकलव्यवहारोऽपि' इत्यादि; तदप्ययुक्तम्; शाब्दव्यवहारस्यैव तदनुविद्धत्वेन अनुभवात्, न चक्षुरादिप्रभवस्य। ५

यच्चान्यदुक्तम्[6]–'सुप्तावस्थायाम्' इत्यादि; तदप्युक्तिमात्रम्; अद्वैते सुप्तेतरावस्थाया एवाऽसंभवात्, तत्संभवे अद्वैतविरोधात्। अविद्यातस्तत्र तदविरोधः; इति श्रद्धामात्रम्; अविद्याया भेदप्रतिभासहेतुत्वस्य प्रागेव कृतोत्तरत्वात्।

यदप्युक्तम्[7]–'ये यदाकारानुस्यूताः' इत्यादि; तदप्यसारम्; शब्दाकारानुस्यूतत्वस्य असिद्धेः। प्रत्यक्षेण हि नीलादिकं प्रतिपद्यमानः प्रतिपत्ता शब्दाकारानन्वितमेव प्रतिपद्यते, कल्पितत्वाच्च अस्याऽसिद्धिः। शब्दाकारान्वितरूपाधाराऽर्थाभावेऽपि हि ते तदन्वितत्वेन त्वया कल्प्यन्ते, तथाभूताच्च हेतोः कथं पारमार्थिकं ब्रह्म सिद्ध्येत्। साध्य-साधनविकलश्च दृष्टान्तः; घटादीनामपि सर्वथैकमयत्वस्य एकान्वितत्वस्य चाऽसिद्धेः। न खलु भावानां सर्वथैकरूपानुगमोऽस्ति, सर्वार्थानां समानाऽसमानपरिणामात्मकत्वात्। १०, १५

यदप्यभिहितम्[8]–'न शब्दाद् व्यतिरिच्यतेऽर्थः' इत्यादि; तत्र पक्षस्य प्रत्यक्षबाधा, शब्दाद् देशादिभेदेनार्थस्य प्रत्यक्षतः प्रतीतेः। 'तत्प्रतीतावेव प्रतीयमानत्वात्' इति हेतुश्चाऽसिद्धः; लोचनादिज्ञानेन शब्दाऽप्रतीतावपि अर्थस्य प्रतीयमानत्वात्। कथमन्यथा बधिरस्य चक्षुरादिप्रभवप्रत्यक्षाद् रूपाद्यर्थप्रतीतिः स्यात्? तन्न शब्दस्वभावस्य ब्रह्मणः सद्भावः कुतश्चित्प्रमाणाद् घटते। २०

अस्तु वा; तथापि शब्दपरिणामत्वात्[9] जगतः शब्दमयत्वं स्यात् मृत्परिणामत्वाद् घटस्य मृण्मयत्ववत्, शब्दादुत्पत्तेर्वा यथा अन्नमयाः प्राणा इति हेतौ मयड् विधानात्? तत्राद्यपक्षोऽनुपपन्नः; परिणामस्यैवाँत्राऽनुपपत्तेः। शब्दात्मकं हि ब्रह्म नीलादिरूपतां प्रतिपद्यमानं

---

१ परिकल्प्येत ज०। २ पृ० १४० पं० ८। ३ पृ० १४० पं० १०। ४ पृ० १४१ पं० १७। ५ पृ० १४१ पं० २०। ६ "अत्र कदाचित् शब्दपरिणामरूपत्वाद्वा जगतः शब्दमयत्वं साध्यत्वेन इष्टम्, कदाचिच्छब्दादुत्पत्तेर्वा यथा अन्नमयाः प्राणाः इति हेतौ मयड् विधानात्। अत्र न तावदाद्यः पक्षः; परिणामस्यैवानुपपत्तेः। तथाहि–शब्दात्मकं ब्रह्म नीलादिरूपतां प्रतिपद्यमानं कदाचिन्निजं स्वाभाविकं शब्दरूपं परित्यज्य प्रतिपद्येत, अपरित्यज्य वा?..." तत्त्वसं० पं० पृ० ६८। प्रमेयक० पृ० १२ उ०। सन्मति० टी० पृ० ३८०। स्या० रत्ना० पृ० १००। ७–स्यैवानुप–ब०, ज०। † पृ० ४७।

स्वाभाविकं शब्दरूपं परित्यज्य प्रतिपद्येत, अपरित्यज्य वा ? प्रथमपक्षे अस्याऽनादिनिधनत्व-विरोधः, पौरस्त्यस्वभावविनाशात्। द्वितीयपक्षे तु नीलादिसंवेदनसमये बधिरस्यापि शब्दसंवेदनप्रसङ्गः नीलादेस्तदव्यतिरेकात्। यद् यदव्यतिरिक्तं तत् तस्मिन् संवेद्यमाने संवेद्यते यथा नीलादिसंवेदनावस्थायां तस्यैव नीलादेरात्मा, नीलाद्यव्यतिरिक्तश्च शब्द इति। तस्याऽसंवेदने वा नीलादेरप्यसंवेदनप्रसङ्गः तादात्म्याऽविशेषात्। अन्यथा विरुद्धधर्माध्यासात् तस्य ततो भेदाऽनुषङ्गः, न हि एकस्यानंशस्यैकदा एकप्रतिपत्रपेक्षया ग्रहणमग्रहणञ्च युक्तम् विरोधात्। विरुद्धधर्माध्यासेऽपि अत्राऽभेदे हिमवद्विन्ध्यादीनामप्यभेदानुषङ्गः। किञ्च, शब्दात्मा परिणामं गच्छन् प्रतिपदार्थं भेदं प्रतिपद्येत, न वा ? तत्राद्यविकल्पे शब्दब्रह्मणोऽनेकत्वप्रसङ्गः, विभिन्नानेकस्वभावाऽर्थात्मकत्वात् तत्स्वरूपवत्। द्वितीयविकल्पे तु सर्वेषां नीलादीनां देश-काल-स्वभाव-व्यापारा-ऽवस्थाभेदाऽभावः प्रतिभासभेदाऽभावश्चानुषज्यते, एकस्वभावात् शब्दब्रह्मणोऽभिन्नत्वात् तत्स्वरूपवत्। तन्न शब्दपरिणामत्वाज्जगतः शब्दमयत्वं घटते।

नापि शब्दोदुत्पत्तेः ; तस्य नित्यत्वेन अविकारित्वात्, अविकारिणश्च क्रमेण कार्योत्पादकत्वानुपपत्तेर्युगपदेवाऽखिलकार्याणामुत्पत्तिप्रसङ्गः। कारणवैकल्याद्धि कार्याणि विलम्बन्ते

---

१ "इति सञ्चक्षते येऽपि ते वाच्याः किमिदं निजम्। शब्दरूपं परित्यज्य नीलादित्वं प्रपद्यते ॥ १२९ ॥ न वा तथेति यद्याद्यः पक्षः संश्रीयते तदा। अक्षरत्ववियोगः स्यात् पौरस्त्यात्मविनाशतः ॥ १३० ॥ अथाप्यनन्तरः पक्षः तत्र नीलादिवेदने। अश्रुतेरपि विस्पष्टं भवेत् शब्दात्मवेदनम् ॥ १३१ ॥ येन शब्दमयं सर्वं मुख्यवृत्त्या व्यवस्थितम्। शब्दरूपापरित्यागे परिणामाऽनिधानतः ॥ १३२ ॥ अगौणे चैवमेकत्वे नीलादीनां व्यवस्थितेः। तत्संवेदनवेलायां कथं नास्त्यस्य वेदनम् ॥ १३३ ॥ अस्याऽवित्तौ हि नीलादेरपि न स्यात् प्रवेदनम्। ऐकात्म्याद् भिन्नधर्मत्वे भेदोऽत्यन्तं प्रसज्यते ॥१३४॥ विरुद्धधर्मसंगो हि बहूनां भेदलक्षणम्। नान्यथा व्यक्तिभेदानां कल्पितोऽपि भवेदसौ ॥१३५॥" तत्त्वसं०। २ च आ०। ३ "नहि एकस्य एकदा एकप्रतिपत्रपेक्षया ग्रहणमग्रहणञ्च युक्तम् एकत्वहानिप्रसङ्गात्।" तत्त्वसं० पं० पृ० ६९। ४ "प्रतिभावञ्च यद्येकः शब्दात्मा भिन्न इष्यते। सर्वेषामेकदेशत्वम् एकाकारा च विद् भवेत् ॥ १३६ ॥ प्रतिव्यक्ति तु भेदेऽस्य ब्रह्मानेकं प्रसज्यते। विभिन्नानेकभावात्मरूपत्वाद् व्यक्तिभेदवत् ॥ १३७ ॥" तत्त्वसं०। "स हि शब्दात्मा परिणामं गच्छन् प्रतिपदार्थं भेदं वा प्रतिपद्यते, न वा ?" तत्त्वसं० पं० पृ० ७०। प्रमेयक० पृ० १२ उ०। सन्मति० टी० पृ० ३८२। स्या० रत्ना० पृ० १०१। ५ "अथापि कार्यरूपेण शब्दब्रह्ममयं जगत्। तथापि निर्विकारत्वात् ततो नैव क्रमोदयः ॥ १४० ॥"...एवमपि शब्दस्य नित्यत्वेन अविकारित्वात् ततः क्रमेण कार्योदयो न प्राप्नोति सर्वेषामविकलाप्रतिबद्धसामर्थ्यकारणात् युगपदेव उत्पादः स्यात्। कारणवैकल्याद्धि कार्याणि प्रविलम्बन्ते, तच्चेदविकलं तत् किमपरमपेक्ष्येरन् येन युगपन्न भवेयुः ?" तत्त्वसं० पं० पृ० ७१। प्रमेयक० पृ० १२ उ०। सन्मति० टी० पृ० ३८२। स्या० रत्ना० पृ० १०१।

नान्यथा, तच्चेदविकलम्, किमपरं तैरपेक्ष्यम् येन युगपन्न भवेयुः ? तदेवं[1] शब्दब्रह्मणः सद्भावग्राहकप्रमाणस्य जगत्प्रपञ्चरचनानिमित्तत्वस्य चाऽसिद्धेः न तदभ्युपगमेन अबाधबोधाधिरूढस्यार्थस्यापलापो युक्तः । नापि परमब्रह्माभ्युपगमेन तस्यापि तदसिद्धेरविशेषात् ।

ननु "सर्वं[2] खल्विदं ब्रह्म" [छान्दोग्यो०] "नेह[3] नानास्ति किञ्चन" [बृहदा०]
"आरामं[4] तस्य पश्यन्ति न तं पश्यति कश्चन" [बृहदा०] ५

परमब्रह्मवादिनो वेदान्तिनः पूर्वपक्षः—

इत्याद्युपनिषद्वाक्यात् परमब्रह्मणः सद्भावसिद्धेः चेतनाऽचेतनपरिणामेन जगत्प्रपञ्चरचनानिमित्तत्वमुपपद्यते । चेतनो हि परिणामोऽस्य कर्मात्मानः, अविप्रतिपत्त्या तत्र सर्वेषां चैतन्यान्वयप्रसिद्धेः, अचेतनस्तु पृथिव्यादिमहाभूतरूपः । न चैकत्वे ब्रह्मणः कथमयं नानारूपः परिणामः ? इत्यभिधातव्यम्; सुवर्ण[5]-क्षीरादेरेकत्वेऽपि कटक-दध्यादिविचित्रपरिणामोपलम्भात्, १०
'तदेवेदं सुवर्णं कटकादिरूपतया परिणतम्', 'तदेवेदं क्षीरं दधीभूतम्' इति प्रतीतेः । क्षीरदध्नोस्तादात्म्ये किन्न युगपत्प्रतिभासः कटकसुवर्णवत् नीलपीताद्याकारैकवस्तुवद्वा ? इत्यप्ययुक्तम्; देशचित्रस्यैवाऽर्थस्य युगपत्प्रतिभासार्हत्वात्, कालचित्रस्य तु स्वात्मभूतेनैव क्रमेणावष्टब्धत्वान्न युगपत्प्रतिभासः ।

नन्वेकस्य कथं क्रमः ? अनेकस्य कथम् ? न हि घटपटादीन् विहाय अन्यः कश्चित्क्रमोऽ १५
स्ति । स हि तेषां स्वरूपम्, धर्मो वा स्यात् ? स्वरूपञ्चेत्; किमेकैकशः, अनेकेषां वा ? यदि एकैकशः; घटप्रतीतावपि क्रमप्रतीतिः स्यात् । अनेकेषां चेत्; तर्हि युगपत्प्रतिभासानामपि अनेकार्थानां क्रमप्रतीतिः स्यात् । अथ धर्मः; स किं कारणान्तराधीनः, प्रमातृ[6]कल्पनाय-

---

१ शब्दब्रह्मवादस्य विविधभङ्ग्या खण्डनं निम्नग्रन्थेषु प्रेक्षणीयम्—मीमांसाश्लो० प्रत्यक्षसू० श्लो० १७६ । न्यायमं० पृ० ५३१ । तत्त्वसं० पृ० ६७ । तत्त्वार्थश्लो० पृ० २४० । प्रमेयक० पृ० ११ उ० । सन्मति० टी० पृ० ३८०, ४९४ । स्या० रत्ना० पृ० ८८ । शास्त्रवा० टी० पृ० २३५ उ० । २ "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीताथ···" छान्दोग्योप० ३।१४।१ । सर्वं हि खल्विदं आ०, भां० । "ब्रह्म खल्विदं वाव सर्वम्···।" मैत्र्युप० ४।६। ३ "मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥" बृहदा० ४।४।१९ । "मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥" कठोप० ४।११ । "साक्षाच्च 'एकमेवाद्वितीयम्' 'नेह नानास्ति किञ्चन' 'मृत्योः स मृत्युमाप्नोति' इत्यादिभिः बहुभिः वचोभिः ब्रह्मातिरिक्तस्य प्रपञ्चस्य प्रतिषेधात् चेतनोपादानमेव जगत् भुजङ्ग इवारोपितो रज्जूपादान इति सिद्धान्तः ।" ब्रह्मसू० शां० भा० भाम० १।१।५ । ४ "आराममस्य पश्यन्ति न तं पश्यति कश्चन" बृहदा० ४।३।१४। अष्टसह० पृ० १६० । प्रमेयक० पृ० १७ उ० । स्या० रत्ना० पृ० १९१ । स्याद्वादमं० पृ० ९९ । प्रमेयरत्नमा० पृ० ७५ । ५ "उपसंहारदर्शनान्नेति चेन्न, क्षीरवद्धि ।" ब्रह्मसू० २।१।२४ । "···तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवत् विचित्रपरिणाम उपपद्यते" ब्रह्मसू० शां० भा० । ६—तृसंक—ब०, ज० ।

त्तो वा ? तत्राद्यपक्षोऽयुक्तः ; तदुत्पत्तौ ज्ञानव्यतिरेकेण कारणान्तरस्याऽनुपलभ्यमानत्वात् । प्रमातृकल्पनायत्तत्वे तु एकत्वेऽप्यसौ न विरोधमध्यास्ते, सर्वत्र तत्कल्पनानुसारेणैव 'क्रमेणैते प्रतिभाताः, युगपदेते प्रतिभाताः' इत्यादिव्यवहारप्रसिद्धेः । ननु चैकत्वे ब्रह्मणो देशकालचित्रता विरुद्ध्यते, तस्यां वा तदेकत्वमिति चेत्; न; चित्रपटादीनां देश-कालवैचित्र्येऽपि एकत्वोपलम्भात् । प्रतिभासभेदोऽपि एकस्य न विरोधमास्कन्दति, निश्चितैकत्वस्यापि पादपस्य दूरासन्नपुरुषापेक्षया विभिन्नप्रतिभासविषयत्वप्रतीतेः । सामर्थ्यभेदोऽपि एकत्वं न विरुणद्धि ; जलनिधेरेकस्यापि वीची-तरङ्ग-बुद्बुद-फेनाद्यनेककार्यकरणे सामर्थ्यभेदाध्यवसायात् ।

न चैकत्वे तस्य विचित्रसृष्टिविधानम् उत्कृष्टाऽपकृष्टप्राण्युत्पादनम् नैर्घृण्यहेतुकनिरतिशयनरकादिदुःखकरणञ्चाऽनुपपन्नम् ; सापेक्षस्य कर्तृत्वात् । स हि कर्मात्मानुष्ठितधर्माधर्मसहायो विचित्रां सृष्टिमुत्पादयति, कर्मात्मानो हि विहित-निषिद्धकर्मानुष्ठातृत्वेन प्रतिप्राणि प्रसिद्धाः । यद्यपि एकरूपब्रह्मविवर्ताः ते, तथापि अविद्यया भेदमिवापादिताः कर्मणां कर्तृत्वेन तत्फलानाञ्च भोक्तृत्वेन अवधार्यन्ते । अतस्तान् पुण्याऽपुण्योपेतान् सार्वज्ञ्यज्ञानेनाऽऽकलय्य उक्तप्रकारं सर्गमारभमाणस्यास्य न नैर्घृण्याद्युपालम्भो ज्यायान् । स्वभावादेव वा उर्णनाभ इवांशूनां कारणान्तरनिरपेक्षं ब्रह्म जगद्वैचित्र्यस्य कारणम् ।

---

१ देशचित्रता काल–भां० । २ "तथाहि–समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनवीचीतरङ्गबुद्बुदादीनामितरेतरविभाग इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते । न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति एवमिहापि । न च भोक्तृभोग्ययोरितरेतरभावापत्तिः । न च परस्माद्ब्रह्मणोऽन्यत्वं भविष्यति..." ब्रह्मसू० शां० भा० २।१।१३। ३ "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ।" ब्रह्मसू० २।१।३४। "...सापेक्षत्वात् ; यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यञ्च, न तु निरपेक्षस्य निर्मातृत्वमस्ति, सापेक्षो हि ईश्वरो विषमां सृष्टिं निर्मिमीते । किमपेक्षत इति चेत् ? धर्माधर्मावपेक्षत इति वदामः । अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिः इति नायमीश्वरस्यापराधः । ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः···एवमीश्वरो देवमनुष्यादिसाधारणं कारणं भवति, देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येव असाधारणानि कर्माणि कारणानि भवन्ति···तथाहि दर्शयति श्रुतिः–एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्यः उन्निनीषत एष उ एवासाधुकर्म कारयति तं यमधो निनीषते (कौ० ब्रा० ३।८।) पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन (बृहदा० ३।२।१३) इति च । स्मृतिरपि प्राणिकर्मविशेषापेक्षमेव ईश्वरस्य अनुगृहीतृत्वं निगृहीतृत्वञ्च दर्शयति 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' (भगवद्गी० ४।११) इत्येवञ्जातीयका ।" शां० भा० २।१।३४। ४–ष्टाप्रकृष्ट–ब०, ज० । ५–द्धधर्मा–भां० । ६ सर्वमार–ब०, ज० । स्वर्गमारभ–भां० । ७ "यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामौषधयः संभवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम् ॥" मुण्डकोपनि० १।१।७। "स यथोर्णनाभिः तन्तूनुच्चरेत् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेव अस्मादात्मनः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति, तस्य उपनिषत्सत्यस्य सत्यमिति प्राणाः वै सत्यं तेषामेष सत्यम् ।" बृहदा० २।१।२०। "य-

यदि चार्थानां भेदो नाऽविद्याकृतः किन्तु वास्तवः, तदा तत्र प्रमाणं वक्तव्यम्–तच्च प्रत्यक्षम्, अनुमानं वा स्यात् ? न तावत्प्रत्यक्षम्; व्यावृत्तिरूपे [1]भेदेऽस्य प्रवृत्त्यनुपपत्तेः, परस्परव्यवच्छेदो हि भेदः 'अयम् अयं न भवति, 'अस्मादयं भिन्नः' इति। स च प्रत्यक्षस्याऽविषयः; विधिविषयत्वात्तस्य, "[2]*आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः*" [ ] इत्यभिधानात्। ५

किञ्च, अर्थानां भेदः क्रमेण गृह्येत, यौगपद्येन वा ? न तावद् यौगपद्येन; तस्य प्रतियोगिग्रहणसापेक्षत्वात्, न च प्रतियोग्यग्रहणे तद्ग्रहणापेक्षो भेदो अर्थस्वरूपग्रहणमात्राद् ग्रहीतुं शक्यः, अतिप्रसङ्गात्। न च आश्रय-प्रतियोगिनोर्युगपद् ग्रहणं संभवति; प्रतियोगिप्रतिपत्तेः भेदाश्रयार्थस्वरूपप्रतिपत्तिपूर्वकत्वात्, तदप्रतीतौ 'अयमस्माद् भिन्नः' इति प्रतीतेरनुपपत्तेः। नापि क्रमेण; इतरेतराश्रयत्वप्रसङ्गात्–घटप्रतिपत्तौ हि तद्व्यवच्छेदेन पटादिप्रतिपत्तिः, तत्प्रतिपत्तौ च पटादिव्यच्छेदेन घटप्रतिपत्तिरिति। तन्न प्रत्यक्षेण भेदप्रतिपत्तिः। १०

नाप्यनुमानेन; अस्य प्रत्यक्षपूर्वकत्वात्। सम्बन्धप्रतिपत्तिपूर्वकं हि अनुमानं प्रवर्तते, न चाऽविषये प्रत्यक्षात् सम्बन्धप्रतिपत्तिर्युक्ता। न च भेदेनाऽविनाभूतं किञ्चिल्लिङ्गमस्ति। न च सुख-दुःखादिप्रतीत्यन्यथानुपपत्त्या आत्मादेर्भेदानुमानं युक्तम्; तस्या मिथ्यारूपत्वात्, अतो भेदोऽप्यपारमार्थिक एव आत्मादेः सिद्ध्येन्न वास्तवः। १५

किञ्च, असौ भेदः पदार्थेभ्यो भिन्नः, अभिन्नो वा स्यात्, उभयरूपः, अनुभयरूपो वा ? यद्याद्यः पक्षः; तत्रापि किमसौ स्वतो भिद्यते, भेदान्तरेण वा ? यदि स्वतः; अर्थैः किमपराद्धम् येनैषां स्वतो भेदो नेष्यते ? अथ भेदान्तरेण; तदा अनवस्था, तस्याप्यपरभेदान्तरेण अर्थेभ्यो भेदप्रसङ्गात्। अथ अभिन्नः; तदा अर्थमात्रं भेदमात्रं वा स्यात्। नाप्युभयरूपः; उभयपक्षनिक्षिप्तदोषानुषङ्गात्, भेदाऽभेदयोः परस्परपरिहारस्थितिलक्षणत्वेन एकत्रैकदा संभवाऽभावाच्च। नाप्यनुभयरूपः; विधि-प्रतिषेधयोः एकतरप्रतिषेधे अन्यतरविधेरवश्यम्भावित्वात्। २०

स्तूर्णनाभ इव तन्तुभिः प्रधानजैः स्वभावतः। देव एकः स्वयमावृणोति स नो दधातु ब्रह्माप्ययम् ॥" श्वेताश्व० ६।१०। "उर्णनाभिर्यथा तन्तून्···" ब्रह्म० ३। "ऊर्णनाभीव तन्तुना···" कशुर ९। "लोकवत्तु लीला कैवल्यम्।" ब्रह्मसू० २।१।३३। "एवमीश्वरस्यापि अनपेक्ष्य किञ्चित् प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति।···" शां० भा० २।१।३३। "तन्तुनाभश्च स्वत एव तन्तून् सृजति, बलाका चान्तरेणैव शुक्रं गर्भं धत्ते, पद्मिनी चानपेक्ष्य किञ्चित् प्रस्थानसाधनं सरोऽन्तरात् सरोऽन्तरं प्रतिष्ठते, एवं चेतनमपि ब्रह्म अनपेक्ष्य बाह्यं साधनं स्वत एव जगत् सृक्ष्यति।" ब्रह्मसू०शां० भा०२।१।२५।

१ भेदेप्यस्य भां०। २ 'नैकत्वे आगमस्तेन प्रत्यक्षेण प्रबाध्यते' इत्युत्तरार्द्धांशः। प्रमेयक० पृ० १७ उ०। न्यायवि० टी० पृ० १८६ पू०। स्याद्वादमं० पृ० १००। प्रमेयरत्नमा० पृ० ७४। 'प्रत्यक्षेण विरुद्ध्यते' न्यायमं० पृ० ५२६। सन्मति० टी० पृ० २७३। स्या० रत्ना० पृ० १९१। "यदुच्यते केचित् (?) आहुर्विधातृ···" ब्रह्मसू० भास्करभा० पृ० ९९।

किञ्च, अखिलार्थानाम् एक एव भेदः, प्रत्यर्थं भिन्नो वा ? यद्येक एव; तर्हि तस्याऽभेदात् तेषामप्यभेद एव स्यात्। अथ प्रत्यर्थं भिन्नः; किं स्वतः, भेदान्तरेण वा ? पक्षद्वयेऽपि प्राक्-प्रतिपादितमेव दोषद्वयं द्रष्टव्यम्। ततो भेदाऽऽग्रहं परित्यज्य अभिन्नमेकं परमब्रह्मलक्षणं पारमार्थिकं तत्त्वं प्रतिपत्तव्यमिति।

५ अत्र प्रतिविधीयते। यत्तावदुक्तम्[1]–'चेतनाऽचेतनपरिणामेन' इत्यादि; तदसमीचीनम्;

ब्रह्माद्वैतस्य खण्डनम्–

अत्र परिणामवाचोयुक्तेरेवाऽसंभवात्। परिणामो हि पूर्वं (पूर्वधर्म) परि-त्यागेन धर्मान्तरस्वीकारः। ब्रह्म चेत् पूर्वं चिद्रूपं परित्यज्य आकाशा-दिस्वरूपं स्वीकुरुते, तदा ब्रह्मरूपतैवाऽनेन परित्यक्ता स्यात्, चिदानन्दमयं हि ब्रह्म उच्यते। अथ स्वरूपाऽपरित्यागेनैव आकाशादिरूपतया तत् परिणमते; तन्न; इत्थम्भूतस्य परिणामस्य १० क्वचिदप्यप्रतिपत्तेः। कार्यमेव हि तेन इत्थमर्थान्तरभूतमुत्पादितं स्यात्, तथा च उपादाना-न्तरसिद्धिः तद्व्यतिरिकेण तदनुपपत्तेः इत्यद्वैतहानिः, 'ब्रह्मोपादानकारणं जगत्' इति स्व-वचनव्याघातश्च।

किञ्च, क्षीर-सुवर्णादेः परिणामिनः कालपरिवास-सुवर्णकारकरव्यापारादिसहकारिस-व्यपेक्षस्य परिणामे प्रवृत्तिर्दृष्टा, ब्रह्मणश्च सहकार्यभावात् कथं तत्र प्रवृत्तिः, परिणामस्य निष्प-१५ त्तिर्वा ? तत्सद्भावे वा अद्वैतहानिः। अथ इतरपरिणामिपदार्थविलक्षणत्वात्तस्य न दोषो-ऽयम्, इदमेव हि तस्य माहात्म्यम्–यदन्यानपेक्षमपि तत् तथाविधं परिणामं प्रतिपद्यते; तन्न; दृष्टानुसारेणैव अदृष्टार्थकल्पनोपपत्तेः। यः कस्यचित् कदाचिदपि परिणामिनः स्वभावो न दृष्टः 'सोऽस्यास्ति' इति केनावष्टम्भेन कल्प्यते ? उपादानान्तरस्याऽनुपपत्तेरिति चेत्; न; तदुपपत्तेर्निषेधाऽसंभवात्, दध्यादौ क्षीरादेरुपादानत्वप्रतीतेः। यदि च अन्यदुपादानान्तरं २० नास्ति तथापि ब्रह्मणो यत् प्रमाणेनाऽनुपपन्नं रूपं तत् कथं घटेत ? स्वभावतश्चास्य परिणामे प्रवृत्तौ तदनुपरतिप्रसङ्गः; सदैकरूपपरिणामश्च स्यात्।

किञ्च, सर्वाऽपि प्रेक्षावत्प्रवृत्तिः प्रयोजनवत्त्वेन व्याप्ता। ब्रह्मणश्च विश्वप्रपञ्चरचने किं कि-ञ्चित् प्रयोजनमस्ति, न वा ? यदि नास्ति; तदा नास्य प्रेक्षापूर्वकारिता, प्रेक्षापूर्वकारी हि न प्रयोजनमनुद्दिश्य कदाचिदपि प्रवर्तेत, अन्यत्र जडात्। द्विविधा हि प्रवृत्तिः–जडस्य, इतरस्य २५ च। तत्र जडप्रवृत्तिः नित्यं परायत्तैव, न हि यावत्स्वप्रयोजनमुद्दिश्य न चेतनेन प्रेर्यते तावज्जडः

---

१ पृ० १४७ पं० ६। २ पूर्वपरि–भां०, आ०। सर्वधर्मपरि–ब०, ज०। "अवस्थितस्य द्रव्य-स्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः।" न्यायभा० ३।२।१५। योगसू० व्यासभा० ३।१३। ३ परिहृत्य आ०, ब०, ज०। ४ "विज्ञानमानन्दं ब्रह्म" बृहदा० ३।९।२८। ५–विधपरि–ब०, ज०। ६ "प्रेक्षापूर्वकारिप्रवृत्तेः प्रयोजनवत्तया व्याप्तत्वात् अतः किमर्थमयं पुरुषो जगद्रचनाव्यापारमीदृशं करोतीति वक्तव्यम्।" तत्त्वसं० पं० पृ० ७६। ७ जडस्य प्रवृत्तिः भां०।

क्वचित्प्रवर्तते, न च ब्रह्मणो जडत्वमङ्गीक्रियते, प्रेरकस्याऽन्यस्य प्रसङ्गतः अद्वैतहानिप्रसङ्गात् । ननु चेतनस्यापि स्वापादिदशायां तदन्तरेण प्रवृत्तिर्दृश्यते; इत्यप्यसमीक्षिताभिधानम्; पूर्वाऽभ्यस्तस्वप्रयोजनप्रवृत्तिनिबन्धनत्वात् तत्प्रवृत्तेः, अन्यथा अनभ्यस्तेऽपि विषये तदा प्रवृत्तिः स्यात् । प्रयोजनवत्त्वे च ब्रह्मणः साकाङ्क्षत्वात् कृतार्थता न स्यात् । प्रयोजनं हि इष्टं साध्यमुच्यते, सर्वथा कृतार्थस्य च साध्याऽभावात् तद्विरुद्ध्यते । ५

किञ्च, ब्रह्म सावयवम्, निरवयवं वा ? न तावत् सावयवम्; चिद्रूपत्वात्, नहि चितोऽवयवानां सम्भवोऽस्ति, तत्संभवे वा अस्याः कार्यत्वप्रसङ्गात् नित्यत्वक्षतिः । निरवयवत्वे च सर्वात्मना प्रथममेव आकाशादिपरिणामं प्रतिपन्नस्य स्वरूपप्रच्युतितो जडत्वप्रसक्तेः लाभमिच्छतो मूलोच्छेदः परिणामान्तराऽसङ्क्रमश्च स्यात्, न हि जडस्यास्य आकाशरूपतां गतस्य केनचिदप्रेरितस्य अतो व्यावृत्य परिणामान्तरे वृत्तिर्घटते, न चान्यस्तद्व्यतिरिक्तः कश्चित् प्रेरकोऽस्ति १० द्वैतप्रसङ्गात् । ततोऽयुक्तमिदं सृष्टिक्रमकथनम्[1]–'ब्रह्मणः प्रथम आकाशलक्षणः परिणामः, तस्माद्वायुः, ततस्तेजः, ततो जलम्, ततः पृथिवी, ततो नानाविधौषधयः, ततो जरायुजाण्डजोद्भेदजादिभेदेन नानाविधः शरीरादिसर्गः विषयसर्गश्च' इति । ब्रह्मपरिणामत्वे च आकाशादीनां कर्मात्मनाश्चाऽभेदः, कारणस्याभिन्नत्वात् । न हि अभिन्नस्वरूपादुपादानाद् भिन्नजातीयस्योत्पत्तिर्युक्ता, वह्नेर्जल-तेजसोरुत्पत्तिप्रसङ्गात् । भोग्यभोक्तृभावश्च एतेषामनुपपन्नः; 'कर्मात्मानो १५ भोक्तारः, भूतानि भोग्यानि' इति । न हि तस्मात्तेषामभेदे विरुद्धस्वभावद्वयसंभवः, तत्संभवे वा विरुद्धधर्माऽध्यासाद् ब्रह्मणो नैकत्वम् ।

यदप्युक्तम्[2]–सुवर्ण-क्षीरादेरेकत्वेऽपि कटक-दध्यादिविचित्रपरिणामवदत्रापि सर्वं घटते; तदप्युक्तिमात्रम्; तस्य अनेकस्वभावत्वे कथञ्चिदुत्पत्ति-विनाशवत्त्वे च सति विचित्रपरिणामत्वोपपत्तेः सर्वथैकस्वभावस्य अनुत्पत्ति-विनाशधर्मणश्चार्थस्यैवाऽसंभवात् खरविषाणवत् । क्रमश्च अर्थानां धर्मः पराधीनोऽनेकस्थः । स च द्वेधा–देशक्रमः, कालक्रमश्च । तत्र युगपद्भाविनां देशप्रत्यासत्तिरूपो देशक्रमः, यथा 'वृद्धा एते क्रमेणोपविष्टाः' इत्यादिप्रतीत्यारूढः । कालप्रत्यासत्तिविशिष्टार्थानां तु कालक्रमः, 'क्रमेणोत्पद्यन्ते वर्णाः' 'क्रमेणोत्पद्यन्ते स्थास-कोशादयः' इत्यादिप्रतीतिसमधिगम्यः । युगपत्प्रतिभासमानानेकार्थानां किन्न क्रमप्रतीतिरिति चेत् ? कालस्य उपाधेरभावात् । यन्निबन्धना हि या प्रतीतिः सा तदभावे न भवति यथा देशनिबन्धना २५ क्रमप्रतीतिः देशाभावे, कालनिबन्धना चेयं प्रतीतिरिति । चित्रपट-दूरासन्नपादपा-ऽम्भोनिधि-

१ "तस्माद्वा एतस्मादात्मन आकाशः संभूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या औषधयः, औषधिभ्योऽन्नम्, अन्नात् पुरुषः···" तैत्ति० २।१ । २ पृ० १४७ पं० १० । ३ "चित्रपटादिद्रव्यमेकस्वभावमपि चक्षुरादिकरणसामग्रीभेदात् रूपादिविलक्षणाकारं तदनुविधानात्··· दूरासन्नानाम् एकत्र वस्तुन्युपनिबद्धनानादर्शनानां पुरुषाणां निर्भासभेदात् तद्विषयस्यापि वस्तुनः स्वभावभेदोऽस्तु ।" अष्टसह० पृ० ११० ।

प्रभृतीनामपि सर्वथैकस्वभावत्वमसिद्धम्; चित्ररूपत्वात् विशदेतरप्रतिभासविषयत्वात् सामर्थ्यभेदाच्चात्र कथञ्चिद् भेदप्रसिद्धेः।

किञ्च, ब्रह्मणश्चित्ररूपत्वं विभिन्नप्रतिभासविषयत्वं सामर्थ्यभेदश्च अवस्थानां भेदे सति स्यात्, अभेदे वा? न तावदभेदे; एकस्यामप्यवस्थायां तत्प्रसङ्गात्। भेदे चेत्; तर्हि तासामन्योन्यं भेदप्रसाधनाय इतरेतराभावादिरप्यायात इति सुष्ठु प्रसाधितमद्वैतम् तत्स्वरूपस्य विधिरूपत्वेन प्रतिषेधसाधकत्वाऽयोगात्! अस्तु वा यथाकथञ्चित्तासामन्योन्यं भेदः; तथापि अवस्थावतः ता भिन्नाः, अभिन्नाः, उभयम्, अनुभयं वा? भेदे 'तस्य अवस्थाः' इति व्यपदेशो न स्यादनुपकारात्, उपकारे वा अनवस्था। अभेदे; किमवस्थातादात्म्येन अवस्थाता स्थितः, अवस्थातृतादात्म्येन अवस्था वा? प्रथमपक्षे अवस्थातुरेकत्वानुपपत्तिः तद्वत्तस्यापि भेदप्रसङ्गात्, न हि भिन्नतादात्म्येनावस्थितं तत्स्वरूपवदभिन्नं युक्तम् अतिप्रसङ्गात्। द्वितीयपक्षे तु अवस्थातैव नाऽवस्थाः, न हि अभिन्नतादात्म्येनावस्थितं तत्स्वरूपवद् भिन्नं भवितुमर्हति तत्स्वरूपस्यापि भेदप्रसङ्गात्। उभयपक्षेऽपि उभयदोषः। अनुभयपक्षस्त्वयुक्तः; विधि-प्रतिषेधधर्मयोः एकतरप्रतिषेधे अन्यतरविधेरवश्यम्भावित्वेन एकत्रैकदा उभयप्रतिषेधानुपपत्तेः।

यदपि-'कर्मात्मानुष्ठितकर्मसहायस्य कर्तृत्वात्'[2] इत्याद्युक्तम्[3]; तदप्ययुक्तम्; यतः कर्मात्मनां कर्मणाञ्चोत्पादः तदायत्त एव, तद्व्यतिरेकेणाऽन्यस्याऽनभ्युपगमात्। तत्र किं प्रथमं कर्मात्मनो निर्माय कर्मभिर्योजयति, कर्माणि [4]वोत्पाद्य कर्मात्मनः सृजति? 'न तावत् प्रथमम् अनुष्ठात्रभावात् कर्माणि स्रष्टुं शक्यन्ते, कर्मसम्बन्धश्च विना नाऽनुष्ठातारो भिन्नाः कल्पयितुं शक्यन्ते' इति इतरेतराश्रयत्वान्न कस्यचित् सृष्टिः स्यात्। 'अविद्यया भेदमिवापादिताः' इत्यादि चातीव दुर्घटम्, तस्यास्ततो व्यतिरेकाऽव्यतिरेकपक्षयोरनुपपत्तेः, तथा तदनुपपत्तिश्च शब्दाद्वैतनिराकरणप्रघट्टके[5] प्रपञ्चतः प्रतिपादिता इत्यलमतिप्रसङ्गेन।

किञ्च, अज्ञानस्वभावाऽविद्या ज्ञानस्वभावं ब्रह्म च, न च ज्ञानाऽज्ञानयोः भावाऽभावयोरिव क्वचित्तादात्म्यं दृष्टम्। न च इत्थमनिर्वचनीयाऽविद्या इत्यभिधातव्यम्; वस्तुनो भेदाऽभेदाभ्यां विचार्यमाणत्वोपपत्तेः, न चावस्तुत्वमस्याः संगच्छते, सकलभेदप्रपञ्चं निष्पादयन्त्या यदि अवस्तुत्वमविद्यायाः तदा ब्रह्मणोऽप्यवस्तुत्वं स्यात्।

किञ्च, ब्रह्मस्वरूपाऽप्रवेदनप्रभवोऽविद्याप्रादुर्भावः, अविद्याप्रादुर्भावप्रभवं वा ब्रह्मस्वरूपाऽप्रवेदनम्? न तावदाद्यः पक्षः; नित्योदितत्वेन ब्रह्मणः स्वरूपाऽप्रवेदनाऽसंभवात्। नापि द्वितीयः; नित्योदिते तस्मिन् प्रकाशमाने मध्यन्दिनावस्थित इवाऽर्के तस्यास्तमस्तुल्यायाः प्रादु-

---

१ "योऽपि अवस्थावतोऽवस्थां पदार्थान्तरभूतां नानुमन्यते तस्यापि कथमवस्थाभेदाद् अवस्थावतो भेदो न स्यात् अवस्थानां वा कथमभेदो न भवेत् तदर्थान्तरत्वाभावात्"···आप्तपरी० पृ० २१। २ कर्मानुष्ठित-आ०। ३ पृ० १४८ पं० ९। ४ चोत्पाद्य भां०। ५ पृ० १४३ पं० १।

भावाभावात् । अनादित्वात्तस्या नायं दोषश्चेत् ; न ; एवमपि तमः-प्रकाशयोरिव ब्रह्मा-ऽविद्ययोः सहावस्थानाऽनुपपत्तेः । कर्मात्मनाश्च अविद्यास्वभावत्वे कथमयं विचारात्मको विवेकः अविद्यात्मनो विद्यात्मकविचारविरोधात् ? कुतश्चास्योत्पत्तिः—अविद्यात एव, अन्यतो वा ? न तावदन्यतः ; अविद्याव्यतिरेकेण अन्यस्यानभ्युपगमात् । अथ अविद्यैव एवंविधविद्योपायः; तन्न; विरोधात्, न हि तमः तेजःप्रकाशोपायः प्रतीयते । ५

यच्चान्यदुक्तम्[1]—'स्वभावादेव वा ऊर्णनाभ इवांशूनां कारणान्तरनिरपेक्षं ब्रह्म जगद्वैचित्र्यकारणम्'; तदप्युक्तिमात्रम् ; ऊर्णनाभस्य[2] तन्तूत्पादने अन्तर्बहिःकारणापेक्षाप्रतीतेः तत्र तदनपेक्षत्वासिद्धेः, ततः कथं तद्दृष्टान्तावष्टम्भेन ब्रह्मणस्तदनपेक्षस्य स्वभावतो जगद्वैचित्र्यहेतुत्व[3] प्रसाधयितुं शक्यम् ? स हि प्राणिहिंसालाम्पट्यतो वंशकुड्यादिकं बहिःकारणकलापं समासाद्य अन्तर्गतं लालारूपं पुद्गलप्रचयं प्राणिभक्षणप्रयोजनमुररीकृत्य दीर्घीकुर्वन्नुपलभ्यते । १० ततः सहकारि-प्रयोजनानपेक्षस्य उपादानरूपस्य ब्रह्मणो जगद्वैचित्र्यमभ्युपगच्छन्नयम् उपेक्षणीय एव, दृष्टहानेः अदृष्टपरिकल्पनायाश्चाऽनुषङ्गात् ।

यदप्युक्तम्[4]—'भेदे प्रत्यक्षमनुमानं वा प्रमाणं[5] वर्तेत' इत्यादि ; तत्र प्रत्यक्षत एव भेदः प्रतीयते, अक्षव्यापारानन्तरप्रभवप्रत्यये अन्योन्यासंसृष्टस्य नीलादेः प्रतिभासनात्, परस्पराऽसङ्कीर्णताप्रतिभास एव च भेदप्रतिभासः । न च अन्योन्यव्यावृत्तिर्भेदः किन्तु पदार्थ- १५ स्वरूपम्, तद्धि[6] स्वकारणपरम्परातः त्रैलोक्यविलक्षणस्वभावमेवोत्पन्नम् । तथाभूतञ्च तत् चेतनात्मकम् अहङ्कारास्पदं ग्राहकाकारमन्तः प्रतिभासते नीलादिकं तु ग्राह्याकारं बहिः । नहि तदुभयं मुक्त्वा अद्वैतं कस्यचित्स्वप्नेऽपि किञ्चित्प्रतिभासते । ननु यदि पदार्थस्वरूपमेव भेदः तर्हि प्रथमाऽक्षसन्निपाते तत्स्वरूपप्रतिपत्तौ 'अयमस्माद् भिन्नः' इति किमिति न प्रतीयते इति चेत् ? पदार्थान्तरग्रहणसापेक्षत्वाद् अभेदवत्, यथैव हि प्रथमाऽक्षसन्निपाते प्रतीतोऽपि २० सत्सामान्यलक्षणोऽभेदः अर्थान्तराऽप्रतीतौ 'सत् सत्' इति अनुगतात्मना नोल्लिखति, तथा भेदोऽपि । अस्तु वा अन्योन्याभावरूपो भेदः ; तथापि अस्य प्रत्यक्षतः प्रतीतिः न विरुद्ध्यते, सत्स्वरूपेणेव असत्स्वरूपेणाप्यर्थानां प्रत्यक्षे प्रतिभासनात् । न खलु स्वरूपेण सत्त्वमेव अर्थानां

---

१ पृ० १४८ पं० १३ । २ "प्राणिनां भक्षणाच्चापि तस्य लाला प्रवर्तते" मी० श्लो० पृ० ६५२ । "प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते । प्राणिभक्षणलाम्पट्यात् लालाजालं करोति यत् ॥ १६८ ॥" तत्त्वसं० । "ऊर्णनाभः मर्कटकः" तत्त्वसं० पं० पृ० ७६ । प्रमेयक० पृ० १९ उ० । सन्मति० टी० पृ० ७१७ । स्या० रत्ना० पृ० १९९ । ३—त्वं साध—ब०, ज० । ४ पृ० १४९ पं० १ । ५—णं प्रवर्तते भां०, श्र० । ६ तद्विश्वका—ब०, ज० । ७ "अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसम्पत्तेः पीतादिव्यवच्छिनं हि नीलं नीलमिति ग्रहीतं भवति नेतरथा । तथा चाह—तत्परिच्छिन्नं त्वन्यद् व्यवच्छिनत्ति इति भाववदभाक्मपि ग्रहीतुं प्रभवति प्रत्यक्षम्···" न्यायमं० पृ० ५२९ ।

प्रत्यक्षे प्रतिभासते न पुनः पररूपेणाऽसत्त्वम्, तदप्रतीतौ तेषामप्यप्रतीतिप्रसङ्गात् स्वपररूपोपादानापोहापाद्यत्वाद् वस्तुनो वस्तुत्वस्य।

यच्चान्यदुक्तम्[1]–'क्रमेणासौ गृह्यते युगपद्वा' इत्यादि; तदप्येतेनैव प्रत्युक्तम्; उक्तन्यायेन युगपद्भेदप्रतिभाससंभवात्। प्रतियोग्यप्रतिपत्तौ कथं भेदः तत्सापेक्षः प्रतीयते? इत्यप्यसुन्दरम्; यतो भेदव्यवहार एव परापेक्षो न तत्स्वरूपम्, तद्धि स्वकारणकलापात् प्रतियोगिग्रहणनिरपेक्षमेवोत्पन्नम्, कथमन्यथा अभेदेऽपि इतरेतराश्रयो न स्यात्–भेदापेक्षा[3] हि सामान्यसिद्धिः, तदपेक्षा च भेदसिद्धिरिति? सङ्कोचितप्रसारिताङ्गुल्यादौ च प्राक्-प्रध्वंसाभावरूपः क्रमभावी भेदः क्रमेणैव सुस्पष्टमाभासते।

यच्चोक्तम्[4]–'अखिलार्थानाम् एक एव भेदः प्रत्यर्थं भिन्नो वा' इत्यादि; तदप्यसाम्प्रतम्; एकत्वविरोधलक्षणत्वाद् भेदस्य, यत्र हि ऐक्यविरोधः तत्र भेदशब्दः प्रयुज्यते यथा 'नीलाद् भिन्नं पीतम्' इत्यादौ। 'स किं धर्मिणो भिन्नोऽभिन्नो वा' इत्यादिविकल्पसंहतिरपि अनेकान्तसमाश्रयणात् प्रत्याख्याता, न खलु धर्म-धर्मिणोः सर्वथा भेदोऽभेदो वा संभवति इत्यग्रे वक्ष्यते। कथञ्चैवंवादिनः अभेदः सिद्ध्येत् भिन्नाऽभिन्नादिविचारस्य तत्रापि कर्तुं शक्यत्वात्? तथाहि–अयमभेदः भेदेभ्यो भिन्नः, अभिन्नो वा स्यात्? यद्यभिन्नः; तदाऽस्य अभेदरूपताऽनुपपत्तिः भेदस्वात्मवत्तावद्वा भेदप्रसङ्गात्। अथ भिन्नः; तन्न; भेदेभ्यो भिन्नस्य अभेदस्याऽप्रतीतेः, अन्यथा विप्रतिपत्त्यभावप्रसङ्गः, न हि घटात् पटे भिन्ने प्रतीयमाने कश्चिद् विप्रतिपद्यते।

किञ्च, असौ ततो भिन्नः प्रत्यक्षेण प्रतीयेत, अनुमानेन वा? प्रत्यक्षेण चेत्; किं भेदस्वरूपग्राहिणा, अन्येन वा? न तावदन्येन; तथाभूतस्यास्य असंवेद्यमानत्वात्, न हि अन्तर्बहिर्वा भेदस्वरूपाऽनवभासिप्रत्यक्षं स्वप्नेऽपि संवेद्यते नीलसुखादिभेदस्वरूपावभासिन एवास्य सदा संवेदनात्। भेदस्वरूपग्राहिणाऽपि तेन युगपत्, क्रमेण वा[6] अभेदः प्रतीयेत? न तावद् युगपत्; द्वयप्रतीतेरभावात्, न खलु सर्वथा भिन्नौ भेदाऽभेदौ युगपत् क्वचिदपि प्रत्यक्षे प्रतिभासेते इत्यनेकान्तसिद्ध्यवसरे प्रतिपादयिष्यते। नापि क्रमेण; प्रत्यक्षस्य एकक्षणस्थायितया क्रमेणाप्यतः तत्प्रतिपत्तेरसंभवात्। तन्न प्रत्यक्षतोऽभेदप्रतिपत्तिर्घटते। नाप्यनुमानतः; प्रत्यक्षाऽभावे तस्याप्यनुपपद्यमानत्वात् तत्पूर्वकतया तस्य भवद्भिरभ्युपगमात्।

किञ्च, अभेदो नाम द्वितीयापेक्षः, तदग्रहे कथमसौ ग्रहीतुं शक्योऽतिप्रसङ्गात्, यो यदपेक्षो धर्मः नासौ तदग्रहे[8] ग्रहीतुं शक्यः यथा दण्डाग्रहे दण्डित्वम्, द्वितीयापेक्षश्च अभेदलक्षणो धर्म इति। यथाप्रतीति अभेदसिद्ध्यभ्युपगमे च भेदसिद्धिरपि तथैवाऽभ्युपगन्तव्या

---

१ स्वरूपपररूप–श्र०। २ पृ० १४९ पं० ६। ३–पेक्षापि हि श्र०। ४ पृ० १५० पं० १। ५ सुशक्य–श्र०। ६ वा स्वरूपभेदः ब०,ज०। ७ –ग्रहेपि ग्र–श्र०। ८ तथाभ्यु–श्र०।

इति सिद्धः प्रत्यक्षतः शरीरादिभेदवद् आत्मनोऽपि भेदः। विभिन्नसुख-दुःखादिप्रतीत्यन्यथानुपपत्तेश्च; न चेयं मिथ्या असन्दिग्धाऽबाध्यमानस्वरूपत्वात् आत्मप्रतीतिवत्। आत्मनोऽभेदाभ्युपगमे च एकस्मिन् सुखिते सर्वं जगत् सुखितं स्यात्, दुःखिते च दुःखितम्, बद्धे बद्धम्, मुक्ते मुक्तम्, प्रवृत्ते प्रवृत्तम्, निवृत्ते[3] च निवृत्तम्; न चैवमस्ति, अतोऽस्ति[4] आत्मनो वास्तवो भेदः। अन्यथा 'स एव सुखी दुःखी बद्धो मुक्तः प्रवृत्तोऽप्रवृत्तश्च' इति प्राप्नोति, न चैतद् युक्तम्, परस्परविरुद्धधर्माणां नित्यनिरंशैकरूपे वस्तुनि असंभवात्। न च कल्पितैताकाशभेदवद् आत्मन्यपि कल्पितभेदात् सर्वमिदमुपपत्स्यते इत्यभिधातव्यम्; आकाशस्याऽबाधितप्रमाणप्रसिद्धस्वरूपस्य वास्तवप्रदेशप्रसिद्धेः 'घटाकाशम्, पटाकाशम्' इत्यादिव्यवहारो युक्तः, ब्रह्मणस्तु कुतश्चिदपि प्रमाणादप्रसिद्धेः खपुष्पवत् न कल्पितोऽपि भेदः संभवेत्। ५

योऽपि '*सर्वं खल्विदं ब्रह्म*' इत्याद्यागमः तत्प्रतिपादकः प्रतिपादितः†; सोऽपि द्वैतविषयत्वाद् भेदमेव प्रसाधयति, नहि वाच्य-वाचक-प्रतिपाद्य-प्रतिपादकानां मध्ये अन्यतमस्याप्यपाये प्रमाणभूताऽऽगमसत्ता उपपद्यते। १०

किञ्च, सकलशरीरेषु आत्मन एकत्वे शरीरभेदेऽपि प्रतिसन्धानप्रसङ्गः, यथैव हि एकस्मिन् शरीरे प्रदेशभेदेऽपि एकत्वादात्मनः प्रतिसन्धानम्, एवं शरीरभेदेऽपि स्यात्। न च कल्पितभेदानां जीवानां भिन्नत्वात् कल्पितप्रदेशभेदवत् प्रतिसन्धानाऽभावः; यतः प्रदेशानां भेदे यद्यपि अन्योन्यं प्रतिसन्धानं नास्ति तथापि तद्वर्तिप्रदेश्यपेक्षया तदस्ति, एवं जीवानां भेदे परस्परप्रतिसन्धानाऽभावेऽपि तदनुस्यूताऽऽत्मापेक्षया तत् स्यादिति। ततः अद्वैताद्याग्रहग्रहाभिनिवेशं परित्यज्य अबाधबोधाधिरूढो बाह्यार्थो यथाप्रतीति अभ्युपगन्तव्यः, अन्यथा अप्रामाणिकत्वप्रसङ्गः। अतः सिद्धो **द्रव्यपर्यायात्मार्थो विषयः**। कस्याऽसौ विषयः इत्यत्राह–**विषयिणो द्रव्य-भावेन्द्रियस्य**। अथ किं द्रव्येन्द्रियम्? इत्याह–**द्रव्येन्द्रियं पुद्गलात्मकम्**। रूपरसगन्धस्पर्शवन्तो हि पुद्गलाः तदात्मकं तत्परिणामविशेषस्वभावम्। १५ २०

१–मानत्वात् भां०, श्र०। २ "कर्मद्वैतं फलद्वैतं लोकद्वैतञ्च नो भवेत्। विद्याविद्याद्वयं न स्याद् बन्धमोक्षद्वयं तथा ॥२६॥" आप्तमीमांसा। ३–त्ते नि–श्र०। ४ अतोऽस्यात्म–श्र०। ५ "....एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि।" ब्रह्मसू० शां० भा० २।१।१४। ६ प्रतिसाधनं श्र०। ७–सम्बन्धाना–श्र०। ८ ब्रह्माद्वैतवादस्य नैकविधतया पर्यालोचना निम्नग्रन्थेषु द्रष्टव्या–मीमांसाश्लो० सम्बन्धाक्षेपपरि० श्लो० ८२। शास्त्रदी० १।१।५। न्यायमं० पृ० ५२६। तत्त्वसं० पुरुषपरी० पृ० ७५। आप्तमी०, अष्टश०, अष्टसह० पृ० १५७, द्वि० परि०। सिद्धिवि० टी० पृ० ३७० पू०। तत्त्वार्थश्लो० पृ० ९४। प्रमेयक० पृ० १७ उ०। सन्मति० टी० पृ० २८५, ७१५। न्यायवि० टी० पृ० १६८ पू०। स्या० रत्ना० पृ० १९०। शास्त्रवा० श्लो० ५४३। शास्त्रवा० टी० पृ० २७६। स्याद्वादमं० पृ० ९७। प्रमेयरत्नमा० पृ० ७४। ९ "स्पर्शरसगन्धवर्णवन्तः पुद्गलाः।" तत्त्वार्थसू० ५।२३। † पृ० १४७ पं० ४।

ननु च इन्द्रियाणामविशेषतः पुद्गलात्मकत्वमयुक्तम्; अत्यन्तभिन्नजातीयेभ्यः पृथिव्यादिभ्योऽत्यन्तभिन्नजातीयानां चक्षुरादीनामाविर्भावविभावनात्। तथा च न्यायभाष्यम्–"*पृथिव्यग्नेजोवायूनां घ्राणरसनचक्षुःस्पर्शनेन्द्रियभावात्* (*भावः*)" [ ] इति। अमुमेवार्थमनुमानतः समर्थयते–पार्थिवं घ्राणम् रूपादिषु सन्निहितेषु गन्धस्यैवाऽभिव्यञ्जकत्वात्, यद् यत्तथाविधम् तत्तत् पार्थिवं दृष्टम् यथा नागकर्णिकाविमर्दककरतलादि, रूपादिषु सन्निहितेषु गन्धस्यैवाऽभिव्यञ्जकञ्च घ्राणम्, तस्मात् पार्थिवमिति। आप्यं रसनम् रूपादिषु सन्निहितेषु रसस्यैवाऽभिव्यञ्जकत्वात् लालावत्। चक्षुस्तैजसं रूपादिषु सन्निहितेषु रूपस्यैवाऽभिव्यञ्जकत्वात् प्रदीपवत्। वायव्यं स्पर्शनं रूपादिषु सन्निहितेषु स्पर्शस्यैवाऽभिव्य-

'अत्यन्तभिन्नजातीयपृथिव्याद्यारब्धत्वमिन्द्रियाणाम्' इति नैयायिकस्य पूर्वपक्षः तन्निरसनञ्च—

५

१–णामशेषपुद्गलात्मत्व–ब०, ज०। २ "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः।" न्यायसू० १।१।१२। "पृथिव्यादीनां पञ्चानामपि भूतत्व-इन्द्रियप्रकृतित्व-बाह्यैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि।" प्रशस्तपा० पृ० २२। "तथा च न्यायभाष्यम्–पृथिव्यग्नेजोवायुभ्यो घ्राणरसनचक्षुस्पर्शनेन्द्रियभावः।" स्या० रत्ना० पृ० ३४४। "भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः। तथाऽऽपस्तेजो वायुश्च रसरूपस्पर्शाऽविशेषात्।" वैशेषिकसू० ८।२।५,६। "रसनचक्षुष्ट्वग्-इन्द्रियाणां प्रकृतिः इति शेषः।" ३ "भूतगुणविशेषोपलब्धेस्तादात्म्यम्॥" न्यायसू० ३।१।६०। "दृष्टो हि वाय्वादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः, वायुः स्पर्शव्यञ्जकः, आपो रसव्यञ्जिकाः, तेजो रूपव्यञ्जकम्, पार्थिवं किञ्चिद् द्रव्यं कस्यचिद् द्रव्यस्य गन्धव्यञ्जकम्, अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः तेन भूतगुणविशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति···" न्यायभा०। "यज्जातीयमिन्द्रियं भवति तस्य यो गुणविशेषः इतरेतरभूतव्यवच्छेदहेतुः गन्धादिः स तेनैवेन्द्रियेण गृह्यते इत्ययं नियमः।" न्यायवा० १।१।१२। ४ "पार्थिवं घ्राणं रूपरसगन्धस्पर्शेषु नियमेन गन्धस्य व्यञ्जकत्वात् बाह्यपार्थिववदिति, यथा मृगमदगन्धव्यञ्जकाः कुक्कुटोच्चारादयः पार्थिवा इत्यर्थः।" न्यायवा० ता० टी० पृ० ५३०। "···द्रव्यत्वे सति रूपादिमध्ये गन्धस्यैव व्यञ्जकत्वात् गन्धयुक्तद्रव्यवत्।" न्यायमं० पृ० ४८१। "पार्थिवत्वेऽपि रूपादिषु मध्ये गन्धस्यैव अभिव्यञ्जकत्वं प्रमाणम् कुङ्कुमगन्धाभिव्यञ्जकघृतवत्···" प्रश० कन्द० पृ० ३५। वैशे० उप० पृ० १२८। "···यथा कस्तूरिकाद्रव्यम्" प्रश० व्योम० पृ० २३३। ५–व्यञ्जनत्वात् श्र०। ६–कर्णिकापेक्षेवि–श्र०। ७ "रसनमिन्द्रियमाप्यं गन्धादिषु मध्ये नियमेन रसस्य व्यञ्जकत्वात् दन्तान्तरस्यन्दमानोदकबिन्दुवत्···" न्यायवा० ता० टी० पृ० ५३०। प्रश० व्योमव० पृ० २४६। "···मुखशोषिणां लालादिद्रव्यवत्" प्रश० कन्द० पृ० ३८। "···सक्तुरसाभिव्यञ्जकसलिलवत्" वैशे० उप० पृ० १२८। ८ "तैजसं चक्षुः रूपादिषु मध्ये नियमेन रूपस्य व्यञ्जकत्वात् प्रदीपादिवत्।" न्यायवा० ता० टी० पृ० ५३०। न्यायमं० पृ० ४८१। प्रश० कन्द० पृ० ४०। प्रश० व्योम० पृ० २५७। वैशे० उप० पृ० १२८। ९ "वायवीयं त्वगिन्द्रियं गन्धादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् स्वेदोदबिन्दुशीतस्पर्शव्यञ्जकव्यजनपवनवत्।" न्यायवा० ता० टी० पृ० ५३०। प्रश० व्योमव० पृ० २७१। "···अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकसमीरणवत्।" प्रश० कन्द० पृ० ४५। वैशे० उ० पृ० १२८।

ञ्जकत्वात् तोयशीतस्पर्शव्यञ्जकवाय्ववयववित्। श्रोत्रस्य तु पुद्गलात्मकत्वम् अतीवाऽनुपपन्नम्; शब्दस्य स्वसमानजातीयविशेषगुणवतैव इन्द्रियेण ग्राह्यत्वोपपत्तेः; तथाहि—शब्दः स्वसमानजातीयविशेषगुणवता इन्द्रियेण गृह्यते, सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात्, बाह्यैकेन्द्रियप्रत्यक्षत्वे सति अनात्मविशेषगुणत्वाद्वा रूपादिवदिति।

तदेतदविचारितरमणीयम्; पृथिव्यादीनामत्यन्तभिन्नजातीयत्वेन द्रव्यान्तरत्वाऽसिद्धितः ५
प्रत्येकमिन्द्रियाणां तदारब्धत्वाऽसिद्धेः। द्रव्यान्तरत्वाऽसिद्धिश्च तेषां विषयपरिच्छेदे प्रसाधयिष्यते।

यदप्युक्तम्—'पार्थिवं घ्राणम्' इत्यादि; तदप्यसमीचीनम्; हेतोर्दिनकरकिरणैः उदकसेकेन चाऽनेकान्तात्। दृश्यते हि तैलाभ्यक्तस्य आदित्यरश्मिभिर्गन्धाभिव्यक्तिः, भूमेस्तु उदकसेकेनेति। 'आप्यं रसनम्' इत्याद्यप्ययुक्तम्; हेतोर्लवणेन व्यभिचारात्, तस्याऽनाप्यत्वेऽपि रूपादिषु सन्निहितेषु रसस्यैवाऽभिव्यञ्जकत्वप्रसिद्धेः। 'चक्षुस्तैजसम्' इत्याद्यप्यनुपपन्नम्; हेतोः माणिक्याद्युद्योतेनाऽनैकान्तिकत्वात्, स हि रूपादीनां मध्ये रूपस्यैव प्रकाशको न च तैजस इति। 'वायव्यं स्पर्शनम्' इत्याद्यप्यसाम्प्रतम्; कर्पूरादिना हेतोर्व्यभिचारात्, स हि सलिलादौ रूपादिषु सन्निहितेषु शीतस्पर्शस्यैवाऽभिव्यञ्जको न च वायव्य इति। पृथिव्यग्नेजःस्पर्शाऽभिव्यञ्जकत्वाच्च स्पर्शनस्य पृथिव्यादिकार्यत्वाऽनुषङ्गः, वायुस्पर्शाऽभिव्यञ्जकत्वात् वायुकार्यत्ववत्। चक्षुषश्च तेजोरूपाभिव्यञ्जकत्वात् तेजःकार्यत्ववत् पृथिव्यप्समवायिरूपाऽभिव्यञ्जकत्वात् पृथिव्यप्कार्यत्वप्रसङ्गः। रसनस्य च आप्यरसाभिव्यञ्जकत्वाद् अप्कार्यत्ववत् पृथिवीरसाभिव्यञ्जकत्वात् पृथिवीकार्यत्वप्रसङ्गः। 'शब्दः स्वसमानजातीयविशेषगुणवता' इत्याद्यपि स्वगृहप्रक्रियोपदर्शनमात्रम्; शब्दे नभोगुणत्वस्य प्रतिषेत्स्यमानत्वात्। ततो नेन्द्रियाणां प्रतिनियतभूतकार्यत्वं व्यवतिष्ठते प्रमाणाऽभावात्।

एतेन आहङ्कारिकत्वमपि इन्द्रियाणां साङ्ख्यपरिकल्पितं प्रत्याख्यातम्; तत्रापि प्रमाणाऽभावाऽविशेषात्, प्रमाणबाधासद्भावाच्च। तथाहि—नाहङ्कारिकाणि इन्द्रियाणि, अचेतनत्वे सति करणत्वाद् वास्यादिवत्, इन्द्रियत्वाद्वा कर्मेन्द्रियवत्। न मनसा व्यभिचारः; द्रव्यमनसोऽनाहङ्कारिकत्वाऽभ्युपगमात्। नापि भावेन्द्रियाऽनिन्द्रियैर्व्यभिचारः; 'अचेतनत्वे सति' इति विशेषणात्। नापि सुखादिभिर्व्यभिचारः; तेषां करणत्वाऽभावात्। तथा, नाहङ्कारिकाणि इन्द्रियाणि प्रतिनियतज्ञानव्यपदेशनिमित्तत्वाद् रूपादिवत्, प्रतिनियत-

साङ्ख्यपरिकल्पितस्य इन्द्रियाणामाहङ्कारिकत्वस्य प्रत्याख्यानम्—

१—लात्मत्वम् श्र०। २—ह्यतोप—श्र०। ३ बाह्येन्द्रि—आ०, ब०, ज०, भां०। ४ पृ० १५६ पं० ५। ५—ष्यनुप—श्र०। ६ सर्वमेतद् अक्षरशः प्रमेयकमलमार्त्तण्डे (पृ० ६२) स्याद्वादरत्नाकरे च (पृ० ३४५) वर्त्तते। ७—माणभा—श्र०। ८ "अभिमानोऽहङ्कारः तस्माद् द्विविधः प्रवर्त्तते सर्गः। एन्द्रिय एकादशकः तन्मात्रापञ्चकश्चैव ॥ २४ ॥" सांख्यका०। ९ "एकाहङ्कारप्रकृतित्वे तु एकं वा सर्वार्थं सर्वाणि वा सर्वार्थानि स्युः। विषयनियमात्तु प्रकृतिनियमोऽप्येषामनुमीयते।" न्यायकलिका पृ० ६।

विषयप्रकाशकत्वाद्वा प्रदीपवत् । यथैव हि–'रूपज्ञानम्, रसज्ञानम्' इत्यादिप्रतिनियतज्ञानव्यपदेशहेतवो रूपादयः नाहङ्कारिकाः तद्वत् 'चक्षुर्ज्ञानम् रसनज्ञानम्' इत्यादितद्व्यपदेशहेतुत्वाच्चक्षुरादीन्द्रियाण्यपि । तथा, नाहङ्कारिकाणि इन्द्रियाणि पौद्गलिकाऽनुग्रहोपघाताश्रयत्वात् दर्पणादिवत् । यथैव हि दर्पणादयः पौद्गलिकैर्भस्मपाषाणादिभिः क्रियमाणाऽनुग्रहोपघाताश्रयभूता नाहङ्कारिकाः किन्तु पौद्गलिकाः तथा अञ्जनादिभिः पौद्गलिकैः क्रियमाणानुग्रहोपघाताश्रयभूतानि चक्षुरादीन्द्रियाण्यपि । मनोऽपि नाहङ्कारिकम्, अनियतविषयत्वाद् आत्मवदिति । ततः प्रतिनियतेन्द्रिययोग्यपुद्गलारब्धत्वं द्रव्येन्द्रियाणां प्रतिपत्तव्यम् इति सिद्धं पुद्गलात्मकत्वं तेषामित्यलमतिप्रसङ्गेन ।

भावेन्द्रियमिदानीं व्याचष्टे–लब्ध्युपयोगौ भावेन्द्रियम्, अर्थग्रहणशक्तिः लब्धिः । ननु च अतीन्द्रियशक्तिसद्भावे प्रमाणाभावात् कथं लब्धिरूपं भावेन्द्रियं व्यवतिष्ठेत ? तथाहि–अन्त्यतन्तुसंयोगानन्तरमुपजायमानः पटः अङ्गुल्यग्निसंयोगानन्तरञ्च दाहो नाधिककारणापेक्षः, तस्य तावन्मात्रान्वयव्यतिरेकानुविधायित्वेन अन्यहेतुकत्वाऽनुपपत्तेः । न च अतीन्द्रियशक्तिमन्तरेण 'पिपासापनोदो जलात् नानलात्' 'शीतापनोदोऽनलात् न पुनर्जलात्' इति नियमाऽनुपपत्तेः, तदुपपत्तये साऽभ्युपगन्तव्या इत्यभिधातव्यम्; स्वरूप-सहकारिशक्तिप्रसादादेव तन्नियमोपपत्तेः । द्विविधा हि शक्तिः स्वरूप-सहकारिशक्ति-

'अतीन्द्रियशक्तिसद्भावे प्रमाणाऽभावात्' इति वदतो नैयायिकस्य पूर्वपक्षः—

१ "भौतिकत्वे तु भूतानां भेदात् नियतगुणोत्कर्षयोगित्वात् नियतविषयग्राह्येन्द्रियप्रकृतित्वं तथा च प्रदीपादितेजोरूपरसाद्यनेकविषयसन्निधानेऽपि रूपस्यैव प्रकाशि भवितुमर्हति । एवमिन्द्रियान्तरेष्वपि वक्तव्यम् । तदेष विषयनियमः प्रकृतिनियमकारित इन्द्रियाणाम् इति भौतिकानि इन्द्रियाणि···" न्यायमं० पृ० ४८० । २ एषाऽविकला चर्चा स्या० रत्नाकरे (पृ० ३४६) द्रष्टव्या । "अनेन खलु आहङ्कारिकाणि इन्द्रियाणीति यदाहुः सांख्याः तन्निराकृतम्, निराकरणहेतुमाह–ऐकात्म्य इति श्लिष्टं पदम्, सांख्यानां किल सिद्धान्ते कारणात्मकं कार्यं तच्च कारणम् इन्द्रियाणाम् अहङ्कार इति ऐकात्म्यम् एककारणत्वम्, तथा च ऐकात्म्यम् एकत्वं घ्राणादीनाम् इत्यनियमः स्यात्···" न्यायवा० १।१।१२ । न्यायवा० ता० टी० पृ० २२३ । "पञ्चेन्द्रियाणि जीवस्य मनसोऽनिन्द्रियत्वतः । बुद्ध्यहङ्कारयोरात्मरूपयोस्तत्फलत्वतः ॥ १ ॥" तत्त्वार्थश्लो० २।१५ । ३ "लब्ध्युपयोगौ भावेन्द्रियम् ।" तत्त्वार्थसू० २ । १८ । ४ "लम्भनं लब्धिः । का पुनरसौ ? ज्ञानावरणक्षयोपशमविशेषः ।" सर्वार्थसि० २।१८ । तत्त्वार्थसार श्लो० ४४ पृ० १११ । "इन्द्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः ।" राजवा० २।१८ । "स्वार्थसंविदुयोग्यतैव च लब्धिः ।" तत्त्वार्थश्लो० २।१८ । "आवरणक्षयोपशमप्राप्तिरूपा अर्थग्रहणशक्तिर्लब्धिः ।" स्या० रत्ना० पृ० ३४४ । जैनतर्कपरि० पृ० ११४ पू० । ५ व्यवतिष्ठते आ० । ६ "न तावत् मीमांसकवदतीन्द्रिया शक्तिरस्माभिरभ्युपेयते किन्तु कारणानां स्वरूपं वा सहकारिसाकल्यं वा ।" न्यायवा० ता० टी० पृ० १०३ । "स्वरूपादुद्भवत्कार्यं सहकार्युपबृंहितात् । न हि कल्पयितुं शक्तं शक्तिमन्यामतीन्द्रियाम् ॥" न्यायमं० पृ० ४१ । "किन्तु योग्यतावच्छिन्नस्वरूपसहकारिसन्निधानमेव शक्तिः । सैवेयं द्विविधा शक्तिरुच्यते अव-

भेदात् । तत्र स्वरूपशक्तिः तन्त्वादीनां तन्तुत्वादिरूपा, चरमसहकारिरूपा तु सहकारिशक्तिः; न हि सन्तोऽपि तन्तवः अन्त्यतन्तुसंयोगं विना पटमारभन्ते । तथा च, अनलत्वाऽभिसम्बन्धाद् अनल एव शीतापनोदं विदधाति न जलं तदभावात्, जलत्वाऽभिसम्बन्धाच्च जलमेव पिपासामपनुदति नत्वनलः, तयोः प्रतिनियतसामान्याश्रयत्वेन अन्योन्यकार्योत्पादं प्रति अनङ्गत्वात् । प्रयोगः—दहनादयो निजसहकारिसन्निधिलक्षणमेव सामर्थ्यमुद्वहन्ति असति प्रतिबन्धके कार्योत्पादकत्वात्, यद् असति प्रतिबन्धके कार्यमुत्पादयति तन्निजसहकारिसन्निधिलक्षणमेव सामर्थ्यं बिभर्ति, यथा कर्म विभागेन [1]निवृत्ते पूर्वसंयोगे उत्तरसंयोगोत्पादिकां निजसहकारिसन्निधिलक्षणामेव शक्तिम्, तथा च दहनादयः, तस्मात्तेऽपि तथा इति । न [3]चैवं प्रतिबन्धकमण्यादिसन्निधानेऽप्यग्नेः स्फोटादिकार्यकारित्वप्रसङ्गः निजसहकारिसन्निधिलक्षणायाः शक्तेः सद्भावात् इत्यभिधातव्यम्; तदुत्पत्तौ करतलाऽनलसंयोगवत् प्रतिबन्धकमण्याद्यभावस्यापि सहकारित्वात् । न चाऽभावस्य अवस्तुत्वात् कारणत्वाऽभावः; यतो दर्शनं नः प्रमाणम्, दृश्यते च 'नास्ति' इति ज्ञाने प्रमाण-प्रमेयाऽभावस्य कारणत्वम्, प्रत्यवाये नित्याऽकरणस्य, पतनकर्मणि संयोगाऽभावस्य च ।

किञ्च[4], असौ शक्तिः नित्या, अनित्या वा ? यदि नित्या; तदा सर्वदा कार्योत्पादप्रसङ्गः

स्थिता, आगन्तुका च । सत्त्वाद्यवच्छिन्नं स्वरूपमवस्थिता शक्तिः । आगन्तुका तु दण्डचक्रादिसंयोगरूपा । " न्यायमं० पृ० ४९५ । "नहि नो दर्शने शक्तिपदार्थ एव नास्ति, कोऽसौ तर्हि ? कारणत्वम् । किं तत् ? पूर्वकालनियतजातीयत्वम्, सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वेति···अनुग्राहकत्वसाम्यात् सहकारिष्वपि शक्तिपदप्रयोगात्··· " न्यायकुसु० १।१३, पृ० ६३ ।

१ "उत्क्षेपणादिकं हि कर्म विभागेन निवर्तिते पूर्वसंयोगे उत्तरसंयोगोत्पादे स्वरूपलक्षणायाः पूर्वसंयोगप्रध्वंसलक्षणसहकारिरूपायाश्च दृष्टशक्तेरतिरिक्तशक्तिभाक् न भवत्येव··· " स्या० रत्ना० पृ० २८६ । निवर्त्तिते आ० । २—संयोगोत्पादकां आ० । ३ "यदपि विषदहनसन्निधाने सत्यपि मन्त्रप्रयोगात् तत्कार्याऽदर्शनं तदपि न शक्तिप्रतिबन्धनिबन्धनमपि तु सामग्र्यन्तरानुप्रवेशहेतुकम्"····न्यायमं० पृ० ४२ । "न मन्त्रादिसन्निधौ कार्यानुत्पत्तिः अदृष्टं रूपमाक्षिपति, यथा अन्वयव्यतिरेकाभ्याम् अवधृतसामर्थ्यो वह्निर्दाहस्य कारणम् तथा प्रतिबन्धकमन्त्रादिप्रागभावोऽपि कारणम्···भावस्य भावरूपकारणनियतत्वदर्शनात् अभावकार्यत्वं नास्तीति चेन्न; नित्यानां कर्मणामकरणात् प्रत्यवायस्य उत्पादात्, अन्यथा नित्याकरणे प्रायश्चित्तानुष्ठानं न स्याद् वैयर्थ्यात् ।" प्रश० कन्दली पृ० १४५ । "अत्रोच्यते—भावो यथा तथाऽभावः कारणं कार्यवन्मतः । प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥ १० ॥ " न्यायकुसु० स्त० १, पृ० ४३ । "मण्याद्यभावविशिष्टवह्न्यादेः दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वम्, अनेनैव सामञ्जस्ये अनन्तशक्तितत्प्रागभावप्रध्वंसाभावकल्पनानौचित्यात्···" मुक्तावली का० २ । ३ "किञ्च, शक्तिरभ्युपगम्यमाना पदार्थस्वरूपवन्नित्या अभ्युपगम्येत, कार्या वा ? नित्यत्वे सर्वदा कार्योदयप्रसङ्गः, सहकार्यपेक्षायां तु स्वरूपस्यैव तदपेक्षा अस्तु किं शक्त्या ? कार्यत्वे तु शक्तेः पदार्थस्वरूपमात्रकार्यत्वं वा स्यात्, सहकार्यादिसामग्रीकार्यत्वं वा ?"····न्यायमं० पृ० ४२ ।

तस्याः सदा सत्त्वात्। ननु तन्नित्यत्वेऽपि सहकारिणां कादाचित्कत्वात् कार्ये कादाचित्कत्वं युक्तं तदपेक्षया तस्याः कार्यकारित्वप्रतिज्ञानात; इत्यप्ययुक्तम्; शक्तिकल्पनावैयर्थ्याऽनुषङ्गात्, स्वरूपस्यैव सहकारिकारणापेक्षस्य कार्योत्पादकत्वोपपत्तेः। अनित्यत्वे तु पदार्थस्वरूपमात्रसम्पाद्योऽसौ, निजाऽऽगन्तुकलक्षणसामर्थ्योत्पाद्या, अतीन्द्रियशक्त्यन्तरनिष्पाद्यो वा ? प्रथमपक्षे पदार्थस्वरूपस्य शाश्वतिकत्वेन शश्वच्छक्तेरुत्पादप्रसङ्गात् स एव सदा सातत्येन कार्योत्पादप्रसङ्गः। निजागन्तुकसामर्थ्यसम्पाद्यत्वे तु शक्तेः कार्यमेव तत्सम्पाद्यमस्तु, अलमप्रातीतिकाऽतीन्द्रियशक्तिकल्पनया। अतीन्द्रियशक्त्यन्तरनिष्पाद्यत्वेऽपि अनवस्था, तस्याऽपि कादाचित्कतया तदन्तरनिष्पाद्यत्वप्रसङ्गात्।

तथा प्रतिकार्यम् एका शक्तिः, अनेका वा ? न तावदेका; तद्भेदात् कार्यभेदाश्रयणात्। अथ अनेका; किमसौ शक्तिमतो भिन्ना, अभिन्ना वा ? भेदे अपसिद्धान्तप्रसङ्गः। अभेदे तु किं शक्तिभ्यः तद्वानभिन्नः, तद्वतो वा शक्तयः ? प्रथमविकल्पे शक्तिस्वरूपवत् शक्तिमतोऽप्यनेकत्वमतीन्द्रियत्वञ्च स्यात्। तत्तादात्म्ये तस्यापि तावद्वा भेदात् अतीन्द्रियस्वरूपस्वीकाराच्च, अन्यथा तत्तादात्म्याऽनुपपत्तिः। द्वितीयविकल्पे तु शक्तिमत्स्वरूपवत् शक्तीनामप्येकत्वानुषङ्गः, एकस्मादभिन्नानां तत्स्वरूपवद् अनेकत्वाऽनुपपत्तेः कुतः कार्यनानात्वसंभव इति ?

अत्र प्रतिविधीयते। यत्तावदुक्तम्[६]–'अन्त्यतन्तुसंयोगानन्तरम्' इत्यादि; तदसमीक्षिताऽभिधानम्, अतीन्द्रियशक्तिमन्तरेण प्रतिनियतकार्यकारणभावाऽनुपपत्तेः। प्रतिनियतं हि कारणं कार्यञ्चोपलभ्यते पटः तन्तुभ्यो न वीरणादेः दाहः कृशानोः न जलादेः, सेयं व्यवस्था परिदृश्यमानपदार्थस्वरूपादनुपपद्यमाना तदतिरिक्तं तद्गतमेव धर्मान्तरत्व (रं स्व) सिद्ध्यर्थमाक्षिपति। ननु चेयं व्यवस्था तद्व्यतिरेकेणापि अन्वय-व्यतिरेकाभ्यां पटं प्रति तन्तूनामेव उत्पादनसामर्थ्याऽध्यवसायात् सिद्ध्यति इत्यभिदधतोऽपि स्वरूपातिरेकिणी शक्तिरेव शरणम्, तदनभ्युपगमे द्रव्यस्वरूपाऽविशेषात् सर्वस्मात् सर्वसंभवो दुर्निवारः। [10]स्वभावभेदान्न सर्वस्मात् सर्वसंभवश्चेत् तर्हि [11]स्वो भावः कार्यनियमहेतुर्विशिष्टं स्वरूपम् इत्यङ्गीकृता सकलार्थाश्रिता भेदवती विचित्रा शक्तिः।

शक्तिमस्वीकुर्वतो नैयायिकस्य निराकरणम्–

यदप्युक्तम्[12]–'स्वरूप-सहकारिशक्तिप्रसादादेव' इत्यादि; तदप्युक्तिमात्रम्; [13]स्वाश्रयजन्यकार्यनिरपेक्षतया सामान्यस्य स्थितत्वात्, [14]स्वानाश्रयभूतकारणान्तरजन्यकार्यं प्रति साधारणत्वेन [15]कार्यकारणभावप्रतिनियमव्यवस्थापकत्वाऽसंभवाच्च। अग्नित्वं हि स्फोटवद् विजातीय-

१ तस्याः सत्त्वात् आ०, ब०, ज०, भां०। २–द्या सा–श्र०। –द्योऽसौ भां०। ३–त्पाद्यः भां०। ४–द्यो वा भां०। ५ तथानेका भां०, श्र०। ६ पृ० १५८ पं० ११। ७ प्रतिविनियतम् आ०। ८–भ्यो वी–भां०, श्र०। ९–केणान्वय–भां०। १० स्वभेदान्न आ०। ११ स्वभावः भां०, श्र०। १२ पृ० १५८ पं० १६। १३ स्वम् अग्नित्वसामान्यं तस्य आश्रयोऽग्निः तज्जन्यं कार्यं स्फोटादि। १४ स्वस्य अग्नित्वस्य अनाश्रयभूतं कारणान्तरं जलादि। १५–कार्यकारणभावं प्रति–आ०।

कारणजन्यकार्येष्वपि तुल्यरूपम्। न हि स्फोटं प्रत्येव अग्नेरग्नित्वम् यथा पुत्रापेक्षं पितुः पितृत्वम्, भृत्यापेक्षं वा स्वामिनः स्वामित्वम्, अपि तु सर्वं प्रत्येव अग्निः अग्निरेव। न हि कार्यान्तराणि प्रति अग्निः अनग्निर्भवति, अतो दाहवत् पिपासाद्यपनोदमपि विदध्यात्। ननु असाधारणं स्वरूपं व्यवस्थानिमित्तम्, तथाभूतञ्चेदम् अग्नित्वमग्नेः अनग्निभ्यो व्यावृत्तिनिमित्तत्वात्, दाहत्वमपि अदाहाद् दाहस्य व्यावृत्तिहेतुत्वात्, अतः कार्यकारणभावप्रतिनियमस्य दृष्टेनैव उपपत्तेर्नाऽदृष्टकल्पना उपपन्ना; तदयुक्तम्; अनग्निव्यावर्तकतया तुल्यस्वरूपत्वाऽभावेपि अग्नित्वस्य प्रतिनियतकार्योत्पादकत्वव्यवस्थापकत्वाऽनुपपत्तेः तस्यापि सर्वकार्याणि प्रति साधारणत्वात्, न हि कार्यान्तरेष्वपि अग्नित्वस्याग्नेः अनग्निभ्यो व्यावर्तकत्वं नास्ति येनाऽस्य तज्जनकत्वं न स्यात्, जलादिकारणापेक्षया हि अग्नित्वस्याऽसाधारणस्वरूपता न जलादिकार्यापेक्षयेति। एवं जलस्यापि शैत्यादिजनकत्वे प्रतिनियमो न घटते; तन्नियमनिमित्तस्य च जलत्वस्य दाहादावपि साधारणत्वात्, अतो जलमपि दहेद् अनलोऽपि पिपासामपनुदेदविशेषात्।

अथ दाहस्याऽग्निजन्यत्वे दाहत्वजातेर्व्यवस्थानिमित्तत्वात् क्षित्यादीनामदाहरूपतया अग्निजन्यत्वाऽप्राप्तिः, शैत्यादीनाञ्च जलादिजन्यत्वे तज्जातेः प्रयोजकत्वात् तद्रहितत्वेन दाहस्य कथमिव जलादिजन्यत्वप्रसङ्गः ? तदसमीचीनम्; दाहत्वजातेः शैत्याद्यपेक्षया [10]अतुल्यत्वेऽपि जलादिकारणान्तरापेक्षया तुल्यत्वान्न प्रतिनियतकार्य-कारणभावव्यवस्थाहेतुत्वम्। ननु यत् सामान्यं यत्र समवेतं तदेव तत्र कार्यकारणभावव्यवस्थाहेतुः, न चाऽग्नित्वं जलादौ समवेतं नापि दाहत्वं शीतादौ ; इत्यप्यसुन्दरम्; एवमप्यग्नित्वादेः कारणत्वादिव्यवस्थापकत्वाऽयोगात्, [11]यद्धि अकारणादेर्व्यावृत्तं कारणादावनुवृत्तं तद् असाधारणत्वात् कारणत्वं व्यवस्थापयति, अग्नित्वादिकं[12] च अकारणेभ्यो न व्यावृत्तं भूतभाविषु अग्निविशेषेष्वपि (ष्वपि वि) द्यमानत्वेन अकारणेष्वपि गतत्वात्। न च असत्त्वेन भूत-भविष्यतोर्वह्निविशेषयोः वह्नित्वाश्रयत्वानुपपत्तिः; वह्नित्वावच्छेदेन 'आसीद्[13] वह्निः, भविष्यति वह्निः' इति [14]प्रत्ययद्वयाऽनुत्पत्तिप्रसङ्गात्। अस्तु वा [15]सत्त्वविशेषितविशेषाश्रयत्वम्; तथापि न वह्नित्वस्य विपक्षाद् व्यावृत्तिः विवक्षितवह्निविशेषजन्यधूमं प्रति वह्निविशेषान्तरस्याऽकारणत्वात्, तज्जन्यञ्च प्रति अन्यस्याऽकारणत्वात्, अतः अकारणेऽपि[16] विपक्षे वह्नित्वस्योपलम्भान्न स्वाश्रयकारणत्वप्रयोजकत्वम्।

किञ्च, अनग्निरूपाऽर्थेभ्यो व्यावर्तमानमग्नित्वम् अग्निजन्यकार्यं प्रति [17]अनग्निरूपार्थानां कारणत्वमपाकरोतु, निखिलाऽग्निव्यक्तीनाम् अन्योन्यकार्यजननं प्रति कारणत्वसङ्करप्रसङ्गं

१ अतीन्द्रियशक्तिरूपा। २ असाधारणत्वेऽपि। तुल्यारू-अ०। ३ अग्नित्वस्य। ४ अग्नित्वस्य। ५ कार्यान्तरजनकत्वम्। ६-त्वे सति नि-भां०। ७ कार्यकारणनियम। ८-स्य ज-आ०। ९ शैत्यादिजातेः। १० असाधारणत्वेऽपि। ११ यद्यका-अ०। १२-कं वा अ-अ०। १३-सीदग्निः भ-भां०,अ०। १४ प्रत्ययानुपप-भां०। १५ सत्यविशेषित-आ०। १६-पि च विप-अ०। १७ अग्निरूपा-भां०।

कथं परिहर्त्तुमुत्सहते,अतस्तत्परिहारे किञ्चिन्नियामकं वक्तव्यम्–तच्च सामान्यम्, विशेषः, द्वयम्, शक्तिर्वा स्यात् ? न तावत्सामान्यम्; व्यक्त्यन्तरेऽप्यनं(प्यनु)गमात्। नापि विशेषः; यतो न विशेषान्तरजन्यकार्यं प्रति विशेषो विशेषरूपतां परित्यजति। नापि द्वयम्; अत एव, अतः शक्तेरेव तन्नियामकत्वमङ्गीकर्त्तव्यम्। स्वरूप-सहकारिशक्तेस्तन्नियामकत्वे च लोकप्रतीति-
५ विरोधः, प्रतीयते हि लोके स्वरूप-सहकारिशक्तियुक्तेष्वपि बलीवर्द-मनुष्यादिषु 'अयमत्र कार्ये समर्थः, अयञ्चाऽसमर्थः अल्पसामर्थ्यो वा' इत्यादिव्यवहारः प्रतीतिश्च। तत्सिद्धं तन्निमित्तं स्वरूप-सहकारिशक्तिव्यतिरिक्तं सामर्थ्यम्, अन्यथा अयं विभागो न स्यात्, सर्वेषां समानमेव कार्यकारित्वं तदकारित्वं वा स्यात्।

किञ्च, सहकारिलाभमात्रात् पदार्थाः कार्यं कुर्वन्ति, स्वभावभेदे सति सहकारिलाभाद्वा ?
१० प्रथमपक्षे तल्लाभे सत्यपि स्वरूपस्याऽविशिष्टत्वात् मृत्पिण्डाद् घटस्येव पटस्याप्युत्पत्तिः स्यात्, 'स्वभावभेदश्च शक्तिभेदे सत्येव स्यात्' इत्युक्तम्। किञ्च, अग्नेः स्वरूपसहकारिसन्निधिमात्रात् कार्यकारित्वाऽभ्युपगमे प्रतिबन्धकमण्यादिसन्निधानेऽपि तत्प्रसङ्गः, न हि तदाऽग्नित्वस्य करतलाऽनलसंयोगस्य वा सहकारिणो विनाशोऽन्यत्वं वाऽस्ति; तत्स्वरूपस्याऽविकलस्य प्रत्यभिज्ञायमानत्वात्। ततो दृष्टरूपात् कारणादनुद्भवत् कार्यं तदतिरिक्तं किञ्चिन्निमित्तान्तरं
१५ परिकल्पयति, सा च शक्तिः।

ननु तन्मण्यादिसन्निधौ सामग्र्यभावाद् वह्नेः कार्याऽकरणत्वादकारणत्वम्, करतलाऽनलसंयोगवद् दाहोत्पत्तौ तन्मण्याद्यभावस्यापि सामग्रीत्वात्; तदसत्; यतः कोऽत्र अभावः सहकारी–किं प्रतिबन्धकमण्यादेः प्रागभावः, प्रध्वंसः, अन्योन्याभावः, अत्यन्ताऽभावः, अभावमात्रं वा ? यदि प्रागभावः; तदा विद्यमानेऽप्येकस्मिन्मणौ मण्यन्तरप्रागभावाऽपेक्षया दाहो-
२० त्पत्तिः स्यात्। अथ तस्यैव प्रागभावं प्राप्य असौ दाहं विधत्ते; तर्हि तत्प्रध्वंसे, सत्यपि वा अस्मिन् उत्तम्भकमणिसन्निधौ दाहोत्पत्तिर्न स्यात्। एतेन प्रध्वंसस्य सहकारित्वं प्रत्युक्तम्; तत्प्रागभावे, तत्सत्त्वेऽपि वा उत्तम्भकमण्युपनिपाते दाहाऽनुत्पत्तिप्रसङ्गात्। नोप्यन्योन्याभावः; प्रतिबन्धकमण्यादिसद्भावेऽप्यस्य संभवात् दाहोदयानुषङ्गात्, तत्प्राक्-प्रध्वंसाभावसंभवे तदनुदयप्रसङ्गाच्च। अत्यन्ताऽभावस्य च प्रतिबन्धकमण्यादावसंभवादेव सहकारित्वं प्रत्याख्यातम्।
२५ नाप्यभावमात्रं सहकारि; अभावचतुष्टयव्यतिरिक्तस्य अभावमात्रस्यैवाऽसंभवात्। ततः

---

१ कथ हि पोहितुमु–भां०। २ व्यक्तंतरेप्यनग–भां०। ३–तां त्यजति भां०, श्र०। ४ हि स्वरूपकारिशक्ति–भां०। ५–पि चाबद्ध मनु–भां०। ६ चास्ति भां० श्र०। ७ "कश्चास्याभावः कार्योत्पत्तौ सहकारी स्यात्–किमितरेतराभावः, प्रागभावो वा स्यात्, प्रध्वंसो वा, अभावमात्रं वा ?" प्रमेयक० पृ० ५२ पू०। स्या० रत्ना० पृ० २८८। ८ तत्प्रतिध्वंसे आ०, भां०। ९ नान्योन्या–भां०, श्र०। १०–संभवतो दा–श्र०। ११ तत्प्रध्वंसा–श्र०।

प्रतिबन्धकमण्याद्यभावो न दाहादौ कारणम् अन्वय-व्यतिरेकशून्यत्वात्, यद् यत्रान्वय-व्यतिरेकशून्यं न तत्तत्र कारणम् यथा पटे कुम्भकारः, तथा चायम्, तस्मात्तथेति। अन्यथासिद्धान्वयव्यतिरेकत्वाद्वा पैङ्गल्यादिवत्।

किञ्च, यदि तन्मन्त्राद्यभावो दाहहेतुः तदैकतन्मन्त्रादिव्यक्तिसद्भावेऽपि अन्यतन्मन्त्रादिव्यक्तीनां भूतभविष्यद्वर्तमानानां तद्देशे तत्काले च अभावाः सन्तीति दाहोत्पत्तिः किन्न स्यात्? न च एकव्यक्त्यभावो नास्ति इति व्यक्त्यन्तराभावैः स्वकार्यं न कर्त्तव्यम्, न हि भावव्यक्त्यन्तराणि न सन्ति इति एका भावव्यक्तिः स्वकार्यन्न करोति इति प्रातीतिकम्। न च अनन्तानां सम्भूय कार्यकारित्वं क्वापि प्रतिपन्नम्। न चैक एवायमभावः तन्मन्त्रादिजातेरेकत्वात् इत्यभिधातव्यम्; जातेः अभावेषु भवताऽनभ्युपगमात्, अन्यथा अभावानां द्रव्य-गुण-कर्मान्यतमरूपताप्रसङ्गो जातेस्तत्रैव परिसमाप्तत्वात्।

किञ्च, मण्यादिमात्राऽभावो दाहहेतुः, प्रतिबन्धकाऽभावो वा? तत्राद्यपक्षोऽयुक्तः; मण्यादिमात्राऽभावे दाहाऽदर्शनात्। न च विशिष्टमण्याद्यभावः कारणम्; तद्वैशिष्ट्यस्य कार्यैकसमधिगम्यस्य नामान्तरेण शक्तेरेवाऽभिधानात्। द्वितीयपक्षोऽप्यनुपपन्नः; प्रतिबन्धकस्तम्भितविषभक्षणे पश्चात् प्रतिबन्धकनिवृत्तौ मरणप्रसङ्गात्। अत्र हि प्रतिबन्धकेन रसाभावः क्रियते; अतिशयान्तरं वा? न तावद्रसाभावः; नीरसत्वस्य विषेऽनुपलम्भात्, रसस्य तत्र प्रत्यभिज्ञायमानत्वात्। नापि अतिशयान्तरम्; अदृष्टकल्पनाप्रसङ्गात्। यदि चाऽतिशयः कश्चिदतीन्द्रियः कल्प्येत तदा शक्तिकल्पने को विद्वेषः? ततो निराकृतमेतत्–'दहनादयो निजसहकारिसन्निधिलक्षणमेव सामर्थ्यमुद्वहन्ति' इत्यादि; निजसहकारिसन्निधिलक्षणसामर्थ्याद् उक्तप्रकारेण तेषां कार्यकारित्वानुपपत्तेः। तल्लक्षणसामर्थ्यात् तदुत्पत्त्यभ्युपगमे च बीजादेरप्यत एवं अङ्कुरादिकार्योत्पत्तिप्रसङ्गात्, स्रग्वनितादेश्च सुखाद्युत्पत्त्यनुषङ्गात् अतीन्द्रियस्येश्वरस्य अदृष्टादेश्च कल्पनाऽनुपपत्तिः।

यच्च 'प्रतिबन्धकमण्यादिसन्निधाने कार्याऽकरत्वादकारणत्वम्' इत्युक्तम्; तत्र किमिदं कार्याऽकरत्वं नाम–किं कार्यप्रतियोगित्वम्, प्रतिबद्धत्वं वा? प्रतियोगित्वे पुनस्ततो दाहोत्पत्तिर्न स्यात् जलादिवत्। नापि प्रतिबद्धत्वम्; प्रतिमण्यादिसन्निधानेऽपि कार्याऽकरत्वप्रसङ्गात्।

किञ्च, सामान्यरूपा शक्तिः प्रतिबन्धकेन प्रतिबद्ध्यते, द्रव्यस्वभावा, गुणरूपा वा? [10]प्रतिबन्धश्चास्याः प्रध्वंसः, अभिभवो वा? तत्र न तावत् सामान्यरूपायाः शक्तेः प्रध्वंस-

१ प्रतिबन्धकमन्त्रमण्यादि। २ दाहादिद–भां०, श्र०। ३ कल्पेत आ०। ४ एव वांकु–भां०, श्र०। ५–त्पत्तिप्रसङ्गात् भां०, श्र०। ६ यच्च तन्मण्यादि–भां०, श्र०। ७ पृ० १६२ पं० १६। ८ अत्र भां०, श्र०। ९ प्रतिबन्धकमण्यादिसन्निधानेऽपि उत्तम्भकमण्यादिसन्निधौ कार्यकरत्वाप्रसंगात् भां०, श्र०। प्रतिबन्धकमण्याद्यपेक्षया प्रतिमण्यादिः उत्तम्भकमण्यादिः मल्लप्रतिमल्लन्यायेन। १० प्रतिबन्धकश्चास्याः भां०।

लक्षणः प्रतिबन्धो घटते ; नित्यत्वात् । नापि द्रव्यरूपायाः ; तस्याः समवायिकारणविनाशाद् असमवायिकारणविनाशाद्वा विनाशाऽभ्युपगमात् । नापि गुणरूपायाः , तस्या विरोधिगुणप्रादुर्भावाद् आश्रयविनाशाद्वा विनाशप्रतिज्ञानात् । अभिभवलक्षणस्तु प्रतिबन्धोऽनुपपन्नः ; प्रतिबन्धकमण्यादिसन्निधानेऽपि सामान्यादिस्वरूपायाः निज-सहकारिशक्तेः अनभिभूतायाः प्रतीतेः ।

किञ्च, द्वे[1] अपि शक्ती किं कारणजन्ये, उत एका जन्या अन्या नित्या ? प्रथमपक्षोऽनभ्युपगमान्न युक्तः । द्वितीयपक्षे तु 'एकां शक्तिं प्रतिबन्धको हन्ति, अपरां पालयति' इति महत्तस्य वैचित्र्यम् ! ततो मन्त्रौषधाद्यैरचिन्त्यप्रभावैः अतीन्द्रियायाः शक्तेरेव प्रतिबन्धः प्रतिपत्तव्यः । कः पुनः शक्तेः प्रतिबन्धः इति चेत् ? अभिभवः, विनाशो वा ।

ननु प्राप्य शक्तिं प्रतिबन्धकः प्रतिबध्नाति, अप्राप्य वा ? न तावत् प्राप्य ; शक्तिमतो मणिमन्त्रादिनाऽप्राप्तौ तेनाऽस्याः प्राप्तेरयोगात् , न हि हस्तेन पटाऽप्राप्तौ तद्गतरूपादेः प्राप्तिः संभवति । अप्राप्तस्य प्रतिबन्धे च एकस्मादेव मणिमन्त्रादेः सर्वस्याः शक्तेः प्रतिबन्धः स्यात् ; इत्यप्यनुपपन्नम् ; योग्यतालक्षणसम्बन्धवशाद् योग्याया एवाऽस्या तेन प्रतिबन्धोपपत्तेः चुम्बकवत् । न खलु चुम्बकस्य अयसः योग्यतातोऽन्यः सन्निकर्षादिः सम्बन्धोऽस्ति, नाप्ययोग्यस्य आकर्षणम् ; त्रैलोक्योदरवर्तिनोऽपि अयसः तेनैकेनैव आकर्षणप्रसङ्गात् । ननु विनष्टायाः शक्तेः कुतः पुनः प्रादुर्भावः यतो दाहादिकार्योत्पत्तिःस्यादिति चेत् ? शक्त्यन्तरयुक्ताद्वह्निक्षणादेव, न चाऽनवस्थानुषङ्गो दोषाय; बीजाङ्कुरादिवत् तत्कार्यकारणप्रवाहस्याऽनादितयेष्टत्वात् । ताश्चैवम्भूताः शक्तयोऽर्थानाम् अनेकरूपाः सन्ति प्रतिक्षणमनेककार्यकारित्वात्, कथमन्यथा कश्चित् प्रति प्रतिबद्धोऽप्यग्निः तदैवाऽन्यस्य दाहादिकं विदध्यात् , विषं वा प्रतिबद्धमारणशक्तिकं व्याध्युपशमं कुर्यात् ? न चैकस्य अनेकस्वभावत्वविरोधः ; प्रमाणतः प्रतिपन्नस्य अविरोधास्पदत्वात् । शक्ति-तद्वतोः सर्वथाभेदाऽभेदपक्षोक्तमपि दूषणमनुपपन्नम् ; तयोः कथञ्चिदभेदाऽभ्युपगमात् । ततः कार्यकारणभावप्रतिनियमं प्रतिजानद्भिः प्रतिपदार्थं स्वात्मभूतमतीन्द्रियं कार्यैकसमधिगम्यं विचित्रं रूपान्तरं शक्त्यपराभिधानं प्रेक्षादक्षैः प्रतिपत्तव्यम् । इति सिद्धा शक्तिः पदार्थानाम् । अतो युक्ता **अर्थग्रहणशक्तिः** आवरणक्षयोपशमप्राप्तिरूपा **लब्धिः** ।

---

१ स्वरूप-सहकारिसन्निधिलक्षणे । २–यो भावानाम् भां०, श्र० । ३ किञ्चित्प्रतिबन्धोप्य– भां० । किं कश्चित् प्रतिब–श्र० । ४–न्द्रियकार्यै–श्र० । ५ अतीन्द्रियशक्तिप्रतिपादनपराः इमे ग्रन्था द्रष्टव्याः । "नित्यं कार्यानुमेया च शक्तिः किमनुयुज्यते । तद्भावभावितामात्रं प्रमाणं तत्र गम्यते ॥ ४४ ॥" मी० श्लो० वा० शब्दनित्य० । प्रक० पं० पृ० ८१ । शास्त्रदी० सू० १।१।५ । प्रमेयक० पृ० ५१ । सन्मति० टी० पृ० ५८६ । स्या० रत्ना० पृ० २८६ । तत्त्वसङ्ग्रहकारस्तु–"तत्र शक्तातिरेकेण न शक्तिर्नाम काचन" (श्लो० १६०७) इत्यादिना पदार्थस्वरूपामेव शक्तिमभ्युपगच्छति ।

उपयोगः पुनः अर्थग्रहणव्यापारः। विषयान्तराऽऽसक्ते चेतसि सन्निहितस्यापि विषयस्याऽग्रहणात् तत्सिद्धिः। इदानीं '**सन्निपात**' इत्यादि व्याचष्टे '**योग्यता**' इत्यादिना। **तयोः** विषयविषयिणोः **अनन्तरं भूतमुत्पन्नम्**, अनेन अनन्तरशब्दः साक्षात् सन्निपातशब्दस्तु सामर्थ्याद् व्याख्यातः। न खलु तयोः योग्यदेशाद्यवस्थानलक्षणसन्निपाताऽसंभवे पूर्वमिव तदनन्तरं कस्यचित् प्रादुर्भावो युक्तोऽतिप्रसङ्गात्। किं तत् तदनन्तरभूतम्? इत्याह— **अर्थग्रहणम्**। **अर्थस्य** अनन्तरोक्तस्य **ग्रहणम् न** पुनः स्वरूपगताऽर्थाकारमात्रस्य, ज्ञानस्य अर्थाकारतया स्वप्नेऽप्यप्रतीतेः। घटादेर्बहिर्देशसम्बद्धस्य अन्तर्देशसम्बद्धेन ज्ञानेन अहमहमिकया प्रतीयमानेन प्रतिप्राणि प्रतिभासप्रतीतेः। ननु यद्यर्थादुत्पन्नं तदाकारानुकारि च तन्न स्यात् कथं तर्हि नियतार्थग्राहकम्? इत्यत्राह—**योग्यतालक्षणम्**। **योग्यता** नियतार्थग्रहणसामर्थ्यम् **लक्षणम्** स्वरूपं यस्य तत्तथोक्तमिति।

साकारज्ञानवादिनो बौद्धैकदेशिसौत्रान्तिकस्य पूर्वपक्षः—

अत्र सौत्रान्तिकमतावलम्बी प्राह—ज्ञानम् अर्थस्य ग्राहकं भवत् किं सम्बद्धस्य ग्राहकं भवेत्, असम्बद्धस्य वा? न तावदसम्बद्धस्य; अतिप्रसङ्गात्। अथ सम्बद्धस्य; किं तादात्म्येन, तदुत्पत्त्या वा? तत्राद्यविकल्पोऽयुक्तः; योगाचारमतप्रसङ्गात्। तदुत्पत्तिरपि न समसमये संभवति; सव्येतरगोविषाणवत् समसमयवर्तिनोः कार्यकारणभावाऽभावात्, भिन्नसमये च अर्थस्य विनष्टत्वात् नाऽऽकारमन्तरेण ग्रहणं घटते। [10]तदुक्तम्—

"[11]*भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।*
हेतुत्वमेव युक्तिज्ञाः तदाकारार्पणक्षमम्॥" [प्रमाणवा० ३।२४७] इति।

प्रयोगः—अर्थाकारं ज्ञानम् अर्थकार्यत्वात् उत्तरार्थक्षणवत्। तथा, यद् यस्य ग्राहकं तत्तदाकारम् यथा स्वरूपग्राहकं ज्ञानं स्वरूपाकारम्, नीलाद्यर्थस्य ग्राहकञ्च ज्ञानमिति।

किञ्च, अतीताऽनागतविषयज्ञानानां [12]केशोण्डुकादिज्ञानानाञ्च बाह्यार्थस्य ग्राह्यस्याऽभावात्

---

१ "तन्निमित्तः आत्मनः परिणाम उपयोगः।" सर्वार्थसि०, राजवा० २।१८। तत्त्वार्थसार पृ० १११। "उपयोगः प्रणिधानम्।" तत्त्वार्थभा० २।१९। "उपयोगस्तु रूपादिग्रहणव्यापारः।" स्या० रत्ना० पृ० ३४४। २ अनन्तरभूत—भां०, श्र०। ३ अन्तरश—भां०। ४—शब्दश्च सा—भां०। ५ खल्वनयोः भां०। ६ पूर्वमेव भां०। ७ "स्वावरणक्षयोपशमलक्षणयोग्यतया हि प्रतिनियतमर्थं व्यवस्थापयति।" परीक्षामु० २।९। ८—हकमसम्ब—भां०, श्र०। ९—मतप्रतिप्रसवप्रसङ्गात् आ०, भां०। १० यदुक्तम् आ०। ११ उद्धृतञ्चैतत्—न्यायवि० टी० पृ० १३५ उ०। प्रमेयरत्नमा० पृ० ४८। "युक्तिज्ञा ज्ञानाकारार्पणक्षमम्" प्रमाणवा०। १२ "यथा चिरकालीनाध्ययनादिखिन्नस्य उत्थितस्य नीललोहितादिगुणविशिष्टः केशोण्डूकाख्यः कश्चिन्नयनाग्रे परिस्फुटति, अथवा करसम्मृदितलोचनरश्मिषु येयं केशपिण्डावस्था सा केशोण्डूकः।" शास्त्रदी० युक्तिस्नेहप्र० सि० १।१५। पृ० ९८।

कथमिव आकारमन्तरेण तद्ग्रहणम् ? यद् यदाकारं न भवति न तत् तस्य ग्राहकम् यथा शुक्लसंवेदनं नीलस्य, ग्राहकञ्चार्थस्य ज्ञानमिति । निराकारत्वाभ्युपगमे[1] च ज्ञानस्य स्वरूपस्यापि अप्रत्यक्षत्वप्रसङ्गः, उत्पद्यमानं हि ज्ञानं 'नीलमिदम्, पीतमिदम्' इत्याद्याकारेणैव प्रतीयते, तदभावे कथमिव अस्य प्रत्यक्षता स्यात् ? निराकारत्वे च ज्ञानानामन्योन्यं भेदोऽपि सुदुर्लभः, नीलाद्याकारो हि संविदः संविदन्तराद् व्यावर्तकं रूपम्, तदभावे कुतः किं व्यावर्त्तेत ? तस्माद् यतो 'नीलस्येदं[3] विज्ञानम्, पीतस्येदम्' इत्यधिगतिर्नियतकर्म्मिका सम्पद्यते तदेवं रूपमस्यां क्रियायां साधकतमत्वात् प्रमाणम्, संविदः संविदन्तराच्च भेदकम् । उक्तञ्च–

"तत्रा[4]ऽनुभवमात्रेण ज्ञानस्य सदृशात्मनः ।
भाव्यं तेनाऽऽत्मना येन प्रतिकर्म विभज्यते ॥" [प्रमाणवा० ३। ३०२] इति ।

न च अर्थरूपताऽत्यये 'नीलस्येयं बुद्धिः' इति बुद्धेरर्थेन घटना घटते, तथाविधायाश्चास्याः सर्वार्थं प्रत्यविशेषात् प्रतिकर्मव्यवस्थाऽपि दुर्घटा । तथा च तत्स्वरूपं प्रतिपदार्थं निराकारतयाऽप्राप्तभेदं सद् व्यवहर्तृ[5]णामर्थक्रियार्थिनां नियतार्थप्रतीत्यहेतुतया कथं नियतेऽर्थे प्रवृत्तेरङ्गं स्यात् ? तदुक्तम्–

"[6]अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम् ।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता ॥" [प्रमाणवा० ३।३०५] इति ।

न च कारणत्वाऽविशेषात् अर्थवत् चक्षुरादेरप्याकारानुकरणं ज्ञाने किन्न स्यादित्यभिधातव्यम् ? तदविशेषेऽपि अपत्येन पित्राकारानुकरणवत् नियतस्यैवाऽऽकारानुकरणोपपत्तेः । उक्तञ्च–

"यथै[7]वाऽऽहारकालादेः समानेऽपत्यजन्मनि ।
पित्रोस्तदेकमाकारं धत्ते नान्यस्य कस्यचित् ॥" [प्रमाणवा० ३।३६६] इति ।

ततो यद् यदाकारं स्वज्ञानेन आलम्ब्यते तत्तदाकारमेव प्रतिपत्तव्यम् यथा सारूप्यादिमदा-

---

१–रत्वानभ्यु–श्र० । २–स्यास्य प्र–भां० । ३–दं ज्ञानम् भां० । "तदाकारं हि संवेदनमर्थं व्यवस्थापयति नीलमिति पीतञ्चेति । यथा च आकारयोगिता ज्ञानस्य तथोत्तरत्र प्रतिपादयिष्यामः ।" प्रमाणवा० अलं० पृ० २ । ४ "स्वसंवित्तिः फलं चास्य तादूप्यादर्थनिश्चयः । विषयाकार एवास्य प्रमाणं तेन मीयते ॥ १० ॥" प्रमाणसमु० । "किमर्थं तर्हि सारूप्यमिष्यते प्रमाणम् ? क्रियाकर्मव्यवस्थायास्तल्लोके स्यान्निबन्धनम् ॥ ४२९ ॥"···सारूप्यतोऽन्यथा न भवति नीलस्य कर्मणः संवित्तिः पीतस्य वेति क्रियाकर्मप्रतिनियमार्थमिष्यते···" प्रमाणवा० अलं० पृ० ११९ । "अर्थसारूप्यमस्य प्रमाणम् ।" न्यायबि० १।१९ । "····प्रमाणं तु सारूप्यं योग्यतापि वा ॥१३४४॥" तत्त्वसं० । ५ उद्धृतञ्चैतत्–न्यायमं० पृ० ५३८ । मीमांसाश्लो० वा० टी० शून्यवाद श्लो० २० । ६ "अर्थेन घटयत्येनां··· अन्यत्स्वभेदो ज्ञानस्य भेदकोऽपि कथञ्चन ॥३०५॥ तस्मात् प्रमेयाधिगतेः साधनं मेयरूपता ।" प्रमाणवा० । "तदुक्तम्–अर्थेन घटयेदेनां···"सिद्धिवि० टी० पृ० ११९ । सन्मति० टी० पृ० ५१० । प्रमेयक० पृ० २८ पू० । न्यायवि० टी० पृ० १२६ उ० । प्रमाणमी० पृ० ३३ । स्याद्वादमं० पृ० १३६ । ७ 'तदेकस्याकारं' प्रमाणवा० ।

कारः स्वज्ञानेनाऽऽलम्ब्यमानो गौः सास्नादिमान्, अर्थाकारत्वाऽर्थज्ञानं स्वज्ञानेनाऽऽलम्ब्यते इति सिद्धा साकारता ज्ञानस्येति ।

साकारवादप्रतिक्षेपपुरस्सरं ज्ञानस्य निराकारत्व-व्यवस्थापनम्–

अत्र प्रतिविधीयते । यत्तावदुक्तम्[2]–'ज्ञानमर्थस्य सम्बद्धस्य असम्बद्धस्य वा ग्राहकम्' इत्यादि; तत्र सम्बद्धस्यैव तद् ग्राहकम्, सम्बन्धश्च[3] ज्ञानार्थयो योग्यतालक्षणो न पुनः तदुत्पत्तिलक्षणः अर्थाज्ज्ञानोत्पत्तेर्निषेत्स्यमानत्वात् । तथा च 'अर्थाकारं ज्ञानम् अर्थकार्यत्वात्' इत्यत्र असिद्धो हेतुः । तल्लक्षणसम्बन्धश्च (न्धाच्च) ज्ञानमर्थस्य समकालस्य भिन्नकालस्य वा ग्राहकं न[6] विरुद्ध्यते, अतः *'भिन्नकालं कथं ग्राह्यम्'* इत्याद्ययुक्तम् । किञ्च, स्वागमा (गम) प्रसिद्धं ज्ञानमाश्रित्य साकारता प्रसाध्यते, अनुभवप्रसिद्धं वा ? तत्राद्यविकल्पे स्वागमप्रसिद्धस्याऽविकल्पकज्ञानस्य आकाशकुशेशयप्रख्यत्वात् न तत्साकारेतरचिन्तयाऽस्माकं किञ्चित् प्रयोजनम् । यदेव हि प्रवृत्तिनिवृत्त्यादिकारणं प्रमाणभूतम् आबालमनुभवप्रसिद्धं सविकल्पकं ज्ञानं तदेव निराकारतया प्रसाधयितुमुपक्रान्तम् । न खलु 'स्वाकारो ज्ञानानां विषयः' इति प्रतियन्ति लौकिकाः, अनात्मभूतार्थोन्मुखतया तैस्तेषामर्थपरिच्छेदकत्वप्रतिज्ञानात् । न च लोकव्यवहारातिक्रमेण अर्थव्यवस्था युक्ता; *"प्रामाण्यं व्यवहारेण"* [प्रमाणवा० २।५] इत्यादिविरोधाऽनुषङ्गात् । प्रत्यक्षादिविरोधप्रसङ्गाच्च ; तथाहि– प्रत्यक्षेण तावत् विषयाकाररहितमेव ज्ञानं प्रतिपुरुषमहमहमिकया घटादिग्राहकमनुभूयते, न पुनर्दर्पणादिवत् प्रतिबिम्बाक्रान्तम् । अनुमानेन च ; तथाहि–यद् येन स्वात्मनोऽर्थान्तरभूतं वेद्यते तत्तेन अतदाकारेण यथा स्तम्भादेर्जाड्यम्, वेद्यते च स्वात्मनोऽर्थान्तरभूतं ज्ञानेन नीलादिकमिति । नचाऽयमसिद्धो हेतुः ; नीलादेर्ज्ञानाद् भेदप्रसाधनात् ।

का चेयं ज्ञानस्य साकारता नाम–स्वसंविद्रूपता, वैशद्यादिस्वभावः, अर्थाकारोल्लेखः, अर्थाकारधारित्वं वा ? तत्र आद्यविकल्पत्रये सिद्धसाध्यता; ज्ञाने तत्त्रयस्यापि सद्भावात्, तदन्यतमापाये ज्ञानस्य ज्ञानरूपत्वस्यैवाऽनुपपत्तेः वैशद्यादिरूपतया स्वपरव्यवसायस्वभावत्वात्तस्य । अर्थाकारधारित्वं तु ज्ञानस्याऽनुपपन्नम्; प्रमाणविरोधात् । तथाहि–नीलाद्याकारो ज्ञाने न सङ्क्रामति[8] जडस्यैव धर्मत्वात्, यो[9] जडस्यैव धर्मः स ज्ञाने न सङ्क्रामति यथा जडता,

१–नावल–श्र० । २ पृ० १६५ पं० ११ । ३ "सम्बन्धो हि योग्यतास्वभाव एव ज्ञानार्थयोः ग्राह्यग्राहकभावाङ्गम् न तु तादात्म्यादिः ।" स्या० रत्ना० पृ० १६३ । ४–नार्थयोग्य–भां०, आ० । ५ लक्षणसम्बन्ध–भां० । ६ न रुद्धयते भां०, श्र० । ७–कल्पकज्ञानं भां० । ८ "किमिदमर्थाकारत्वं वेदनानां यद्वशात् प्रतिनियतार्थपरिच्छेदः स्यात् किम् अर्थाकारोल्लेखित्वम्, अर्थाकार धारित्वं वा ?" रत्नाकराव० ४।४७ । स्याद्वादमं० पृ० १३१ । ९–ति अर्थस्यैव भां० । १० यो अर्थस्यैव भां० ।

जडस्यैव धर्मश्च नीलाद्याकार इति। न च सत्त्वादिना व्यभिचारः; तस्य जडस्यैव धर्मत्वाऽसंभवात् अजडसुखादावप्यस्य संभवात्।

किञ्च, अर्थेन सह ज्ञानस्य सर्वात्मना सारूप्यम्, एकदेशेन वा ? सर्वात्मना सारूप्ये जडत्वादर्थस्य ज्ञानमपि जडमेव स्यात्। यस्य सर्वात्मना अर्थेन सारूप्यं तज्जडम् यथा उत्तरोऽर्थक्षणः, सर्वात्मना सारूप्यञ्च अर्थेन ज्ञानस्येति। प्रमाणरूपताविरोधानुषङ्गश्च तद्वदेवास्य स्यात् प्रमेयरूपताऽनुकरणात्, न चैतद् युक्तम्; प्रमाणप्रमेययोर्बहिरन्तर्मुखाऽऽकारतया भेदेन प्रतिभासमानत्वात्। अथ एतद्दोषपरिजिहीर्षया एकदेशेन सारूप्यमिष्यते; तर्हि तेनाऽजडाकारेण जडताप्रतिपत्तेरभावात् कुतः तद्विशिष्टताऽर्थस्य प्रतीयते ? यद् येन यत्र न प्रतीयते न तेन तत्र तद्विशिष्टता प्रत्येतुं शक्या यथा रूपज्ञानेन अप्रतिपन्नेन रसेन विशिष्टता मातुलिङ्गादौ, न प्रतीयते च अजडाकारेण नीलादिज्ञानेन अर्थजडतेति। जडताऽप्रतीतौ च कथं नीलताऽपि प्रतीयेत ? अन्यथाऽनयोर्भेदः स्यात्। यस्मिन् अप्रतीतेऽपि यत् प्रतीयते तत्ततः अन्यद् यथा घटेऽप्रतीयमानेऽपि प्रतीयमानः पटः, अप्रतीयमानायामपि जडतायां प्रतीयते च नीलतेति। सुगतेन चास्याः प्रतीत्यभावे कथं सत्त्वम् ? सत्त्वे वा कथं तस्य अशेषज्ञता ?

परैरागादिवेदने च अस्य यदि तदाकारता स्यात् तर्हि परकीयसकलकल्पनाजालाऽनुकरणात् कथं वीतरागता विधूतकल्पनाजालता च स्यात् ? अथ तदाकारानुकरणेऽपि 'मदीया एते रागादयः' इति बुद्धेरभावान्नाऽयं दोषः; कथं तर्हि परस्य ते ? तद्बुद्धिसद्भावादिति चेत्; ननु तेन तद्बुद्ध्याकाराऽनुकरणे अयमेव दोषोऽनुषज्यते। अथ एतद्दोषाद् बिभ्यता 'अतदाकारेण ज्ञानेन जडतादिकं प्रतीयते' इत्यभ्युपगम्यते; तर्हि नीलाद्याकारोऽपि अतदाकारेणैव ज्ञानेन प्रतीयताम् अलमाकाराऽऽग्रहग्रहाऽभिनिवेशेन। अथ नीलतां तत् तदाकारतया प्रतिपद्यते जडतां त्वतदाकारतया[10]; तदिदम् [11]अर्धजरतीयन्यायाऽनुसरणम्।

---

१ जडत्वस्यैव श्र०। २ अजडे सु-श्र०। ३ "सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत्। साम्ये केनचिदंशेन स्यात्सर्वं सर्ववेदनम्॥" प्रमाणवा० ३।४३५। तत्त्वसं० श्लो०२०३९। सन्मति०टी० पृ० ४६४। "सारूप्येऽपि समन्वेति प्रायः सामान्यदूषणम्। अतदर्थपरावृत्तमतद्रूपं तदर्थदृग्॥२७॥" न्यायवि० पृ० १२९ उ०। ४ "अर्थेन सर्वात्मना तत्र स्वाकाराधाने ज्ञानस्य जडताप्रसक्तेः उत्तरार्थक्षणवत्। एकदेशेन तदाधायकत्वे सांशताप्रसक्तेः।" शास्त्रवा० टी० पृ० १५९ पू०। ५ अर्थे जड-श्र०। ६-था तयोः श्र०। ७ तत्ततोऽन्यथा आ०। ८ "अन्यरागादिसंवित्तौ तत्सारूप्यसमुद्भवात्। प्राप्तोत्यावृत्तिसद्भावः औपलम्भिकदर्शने॥ २०४८॥" तत्त्वसं०। ९ च न स्यात् श्र०। १०-तया प्रतिपद्यते तदिदम् भां०, श्र०। ११ "तद्यथा-अर्धं जरत्याः कामयन्ते अर्धं नेति।" पातं० महाभा० ४।१।७८। "मुखं न कामयन्ते अङ्गान्तरं तु कामयन्ते जरत्याः।" महाभा० प्रदीप। "अर्धं मुखमात्रं जरत्याः वृद्धायाः कामयते नाङ्गानीति सोऽयमर्धजरतीन्यायः।" ब्रह्मसू० शां० भा० रत्नप्रभा १।२।८। "नहि कुक्कुटादेरेकदेशो भोगाय पच्यते एकदेशस्तु प्रसवाय कल्प्यते···" ब्रह्मसू०शां०भा० आनन्दगि० १।२।८। अस्य न्यायस्य विशेषस्वरूपं विविधस्थलनिर्देशपुरस्सरं लौकिकन्यायाञ्जल्यां (पृ० ७) द्रष्टव्यम्।

किञ्च, एकदेशेन सारूप्यात् नीलार्थवद् अशेषार्थानामपि ग्रहणप्रसङ्गः सत्त्वादिमात्रेणास्य सर्वत्र सारूप्याऽविशेषात्। अथ तदविशेषेऽपि नीलाद्याकारवैलक्षण्यात्तेषामग्रहणम्; तर्हि समानाकाराणामशेषाणां ग्रहणाऽनुषङ्गः। अथ यत एव उत्पद्यते तस्यैव आकारानुकरणे ग्राहकम् न सारूप्यमात्रेण; एवमपि समनन्तरप्रत्ययस्य तद् ग्राहकं स्यात्। तदुत्पत्ति-सारूप्याभ्याञ्च प्रामाण्यव्यवस्थायां पितरि पुत्रस्य प्रामाण्यप्रसङ्गः। ५

किञ्च, परमाणवः प्रत्येकं परमाण्वात्मना आत्मीयमाकारं ज्ञाने समर्पयन्ति, सङ्घातात्मना वा? तत्र प्रथमः पक्षोऽनुपपन्नः; परमाणूनां स्वरूपेणाऽप्रतिभासनात्, तद्विपरीतस्य अनेकावयवात्मनोऽवयविनः स्थिर-स्थूलस्य प्रतिभासनात्। द्वितीयपक्षोऽप्ययुक्तः; तेषां समुदितानामपि स्वरूपाऽपरित्यागतः तथाभूताऽवयविस्वरूपेण प्रतिभासाऽनुपपत्तेः। न खलु समुदितास्ते अणुत्वा-ऽनेकत्वे परित्यजन्ति परमतप्रवेशाऽनुषङ्गात्। न चाऽन्यथाभूतानां तेषाम् अन्यथा १० विज्ञानजनकत्वं युक्तम्; प्रमाणविरोधात्। तथाहि—परमाणवो न स्थूलाद्याकारेण ज्ञानं स्वरूपयन्ति, तद्रूपरहितत्वात्, यद् यद्रूपरहितं न तत् तेनाऽऽत्मना ज्ञानं स्वरूपयति यथा नीलं पीतात्मना, स्थूलाद्याकाररहिताश्च परमाणव इति। तत्सदृशत्वे च ज्ञानस्य अणुवत् तदपि मूर्त्तम्, सूक्ष्मत्वादप्रत्यक्षञ्च स्यात्। अथ समुदितानां तेषामपि प्रत्यक्षता इष्यते; तर्हि समुदितपरमाणुवत् ज्ञानस्यापि त्रिचतुरस्र-दीर्घ-ह्रस्व-परिमण्डल-सम-विषमादिरूपप्रसङ्गः, जलधारणाऽऽहरणाद्यर्थक्रियाकारित्वं बाह्येन्द्रियप्रत्यक्षता च स्यात्। १५

किञ्च, आकारो ज्ञानादभिन्नः, भिन्नो वा? भेदे ज्ञानं निराकारमेव स्यात्। अभेदे तयोः अन्यतरदेव स्यात्। कथञ्चिद्भेदे तु मतान्तराऽनुषङ्गः। स्वतोऽभिन्नस्य च आकारस्य ज्ञानग्राह्यत्वे अर्थे दूराऽतीतादिव्यवहारो न स्यात्। यत् स्वतोऽभिन्नं गृह्यते न तत्र दूरादिव्यवहारः यथा स्वरूपे, स्वतोऽभिन्नं गृह्यते च पर्वतप्रासादादिकमिति। अस्ति च अर्थे दूरादिव्यवहारः २० 'दूरे पर्वतः, निकटे प्रासादः, अतीतो राजा' इत्यादिव्यवहारस्याऽस्खलद्रूपस्य प्रतीतेः। न च आकाराधायकस्य दूराऽतीतत्वात् तथा व्यवहारः इत्यभिधातव्यम्; जाग्रच्चेतसो दूराऽतीतत्वेन प्रबोधचेतसि तथा व्यवहारप्रसङ्गात्। अथ भ्रान्तोऽयं व्यवहारः अत्यन्तनिकटेऽपि ज्ञानाकारे अन्यथात्वेन व्यवहारात्; ननु 'ज्ञानाकारे' इति कुतः? अस्य भ्रान्तत्वाच्चेत्; अन्योन्या-

१ ग्रहणम् भां०। २ "तत्सारूप्यतदुत्पत्ती यदि संवेद्यलक्षणम्। संवेद्यं स्यात् समानार्थविज्ञानं समनन्तरम्॥" प्रमाणवा० ३।३२३॥ ३–थमप–श्र०। ४–त्यागः तथा–भां०। ५ विज्ञानस्वरूपकत्वं आ०। ६ तत्सदृशत्वं ज्ञानस्य आ०। ७ आकारमात्रस्य भां०। ८ "दूरासन्नादिभेदेन व्यक्ताव्यक्तं न युज्यते। तत्स्यादालोकभेदाच्चेत्तिमिधानाऽपिधानयोः॥ तुल्यादृष्टिरदृष्टिर्वा सूक्ष्मोऽशस्तस्य कश्चन। आलोकेन न मन्देन दृश्यतेऽतो भिदा यदि॥" प्रमाणवा० ३।४०८-९। "विषयाकारधारित्वे च ज्ञानस्य अर्थे दूरनिकटादिव्यवहाराभावप्रसङ्गः।" प्रमेयक० पृ० २७ पू०। ९–प्रसङ्गः स्यात् अ–भां०। १० अन्यस्य भां०, श्र०।

श्रयः—अस्य भ्रान्तत्वसिद्धौ हि 'ज्ञानाकारे' इत्यस्य सिद्धिः, तत्सिद्धौ चाऽस्य भ्रान्तत्वसिद्धि-रिति । अनुमानञ्च शब्दादेरनित्यत्वादिकमधिगच्छद् यदि तदाकारं तर्हि धर्मरूपतैव अस्य स्यात् नानुमानरूपता । अथ अतदाकारम् ; कथमनेन तत्प्रतिपत्तिः, प्रतिपत्तौ वा किमन्यत्रापि साकारताप्रसाधनप्रयासेन ?

५ किञ्च, अर्थेन सादृश्यमात्मनः तदेव ज्ञानं प्रतिपद्यते, ज्ञानान्तरं वा ? यदि ज्ञानान्तरम् ; तत्किम् ज्ञानाऽर्थौ प्रतिपद्य तयोः सादृश्यं प्रतिपद्येत, अप्रतिपद्य वा ? न तावदप्रतिपद्य ; सादृश्यप्रतिपत्तेः तद्वत्प्रतिपत्तिनान्तरीयकत्वात् , न हि यमलकयोरप्रतिपन्नयोः सादृश्यं प्रतिपत्तुं शक्यम् । अथ प्रतिपद्य ; कुतस्तत्प्रतिपत्तिः—किमेकस्मादेवाऽतो ज्ञानान्तरात्, द्वाभ्यां वा ? तत्र प्रथमपक्षोऽसाम्प्रतः; तयोर्भिन्नकालतया एकत्र ज्ञाने प्रतिभासाऽनुपपत्तेः । यौ भिन्न-१० कालौ न तयोरेकत्र ज्ञाने प्रतिभासः यथा उदयाऽस्तमनयोः, भिन्नकालौ च ज्ञानाऽर्थाविति । न चाऽनयोः भिन्नकालत्वमसिद्धम् ; ज्ञानाऽर्थयोः कार्यकारणभावतः समसमयवृत्तित्वस्य भवताऽनभ्युपगमात् । द्वितीयपक्षोऽप्यसङ्गतः ; द्वयोरपि ज्ञानान्तरयोरत्यन्तविलक्षणत्वेन तत्सादृश्यप्रतिपत्त्यहेतुत्वात् । ये अत्यन्तविलक्षणे ज्ञाने न ते कस्यचित् सादृश्यं प्रतिपत्तुं समर्थे यथा देवदत्त-यज्ञदत्तज्ञाने, अत्यन्तविलक्षणे च ज्ञानाऽर्थविषये ज्ञानान्तरे इति । न १५ चेदमसिद्धम् ; ज्ञानादुत्पन्नस्य ज्ञानाकारस्य ज्ञानस्य अर्थोत्पन्नाऽर्थाकारज्ञानादत्यन्तवैलक्ष-ण्यस्य भिन्नसामग्रीप्रभवतया भिन्नविषयतया च प्रसिद्धत्वात् । ययोर्भिन्नसामग्रीप्रभवता भिन्नविषयता च तयोरत्यन्तवैलक्षण्यम् यथा रूपस्पर्शज्ञानयोः, भिन्नसामग्रीप्रभवता भिन्नविषयता च ज्ञाना-ऽर्थज्ञानयोरिति । अस्तु वा ताभ्यां तत्सादृश्यप्रतिपत्तिः; तथापि अन-योरपि अर्थ-ज्ञानाभ्यां सादृश्यम् अन्यतः प्रतिपत्तव्यम् , तस्यापि अर्थज्ञानज्ञानैः सादृश्यम् २० अन्यतः इत्यनवस्था । अथ तदेव ज्ञानम् आत्मनोऽर्थेन सादृश्यं प्रतिपद्यते ; तन्न ; तत्काले अर्थस्याऽसत्त्वात् । यत्काले यन्नास्ति न तेन तद् आत्मनः स्वत एव सादृश्यं प्रतिपत्तुं समर्थम् यथा पुत्रकालेऽसता पित्रा [10]पुत्रः, नास्ति च ज्ञानकाले अर्थ इति । ततो ज्ञाने अर्थसारूप्यस्य विचार्यमाणस्याऽनुपपत्तेः 'यद् यदाकारं न भवति न तत्तस्य ग्राहकम्' इत्याद्ययुक्तम् ।

यदप्यभिहितम्[11]—'निराकारत्वे ज्ञानस्य[12] स्वरूपस्याप्यप्रत्यक्षत्वप्रसङ्गः' इत्यादि ; तदप्यभि-२५ धानमात्रम् ; स्वपरप्रकाशकत्वं हि बुद्धेराकारः न पुनर्नीलाद्याकारः, अस्य अर्थधर्मत्वात् । न चाऽन्याकारेण अन्यस्य प्रत्यक्षता युक्ता ; अतिप्रसङ्गात्, किन्तु स्वाकारेण, तथाभूतेन चाऽऽ

१—द्विः अनु—भां० । २—न्तरं भिन्नं त—भां० । ३ तद्द्वयप्र—श्र० । ४ ज्ञानयोरत्यन्त—भां०, श्र० । ५ ज्ञाने इति भां०, श्र० । ६ भिन्नसामग्रीप्रभवतया च सुप्र—भां०, श्र० । भिन्नसा-मग्रीतया प्रभवभिन्नविषयतया च आ० । ७—र्शनज्ञा—भां० । ८ अर्थज्ञानैः श्र० । ९ अर्थेऽस्या—भां०, आ० । १० पुत्रे आ० । ११ पृ० १६६ पं० २ । १२ —स्य रूपस्या—आ० ।

कारेण अस्याः प्रत्यक्षत्वम् 'नीलमहं वेद्मि' इत्याद्युल्लेखेन सुप्रसिद्धमेव । व्यावृत्तिरपि संविदः संविदन्तरात् प्रतिनियतार्थग्राहकत्वस्वरूपेणैव, न पुनर्नीलादिस्वरूपेण अस्य ग्राह्यधर्मत्वात् । पदार्थानां हि स्वगतधर्मेणैव अन्योन्यं व्यावृत्तिर्युक्ता नान्यधर्मेण अतिप्रसङ्गात्, तथा च *'तत्रानुभवमात्रेण'* इत्याद्यनुपपन्नम् । अनुभवमात्रेण ज्ञानस्य सारूप्येऽपि प्रतिनियताऽर्थानुभवप्रकारेण प्रतिविषयं विशेषसंभवात् । न खलु नीलग्रहणस्वभाव एव अस्य पीतग्रहणस्वभावो भवितुमर्हति, तथाभूतेन चं स्वभावेन प्रत्यर्थं सम्बन्धसंभवात् *'अर्थेन घटयत्येनाम्'* इत्याद्यपि अनल्पतमोविलसितम् ।

किञ्चं, 'घटयति' इति 'सम्बन्धयति' इत्यभिप्रेतम्, 'अर्थसम्बद्धं निश्चाययति' इति वा? तत्राद्यविकल्पोऽनुपपन्नः; अर्थरूपताया ज्ञानस्याऽर्थे सम्बन्धकारणत्वे तादात्म्याऽभावप्रसङ्गात् । ययोः कार्यकारणभावः न तयोस्तादात्म्यम् यथा अग्निधूमयोः, कार्यकारणभावश्च अर्थसम्बद्धज्ञाना-ऽर्थरूपतयोरिति । द्वितीयपक्षोऽप्ययुक्तः; अर्थसम्बद्धज्ञानेन अर्थरूपतायाः क्वचित् सम्बन्धाऽप्रतीतेः । यस्य येन सम्बन्धः क्वचिन्न प्रतिपन्नः न तस्य तन्निश्चयहेतुत्वम् यथा सह्यस्य विन्ध्येन क्वचिदप्रतिपन्नसम्बन्धस्य न विन्ध्यनिश्चयहेतुत्वम्, क्वचित्सम्बन्धाऽप्रतीतिश्च अर्थसम्बद्धज्ञानेन अर्थरूपतायाः, इति कथमसौ अर्थसम्बद्धं ज्ञानं निश्चाययेत्? न च विशिष्टविषयोत्पादादन्यो ज्ञानस्य अर्थे सम्बन्धो घटते, स च स्वसामग्रीतः एव सम्पन्न इति अर्थरूपताप्रसाधनप्रयासो व्यर्थः ।

ननु निराकारत्वे ज्ञानस्य सर्वं सर्वस्य ग्राहकं स्यादविशेषात्; इत्यप्यसमीचीनम्; पुरोवर्त्तिन्येवाऽर्थे ज्ञानस्य स्वकारणैर्नियमितत्वात् प्रदीपवत् । न खलु प्रदीपः घटादीनाम् आकारमनुकुर्वन् तेषां प्रकाशकः प्रतीयते; प्रत्यक्षविरोधात् । नाप्याकाररहितस्य प्रकाशकत्वे सकलघटादीनां प्रकाशकत्वं प्रसज्यते; गृहाद्यन्तर्वर्तिनामेव प्रतिनियतानां तेषां प्रतिनियतसामग्रीप्रभवतया प्रतिनियतसामर्थ्यमासादयता तेन प्रकाशनात् । साकारतयापि अर्थप्रकाशकत्वाभ्युपगमे 'एकस्य घटज्ञानस्य त्रैलोक्योदरवर्तिनां निखिलघटानां प्रकाशकत्वप्रसङ्गः' इति चोद्ये भवतोऽपि प्रतिनियतसामग्रीप्रभवप्रतिनियतयोग्यतातो नान्यदुत्तरम् । तदेवं साकारतापक्षस्य अनेकदोष-

---

१–त्यक्षं नी–आ० । २ नीलादिना स्व–श्र० । ३–नुभवप्रभवप्रका–आ० । ४ च प्रत्य–आ० । ५ प्रतिनियतार्थग्राहकत्वलक्षणेन । ६ "यतोघटयति सम्बन्धयति विवक्षितं ज्ञानमर्थसम्बद्धमर्थरूपता निश्चाययति वा?" प्रमेयक० पृ० २८ पू० । ७ "एतेन वित्तिसतायाः साम्यात् सर्वैकवेदनम् । प्रलपन्तः प्रतिच्छिसाः प्रतिबिम्बोदये समम् ॥२६॥" न्यायवि० पृ० १२७ पू० । "प्रकाशनियमो हेतोर्बुद्धेर्न प्रतिबिम्बतः । अन्तरेणापि तादूप्यं ग्राह्यग्राहकयोः सतोः ॥३२॥" न्यायवि० पृ० १३९पू० । ८–मापाद–श्र० । ९ "साकारत्वेऽपि चायं पर्यनुयोगः समानः"···· सन्मति० टी० पृ० ४६० । १० "प्रतिकर्मव्यवस्थानस्यान्यथानुपपत्तितः । साकारस्य च बोधस्य प्रमाणत्वोपवर्णनम् ॥ ३३ ॥ क्षणक्षयादिरूपस्य व्यवस्थापकता न किम् । तेन तस्य स्वरूपत्वाद् विशेषान्तरहानितः ॥ ३४ ॥" तत्त्वार्थश्लो० पृ० १२६ ।

दुष्टत्वान्न स्वाकारमात्रालम्बनं ज्ञानम्। किं तर्हि ? तद्व्यतिरिक्तबाह्यार्थालम्बनम्, ततो विलक्षणप्रतिभासत्वात्। यद्धिज्ञानं यद्विलक्षणप्रतिभासं न तत्तदालम्बनम् यथा रूपविलक्षणप्रतिभासं रसज्ञानं न रूपालम्बनम्, स्वाकाराद् विलक्षणप्रतिभासश्च घटादिज्ञानमिति। न चायमसिद्धो हेतुः; अन्तर्मुखाऽऽकारतया प्रतिभासमानज्ञानाकाराद् बहिर्मुखाकारतया प्रतिभासमानघटादिज्ञानस्य विलक्षणप्रतिभासत्वप्रसिद्धेरिति।

कथं **तदनन्तरं** तद् **भूतम्** ? इत्याह–'**सन्मात्रम्**' इति। सन्मात्रविषयत्वात् सन्मात्रकमिति (त्रमि) त्युच्यते। किं तत् ? **दर्शनम्** 'आलोकः' इति यावत्। तत् किं करोति ? इत्यत्राह–'**स्वविषय**' इत्यादि। **उत्तरम्** स्वोत्तरकालभाविनं **परिणामम्** विकारम् **प्रतिपद्यते** यत् '**दर्शनम्**' इति सम्बन्धः। कथम्भूतं परिणामम् ? इत्याह–'**स्व**' इत्यादि। स्वशब्देन उत्तरः परिणामो गृह्यते। तस्य **विषयः** अवान्तरो मनुष्यत्वादिजातिविशेषः तस्य **व्यवस्थापनम्** सङ्कर-व्यतिकरव्यतिरेकेण नियतरूपेण योजनम्, तस्मै **विकल्पः** निर्णयात्मा यस्य स तथोक्तः तम् इति। तस्य किन्नाम इत्याह–'**अवग्रहः**' इति। आद्यशब्दलभ्यं फलं दर्शयन्नाह–'**पुनः**' इत्यादि। **पुनः** अवग्रहोत्तरकालम्, अवग्रहेण विषयीकृतः **अवगृहीतः** अवान्तरमनुष्यत्वादिजातिविशेषः तस्य **विशेषः** कर्णाट-लाटादिभेदः तस्य **आकाङ्क्षणम्** भवितव्यताप्रत्ययरूपतया ग्रहणाभिमुख्यम् **ईहा** भवति। **तथा** तेन कर्णाटादिप्रकारेण **ईहितविशेषनिर्णयोऽवायः**। ननु दर्शनादीनामन्योन्यं भेदैकान्ते क्षणिकत्वप्रसङ्गाद् अपसिद्धान्तप्रसक्तिः, अभेदैकान्ते पुनः अन्यतमस्यैव प्रसङ्गाद् व्यपदेशभेदो दुर्लभः स्यात्, इत्यत्राह–'**कथञ्चिद्**' इत्यादि। **कथञ्चित्** न सर्वात्मना दर्शनादीनाम् **अभेदेऽपि** एकत्वेऽपि न केवलं भेदे **परिणामविशेषाद् व्यपदेशस्य** शब्दस्य **भेदः** नानात्वं सुघटमेवेति।

विवृतिव्याख्यानम्—

अवायाऽनन्तरं धारणामुक्त्वा चतुर्विधं मतिज्ञानमुपसंहरन् कारिकार्धमाह–

धारणा स्मृतिहेतुस्तन्मतिज्ञानं चतुर्विधम्।

विवृतिः–स्मृतिहेतुर्धारणा संस्कार इति यावत्। ईहाधारणयोरपि ज्ञानात्मकत्वमुन्नेयं तदुपयोगविशेषात्।

१–त्रावल–श्र०। २–र्थावल–श्र०। ३ यदि ज्ञानं भां०। ४–भासनम् श्र०। ५–दावलम्ब–श्र०। ६ घटज्ञानमिति भां०, श्र०। ७–त्व सिद्धेः भां०। अस्य च साकारवादस्य विविधभङ्ग्या खण्डनं निम्नग्रन्थेषु द्रष्टव्यम्। न्यायमं० पृ० ५४०। शास्त्रदी० १।१।५। तत्त्वार्थश्लो० वा० पृ०१३६। न्यायवि० टी० पृ० १२९। प्रमेयक० पृ० २७ पू०। सन्मति० टी० पृ० ४५९। स्या० रत्ना०, रत्नाकराव०, सू० ४।४७। स्याद्वादमं० पृ० १३०। ८ इत्याह श्र०। ९ अवगृहीतः भां०, श्र०। १० दर्शनानाम् भां०, श्र०। ११–स्य वा भे–भां०, श्र०। १२ "धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च। धारणा प्रतिपत्तिरवधारणमवस्थानं निश्चयोऽवगमः अवबोधः इत्यनर्थान्तरम्।" तत्त्वार्थभा०

स्मृतिहेतुर्धारणा संस्कार इति यावत्, यत एवं **तत्** तस्मात् **मतिज्ञानम्** अवग्रहेहावायधारणाभेदेन **चतुर्विधम्** ।

कारिकार्धं विवृण्वन्नाह–'**स्मृतिहेतुः**' इत्यादि । **स्मृतेः** अनुभूतवस्तुविषयायाः तच्छब्दपरामृष्टायाः प्रतीतेः **हेतुः धारणा** भावना **संस्कार इति यावत्** ।

विवृतिव्याख्यानम्—

ननु च ईहा चेष्टा प्रयत्न इत्यर्थः, धारणा च संस्कारः, तयोश्च ज्ञानादत्यन्तभेदः, *"बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मसंस्काराः"* [ ] इत्यभिधानात्, तत्कथमनयोः प्रत्यक्षता ? इत्याशङ्क्यमानं प्रति आह–'**ईहा**' इत्यादि । **ईहा-धारणयोरपि न केवलम् अवग्रहा-ऽवाययोः ज्ञानात्मकत्वमुन्नेयम्** अभ्युपगन्तव्यम् । कुत एतदित्यत्राह–'**तद्**' इत्यादि । **तयोः** अवग्रहाऽवाययोः **उपयोगविशेषात्** व्यापारविशेषात् । तथाहि–अवग्रहस्य ईहा, अवायस्य च धारणा व्यापारविशेषः, न च चेतनोपादानो व्यापारविशेषः अचेतनो युक्तोऽतिप्रसङ्गात् । अथवा ईहा-धारणयोः सम्बन्धी उपादेयत्वेन यः **उपयोगविशेषः** अवाय-स्मृतिलक्षणः तस्मात् इति ग्राह्यम् । न वै खलु चेतनम् अचेतनोपादानं युक्तम् ; चार्वाकमतानुप्रवेशप्रसङ्गात् ।

इदानीं स्वसंविदामपि बह्वादिभेदमवग्रहादिकम्, अवग्रहादीनाञ्च पूर्वपूर्वस्य प्रमाणत्वे फलत्वमुत्तरोत्तरस्य दर्शयन्नाह— १५

बह्वाद्यवग्रहाद्यष्टचत्वारिंशत् स्वसंविदाम् ॥ ६ ॥
पूर्वपूर्वप्रमाणत्वं फलं स्यादुत्तरोत्तरम् ।

विवृतिः–परमार्थैकसंवित्तेः वेद्यवेदकाकारयोः प्रमाणफलव्यवस्थायां क्षणभङ्गादेरपि प्रत्यक्षत्वं प्रसज्येत । ततः किम् ? गृहीतग्रहणात् संवृतिवत् तदनुमानं प्रमाणं

१।१५ । "धरणं पिय धारणं विंति ॥३॥" आव० नि० । "धृतिः धरणम् अर्थानामिति वर्तते । परिच्छिन्नस्य वस्तुनोऽविच्युति-स्मृति-वासनारूपं तद्धरणं पुनर्धारणां ब्रुवते ?" आव० नि० हरि० पृ० १० । "एवमविच्युति-वासना-स्मृतिरूपा धारणा त्रिधा सिद्धा भवति ।" विशेषा० भा० बृह० गा० १८८-१८९ । "अथैतस्य कालान्तरेऽविस्मरणकारणं धारणा ।" सर्वार्थसि० १।१५ । "निर्ज्ञातार्थाविस्मृतिर्धारणा" राजवा० १।१५ । "ततो दृढतरावायज्ञानाद् दृढतमस्य च । धारणात्वप्रतिज्ञानात् स्मृतिहेतोर्विशेषतः ॥ २१ ॥" तत्त्वार्थश्लो० पृ० २२१ । "स एव दृढतमावस्थापन्नो धारणा ।" प्रमाणनय० २।१० । "महोदये च कालान्तराविस्मरणकारणं हि धारणाभिधानं ज्ञानं···। अनन्तवीर्योऽपि–तथा निर्णीतस्य कालान्तरे तथैव स्मरणहेतुः संस्कारो धारणा इति···।" स्या० रत्नाकर पृ० ३४९ । "स्मृतिहेतुर्धारणा" प्रमाणमीमां० १।१।२९ ।

१ ईहा धारणायाः आ०, भां० । २ कार्यत्वेन । ३–दानाद्युक्तम् आ० । ४ "बहुबहुविधक्षिप्रानिसृतानुक्तध्रुवाणां सेतराणाम् ।" तत्त्वार्थसू० १।१६ । "···निसृतासन्दिग्धध्रुवाः···" तत्त्वार्थाधि० सू० १।१६ । ५–मानं न आ० वि० ।

न स्यात्; तदनयोः समारोपव्यवच्छेदाऽविशेषात् संवृतेरपि प्रमाणान्तरत्वं स्यात्। सर्वस्यैव निर्विकल्पकज्ञानस्य समारोपव्यवच्छेदाकाङ्क्षिणः प्रामाण्यं न स्यात् ततः संव्यवहाराऽभावात्। अर्थक्रियार्थी हि प्रमाणम् अप्रमाणं वा अन्वेषते, रूपादिक्षणक्षयादिस्फुटप्रतिभासाऽविशेषात् खण्डशः प्रामाण्यं यदपेक्षं तदेव फलं युक्तम्; तत्त्वतः तत्कृतो न भवति। 'तत्त्वतः तत् ततो न भवति' इत्यपि पाठः। भावे वा निर्णीतिः अखण्डशः कुतो न भवेत्? बहुबहुविधक्षिप्राऽनिसृताऽनुक्तध्रुवेतरविकल्पानाम् अवग्रहादेः स्वभावभेदान्न विरुद्ध्यते। प्रतिभासभेदेऽपि स्वभावभेदाऽभावकल्पनायां क्रमवृत्तिधर्माणामपि तथाभावात् कुतः क्रमः सुख-दुःखादिभेदो वा परमार्थतः प्रतिष्ठाप्येत सहप्रतिभासवत्? तदयम् एकमनेकाऽऽकारं क्षणिकज्ञानं कुतश्चित् प्रत्यासत्तेः प्रतिभासभेदानाम् उपयन् क्रमवर्तिनामपि तथैकत्वं प्रतिपत्तुमर्हति हर्षविषादादीनाम्। अतोऽनेकान्तसिद्धिः। प्रमाणफलयोः क्रमभेदेऽपि तादात्म्यम् अभिन्नविषयत्वञ्च प्रत्येयम्।

बहु आदिर्यस्य बहुविधादेः स तथोक्तः तेन, अवग्रहादीनाम् अष्टचत्वारिंशत् **बह्वाद्यवग्रहाद्यष्टचत्वारिंशत्।** एतदुक्तं भवति—बह्वादिभिः द्वादशभेदैः अवग्रहादयश्चत्वारो गुणिता अष्टचत्वारिंशद् भवन्ति। केषाम्? इत्याह—**'स्वसंविदाम्'** इति। चशब्दोऽत्र समुच्चयार्थः लुप्तो द्रष्टव्यः, तेन अर्थग्रहणमनुवर्तमानं चशब्देन लब्धतापरिणामं सम्बद्ध्यते। तथा चायमर्थः स्थितः—न केवलम् अर्थग्रहणस्य अपि तु स्वसंविदाञ्च बह्वाद्यवग्रहाद्यष्टचत्वारिंशद् भवति (भवन्ति), अन्यथा तासां श्रुतादावन्तर्भावो वक्तव्यः, ज्ञानषट्कत्वञ्चाऽनुषज्येत मतौ अनन्तर्भावात् अवग्रहाद्यात्मकत्वात्तस्याः।

कारिकाव्याख्यानम्—

ननु च अर्थे बहुबहुविधादिधर्माणां संभवाद् युक्तो बह्वाद्यवग्रहादिः न पुनर्ज्ञानस्वरूपे, तत्र तदसंभवात्, न हि ज्ञानस्वरूपे बहु-बहुविधादिधर्माः कदाचिदपि प्रतीयन्ते बहिरर्थे एव तेषां सर्वदा प्रतीतेः; इत्यप्यपेशलम्; बह्वादिधर्मग्राहकत्वस्य ज्ञानस्वरूपगतस्य स्वसंवेदनविषयतोपपत्तितः तत्स्वरूपेऽपि बह्वाद्यवग्रहादिसंभवाऽविरोधात्। किं पुनर्ज्ञानस्य स्वसंवेदनं नाम? इति चेदुच्यते—

ज्ञानान्तराऽनपेक्षं यत् स्वरूपप्रतिभासनम्। तत् स्वसंवेदनं ज्ञाने सिद्धमर्थप्रतीतितः॥

प्रयोगः—स्वग्रहणात्मकं ज्ञानम् अर्थग्रहणात्मकत्वात्, यत् पुनः स्वग्रहणात्मकं न भवति न तद् अर्थग्रहणात्मकम् यथा घटादि, अर्थग्रहणात्मकञ्च ज्ञानम्, तस्मात् स्वग्रहणात्मकमिति।

---

१ विरुद्ध्येत ज० वि०। २ क्रमभावेऽपि आ० वि०। ३ षष्ठी। ४—त्वं वानु—आ०। ५ अथ बहुविधा—आ०, भां०। ६—स्य संवे—भां०। ७—तः स्व—भां०।

ननु ज्ञाने स्वसंविदितत्वं प्रमाणविरुद्धम् कर्मत्वेनाऽप्रतीयमाने तस्मिन् परोक्षत्वस्यैवोपपत्तेः;

'ज्ञाने स्वसंविदितत्वं प्रमाणविरुद्धम्' इति जैमिनीयस्य पूर्वपक्षः—

तथाहि—ज्ञानं परोक्षम् कर्मत्वेनाऽप्रतीयमानत्वात्, यत् पुनः प्रत्यक्षं तत् कर्मत्वेन प्रतीयमानं दृष्टम् यथा अर्थः, कर्मत्वेनाऽप्रतीयमानश्च ज्ञानम्, तस्मात् परोक्षमिति। न चाऽयमसिद्धो हेतुः; कर्मत्वेनाऽप्रतीयमानत्वस्य ज्ञानाख्ये धर्मिणि विद्यमानत्वात्, न खलु घटाद्यर्थवत् कर्मत्वेन ज्ञानं स्वप्नेऽपि प्रतिभासते, प्रतिभासने वा करणात्मनो ज्ञानान्तरस्य परिकल्पना प्रसज्येत, तस्यापि प्रत्यक्षत्वे करणात्मकं ज्ञानान्तरमपरं परिकल्प्येत इत्यनवस्था। तस्याप्रत्यक्षत्वेऽपि करणत्वे प्रथमे कोऽपरितोषः येनाऽस्य तथा करणत्वं नेष्यते? न च एकस्यैव ज्ञानस्य परस्परविरुद्धकर्म-करणाकाराभ्युपगमो युक्तः; अन्यत्र तथा प्रतीत्यभावात्। तस्मादेतद्दोषपरिजिहीर्षया ज्ञानस्य प्रत्यक्षरूपताऽऽग्रहं परित्यज्य प्रतीत्यनतिक्रमेण परोक्षरूपतैवाऽभ्युपगन्तव्या। इन्द्रियाऽर्थसम्प्रयोगादिसामग्रीतो हि क्रियास्वभावम् आत्मनि ज्ञानमुत्पद्यमानं नित्यपरोक्षरूपमेव उत्पद्यते।

न चास्य नित्यपरोक्षरूपत्वे ग्राहकप्रमाणाऽभावाद् अभावोऽनुषज्यत इत्यभिधातव्यम्; प्रत्यक्षतो हि तत्प्रतीत्यभावान्नित्यपरोक्षरूपता, न पुनर्मूलतोऽपि ग्राहकप्रमाणाऽभावात्,

---

१ "ननूत्पन्नायां बुद्धौ ज्ञातोऽर्थ उच्यते नानुत्पन्नायाम्, अतः पूर्वं बुद्धिः उत्पद्यते पश्चाज्ज्ञातोऽर्थः? सत्यम्; पूर्वं बुद्धिरुत्पद्यते न तु पूर्वं ज्ञायते। भवति हि कदाचिदेतद् यज्ज्ञातोऽप्यर्थः सन्नज्ञात इत्युच्यते। न च अर्थव्यपदेशमन्तरेण बुद्धेः रूपोपलम्भनम्, तस्मान्न व्यपदेश्या बुद्धिरव्यपदेश्यञ्च न प्रत्यक्षम्। तस्मादप्रत्यक्षा बुद्धिः।" शाबरभा० १।१।५। "अस्मन्मते ज्ञाततालिङ्गकानुमानेनैव बुद्धेर्ग्रहणाङ्गीकारात्, तस्य च अर्थग्रहणोत्तरकालीनत्वात् न प्रतिबन्धकाभावमात्रेण अर्थग्रहणसमये बुद्धेर्ग्रहणं भवितुमर्हति।" शाबरभा० प्रभाटी० पृ० ३३। "संवित्तयैव हि संवित् संवेद्या न संवेद्यतया। केयं वाचो युक्तिः संवेद्या न संवेद्येति? इयमियं वाचो युक्तिः नास्याः कर्मभावो विद्यते इत्यर्थः। कर्म च संवेद्याभिधेयं न संवित्, तस्मान्न पृथक् संवेद्यतया ग्रहीतुं शक्यते। न चाऽसंवेद्यैव संवित् तन्मूलत्वात् सर्वभावानां संवेद्यभावस्य। किं तर्हि? आनुमानिकम्, फलमेव हि प्रमाणम् इति प्रमाणविदो मन्यन्ते (पृ० ६४) किमसंवेद्यमेव विज्ञानम्? बाढमसम्वेद्यं न त्वप्रमेयम्। कः पुनः प्रमेयसंवेद्ययोर्विशेषः? यत्र हि विषयस्य स्वरूपं परिच्छिद्यते तत्संवेद्यमित्युच्यते अतः संवेदनं प्रत्यक्षमिति प्रमाणविदः असम्वेदना च प्रमितिः ज्ञाने आकारान्तराग्रहणात्। तस्मात् ज्ञानं प्रत्यक्षमित्ययुक्तम्। क्षणिकत्वाच्चास्य प्रत्यक्षता न संभवति···(पृ० ६५) ···तस्मान्न बुद्धिविषयं प्रत्यक्षम्, अर्थविषयं हि तत् अतः सिद्धमानुमानिकत्वं बुद्धेः फलतः"(पृ० ६७) बृहती १।१।५। पञ्जिका पृ० ६४-६७। "अपि च ज्ञानमनुमेयमिष्यते। तदनुमाने च नार्थसत्तामात्रं लिङ्गम्; तदविनाभावनियमाभावात्। अथ अर्थज्ञानमित्युच्यते; तदपि नोत्पत्तिमात्रेण लिङ्गम्···" प्रकरणपं० पृ० ६३। २ तत्प्रत्यक्षत्वे भां०, श्र०। ३—कल्प्यते भां०, श्र०।

अर्थापत्त्याख्यस्य तद्ग्राहकप्रमाणस्य सद्भावात्। तथाहि–'क्रिया न काचित् निष्फला संभवति' इति ज्ञानक्रिया प्रकटनाख्यं फलम् अर्थे प्रादुर्भावयति, तस्माच्च फलात् प्रतिप्राणि सुप्रसिद्धात् अन्यथाऽनुपपद्यमानाद् आत्मनि अहम्प्रत्ययग्राह्ये नित्यपरोक्षं क्रियारूपं ज्ञानमुपकल्प्यत इति। उक्तञ्च–"*अप्रत्यक्षा नो बुद्धिः प्रत्यक्षोऽर्थः, स हि बहिर्देशसम्बद्धः प्रत्यक्षमनुभूयते, ज्ञाते त्वनुमानादवगच्छति बुद्धिम्।*" [शाबरभा० १।१।५] इति। प्रवृत्त्यन्यथानुपपत्त्या च ज्ञानमनुमीयते; अज्ञाते प्रवृत्तिविषये प्रवृत्त्यनुपपत्तेः, प्रयोजनार्थी हि पुरुषः कदाचित् प्रवर्तते कदाचिन्न प्रवर्तते इत्यत्र न ज्ञानादन्यत् तदा तत्प्रवृत्तेः कारणमस्ति। न हि इष्टसाधनोऽप्यर्थः स्वरूपेणैव प्रवृत्तिहेतुर्घटते सर्वदा प्रवृत्तिप्रसङ्गात्, न चैवम्, अतः कादाचित्कत्वात् प्रवृत्तेः अर्थाऽतिरिक्तम् 'अन्यदपि किञ्चित्कारणमस्ति' इत्यवगम्यते यस्मिन् सति अर्थः प्रवृत्तियोग्यतामापद्यते, तच्च ज्ञानमिति।

ज्ञानस्य स्वसंविदितत्वनिरसनपुरस्सरं स्वसंवेदनत्वव्यवस्थापनम्—

अत्र प्रतिविधीयते। यत्तावदुक्तम्–'कर्मत्वेनाऽप्रतीयमानत्वात्' इति; तद् आत्मना फलज्ञानेन चाऽनैकान्तिकम् तयोः कर्मत्वेनाऽप्रतीयमानयोरपि प्रत्यक्षत्वेनाऽभ्युपगमात्। अथ अनयोः कर्मत्वेनाऽप्रतीतावपि कर्तृत्वेन फलत्वेन च प्रतीतेः प्रत्यक्षता इष्यते; तर्हि प्रमाणाऽभिमतज्ञानस्य कर्मत्वेनाऽप्रतीतावपि करणत्वेन प्रतीतेः प्रत्यक्षता इष्यताम् अविशेषात्। अथ करणत्वेन प्रतीयमानं ज्ञानं करणमेव स्यान्न प्रत्यक्षम्, तर्हि कर्तृफ-

---

१–ख्यस्य प्रमा–आ०, भां०। "तत्रात्मना न शक्यं तत्रान्योत्पत्तिस्तदस्ति वा। तेनैतत्कारणाभावात् तदानीं नानुभूयते ॥ १८१ ॥ नान्यथा ह्यर्थसद्भावो दृष्टः सन्नुपपद्यते। ज्ञाने चेन्नेत्यतः पश्चात् प्रमाणमुपजायते ॥ १८२ ॥" "अर्थापत्तिः ज्ञानस्य प्रमाणम्, सा च अर्थस्य ज्ञातत्वान्यथानुपपत्तिप्रभवा। प्रागर्थस्य ज्ञातत्वाभावान्नोत्पद्यते। ज्ञाते त्वर्थे पश्चात्तज्ज्ञातत्वानुपपत्त्या अर्थापत्तिप्रमाणमुपजायते···" मीमां० श्लो० टी० सू० १।१।५। शून्यवाद। "ज्ञानक्रिया हि सकर्मिका कर्मभूतेऽर्थे फलं जनयति पाकादिवत्। तच्च फलमैन्द्रियकज्ञानजन्यमापारोक्ष्यम् लिङ्गादिज्ञानजन्यं तु पारोक्ष्यमित्युच्यते···तदेव च फलं कार्यभूतं कारणभूतं विज्ञानमुपकल्पयतीति सिद्धयत्यप्रत्यक्षमपि ज्ञानम्। अथवा ज्ञानक्रियाद्वारको यः कर्तृभूतस्य आत्मनः कर्मभूतस्य च अर्थस्य परस्परं सम्बन्धो व्याप्तृव्याप्यत्वलक्षणः स मानसप्रत्यक्षावगतो विज्ञानं कल्पयति। न आगन्तुककारणमन्तरेण आत्मनोऽर्थं प्रति व्याप्तृत्वमुत्पत्तुमर्हति, तच्च कारणं लोके ज्ञानशब्देन अभिधीयते····" शास्त्रदी० १।१।५। २ प्रादुर्भवति भां०, श्र०। ३–ग्राह्यं नि–आ०। ४ "ज्ञाते त्वर्थेऽनुमानादवगच्छति बुद्धिरिति शाबरभाष्ये श्रवणात्।" प्रमाणपरी० पृ० ६०। तत्त्वार्थश्लो० पृ० ४७। न्यायवि० टी० पृ० १४ पू०। ५–ते च प्र–भां०। ६–न्यत् यथा तत्प्रवृ–आं०। ७ पृ० १७५ पं० १। ८ "कर्मत्वेनाऽप्रतिभासमानत्वात् करणज्ञानमप्रत्यक्षं करणत्वेन प्रतिभासमानस्य प्रत्यक्षत्वोपपत्तेः। कथञ्चित् प्रतिभासते च कर्म च न भवतीति व्याघातस्य प्रतिपादितत्वात्। कथञ्चायं फलज्ञानं कर्मत्वेनाऽप्रतिभासमानमपि प्रत्यक्षमुपयन् करणज्ञानं तथा नोपैति?" तत्त्वार्थश्लो० पृ० ४६। प्रमाणपरी० पृ० ६१। प्रमेयक० पृ० ३१ उ०। स्या० रत्ना० पृ० २१३।

लरूपतया प्रतीयमानयोः आत्म-फलज्ञानयोः कर्तृ-फलरूपतैव स्यान्न प्रत्यक्षता इत्यप्यस्तु तुल्या-क्षेपसमाधानत्वात् ।

किञ्च, सकलप्रमाणापेक्षया ज्ञानस्य कर्मत्वाऽप्रसिद्धिः, स्वरूपाऽपेक्षया वा ? यदि सकल-प्रमाणापेक्षया ; तदा सत्त्वमप्यस्य अतिदुर्लभम् ; तथाहि–यत् सर्वप्रमाणापेक्षया कर्म न भवति न तत् सत् यथा खरविषाणम् , सर्वप्रमाणापेक्षया न भवति च कर्म विवक्षितं प्रमाणाभिमतं ५ ज्ञानमिति । एवं प्रमाणान्तरेष्वप्ययमेव न्यायः इत्यखिलप्रमाणानामसत्त्वप्रसङ्गे प्रमेये कः समाश्वासः प्रमाणनिबन्धनत्वात् प्रमेयव्यवस्थायाः ? इति पूत्कुर्वतोऽपि द्विजस्य सकलशून्य-तापातः स्यात्, तं परिजिहीर्षता ज्ञानस्य अप्रत्यक्षत्वेऽपि प्रमाणान्तरात् प्रतीतिरभ्युपगन्तव्या इति 'कर्मत्वेनाऽप्रतीयमानत्वात्' इत्यस्याऽसिद्धत्वम् । अस्तु नाम अस्य प्रमाणान्तरात् प्रतीय-मानत्वं न तु कर्मत्वम् ; इति चाऽयुक्तम् ; प्रतीयमानस्य अकर्मत्वविरोधात् , प्रतीयमानत्वं १० हि ग्राह्यत्वमुच्यते, तदेव च कर्मत्वमिति ।

अथ स्वरूपापेक्षया कर्मत्वाऽप्रसिद्धिः ; तदप्यनुभवविरुद्धत्वादयुक्तम् ; सुप्रसिद्धो हि 'घटग्राहिज्ञानविशिष्टमात्मानं स्वतोऽहमनुभवामि' इत्यनुभवः, तत्प्रसिद्धत्वाच्च ज्ञाने कर्मत्व-प्रसिद्धिरिति (द्वेरिति) कथं स्वरूपापेक्षया तत्र कर्मत्वस्याऽप्रसिद्धिः अनुभवेन न विरुद्ध्यते ? प्रतीतिसिद्धस्याप्यत्र प्रत्यक्षत्वस्य कर्मत्वस्य चाऽपह्नवे अर्थे तत्सद्भावे कः समाश्वासः इति १५ कथं तस्य व्यतिरेकदृष्टान्तता स्यात् ? प्रसङ्ग-विपर्ययाभ्याञ्चास्य प्रत्यक्षतासिद्धिः ; तथा हि– 'यत् परोक्षं न तत् स्वोपधानेन अन्यमुपलम्भयति यथा इन्द्रियम् ,परोक्षश्च भवद्भिः परिकल्पितं ज्ञानम्' इति प्रसङ्गः । विपर्ययस्तु–'यत् स्वाकारोपहितम् आकारान्तरमुपलम्भयति तत् परोक्षं न भवति प्रत्यक्षं वा भवति, यथा प्रदीपाद्यालोकः, उपलम्भयति च ज्ञानं स्वाकारोपहितं नीलादिकम्' इति । २०

किञ्च, बुद्धेः स्वसंवेदनप्रत्यक्षाऽगोचरत्वे कुतः तत्सत्त्वं सिद्ध्येत् ? प्रमाणान्तराच्चेत्–किं प्रत्यक्षरूपात् , अनुमानरूपाद्वा ? न तावत् प्रत्यक्षरूपात् ; मतान्तरानुप्रवेशप्रसङ्गात् । नाप्यनु-मानरूपात् ; तस्य अत्रोत्पत्तेरेवाऽसंभवात् । तस्य खलु उत्पत्तिः लिङ्गाद् भवति, न च ज्ञानेन

---

१ सत्त्वमस्य भां, श्र० । २ फुक्कु–श्र० । ३ "साक्षात् प्रतीयमानत्वं हि विषयीक्रियमाणत्वं विषयत्वमेव च कर्मत्वम् ।" तत्त्वार्थश्लो० पृ० ४५ । प्रमेयक० पृ० ३२ पू० । ४ कर्मत्वस्य कथं आ० । कर्मत्वाप्रसिद्धिरिति कथं भां० । ५ प्रत्यक्षस्य आ०, भां० । ६ कः कथं समा–भां० । ७ "प्रसङ्गश्च नाम परप्रसिद्धेन परस्य अनिष्टापादनमुच्यते ।" न्यायमं० पृ० १०२ । "साध्यसाधनयोर्व्याप्यव्या-पकभावसिद्धौ हि व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयको यत्र प्रदर्श्यते तत्प्रसङ्गसाधनम् । व्यापक-निवृत्तौ चावश्यम्भाविनी व्याप्यनिवृत्तिः स विपर्ययः ।" प्रमेयक० पृ० ६९ पू० । ८–ताप्रसिद्धेः श्र० । ९ परोक्षं न भवति यथा भां० ।

अविनाभूतं किञ्चिल्लिङ्गं संभवति । तद्धि इन्द्रियम् , अर्थः, तदतिशयः, तत्सम्बन्धः, तत्र प्रवृत्तिर्वा भवेत् ? यदि इन्द्रियम् ; तदा तदपि किं निर्विशिष्टम् , विशिष्टं वा तद्धेतुः स्यात् ? यदि निर्विशिष्टम् ; तर्हि सुप्त-मत्त-मूर्च्छिता-ऽन्यत्रगतचित्तावस्थास्वपि बुद्धेः अनुमानप्रसङ्गः इन्द्रियसद्भावस्य तत्राप्यविशेषात् । अथ विशिष्टमिन्द्रियं तद्धेतुः, तच्चात्र नास्ति तेनाऽयमदोषः;

५ ननु केन विशेषेण इन्द्रियस्य विशिष्टत्वम्–अनावरणत्वेन, प्रगुणमनःसहकृतत्वेन वा ? न तावदनावरणत्वेन ; अस्य प्रत्यक्षतः प्रत्येतुमशक्यत्वात् , अप्रतिपन्नस्य च हेतुविशेषणत्वे विशेषणाऽसिद्धो हेतुः स्यात् । विशेष्यासिद्धश्च ; तथाहि–शक्तिः इन्द्रियम् , शक्तिश्च अध्यक्षतः प्रत्येतुमशक्या इति । विषयपरिच्छित्त्या अनावरणेन्द्रियसिद्धौ अन्योन्याश्रयः ; तथाहि–विषयपरिच्छित्तिः बुद्धिः, तत्सिद्धौ अनावरणत्वोपेतमिन्द्रियं सिद्ध्यति, तथाभूतेन्द्रियसिद्धौ च विषयप-

१० रिच्छित्तिः सिद्ध्यतीति । एतेन प्रगुणमनःसहकृतत्वमपि प्रत्याख्यातम् ; मनसोऽतीन्द्रियस्य प्रगुणत्वधर्मोपेतस्य विषयपरिच्छित्तेरन्यतः प्रत्येतुमशक्यत्वाऽविशेषात् , तत्र च इतरेतराश्रयदोषाऽनुषङ्गात् ।

अथ अर्थो लिङ्गम् , सोऽपि किं सत्तामात्रेण लिङ्गम् , ज्ञातत्वविशेषणविशिष्टो वा ? प्रथमपक्षोऽनुपपन्नः ; तथाभूतस्यास्य व्यभिचारात् । न खलु यत्र यदा सत्ताविशिष्टोऽर्थः तत्र तदा

१५ बुद्धिः अनुमातुं शक्या ; तामन्तरेणाऽपि अस्य संभवतः अविनाभावाऽभावात् । यस्य तु येन अविनाभावः न तत् तदभावे संभवति यथाऽग्नेरभावे धूमः, संभवति च बुद्धेरभावेऽप्यर्थ इति । सत्तामात्रेण चाऽनुमापकत्वे सर्वार्थसत्तायाः सर्वपुरुषान् प्रति अविशिष्टत्वात् सर्वबुद्ध्यनुमानं स्यात् । अथ एतद्दोषाद् बिभ्यता ज्ञातेन अर्थो विशिष्यते 'ज्ञातोऽर्थः तत्कल्पकः' इति ; अत्रापि ज्ञातत्वेन अर्थो ज्ञातः, अज्ञातो वा तत्कल्पकः स्यात् ? अज्ञातस्य कल्पकत्वे सर्व

२० सर्वस्य कल्पकं स्याद् अविशेषात् । अथ ज्ञातः ; किं तत एव ज्ञानात् , तदन्तराद्वा ? तत एव ज्ञप्तौ अन्योन्याश्रयः–सिद्धे हि ज्ञातत्वविशिष्टेऽर्थे ततो ज्ञानसिद्धिः, तत्सिद्धौ च अर्थस्य ज्ञातत्वसिद्धिरिति । ज्ञानान्तरात्तज्ज्ञप्तौ चाऽनवस्था । न च अज्ञाते ज्ञाँते ज्ञाँतविशिष्टताऽर्थस्य घटते; तथाहि[६]–यो यद्विशेषणपूर्वकः प्रत्ययः स तस्मिन् विशेषणे ज्ञाते सत्येव प्रादुर्भवति, यथा दण्डविशेषणपूर्वको 'दण्डी' इति प्रत्ययः, ज्ञाँत-विशेषणपूर्वकश्च 'ज्ञातोऽर्थः' इति प्रत्ययः, तस्मात्

२५ ज्ञाँत-विशेषणे ज्ञाते सत्येव उपपद्यत इति । तज्ज्ञप्तौ च स एव परमतप्रवेशः अनवस्था च । न च ज्ञातत्वविशिष्टस्याऽर्थस्य ज्ञानेन विनाऽनुपपद्यमानत्वात् ज्ञानकल्पकत्वमित्यभिधातव्यम् ;

१ "विषयेन्द्रियविज्ञानमनस्कारादिलक्षणः । अहेतुरात्मसंवित्तेरसिद्धिर्व्यभिचारतः ॥१६॥" न्यायवि० पृ० १०८ । "तद्धि अर्थज्ञप्तिरिन्द्रियार्थौ तत्सहकारिप्रगुणं मनो वा ?" प्रमेयक० पृ० ३२ उ० । स्या० रत्ना० पृ० २१६ । २ ज्ञातत्वज्ञानविशेषण–भां० । ज्ञातत्वज्ञानविशेषणविशेषे वा श्र० । ३ ज्ञानेन श्र० । ४ विशेषणीभूते । ज्ञाने भां०, श्र० । ५ ज्ञानवि–भां० । ६–हि यद्वि–भां० । ७ ज्ञानवि–भां०, श्र० । ८ ज्ञान–भां०, श्र० । ९ नैयायिकमत ।

अनुपपद्यमानतामात्रस्याऽगमकत्वात्। न हि धूमादयोऽनुपपद्यमानतामात्रेण गमकाः ; नालिकेरद्वीपाऽऽयातं प्रत्यपि तेषां गमकत्वप्रसङ्गात्। किं तर्हि ? ज्ञाताः सन्तः, तथा अर्थोऽपि ज्ञातत्वविशिष्टतया ज्ञात एव ज्ञानस्य गमको युक्तः इति।

अथ अर्थातिशयो लिङ्गम्, ननु कोऽयम् अर्थस्य अतिशयो नाम ? 'प्राकट्यम्' इति चेत् ; तत् किं ज्ञानम्, ज्ञानविषयत्वम्, प्रकाशतामात्रं वा ? यदि ज्ञानम् ; तदा तस्याऽसिद्धत्वात् कथं लिङ्गत्वम् ? न च आत्मसिद्धौ आत्मन एव लिङ्गत्वं क्वापि प्रतिपन्नम् येनाऽत्रापि तथा कल्प्येत। अथ ज्ञानविषयत्वम् ; तदपि 'ज्ञानाऽसिद्धौ न सिद्ध्यति' इत्युक्तम्।

अथ प्रकाशतामात्रम् ; तदपि ज्ञानधर्मः, अर्थधर्मः, उभयधर्मः, स्वतन्त्रं वा स्यात् ? यदि ज्ञानधर्मः ; तर्हि 'ज्ञानं प्रकाशते' इत्येतावदेव प्राप्नोति, न पुनः 'अर्थः प्रकाशते' इति, अन्यधर्मस्य अन्यत्र व्यपदेशाऽहेतुत्वात्। यो यद्धर्मो न भवति न स तत्र तथा व्यपदेशहेतुः यथा पटरक्तता रजते, न भवति च ज्ञानधर्मतया प्रकाशमानता अर्थस्य धर्मः, तस्मान्न 'अर्थः प्रकाशते' इति व्यपदेशहेतुरिति। अथ अर्थधर्मः ; स किं साधारणः, असाधारणो वा ? प्रथमपक्षे सर्वदा सर्वान् प्रति अविशेषेणैव अर्थोऽवभासेत न तु कदाचित् कञ्चन प्रति, प्रकाशरूपतायाः सर्वान् प्रत्यविशिष्टत्वात्। न खलु प्रदीपः प्रकाशरूपतामापन्नः 'किञ्चित्प्रकाशते किञ्चिन्न' इति नियमो दृष्टः। अथ यदिन्द्रियेण उपकृतः असाधारणतद्धर्मोऽर्थः सम्पन्नः तस्यैव प्रकाशते नान्येषाम्। ननु इन्द्रियाणां स्वार्थप्रकाशकज्ञानजननात् नाऽपरं तदुपकारकत्वं प्रतीयते, एतच्च तज्ज्ञानस्य अर्थधर्मत्वे सर्वान् प्रति अविशिष्टम्। न हि 'नीलताद्यर्थधर्मः येनैव जन्यते तस्यैव प्रकाशते' इति नियमो दृष्टः। किञ्च, अर्थप्रकाशात् नित्यपरोक्षे ज्ञानेऽनुमीयमाने 'ज्ञानं मम अभूत' इत्यनुमानं स्यात् तस्य तत्प्रकाशात् पूर्वकालभावित्वात्, तथाभूतस्य च ज्ञानस्याऽनुमाने स्व-परसम्बन्धित्वविभागो दुर्लभः स्यात्।

किञ्च, मुख्यतः अर्थस्य प्रकाशमानता धर्मः, उपचारतो वा स्यात् ? न तावन्मुख्यतः ; ज्ञानाऽनपेक्षया तत्र तत्सिद्धिप्रसङ्गात्। यत्र हि यत्स्वरूपं मुख्यतः प्रसिद्धम् तत्र तत् पराऽनपेक्षम् यथा वह्नौ भासुररूपोष्णस्पर्शस्वरूपम्, मुख्यतोऽभ्युपगम्यते च अर्थे प्रकाशमानताधर्मः, तस्मात् ज्ञानाऽनपेक्ष एव स्यात्, न चैवम्, ज्ञाने सत्येव सर्वदा तत्र तत्प्रतीतेः। उपचारतः तत्र तद्धर्माऽभ्युपगमे तु न किञ्चिदनिष्टम्, मुख्यतो हि प्रकाशमानता ज्ञानस्य धर्मः, सा तद्विषयत्वाद् अर्थे उपचर्यते। कुतः पुनर्ज्ञानस्योत्पद्यमानस्य स्वपरप्रकाशता भवतीति चेत् ? स्वाभाव्यात् दिवाकरस्य करसम्पत्तिवत्, न हि दिवाकरस्य करसम्पत्तिः केनचित् क्रियते, तथा अत्र स्वपरप्रकाशता इति। तथा च अस्य स्वसंविदितत्वसिद्धेः, ततस्तस्य अनुमेयताऽनुप-

---

१ अनुपपद्यता-भां०। २ ननु युक्तोऽयम् भां०, श्र०। ३ तथापि भां०, श्र०। ४ असाधारणधर्मोऽर्थः भां०, श्र०। ५ प्रकाशेत आ०, भां०। ६ ज्ञानविषयत्वात्। ७-द्धेः तस्य श्र०।

पत्तिः । उभयधर्मपक्षे तु प्रमाण-प्रमेयव्यवहाराभावप्रसङ्गः द्वयोः प्रकाशधर्मतया तुल्यत्वात् । ज्ञानकृता हि अर्थस्य तत्परिच्छिद्यमानतया प्रमेयता, द्वयोश्च प्रकाशमानस्वरूपयोः तुल्यत्वे किं केन क्रियते ? प्रयोगः–यद् यतो येन वपुषा न व्यतिरिच्यते न तत् तस्य तथारूपत्वे व्याप्रियते यथा घटो घटान्तरस्य पृथुबुध्नोदराकारतया, न व्यतिरिच्यते च ज्ञानम् अर्थात् प्रकाशरूपतया इति । स्वातन्त्र्ये च प्रकाशतायाः ज्ञानापेक्षाऽनुपपत्तिः, स्वातन्त्र्यस्य पारतन्त्र्यपरिहारेणाऽवस्थितत्वात् । यद् यत्र स्वतन्त्रं न कर्तृत्र (न तत्तत्र) परमपेक्षते यथा राजा स्वकार्ये, स्वतन्त्रा च अर्थानां प्रकाशमानता इति । न च ज्ञानाऽनपेक्षाऽसौ प्रतीयते ।

किञ्च, इयं प्रकाशमानता अर्थादभिन्ना, भिन्ना वा स्यात् ? यद्यभिन्ना ; तदा अर्थ एव सा, तस्य च सदा सत्त्वात् तस्या अपि सदा सत्त्वप्रसङ्गात् सर्वं जगत् सर्वदा सर्वज्ञमकिञ्चिज्ञं वा स्यात् । अथ भिन्ना ; तदाऽसौ तत्र सम्बद्धा, असम्बद्धा वा ? यद्यसम्बद्धा ; कथम् 'अर्थस्य' इति व्यपदिश्येत ? यद् येनाऽसम्बद्धं न तत् 'तस्य' इति व्यपदिश्यते यथा सह्यस्य विन्ध्यः, अर्थेनाऽसम्बद्धा च प्रकाशमानता इति । अथ सम्बद्धा ; किं तादात्म्येन, तदुत्पत्त्या, संयोगेन वा ? न तावत्तादात्म्येन ; भेदपक्षस्य अङ्गीकृतत्वात् , भेद-तादात्म्ययोश्च अन्योन्यं विरोधात् । नापि तदुत्पत्त्या ; यतः अर्थात् किं प्रकाशता उत्पद्यते, ततो वाऽर्थः ? न तावदर्थात् प्रकाशता उत्पद्यते ; ज्ञानात् तदुत्पत्तिप्रतिज्ञानात् । नापि प्रकाशतातोऽर्थः ; स्वकारणकलापात् प्रकाशतातः पूर्वमपि अस्योत्पन्नत्वात् । नापि संयोगेन प्रकाशता अर्थे सम्बद्धा , तस्य द्रव्यवृत्तित्वेन अद्रव्यरूपायां प्रकाशतायां संभवाऽभावात् । अस्तु वा केनचित् सम्बन्धेन सम्बद्धाऽसौ; तथापि अर्थमात्रेण असौ सम्बद्धा, अर्थविशेषेण वा ? अर्थमात्रेण सम्बन्धे, स एव अशेषस्य जगतोऽशेषज्ञत्वस्य अकिञ्चिज्ञत्वस्य वा प्रसङ्गः । 'घटस्य आसीदत्र प्रकाशता, इदानीं तु पटस्य' इति प्रतिनियतदेश-कालविशिष्टे प्रतिनियतेऽर्थे तद्व्यपदेशाऽभावश्च स्यात् । अथ अर्थविशेषेण ; ननु कोऽयम् अर्थस्य विशेषः–ज्ञानजनकत्वम् , आलम्बनत्वं वा ? तत्राद्यविकल्पोऽयुक्तः ; ज्ञानजनकत्वस्य अर्थे निराकरिष्यमाणत्वात् । द्वितीयविकल्पेऽप्यन्योन्याश्रयः–अर्थस्य आलम्बनत्वसिद्धौ हि प्रकाशतायाः अर्थविशेषे सम्बन्धसिद्धिः, तत्सिद्धौ च अर्थस्य आलम्बनत्वसिद्धिरिति । तन्न अतिशयोऽपि लिङ्गम् । नापि तत्सम्बन्धः ; तस्य सम्बन्धिज्ञानपूर्वकत्वात् , सम्बन्धिनौ चाऽत्र इन्द्रियाँऽर्थौ ज्ञानाऽर्थौ अतिशयाऽर्थौ वा न ज्ञातुं शक्येते, यथा चैषां ज्ञातुमशक्तिः तथा प्रतिपादितमेव । अथ प्रवृत्त्या ज्ञानमनुमीयतेः ; तर्हि निवर्त्तकस्य ज्ञानस्य कथं प्रतिपत्तिः स्यात् ? प्रवृत्त्या हि

१–दिश्यते आ०, भां० । २–व्यप्राप्तित्वेन श्र० । ३ प्रकाशमानतायां आ०, भां० । ४–तोऽशेषज्ञस्य किंचि–भां० । –तोविशेषज्ञत्व– श्र० । ५ ज्ञानस्य जनकत्वम् आं० । ६–विकल्पोप्यन्यो–भां० । –विकल्पेन्योन्या– आ० । ७–यार्थाः श्र० । ८–नार्थाः श्र० । ९–यार्थाः श्र० ।

प्रवर्त्तकमेव ज्ञानमनुमीयते न निवर्त्तकम्। अथ प्रवृत्ति-निवृत्तीभ्यां ज्ञानमुपकल्प्यते ; तर्हि तयोरभावे उदासीनस्य उपेक्षमाणोर्थविज्ञानं कथं कल्प्येत ?

अस्तु वा किञ्चिल्लिङ्गम् ; तथापि अगृहीतप्रतिबन्धं तत् न परोक्षां बुद्धिमनुमापयितुं समर्थम्, सर्वत्राऽस्य गृहीतप्रतिबन्धस्य स्वसाध्याऽनुमापकत्वप्रतीतेः। प्रतिबन्धश्च लिङ्ग-लिङ्गिनोः अविनाभूतत्वेन प्रमाणप्रतिपन्नयोरेव भवति। न च ज्ञानम्, तेन चाऽविनाभूतं किञ्चिल्लिङ्गं केनचित् प्रमाणेन प्रतिपन्नं यतः सम्बन्धग्रहणपुरस्सरमनुमानं प्रवर्तेत। ततोऽनुमानमिच्छता ज्ञानं प्रत्यक्षमभ्युपगन्तव्यम्। न च अपरोक्षस्य स्वयं प्रकाशस्वभावस्य आत्मनः क्रिया नित्य-परोक्षा युक्ता ; तथाहि—याऽसौ स्वयं प्रकाशमानस्याऽऽत्मनः प्रकाशक्रिया सा नित्यपरोक्षा न भवति, प्रकाशक्रियात्वात्, प्रदीपादेः प्रभाभारक्रियावदिति। किञ्च, ज्ञानमुत्पद्यमानं स्वाऽनुभवेन तदनुभवव्यावृत्तं संवेद्यते, अर्थश्चास्य विषयभावमापन्न एव संवेद्यते 'अर्थमहं जानामि' इति प्रतीतेः। नित्याऽनुमेयत्वे च ज्ञानस्य उभयमपि दुर्घटम्, अर्थो हि प्रकाशमानः सर्वान् प्रति साधारणः इति ज्ञानस्य परोक्षत्वे 'मम प्रकाशते' इति निर्निबन्धना व्यवस्थितिः। तस्मादुक्तदोषेभ्यो बिभ्यता ज्ञानस्य परोक्षताऽऽग्रहमहाऽभिनिवेशं परित्यज्य स्वसंविद्रूपता अभ्युपगन्तव्या इति।

ननु ज्ञानस्य स्वसंविदितत्वमयुक्तं ज्ञानान्तरवेद्यत्वस्यैवात्रोपपन्नत्वात् ; तथा च अनुमानम्—

'ज्ञानं ज्ञानान्तरवेद्यं प्रमेयत्वात्' इति वदतो नैयायिकस्य पूर्वपक्षः—

ज्ञानं ज्ञानान्तरवेद्यं प्रमेयत्वात् घटादिवत्। न चाऽयमसिद्धो हेतुः ; पक्षे प्रवर्तमानत्वात्। नापि विरुद्धः ; सपक्षे सत्त्वात्। नाप्यनैकान्तिकः ; पक्ष-सपक्षवद् विपक्षे प्रवृत्त्यभावात्। नापि ईश्वरज्ञानेन अनैकान्तिकः ; अस्मदादिज्ञानापेक्षया ज्ञानान्तरवेद्यत्वाऽभ्युपगमात्, ईश्वरज्ञानस्य च अस्मदादिज्ञानाद् विशिष्टत्वात्। न च विशिष्टे दृष्टं धर्मम् अविशिष्टेऽपि योजयन् प्रेक्षावत्तां

१—णार्थे वि—श्र०। २—पकप्र—आ०, भां०। ३—णत्वप्रति—श्र०। ४ प्रकाशस्यात्मनः भां०। प्रकाशस्य भा—श्र०। ५ ज्ञानमुत्पाद्य—आ०। ६—गम्या इति आ०। ७ "प्रयोगस्तु विवादाध्यासिताः प्रत्ययान्तरेणैव वेद्याः प्रत्ययत्वात्। ये ये प्रत्ययाः ते सर्वे प्रत्ययान्तरवेद्याः यथा न प्रत्ययान्तरेणैव वेद्याः (?)। अविद्यमानस्यावभासे अतिप्रसङ्गात् ज्ञायमानस्यैवावभासोऽभ्युपेयः। तथा च विज्ञानस्य स्वसंवेदने तदेव तस्य कर्म क्रिया चेति विरुद्धमापद्येत। यथोक्तम्—अङ्गुल्यग्रं यथात्मानं नात्मना स्पष्टुमर्हति। स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति॥ इति। यत्प्रत्ययत्वं वस्तुभूतमविरोधेन व्याप्तं तद्विरुद्धविरोधदर्शनात् स्वसंवेदनान्निवर्त्तमानं प्रत्ययान्तरवेद्यत्वेन व्याप्यते इति प्रतिबन्धसिद्धिः। एवं प्रमेयत्वगुणत्वसत्त्वादयोऽपि प्रत्ययान्तरवेद्यत्वहेतवः प्रयोक्तव्याः। तथा च न स्वसंवेदनं ज्ञानमिति सिद्धम्।" विधिवि० न्यायकणि० पृ० २६७। "तथाहि—यदि स्वसंवेद्यमात्मान्तःकरणसंयोगादुपलभ्यं तदिष्टमेव। अथ तदेव ज्ञानं प्रमाणं प्रमेयं फलञ्चेति; तन्न; अन्यत्र त्रितयस्याभेदादर्शनात्, भेदे त्वनेकं दण्डाद्युदाहरणम्। अतो न ज्ञाने करणकर्मणोरभेदः स्वसंवेद्यत्वम्, नापि क्रियाकर्मणोरिति। तस्मात् ज्ञानान्तरसंवेद्यं संवेदनं वेद्यत्वात् घटादिवत्।" प्रश० व्यो० पृ० ५२९। ८ घटवत् श्र०।

लभते; अशेषार्थग्राहित्वस्याऽपि अशेषज्ञानानां तद्वत् प्रसङ्गात्। नापि कालात्ययापदिष्टः ; प्रत्यक्षाऽऽगमाभ्यामबाधितविषयत्वात्। ननु स्वसंविदितस्वभावम् अर्थज्ञानं प्रत्यक्षत एव प्रतीयते, ततः प्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वेन कालात्ययापदिष्ट एवाऽयम्; इत्यप्यसाम्प्रतम्; ज्ञानस्य स्वसंविदितस्वभावत्वाऽसंभवात्, अर्थग्रहणस्वभावतयैवास्य व्यवस्थितत्वात्। "अर्थग्रहणं बुद्धिश्चेतना" [ ] इत्यभिधानात्। ग्रहणञ्चास्य एकात्मसमवेताऽनन्तरज्ञानेनैव, न तु स्वतः। यद्येवम् अर्थ-ज्ञानयोः क्रमेणोत्पन्नयोः तथैवोपलम्भः स्यादिति चेत्; न ; अनयोः क्रमभावेऽपि आशुवृत्त्या उत्पलपत्रशतच्छेदवद् यौगपद्याऽभिमानतो भेदेनाऽनुपलम्भसंभवात्। न च अर्थज्ञानस्य ज्ञानान्तरप्रत्यक्षत्वे तस्यापि अपरज्ञानप्रत्यक्षत्वप्रसङ्गाद् अनवस्था स्यादित्यभिधातव्यम्; अर्थज्ञानस्य द्वितीयेन अस्यापि तृतीयेन ग्रहणाद् अर्थसिद्धेः अपरज्ञानकल्पनाऽनर्थक्यतोऽनवस्थासंभवाऽभावात्। अर्थजिज्ञासायां हि अर्थे ज्ञानमुत्पद्यते ज्ञानजिज्ञासायां तु ज्ञाने, प्रतीतेरेवंविधत्वात्।

ये तु स्वसंवेदनस्वभावं तद् अभ्युपगच्छन्ति ते प्रष्टव्याः—किं स्वेन संवेदनं स्वसंवेदनम्, स्वकीयेन वा ? यदि स्वकीयेन ; तदा सिद्धसाधनम्, स्वकीयेन अनन्तरोत्तरज्ञानेन प्राक्तनज्ञानस्य संवेदनाऽभ्युपगमात्। अथ स्वेन आत्मनैव संवेदनं स्वसंवेदनम्; तदयुक्तम्; स्वात्मनि क्रियाविरोधात्, न हि सुतीक्ष्णोऽपि खड्गः आत्मानं छिनत्ति, सुशिक्षितोऽपि वा बटुः स्वस्कन्धमारोहति। तथा चेदमयुक्तम्—'ज्ञानं स्वप्रकाशात्मकम् अर्थप्रकाशकत्वात् प्रदीपवत्' इति। चक्षुरादिना अनेकान्ताच्च। स्वप्रकाशात्मकत्वञ्च बोधरूपत्वम्, भासुररूपसम्बन्धित्वं वा स्यात् ? प्रथमपक्षे साध्यविकलो दृष्टान्तः प्रदीपे बोधरूपत्वस्याऽसंभवात्। अथ भासुररूपसम्बन्धित्वम्; तस्य ज्ञानेऽत्यन्ताऽसत्त्वात् कथं साध्यता ? अन्यथा प्रत्यक्षबाधा।

किञ्च ; किं येनैव आत्मना ज्ञानम् आत्मानं प्रकाशयति तेनैवाऽर्थम्, स्वभावान्तरेण वा ? यदि तेनैव ; कथं ज्ञानाऽर्थयोः भेदः अभिन्नस्वभावग्रहणग्राह्यत्वात् तदन्यतरस्वरूपवत् ? अथ स्वभावान्तरेण ; तदा तौ स्वभावौ ततोऽभिन्नौ, न वा ? यद्यभिन्नौ ; तत्रापि किं ताभ्यां ज्ञानम् अभिन्नम्, ज्ञानाद्वा तौ ? तत्राद्यविकल्पे तौ एव न ज्ञानम्, तस्य तत्रैवाऽनुप्रवेशात् तत्स्वरूपवत्। द्वितीयविकल्पे तु ज्ञानमेव न तौ, तयोरत्रैवाऽनुप्रवेशात्, तथा च कथं ज्ञानं

---

१ प्रत्यक्ष एव भां०,श्र० । २—तत्वस्वभा—श्र० । ३ आप्तप० पृ० ९ । स्या० रत्ना० पृ० २२४ । ४—स्था इत्य—श्र० । ५ "स्वात्मनि वृत्तिविरोधात्, न हि तदेव अङ्गुल्यग्रं तेनैव अङ्गुल्यग्रेण स्पृश्यते, सैवाऽसिधारा तयैवाऽसिधारया छिद्यते।" स्फुटार्थ-अभिध०पृ० ७८ । ६—च प्रकाशा—आ०,भां०। ७ "तत्र यदि प्रकाशकत्वं बोधरूपत्वं विवक्षितं तदा साधनविकलमुदाहरणम्, प्रदीपे बोधरूपत्वस्यासंभवात्। अथ प्रकाशकत्वं भास्वररूपसम्बन्धित्वं तद्विज्ञाने नास्त्यतो ज्ञानान्तरस्य तद्विषयस्योत्पाद एव ज्ञानस्य परिच्छेद इति।" प्रश० व्यो० पृ० ५२९।

स्वाऽर्थयोः प्रकाशकं स्यात् ? अथ भिन्नौ; तत्रापि किं तौ स्वसंविदितौ, स्वाश्रयज्ञानविदितौ वा ? प्रथमपक्षे स्वसंविदितज्ञानत्रयप्रसङ्गः, तत्रापि प्रत्येकं स्वपरप्रकाशस्वभावद्वयात्मकत्वे स एव पर्यनुयोगः अनवस्था च । द्वितीयपक्षेऽपि स्व-परप्रकाशहेतुभूतयोः तयोर्यदि ज्ञानं तथाविधेन स्वभावद्वयेन प्रकाशकम्; तर्हि अनवस्था । तदप्रकाशकत्वे प्रमाणत्वाऽयोगः, तयोर्वा तत्स्वभावे[1]-त्वविरोध इति । ५

ज्ञानान्तरवेद्यत्वनिराकरण-पुरस्सरा ज्ञानस्य स्वसंवेदनसिद्धिः-

अत्र प्रतिविधीयते । यत्तावदुक्तम्[2]–'प्रमेयत्वात्' इति साधनम्; अतः किम् अस्मदादि-ज्ञानस्य ज्ञानान्तरवेद्यत्वं प्रसाध्यते[3], ज्ञानसामान्यस्य वा ? यदि ज्ञानसामान्यस्य[4]; तदा ईश्वरज्ञानेन अनेकान्तः । अथ अस्मदादिज्ञानस्य; तन्न; अस्मदादिविशेषणस्य अत्राऽप्रतीयमानत्वात् । हन्निविष्टं तद् इति चेत्; कथं कोशपानाद्दते अयमर्थः प्रतीयते ? अस्तु वा, तथापि तत् किं पक्षस्य विशेषणम्, हेतोर्वा ? यदि पक्षस्य; तदा ईश्वरज्ञानम् अपक्षोऽस्तु, हेतुस्तु[5] तत्र प्रवर्तमानः केन निषिद्ध्यते येन अनैकान्तिको न स्यात् ? १०

किञ्च, ईश्वरज्ञानं स्वसंविदितत्वाद् अनेन व्यवच्छिद्यते, सर्वदा परोक्षत्वात्, सदाऽप्रमेयत्वाद्वा ? स्वसंविदितत्वाच्चेत्; कुतस्तस्य तत्सिद्धिः–युक्तितः, अभ्युपगममात्राद्वा ? अभ्युपगममात्रात् तत्सिद्धौ सर्वं सर्वस्य इष्टं सिद्ध्येत्। अथ युक्तितः; काऽत्र युक्तिः ? अर्थग्रहणात्मकत्वम्, ज्ञानत्वं वा ? द्वयमपि[6] चेदम् अस्मदादिज्ञानेऽस्त्येव इत्युभयत्र स्वसंविदितत्वं सिद्ध्येत् न वा क्वचिदपि अविशेषात्। नन्[7] च ईश्वरज्ञानस्य अस्मदादिज्ञानाद् विशिष्टत्वात् तत्रैव स्वसंविदितत्वं युक्तम् नान्यत्र, न हि विशिष्टे दृष्टं धर्मम् अविशिष्टेऽपि योजयन्[8] प्रेक्षावत्तां लभते[9]; इत्यप्यविचारितरमणीयम्; ज्ञानत्वस्य अर्थग्रहणात्मकत्वस्य च ईश्वरज्ञाने विशिष्टे दृष्टस्य धर्मस्य अस्मदादिज्ञाने प्रतिषेधप्रसङ्गात्। ननु ज्ञानत्वस्य अर्थग्रहणात्मकत्वस्य चाऽभावे कथं तत् ज्ञानं स्यात्[10] तस्य तत्स्वभावत्वात् ? इत्यन्यत्रापि समानम्, न हि स्वसंविदितत्वस्वभावस्याप्यभावे ज्ञानस्य ज्ञानता युक्ता; तस्यापि[11] तत्स्वभावत्वाऽविशेषात्। न हि ईश्वरज्ञाने ज्ञानत्व-अर्थग्रहणात्मकत्वाभ्यामिव स्वसंविदितत्वेनापि विना ज्ञानस्वभावता दृष्टा एवमन्यत्रापि। १५ २०

---

१ तत्स्वभाव इति विरोध भां०, श्र०। २ पृ० १८१ पं० १६। ३–साध्येत श्र०। ४ "महेश्वरार्थज्ञानेन हेतोर्व्यभिचारात्"···प्रमाणपरी० पृ० ६०। "सुखादिनापि वेद्यत्वस्य व्यभिचारित्वमीश्वरज्ञानेन च।" न्यायवि० टी० पृ० ११६ पू०। स्या० रत्ना० पृ० २२२। ५ हेतुस्तत्र भां०। ६–मप्यस्मदा–भां०, श्र०। ७ "अस्मदादिज्ञानापेक्षया अर्थज्ञानस्य ज्ञानान्तरवेद्यत्वं प्रमेयत्वहेतुना साध्यते, ततो नेश्वरज्ञानेन व्यभिचारः तस्य अस्मदादिज्ञानाद् विशिष्टत्वात्। न हि विशिष्टे दृष्टं धर्ममविशिष्टेऽपि घटयन् प्रेक्षावत्तां लभते।" प्रमाणपरी० पृ० ६०। प्रमेयक० पृ० ३४ उ०। स्या० रत्ना० पृ० २२२। ८ योजयत् आ०, श्र०। ९ लभ्यते भां०, श्र०। १० तस्यैतत्स्व–भां०। ११ तत्स्वाभाव–आ०।

न च स्वभावः प्रादेशिको युक्तः आलोकस्य स्वपरप्रकाशतावत्। न खलु स्वपरप्रकाशता आदित्यालोकस्यैव स्वभावः न प्रदीपाद्यालोकस्य, उभयत्राप्यविशेषतस्तत्प्रतीतेः। अथ अस्मदादिज्ञानस्य ईश्वरज्ञानवत् स्वपरव्यवसायात्मकत्वे तद्वत् निखिलार्थावभासित्वमपि स्यात्; तदसमीचीनम्; योग्यस्यैवाऽवभासनात् प्रदीपवत्। न हि प्रदीपस्य आदित्यवत् स्वपरप्रकाशस्वभावत्वेऽपि तद्वन्निखिलार्थस्य प्रकाशकत्वं दृष्टम्, योग्यस्यैव नियतदेशार्थस्य अनेन प्रकाशनात्, एवमत्रापि। योग्यता च अखिलज्ञानानां स्वावरणक्षयोपशमतारतम्यलक्षणा प्रतिपत्तव्या। न हि तदभावे विषयग्रहणतारतम्यं तेषां घटते इत्यग्रे प्रसाधयिष्यते। तन्न स्वसंविदितत्वात् अस्मदादिविशेषणेन ईश्वरज्ञानस्य व्यवच्छेदः।

नापि सर्वदा परोक्षत्वात्; मीमांसकमतानुप्रवेशप्रसङ्गात्, न हि नैयायिकैः सर्वदा परोक्षं किञ्चिज्ज्ञानमिष्यते। तत्परोक्षत्वे च कथम् ईश्वरस्य सर्वज्ञत्वम्? ततोऽन्यस्याऽशेषार्थस्य ग्रहणात् तत्त्वम्; इत्यप्ययुक्तम्; ज्ञानस्याऽग्रहणे तेन अर्थग्रहणाऽयोगात्। नहि असंवेद्यमानाऽनुभवाद् अर्थोऽनुभूतो नाम; आत्मान्तरप्रत्यक्षतोऽपि अर्थप्रत्यक्षताप्रसङ्गात्, न खलु तत्र अस्वसंविदितत्वाद् अन्यद् अप्रत्यक्षताकारणमस्ति। यद् यत्र समवेतं तत् तत्र प्रत्यक्षताकारणम् न पुनः स्वसंविदितत्वम्; इत्यपि मनोरथमात्रम्; समवायाऽसिद्धौ समवेतत्वाऽसिद्धेः[3]। सदाऽप्रमेयत्वाऽभ्युपगमे च ईश्वरज्ञानस्य सर्वदाऽसत्त्वप्रसङ्गः, यत् सर्वदाऽप्रमेयं न तत् कदाचित् सत् यथा खपुष्पम्, सर्वदाऽप्रमेयश्च ईश्वरज्ञानमिति। ततः तस्य सत्त्वम् अर्थग्रहणञ्च इच्छता स्वसंविदितस्वभावत्वमभ्युपगन्तव्यम्, तद्वदन्यदपि। अथ हेतुविशेषणम् 'अस्मदादिज्ञानत्वे सति प्रमेयत्वात्' इति; तर्हि साधनविकलो दृष्टान्तः, तथाभूतस्य हेतोः घटादिदृष्टान्तेऽसंभवादिति।

यदप्युक्तम्–[6]*'अर्थग्रहणं बुद्धिश्चेतना'* इत्यादि; तदप्ययुक्तम्; स्वसंविदितस्वभावाऽभावे ज्ञानेऽर्थग्रहणस्यैवाऽसंभवात्। तद्धि तँत्र अर्थादुत्पत्तेः, चेतनातो वा स्यात्? तत्र यदि अर्थादुत्पत्तेर्ज्ञानेऽर्थग्रहणमिष्यते; तर्हि घटेऽपि तदिष्यताम् चक्राद्यर्थात् तदुत्पत्तेरप्यविशेषात्। अथ चेतनातः; ननु कुतो ज्ञानस्य चेतनासिद्धिः–अर्थग्रहणात्, चेतनात्मप्रभवत्वाद्वा? अर्थग्रहणाच्चेत्; अन्योन्याश्रयः–सिद्धे हि अर्थग्रहणे चेतनासिद्धिः, तत्सिद्धेश्च अर्थग्रहणसिद्धिरिति। अथ चेतनात्मप्रभवत्वात्; ननु आत्मनोऽपि कुतश्चेतनत्वं सिद्धयेत्–चेतनासमवायात्, स्वतो वा? यदि स्वतः; ज्ञानस्यापि तथा तदस्तु विशेषाऽभावात्। अथ चेतनासमवायात्; अयमपरोऽन्योन्याश्रयः–चेतनासमवायाद्धि आत्मा चेतनः, तत्प्रभवत्वाच्च बुद्धिश्चेतना इति।

किञ्च, *'अर्थग्रहणं बुद्धिः'* इत्यत्र किम् 'अर्थस्यैव ग्रहणं बुद्धिः' इत्यवधार्यते, किं वा अर्थस्यापि?

१–मन्यत्रापि श्र०। २ सर्वज्ञत्वम्। ३–द्धेः तथाऽप्र–श्र०। ४–स्वभावमीश्वरज्ञानमभ्यु–आ०। ५–न्यस्यापि श्र०। अस्मदादिज्ञानमपि। ६ पृ० १८२ पं० ४। ७ "अर्थग्रहणत्वं हि ज्ञाने अर्थादुत्पत्तेः चेतनास्वरूपत्वतो वा भवेत्?" स्या० रत्ना० पृ० २२४।

तत्राद्यः पक्षोऽप्यक्षविरुद्धः; 'नीलम्' इत्युल्लेखेन अर्थग्रहणवत् 'अहम्' इत्युल्लेखेन आत्मग्रहणस्याप्यनुभवात्। न हि नीलादिसंवेदनाद् भिन्नकालं तदात्मसंवेदनमनुभूयते; तत्संवेदनसमकालमेव अन्तः परिस्फुटरूपस्याऽनुभवात्। अतोऽर्थसंवेदनस्य आत्मसंवेदनादभिन्नस्वभावत्वात् तत्संवेदने तदपि संविदितम् इति स्वसंवेदनसिद्धिः। यद् यस्माद् अभिन्नस्वभावं तस्मिन् गृह्यमाणे तद् गृहीतमेव यथा नीले गृह्यमाणे तस्यैव स्वरूपं सन्निवेशादि, स्वरूपसंवेदनाद् अभिन्नस्वभावश्च अर्थसंवेदनमिति। ५

अथ 'अर्थस्यापि ग्रहणम्' इत्ययं पक्षः कक्षीक्रियते; तदा सिद्धसाधनं स्वसंवेदनाऽप्रतिक्षेपात्। यदि च ज्ञानमस्वसंविदितस्वभावम् इष्यते; तदा तत् किं परोक्षं स्यात्, ज्ञानान्तरवेद्यं वा? न तावत् परोक्षम्; मतान्तरप्रसङ्गात्, तेनाऽप्रत्यक्षेण अर्थप्रत्यक्षताविरोधाच्च। तथाहि— यद् अव्यक्तव्यक्तिकं न तद् व्यक्तम् यथा किञ्चित् केनचिद् अज्ञानम्, अव्यक्तव्यक्तिकश्च नीलादिकं वस्तु इति। व्यक्तिर्हि ज्ञानम्, सा यदा अव्यक्ता; तदा कथम् अर्थव्यक्ततोपपन्ना, सन्तानान्तरज्ञानादपि अर्थव्यक्तत्वाऽनुषङ्गात्। १०

अथ ज्ञानान्तरवेद्यं तदिष्यते; तत्रापि किं सहसम्भूतज्ञानसंवेद्यम्, उत्तरकालीनज्ञानसंवेद्यं वा स्यात्? तत्राद्यः पक्षोऽनुपपन्नः; युगपज्ज्ञानानामसंभवात्, अन्यथा *"युगपज्ज्ञानाऽनुत्पत्तिर्मनसो लिङ्गम्"* [न्यायसू० १।१।१६।] इति वचो विरुद्ध्येत। द्वितीयपक्षोऽप्ययुक्तः; विच्छिन्नप्रतिभासाऽभावात्, न खलु 'प्रागर्थज्ञानम्, पश्चात्तज्ज्ञानज्ञानम्' इति सान्तरा प्रतीतिरनुभूयते। ततः 'ग्रहणश्च अर्थज्ञानस्य एकात्मसमवेताऽनन्तरज्ञानेन' इत्यादि प्रत्याख्यातम्। १५

किञ्च, उत्तरकालीनज्ञानकाले तत् प्राक्तनज्ञानम् अनुवर्तते, न वा? यद्यनुवर्तते; स एव ज्ञानयौगपद्यप्रसङ्गः, अक्षणिकत्वाऽनुषङ्गश्च स्यात्। अथ नाऽनुवर्तते; कस्य तर्हि तद् ग्राहकम् ग्राह्यस्य प्रागेव विलीनत्वात्? किञ्च, इन्द्रियजं प्रत्यक्षं प्रवर्तमानं सम्बद्धे वर्तमाने च विषये प्रवर्तते, अतीतक्षणवर्तिनश्च ज्ञानस्य न वर्तमानत्वम् मनोलक्षणेन्द्रियसन्निकर्षो वा संभवति, न च असम्बद्धे अवर्तमाने चाऽर्थे प्रवर्तमानं ज्ञानं प्रत्यक्षं युक्तम्, तत्कथं तत्र मानसप्रत्यक्षवार्ताऽपि स्यात्? अर्थाद् उत्पन्नश्च ज्ञानम् अर्थग्राहकम्, न च विनष्टस्य जनकत्वम्; असत्त्वात्। असतश्च अर्थक्रियाकारित्वाऽनुपपत्तिः; विरोधात्। न च विनश्यदवस्थस्य जनकत्वं युक्तम्; तथाभूतस्य कारकत्वाऽदर्शनात्, न हि म्रियमाणस्य पितुः पुत्रं प्रति कारकत्वं दृष्टम्। २० २५

---

१ अहमित्युल्लेखरूपम्। २–भवनात् श्र०। ३ "परोक्षज्ञानविषयः परिच्छेदः परोक्षवत्।" न्यायवि० पृ० ९७ पू०। "तस्यापि च परोक्षत्वे प्रत्यक्षोऽर्थो न सिद्ध्यति। ततो ज्ञानावसायः स्यात्कुतोऽस्याऽसिद्धवेदनात्॥ २२४॥" तत्त्वार्थश्लो० पृ० ४७। ४ उद्धृतञ्चैतत्–सन्मति० टी० पृ० ४७७। न्यायवि० टी० पृ० ११७ उ०। स्या० रत्ना० पृ० २२५। ५ पश्चाज्ज्ञानम् आ०, भां०। ६ कारणत्वं भां०, श्र०।

किञ्च, अर्थज्ञानोत्पत्तौ नियमेन तद्ग्राहकं ज्ञानमुत्पद्यते, न वा ? प्रथमपक्षे न पुरुषायुषेणाऽपि अर्थान्तरे ज्ञानस्य सञ्चारः ज्ञानज्ञानोत्पत्तावेव आजन्म मनसो व्यापारात्, तथा च अनवस्थातो[1] नार्थः अर्थज्ञानं वा सिध्येत्। न च अप्रत्यक्षेण अर्थज्ञानज्ञानेन अर्थज्ञानस्य, तेन च अर्थस्य प्रत्यक्षता युक्ता ; सन्तानान्तरज्ञानादपि तत्प्रसङ्गात्। अथ तदुत्पत्तावपि नियमेन तन्नोत्पद्यते, अर्थजिज्ञासायां हि अर्थे ज्ञानमुत्पद्यते, ज्ञानजिज्ञासायां तु ज्ञाने ; तदप्यसुन्दरम्; ज्ञानस्य जिज्ञासाप्रभवत्वाऽसंभवात्, नष्टाश्वस्य अश्वदिदृक्षायां सत्यामपि अश्वदर्शनाऽनुत्पत्तेः, असत्यामपि च गोदिदृक्षायां तद्दर्शनोत्पत्तेः।

किञ्च, 'अर्थजिज्ञासायां सत्याम् अहमुत्पन्नम्' इति तज्ज्ञानमेव प्रतिपद्यते, ज्ञानान्तरं वा ? प्रथमविकल्पे जैनमतसिद्धिः, तथा प्रतिपद्यमानं हि ज्ञानं स्वार्थपरिच्छेदकं स्यात्। द्वितीयविकल्पे तु अनवस्था–तत्रापि जिज्ञासाप्रभवत्वस्य अन्यतः प्रतीतेः। अस्तु वा तत्प्रभवतया तृतीयादिज्ञानाऽनुत्पत्तिः ; तथापि–'अर्थज्ञानम् अज्ञातमेव मया अर्थस्य परिच्छेदकम्' इति ज्ञानान्तरं प्रतिपद्यते, न वा ? प्रतिपद्यते चेत्[2]; तर्हि देव (तदेव) स्व-परपरिच्छेदकं सिद्धम्। न प्रतिपद्यते चेत्; कथं तथा प्रतिपत्तिः अतिप्रसङ्गात् ? किञ्च, अर्थज्ञानम् अर्थम् आत्मानञ्च प्रतिपद्य 'अज्ञातमेव मया ज्ञानम् अर्थं जानाति' इति ज्ञानान्तरं प्रतीयात्, अप्रतिपद्य वा ? प्रथमपक्षे त्रिविषयत्वमस्य प्रसज्यते। द्वितीयपक्षे तु अतिप्रसङ्गः 'अज्ञातमेव मया अणुद्वयं द्व्यणुकमारभते' इत्यपि तत् प्रतीयादिति। ज्ञानस्य ज्ञानान्तरग्राह्यत्वे च अज्ञानतैवास्य स्यात् प्रकाशस्य प्रकाशान्तरापेक्षायाम् अप्रकाशतावत्, न हि स्वसिद्धौ परमुखप्रेक्षित्वं विहाय अन्यज् जडस्य लक्षणम्।

किञ्च, अर्थसंवेदनात् तत्संवेदनस्य भेदे तथैव उपलम्भः कुतो न स्यात् ? आशुवृत्त्या उत्पलपत्रशतच्छेदवद् यौगपद्याभिमानादिति चेत् ; कथमेवं सर्वभावानां क्षणिकत्वं न स्यात् 'एकत्वाध्यवसायस्य अत्रापि आशुवृत्तिप्रवृत्तत्वात्' इति बौद्धेनापि अभिधातुं शक्यत्वात् ? मूर्तानाञ्च उत्पलपत्राणां मूर्तेन शू (सू)च्यग्रेण छेदः क्रमेणैव युक्तः ; युगपत्प्राप्त्यभावात्। प्रयोगः–योऽयम् औत्तराधर्यक्रमावस्थितानां मूर्तानामुत्पलपत्राणां मूर्तेन एकपुरुषव्यापारात्

---

१ "विमुखज्ञानसंवेदो विरुद्धो व्यक्तिरन्यतः। असञ्चारोऽनवस्थानमविशेष्यविशेषणम्॥ १९॥ ज्ञानज्ञानमपि ज्ञानमपेक्षेत परस्तथा। ज्ञानज्ञानलताऽशेषनभस्तलविसर्पिणी॥ २१॥" न्यायवि० पृ० ११०-१११। प्रमाणपरी० पृ० ६०। तत्त्वार्थश्लो० पृ० ४२। युक्त्यनुशा० टी० पृ० ७। सन्मति० टी० पृ० ४७९। प्रमेयक० पृ० ३४ उ०। स्याद्वादमं० पृ० ९४। चन्द्रप्रभच० २।५७-५९। २–तो ज्ञानात्मार्थज्ञानं वा भां०, श्र०। ३–तीयज्ञा–श्र०। ४ चेतदेव आ०, भां०। ५ "किञ्चाऽर्थज्ञानमर्थमात्मानं च प्रतिपद्य....." युक्त्यनुशा० टी० पृ० ९। प्रमेयक० पृ० ३७ उ०। ६–तैव स्यात् आ०, भां०। ७ आशुवृत्तित्वात् भां०। ८ "मूर्त्तस्य सूच्यग्रस्य औत्तराधर्यावस्थितमुत्पलपत्रशतं युगपद्व्याप्तुमशक्तेः।" प्रमेयक० पृ० ३६ पू०। सन्मति० टी० पृ० ४७७।

कृतः छेदः सः क्रमभाव्येव, यथा तथाभूतानां ताम्रपत्राणां मूर्तेन सूच्यग्रेण एकपुरुषव्यापारात् कृतश्छेद इति । आत्मनस्तु स्वपरप्रकाशनस्वभावस्य अविकलेन्द्रियस्य अप्राप्तार्थप्रकाशकस्य अमूर्तस्य युगपत् स्वविषयप्रकाशने को विरोधः यतो युगपज्ज्ञानोत्पत्तिर्न स्यात् ? न च उत्पलपत्रशतवत्[1] परस्परपरिहारस्थितानि इन्द्रियाणि सूच्यग्रवन्मूर्तस्य मनसः युगपत्प्राप्तुमसमर्थत्वान्न तथा तदुत्पत्तिः इत्यभिधातव्यम् ; भवत्कल्पितस्य मनसः षट्पदार्थपरीक्षावसरे निराकरिष्यमाणत्वात् । ५

यदप्युक्तम्[2]–'स्वेन-आत्मनैव संवेदनम् स्वसंवेदनम् ; तदयुक्तम् ; स्वात्मनि क्रियाविरोधात्' इत्यादि; तदप्यसारम् ; ईश्वरज्ञानेन प्रदीपाद्यालोकेन च अनेकान्तात् । न हि ईश्वरज्ञानं स्वप्रकाशने ज्ञानान्तरमपेक्षते "*स्वपरावभासकमेकं नित्यज्ञानं जगत्कर्तुः*[3] [ ] इत्यभ्युपगमात् । नापि प्रदीपाद्यालोकः स्वरूपप्रकाशने प्रकाशान्तरमपेक्षते; प्रतीतिविरोधात् । का च क्रिया[4] ज्ञानस्य स्वात्मनि विरुद्ध्यते–किम् उत्पत्तिरूपा, परिस्पन्दात्मिका, धात्वर्थस्वभावा, ज्ञप्तिलक्षणा वा ? यदि उत्पत्तिलक्षणा; सा विरुद्ध्यताम् । न हि 'ज्ञानम् आत्मानमुत्पादयति' इति अस्माकमभ्युपगमः, स्वसामग्रीतः तदुत्पत्तिप्रतिज्ञानात् । नापि[5] परिस्पन्दात्मिका; तस्या द्रव्यवृत्तित्वेन अद्रव्यरूपे ज्ञाने सत्त्वस्यैवाऽसंभवात् । १०

धात्वर्थरूपाऽपि–अकर्मिका, सकर्मिका वा क्रिया स्वात्मनि विरुद्ध्यते[6] ? न तावदकर्मिका; 'वृक्षस्तिष्ठति' इत्यादौ तस्याः स्वात्मन्येव प्रतीतेः । अथ प्रतीतितः अस्यास्तत्राऽविरोधः; तर्हि 'ज्ञानं प्रकाशते' इत्याद्यकर्मकक्रियायाः[7] ज्ञानस्वरूपेऽप्यविरोधोऽस्तु , प्रतीतेः उभयत्राप्यविशिष्टत्वात् । अथ 'ज्ञानम् आत्मानं जानाति' इति सकर्मिका क्रिया स्वात्मनि विरुद्धा, ततोऽन्यत्रैव कर्मत्वप्रतीतेः इत्युच्यते; तदप्युक्तिमात्रम् ; 'आत्मा आत्मानं हन्ति, प्रदीपः स्वात्मानं प्रकाशयति' इत्यादेरपि विरोधाऽनुषङ्गात् । आत्मादेः कर्तुः कर्मत्वोपचारः ज्ञानेऽपि समानः । एतेन ज्ञप्तिक्रियायाः स्वात्मनि विरोधः प्रत्याख्यातः ; स्वरूपेण कस्यचिद् विरोधाऽसिद्धेः, अन्यथा प्रदीपस्यापि स्वपरप्रकाशनविरोधः स्यात्, न चैवम् , अतो यथा प्रदीपः स्वकारणकलापात् स्वपरप्रकाशनस्वभावो जायमानो न विरोधमध्यास्ते तथा ज्ञानमपि । अथ ज्ञप्तिक्रिया कर्मतया[8] स्वात्मनि विरुद्ध्यते ततोऽन्यत्रैव[9] कर्मत्वस्य प्रतीतेः; तर्हि प्रकाशनक्रियापि प्रदीपस्वरूपे[10] तथा विरुद्ध्यताम् स्वरूपादन्यत्रैव[11] अस्या अपि[12] प्रतीत्यविशिष्टत्वात् । स्वसामग्रीतः स्वपर- १५ २० २५

१–पत्रवत् आ०, भां० । २ पृ० १८२ पं० १४ । ३–त्यं ज्ञानं श्र० । ४ "का पुनः स्वात्मनि क्रिया विरुद्धा; परिस्पन्दरूपा, धात्वर्थरूपा वा ?" तत्त्वार्थश्लो० पृ० ४२ । "किमुत्पत्तिर्ज्ञप्तिर्वा···" प्रमाणपरी० पृ० ५९ । आप्तपरी० पृ० ४७ । प्रमेयक० पृ० ३५ उ० । स्या० रत्ना० पृ० २२८ । स्या० मं० पृ० ९३ । ५ परस्पन्दा–आ० । ६ विरुद्ध्येत श्र० । ७–क्रियायां आ० । ८ अन्यथापि प्र–आ० । ९ स्वात्मनः । १० कर्मतया । ११ प्रकाशनक्रियायाः । १२ प्रतीतिविशेषात् आ० ।

प्रकाशनस्वभावस्य अस्योत्पत्तेः तस्यास्तत्राऽविरोधः, इत्यन्यत्रापि समानम्। यदि चैकत्र दृष्टो धर्मः सर्वत्र विधीयते प्रतिषिद्ध्यते वा, तर्हि रथ्यापुरुषे असर्वज्ञत्वोपलम्भात् महेश्वरेऽपि तत्प्रसङ्गः, द्विचन्द्रादिज्ञाने च प्रामाण्यप्रतिषेधप्रतीतेः एकचन्द्रादिज्ञानेऽपि तत्प्रतिषेधप्रसङ्गः। अत्र वस्तुवैचित्र्यसंभवे ज्ञानेन किमपराद्धं येन तत् तत्र नेष्यते ?

किञ्च, ज्ञानान्तरापेक्षया तत्र कर्मत्वविरोधः, स्वरूपापेक्षया वा ? प्रथमपक्षे महेश्वरस्य असर्वज्ञत्वम्, "*एकात्मसमवेताऽनन्तरज्ञानग्राह्यम् अर्थज्ञानम्।*" [ ] इति ग्रन्थविरोधश्च स्यात्। ज्ञानान्तरापेक्षया तत्र तस्याऽविरोधे च स्वरूपापेक्षयापि अविरोधोऽस्तु, सहस्रकिरणवत् स्वपरोद्योतनस्वभावत्वात्तस्य। कर्मत्ववच्च ज्ञानक्रियातोऽर्थान्तरस्यैव करणत्वस्य प्रतीतेः तस्यापि तत्र विरोधः स्यात्, तथा च 'ज्ञानेन अहमर्थं जानामि' इति ज्ञानस्य करणतया प्रतीतिर्न स्यात्।

अथ अर्थवत् ज्ञाने ज्ञानस्वरूपस्याऽप्रतीतेर्न स्वतः प्रत्यक्षता; ननु 'अर्थवत्' इति कोऽर्थः—किं यथा अर्थो बहिर्देशसम्बद्धः प्रतीयते न तथा ज्ञानम्, किं वा यथा अर्थोन्मुखं ज्ञानं न तथा स्वोन्मुखम् इति ? प्रथमविकल्पे सिद्धसाध्यता, घटाद्यर्थ-तज्ज्ञानयोर्बहिरन्तर्देशसम्बद्धतया अवभासनात्। घटाद्यर्थदेशसम्बद्धतया ज्ञानस्याऽप्रतिभासनाद् अप्रत्यक्षत्वे घटाद्यर्थस्यापि ज्ञानदेशसम्बद्धतयाऽप्रतिभासनाद् अप्रत्यक्षता स्यात्। द्वितीयविकल्पोऽप्यनुपपन्नः; 'घटम्' 'अहम्' 'वेद्मि' इति त्रयस्यापि प्रतिभासनात्। अत्र प्रतिभासद्वयविलोपे घटप्रतिभासे कः समाश्वासः ?

किञ्च, ज्ञानस्वरूपताऽप्रतिभासे कथं तस्य अर्थोन्मुखत्वम् अन्यद्वा व्यवस्थापयितुं शक्यम् 'अस्य इदम्' इति सम्बन्धप्रतिपत्तेः सम्बन्धिप्रतिपत्तिनान्तरीयकत्वात् ? अथ ज्ञानान्तरेण ज्ञानं प्रतीत्य अर्थोन्मुखत्वमस्य प्रतीयते; तदा आवृत्त्या अर्थप्रतीतिप्रसङ्गः—प्रथमं हि प्रथमज्ञानेऽर्थप्रतीतिः ततो ज्ञानान्तरे, कथमन्यथा 'अर्थोन्मुखमेतत्' इति प्रतीतिः स्यात् ? ततो ज्ञाने अर्थोन्मुखत्वप्रतिभासवत् स्वोन्मुखत्वप्रतिभासोऽप्यभ्युपगम्यताम् अलं प्रतीत्यपलापेन।

कश्चैं क्रियायाः स्वात्मा यत्र अस्या विरोधः प्रतिपाद्यते—किं तस्याः स्वरूपम्, क्रियावदात्मा वा स्यात् ? तत्र आद्यविकल्पोऽयुक्तः; स्वरूपस्याविरोधकत्वात्, अन्यथा सर्वभावानां स्वरूपे विरोधाऽनुषङ्गात् निःस्वरूपत्वप्रसङ्गः स्यात्। विरोधस्य द्विष्ठत्वाच्च न अस्याः स्वरूपे विरोधो युक्तः। द्वितीयविकल्पोऽप्यनुपपन्नः; क्रियावत्येव अखिलक्रियाणां प्रतीतेः, अन्यथा सर्वद्रव्याणां निष्क्रियत्वं क्रियाणाञ्च निराश्रयत्वं स्यात्, न चैवम्, कर्तृस्थायाः क्रियायाः कर्त्तरि कर्मस्थायाश्च कर्मणि प्रतीयमानत्वात्।

यदप्यभिहितम्[५]—'प्रकाशत्वं बोधरूपत्वम्, भासुररूपसम्बन्धित्वं वा' इत्यादि; तदप्य-

---

१ वैचित्र्यम्। २—स्वज्ञानं आ०। ३ प्रथमपक्षे श्र०। ४ "स्वात्मा हि क्रियायाः स्वरूपं क्रियावदात्मा वा ?" आप्तपरी० पृ० ४७। प्रमेयक० पृ० ३५ उ०। स्या० रत्ना० पृ० २२९। ५ पृ० १८२ पं० १७। ६ प्रकाशकत्वं श्र०।

भिधानमात्रम्; यतः अर्थप्रकाशकत्वम् अर्थोद्योतकत्वम् उच्यते तच्च क्वचिद् बोधरूपतया क्वचिद् भासुररूपतया वा न विरोधमध्यास्ते।

यच्चान्यदुक्तम्[2]–'येनैवाऽऽत्मना ज्ञानमात्मानं प्रकाशयति तेनैवार्थम्' इत्यादि; तदसमीक्षिताभिधानम्[3]; स्वभाव-तद्वतोः भेदाऽभेदं प्रति अनेकान्तात्[4], ज्ञानात्मना हि स्वभाव-तद्वतोः अभेदः, स्वपरप्रकाशस्वभावात्मना च भेदः, इति ज्ञानमेव अभेदः, तत्स्वभावौ एव भेदः इत्युक्तदोषाऽनवकाशः[5]। कल्पितयोस्तु भेदाऽभेदयोः तद्दूषणप्रवृत्तौ[6] स्वाभिप्राय एव प्रतिषिद्धः स्यान्न वस्तुस्वरूपम्। न चैवं कस्यचिद् इष्टतत्त्वव्यवस्था घटते; तथा तत्प्रवृत्तेः सर्वत्र संभवात्। स्व-परग्रहणस्वभावौ[7] च ज्ञानस्य तत्प्रकाशनसामर्थ्ये, तद्रूपतया च अस्य परोक्षता, तत्प्रकाशनलक्षणकार्याऽनुमेयत्वात् तयोः, इत्युक्तदोषाऽनवकाशः इति[8]।

एतेन साङ्ख्योऽपि ज्ञानस्य ज्ञानान्तरवेद्यत्वं प्रतिपादयन् प्रत्याख्यातः[9]।

ननु ज्ञानं स्वव्यवसायात्मकं न भवति अचेतनत्वात् पटादिवत्। न चास्य अचेतनत्वमसिद्धम्; तथाहि–अचेतनं ज्ञानम् प्रधानपरिणामत्वात् तद्वदेव। यत् पुनश्चेतनम् तन्न प्रधानपरिणामः यथा आत्मा, प्रधानपरिणामश्च ज्ञानम् इति। तत्परिणामत्वञ्चास्य सुप्रसिद्धम् *"प्रकृतेर्महान्"* [सांख्यका० २२] इत्याद्यभिधानात्। प्रधानस्य हि जगत्प्रपञ्चरचनायां प्रवर्तमानस्य प्रथमतो "महान् एको व्यापको विषयाध्यवसायस्वरूप आसर्गप्रलयस्थायी भवति *"आसर्गप्रलयादेका बुद्धिः"*" [ ] इत्यभिधानात्। स च अस्माद्-

'अचेतनत्वात् न ज्ञानं स्वव्यवसायात्मकम्' इति सांख्यस्य पूर्वपक्षः–

---

१ यतः अर्थोद्यो–श्र०। २ पृ० १८२ पं० २०। ३ तदप्यस–श्र०। ४ "स्वभावतद्वतोः भेदाभेदं प्रत्यनेकान्तात्..." प्रमेयक० पृ० ३८ पू०। ५–नवकाशाः आ०। ६ तथा प्रवृत्तेः आ०। ७–हणभावौ आ०। ८ ज्ञानान्तरवेद्यज्ञानवादस्य खण्डनं निम्नग्रन्थेषु विलोकनीयम्–तत्त्वार्थश्लो० पृ० ४०। प्रमाणपरी० पृ० ६०। युक्त्यनुशा० टी० पृ० ७। प्रमेयक० पृ० ३३ उ०। न्यायवि० टी० पृ० १०९ उ०। प्रमेयरत्नमा० सू० ६।१। सन्मति० टी० पृ० ४७५। स्या० रत्ना० पृ० २१९। स्या० मं० पृ० ९५ श्लो० १५। ९ "प्रकृतेर्महान् ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः। तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥ २२ ॥" सांख्यका०। "तस्याः प्रकृतेर्महान् उत्पद्यते प्रथमः कश्चित्। महान् बुद्धिः मतिः प्रज्ञा संवित्तिः ख्यातिः चितिः स्मृतिरासुरी हरिः हरः हिरण्यगर्भ इति पर्यायाः।" माठरवृ०, गौड़पादभा०। सांख्यसं० पृ० ६। १० "महदाख्यमाद्यं कार्यं तन्मनः ॥७१॥ महदाख्यमाद्यं कार्यं तन्मनो मननवृत्तिकम्। मननमत्र निश्चयः। तद्वृत्तिका बुद्धिरित्यर्थः। यदेतद्विस्तृतं बीजं प्रधानपुरुषात्मकम्। महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते ॥" सांख्यप्र० भा० १।७१। "सत्तामात्रात्मभावो यश्चाहमस्मीति लक्षणः ॥ ३८ ॥ आत्मनिश्चयबुद्धिर्वा लिङ्गमात्रं महानिति। बुद्धितत्त्वं तथाख्यातं तत् षट् प्रकृतिकारणम् ॥३९॥" योगका० साधनपाद। ११ उद्धृतश्चैतत्–तत्त्वसं० पं० पृ० २९। सन्मति० टी० पृ० ३००।

शामसंवेद्यस्वभावः, ततस्तु या प्रतिप्राणि विभिन्ना इन्द्रिय-मनोवृत्तिद्वारेण बुद्धिवृत्तयो निस्सरन्ति ताः प्रमाणान्तरेण संवेद्यस्वभावाः। प्रतिपुरुषं हि इन्द्रियवृत्तिः प्रथमतो विषयाकारेण परिणमते ततो मनोवृत्तिद्वारेण, बुद्धिवृत्तिः एकतः सङ्क्रान्तविषयाकारा अन्यतश्च सङ्क्रान्तचिच्छाया विषयव्यवस्थापिका। न खलु बुद्धौ आदर्शस्थानीयायां विषयाकाराऽसङ्क्रमे पुरुषेण अर्थश्चेतयितुं शक्यः "*बुद्धेरध्यवसितमर्थं पुरुषश्चेतयते*" [ ] इत्यभिधानात्। बुद्ध्यध्यवसितं बुद्धिप्रतिबिम्बितम् इत्यर्थः।

ननु बुद्धिव्यतिरिक्तस्य चैतन्यस्य कदाचिदप्यप्रतीतेः कथं तत्र चिच्छायासङ्क्रान्तिः? इत्यप्यसमीचीनम्; सतोऽप्यनयोर्विवेकस्य संसर्गविशेषवशाद् विप्रलब्धेन अवधारयितुमशक्तेः अयोगोलक-वह्निविवेकवत्। न च अयोगोलक-वह्न्योरपि अभेद एव इत्यभिधातव्यम्; अनयोः अन्योन्याऽसंभविसंस्थान-रूप-स्पर्शविशेषप्रतीतितः अन्योन्यं भेदप्रतीतेः। ययोरन्योन्याऽसंभवी संस्थान-रूप-स्पर्शविशेषः प्रतीयते तयोरन्योन्यं भेदः यथा घट-पटयोः, अन्योन्याऽसंभवी संस्थान-रूप-स्पर्शविशेषश्च अयोगोलक-वह्न्योरिति। न चाऽयमसिद्धः; अयोगोलकवृत्तसन्निवेशाऽभासुररूपाऽनुष्णस्पर्शेभ्यो वह्निभासुररूपोष्णस्पर्शयोः प्रत्यक्षत एव विशेषः प्रतीयते। अतो यथाऽत्र अन्योन्यप्रदेशाऽनुप्रवेशलक्षणसंसर्गाद् विप्रलब्धो भेदं नावधारयति एवं बुद्धिचैतन्ययोरपि। उक्तञ्च–"*तस्मात्तत्संसर्गादचेतनं चेतनावदिव लिङ्गम्*" [सांख्यका० २०] इति। अचेतनाऽपि हि बुद्धिः चेतनासंसर्गात् चेतनायमाना प्रतिभासते इति।

---

१ "एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः। कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥"...बाह्येन्द्रियाण्यालोच्य मनसे समर्पयन्ति मनश्च सङ्कल्प्य अहङ्काराय अहङ्कारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायाम्। सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः। सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥३७॥ बुद्धिर्हि पुरुषसन्निधानात् तच्छायापत्त्या तद्रूपेव सर्वविषयोपभोगं पुरुषस्य साधयति...।" सांख्यका० ३६, ३७। "इन्द्रियप्रणालिकया अर्थसन्निकर्षेण लिङ्गज्ञानादिना वा आदौ बुद्धेरर्थाकारा वृत्तिर्जायते...।" स्मृतिरपि–"तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः। इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः॥" सांख्यप्र० भा० १।८७। "बुद्धिदर्पणे पुरुषप्रतिबिम्बसङ्क्रान्तिरेव बुद्धिप्रतिसंवेदित्वं पुंसः तथा च दृशिच्छायापन्नया बुद्ध्या संसृष्टाः शब्दादयो भवन्ति दृश्याः इत्यर्थः।" योगसू० तत्त्ववैशा० २। २०। २ उद्धृतश्चैतत्–तत्त्वार्थश्लो० पृ० ५०। आप्तपरी० पृ० ४१। प्रमेयक० पृ० २६ उ०। न्यायवि० टी० पृ० ५४७ पू०। स्या० रत्ना० पृ० २३३। ३–रूपस्पर्शनयोः वि–भां०। ४ विशेषप्रतीतेः भां०, श्र०। ५–वदिह भां०, श्र०। "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ २० ॥ यस्माच्चेतनस्वभावः पुरुषः तस्मात् तत्संयोगादचेतनं महदादि लिङ्गं अध्यवसायाभिमानसङ्कल्पालोचनादिषु वृत्तिषु चेतनावत् प्रवर्त्तते। को दृष्टान्तः? तद्यथा–अनुष्णाशीतो घटः शीताभिरद्भिः संसृष्टः शीतो भवति अग्निना संयुक्त उष्णो भवति एवं महदादिलिङ्गमचेतनमपि भूत्वा चेतनावद् भवति।..." माठरवृ०, गौडपादभा०। ६ चेतयमाना श्र०।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[1]–'न स्वव्यवसायात्मकं ज्ञानम् अचेतनत्वात्' इति ; तत्र किमिदमचेतनत्वं नाम–अस्वसंविदितत्वम्, अर्थाकारधारित्वम्, जडपरिणामत्वं वा ? प्रथमपक्षे साध्याऽविशिष्टो हेतुः। द्वितीयपक्षे तु साधनविकलो दृष्टान्तः, न खलु पटादयो दर्पणादिवत् अर्थाकारधारिणः प्रतीयन्ते। स्वरूपाऽसिद्धश्च इत्थम्भूतमचेतनत्वम् ; अमूर्ते ज्ञाने मूर्तस्याऽर्थस्य आकारधारित्वाऽनुपपत्तेः। तथाहि–न विषयाकारधारि ज्ञानम् अमूर्तत्वात्, यदमूर्तम् तद् विषयाकारधारि न भवति यथा आकाशम्, अमूर्तश्च ज्ञानमिति। तद्धारित्वे वा अमूर्तत्वमस्य विरुद्ध्यते ; तथाहि–यद् विषयाकारधारि तन्मूर्तम् यथा आदर्शादि, विषयाकारधारि च ज्ञानमिति। विषयाकारधारित्वञ्चास्य प्रागेव प्रबन्धेन प्रतिषिद्धम् इत्यलमतिप्रसङ्गेन। जडपरिणामत्वमपि असिद्धमेव ; आत्मपरिणामत्वात्तस्य। तथाहि–ज्ञानपरिणामवान् आत्मा दृष्टृत्वात्, यस्तु न तथा स न दृष्टा यथा घटादिः, दृष्टा च आत्मा, तस्मात् ज्ञानपरिणामवान् इति। तथा चास्य अचेतनत्वसमर्थनार्थं यदुक्तम्–'प्रधानपरिणामत्वात्' इति साधनम् ; तदप्यसिद्धमेव ; अस्य आत्मपरिणामत्वसमर्थनात्।

अचेतनत्वनिरसनपुरस्सरं ज्ञानस्य स्वसंवेदनत्वव्यवस्थापनम्—

न च आत्मनः[2] अनित्यज्ञानपरिणामात्मके अनित्यत्वापत्तिः ; प्रधानेऽपि तत्प्रसङ्गात्। व्यक्ताऽव्यक्तयोरभेदेऽपि 'व्यक्तमेव अनित्यं परिणामत्वात्, न तु अव्यक्तं परिणामित्वात्' इत्यन्यत्रापि समानम्। आत्मनोऽपरिणामित्वे अर्थक्रियाकारित्वाऽभावतः अश्वविषाणवद् असत्त्वप्रसङ्गश्च। आसर्गप्रलयस्थायित्वं व्यापित्वञ्च बुद्धेः अतीवाऽनुपपन्नम् ; तत्परिणामस्य तद्विरोधात्। तथाहि–न बुद्धिः व्यापिका नित्या च प्रधानपरिणामत्वात् पटादिवत्। न च आकाशादिना अनेकान्तः ; तस्य तत्परिणामत्वाऽसिद्धेः। सिद्धौ वा तद्वत्[3] तस्यापि तद्विरोधप्रसङ्गः। अथ तत्परिणामत्वाऽविशेषेऽपि किञ्चिद् आसर्ग-प्रलयस्थायि व्यापकञ्च अन्यद् अन्यथा ; तर्हि तदविशेषेऽपि 'ज्ञानं स्वसंविदितं पटादिकञ्च अन्यथा' इति किन्नेष्यते अविशेषात् ?

किञ्च, अयं प्रथमो बुद्धिरूपः परिणामः प्रकृतेः कुतः स्यात्–स्वभावतः, पुरुषार्थकर्त्तव्यतातः, अदृष्टाद्वा ? यदि स्वभावतः ; तर्हि सदा अस्य सत्त्वप्रसङ्गः स्वभावस्य सदा सत्त्वसंभवात्। यत् स्वाभाविकं न तत् कादाचित्कम् यथा त्रिगुणात्मकत्वम्, स्वाभाविकश्च प्रकृतेराद्यो बुद्धिपरिणाम इति। अथ पुरुषार्थकर्त्तव्यताहेतुः, 'आत्मनो हि भोगो मया सम्पादनीयः' इत्यनुसन्धाय प्रकृतिः महदादिभावेन परिणमते इति; तदप्यसुन्दरम्; जडस्वभावायास्तस्याः

---

१ पृ० १८९ पं० ११। २ "प्रधानस्य चाऽनित्याद् व्यक्तादनर्थान्तरभूतस्य नित्यतां प्रतीयन् पुरुषस्यापि ज्ञानादशाश्वतादनर्थान्तरभूतस्य नित्यत्वमुपैतु सर्वथा विशेषाभावात्।" आप्तपरी० पृ० ४१। स्या० रत्ना० पृ० २३५। ३ "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥" सांख्यका०। ४ पटादिवत्। ५ आकाशस्यापि। ६ नित्यत्वव्यापकत्वविरोध।

'पुरुषार्थो मया सम्पादनीयः' इत्यनुसन्धानानुपपत्तेः। तथाहि–प्रथमसृष्टिकाले प्रकृतिः अनुसन्धानशून्या अनुत्पन्नबुद्धिवृत्तित्वात्, यदाऽसौ अनुत्पन्नबुद्धिवृत्तिः तदा अनुसन्धानशून्या यथा संहृतसृष्ट्यवस्थायाम्, अनुत्पन्नबुद्धिवृत्तिश्च प्रकृतिः प्रथमसृष्टिकाले इति। उत्पन्नायां बुद्धिवृत्तौ सङ्क्रान्तायाश्च चिच्छायायां भवति अनुसन्धानम्, प्रथमसृष्टिकाले च प्रकृतेर्जडत्वात् पुरुषस्य च निरभिलाषत्वात् 'पुरुषार्थमहं प्रवर्त्ते' इति कस्य इदमनुसन्धानं स्यात्? चिच्छायासङ्क्रान्तिश्च पुरुषस्य बुद्धौ प्रतिबिम्बनम् यथा मुखस्य दर्पणे, न च व्यापिनोऽस्य क्वचित् प्रतिबिम्बनं युक्तम्। यद् व्यापकं न तत् क्वचित् प्रतिबिम्बति यथा आकाशम्, व्यापकश्च आत्मा इति।

किञ्च, अस्वच्छस्वभावस्य मुखादेः स्वच्छस्वभावे दर्पणे प्रतिबिम्बनमुचितम्, बुद्धौ तु त्रिगुणात्मकत्वेन अत्यन्तम्लानस्वभावायां कथमत्यन्तस्वच्छस्वभावः पुरुषः प्रतिबिम्बेत्? यत् स्वच्छस्वभावं न तद् अस्वच्छस्वभावे प्रतिबिम्बति यथा दर्पणो मुखे, स्वच्छस्वभावश्च चिन्मयः पुरुष इति। प्रतिबिम्बने वा अस्य अस्मादृशामसंवेद्यपर्वणि स्थितत्वात् न तत्प्रतिबिम्बप्रतिपत्तिः स्यात्। यद् असंवेद्यपर्वणि स्थितं न तस्य क्वचित् प्रतिबिम्बितस्यापि प्रतिबिम्बग्रहणम् यथा परमाणोः, असंवेद्यपर्वणि स्थितश्च अस्मादृशाम् आत्मा इति। तद्ग्रहणे वा मुख-दर्पणयोरिव प्रकृति-पुरुषयोः विवेकेन अवधारणात् तन्निमित्तः सर्वस्य सर्वदा मोक्षः स्यात्, ततो न कश्चित् शास्त्र-श्रवण-मनन-निदध्यासनादिषु प्रयतेत। तन्न पुरुषार्थकर्त्तव्यतातोऽपि प्रकृतेः तत्परिणामः। नापि अदृष्टात्; चक्रकप्रसङ्गात्–सिद्धे हि चिच्छायाच्छुरितबुद्धिवृत्तिसद्भावे सुखसाधनप्रतिपत्तिपूर्वकमदृष्टसाधनानुष्ठानम्, तदनुष्ठानाद् अदृष्टस्योत्पत्तिः, तदुत्पत्तौ च प्रथमसृष्टिकाले तथाविधबुद्धिवृत्तिसद्भावसिद्धिरिति।

यदप्युक्तम्–*'तस्मात्तत्संसर्गादचेतनं चेतनावदिव लिङ्गम्'* इति; तत्र कोऽयं संसर्गशब्दार्थः–प्रतिबिम्बनम्, भोग्यभोक्तृभावो वा? न तावत् प्रतिबिम्बनम्; तस्य प्रतिषिद्धत्वात्। नापि भोग्यभोक्तृभावः; पुरुषस्य निरभिलाषत्वात्। न च अस्मिन्निरभिलाषे प्रकृतेर्भोग्यता तस्य वा भोक्तृता उपपद्यते; निरभिलाषस्य सुख-दुःखसंविल्लक्षणभोगाऽभावे भोग्य-भोक्तृभावाऽनुपपत्तेः। 'चेतनावत्' इत्यस्य च भाषितस्य कोऽर्थः–किम् 'अचेतनं चेतनं सम्पद्यते' इत्यर्थः, तच्छायाच्छुरितं वा? तत्राद्यपक्षोऽसाम्प्रतः; अन्यसन्निधाने अन्यस्य अन्यधर्मस्वीकाराऽसंभवात्, अन्यथा अकर्तृत्वादिधर्मोपेताऽऽत्मसन्निधानात् प्रकृतेरपि अकर्तृत्वादिधर्मस्वीकारः स्यात्, तथा च *'प्रकृतेर्महान्'* इत्यादि जगत्प्रपञ्चप्ररूपणा विशीर्येत। अत्रैवाऽर्थे प्रयोगः–चेतना बुद्धौ तद्व्यपदेशहेतुर्न भवति आत्मधर्मत्वात्, यो यः आत्मधर्मः स सोऽन्यत्र तद्व्यपदेशहेतुर्न भवति यथा प्रकृतौ अकर्तृत्वादिः; आत्मधर्मश्च चेतना इति। अथ चैतन्यसन्निधाने बुद्धिः

---

१ अज्ञेयदशायाम्। २ स्यान्नतो आ०। ३–षु यतेत श्र०। ४ पृ० १९० पं० १५। ५–वदिह भां०, श्र०। ६–रासंभावात् आ०। ७ तद्वद्व्यप–श्र०।

तच्छायाच्छुरिता भवति इत्युच्यते; तदप्यविचारितरमणीयम्; तत्सन्निधानस्य सदैव सद्भावात्, अतो बुद्धेः आसर्ग-प्रलयस्थायिन्याः सदैव तच्छायाच्छुरितत्वाऽनुषङ्गात् सदा संवित्तिः स्यात्, तथा च 'अस्मादृशाम् असंवेद्यपर्वणि स्थितः' इति वचो विरुद्ध्यते। न चास्या वास्तवचैतन्याऽभावे विषयव्यवस्थापनशक्तिर्युक्ता, न खलु माणवकस्य अग्न्युपचाराद् दाहादिजननशक्तिर्दृष्टा। यद् यत्रोपचरितं न तत्तत्र मुख्यप्रयोजनप्रसाधकम् यथा माणवके अग्न्यादि, उपचरितश्च बुद्धौ चैतन्यमिति। ५

किञ्च, मुख-आदर्शवत् बुद्धि-चैतन्ययोर्भेदे सिद्धे सति अन्यस्याऽन्यत्र प्रतिबिम्बनं युक्तम्, न चासौ सिद्धः, संविद्रूपस्यैकस्यैव हर्ष-विषादाद्यनेकाऽऽकारस्य विषयव्यवस्थापकत्वेन अनुभवप्रसिद्धत्वात्। तस्यैव[3] एते 'चैतन्यम्, बुद्धिः, अध्यवसायः, ज्ञानम्, संवित्तिः' इति पर्यायाः। तथा च चैतन्यं ज्ञानमेव तद्वाचकैः प्रतिपाद्यमानत्वाद् बोधवत्। प्रसिद्धो[3]हि लोके १० 'चेतयते, जानीते, बुद्ध्यते, अध्यवस्यति, पश्यति' इति एकार्थे प्रयोगः। न च शब्दभेदमात्राद् वास्तवोऽर्थभेदः; अतिप्रसङ्गात्।

यदप्यभिहितम्[4]–'संसर्गविशेषवशाद्विप्रलब्धो बुद्धि-चैतन्ययोर्विवेकं नावधारयति' इत्यादि; तदप्यभिधानमात्रम्; वह्नि-अयोगोलकयोरपि अन्योन्यं भेदाऽभावात्, अयोगोलकद्रव्यं हि पूर्वाकारपरित्यागेन अग्निसन्निधानाद् विशिष्टरूप-स्पर्शपर्यायाऽऽधारमेकमेव उत्पन्नमनुभूयते आमाऽऽकारपरित्यागेन पाकाकाराधारघटद्रव्यवत्। एवमिहापि एकस्मिन् स्व-परप्रकाशात्मकपर्याये अनुभूयमाने अन्यसद्भावो नाऽभ्युपगन्तव्यः, अन्यथा न क्वचिद् एकत्वव्यवस्था स्यात्। १५

१ "एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्त्तं पश्यामः।..." न्यायमं० पृ० ७४। २ "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्।" न्यायसू० १।१।१५। प्रशस्त० भा० पृ० १७१। "बुद्धिः किल त्रैगुण्यविकारः त्रैगुण्यं चाऽचेतनमित्यचेतनम्। केवलमिन्द्रियप्रणालिकया अर्थाकारेण परिणमते। चितिशक्तिश्चापरिणामिनी नित्यचैतन्यस्वभावा। तस्याः सन्निधानादयस्कान्तमणिकल्पा बुद्धिः तत्प्रतिबिम्बोद्ग्राहितया चैतन्यरूपतामापन्ना इव अर्थाकारपरिणता अर्थं चेतयते। तेन योऽसौ नीलाकारः परिणामो बुद्धेः स ज्ञानलक्षणा वृत्तिरित्युच्यते। आत्मप्रतिबिम्बस्य तु बुद्धिसङ्क्रान्तस्य यो बुद्ध्याकारनीलसम्बन्धः स आत्मनो व्यापार इवोपलब्धिः आत्मनो वृत्तिरित्याख्यायते। तदिदं बुद्धितत्त्वं जडप्रकृतितया इन्दुमण्डलमिव स्वयमप्रकाशं चैतन्यमार्त्तण्डमण्डलछायापत्त्या प्रकाशते, प्रकाशयति चार्थान्, इति तन्निराकरणाय पर्यायोपन्यासः बुद्धिरुपलब्धिः...।" न्यायवा०ता०टी० १।१।१५। प्रशस्त० कन्द० पृ० १७१। "बुद्धिरध्यवसायो हि संवित्संवेदनं तथा। संवित्तिश्चेतना चेति सर्वं चैतन्यवाचकम् ॥ ३०२ ॥" तत्त्वसं० पृ० ११५। सन्मति० टी० पृ० ३०४। स्या० रत्ना० पृ० २३८। ३ "समानं भवति पुरुषश्चेतयते बुद्धिर्जानीते इत्यत्रापि अर्थो न भिद्यते" न्यायभा० ३।२।३। "य एव बुद्ध्यते जानाति अध्यवस्यति स एव पश्यति चेतयते च, न खल्वत्र वस्तुरूपभेदं पश्यामः...।" न्यायमं० पृ० ४९१। ४ पृ० १९० पं० ८। ५ "वह्नयोगोलकयोरप्यभेदात्..."। प्रमेयक० पृ० २६ उ०।

सकलव्यवहारोच्छेदप्रसङ्गश्च, अनिष्टपरिहारेण इष्टे वस्तुन्येकस्मिन् अनुभूयमानेऽपि अन्यसद्भावाऽऽशङ्कया क्वचित् प्रवृत्त्याद्यनुपपत्तेः। ततः अबाधितैकत्वप्रतिभासाद् अन्यपरिहारेणैवभासमाने वस्तुनि एकत्वव्यवस्थामिच्छता अनुभवसिद्धकर्तृत्वभोक्तृत्वाद्यनेकधर्माऽऽधारचिद्विवर्तस्यापि एकत्वेनाऽनुभूयमानस्य एकत्वमभ्युपगन्तव्यम्, न पुनः तद्व्यतिरिक्ता तेन संसृष्टा बुद्धिः। प्रयोगः—यद् यतो व्यतिरेकेण नोपलभ्यते न तत् तद्व्यतिरेकेण अभ्युपगन्तव्यम् यथा पृथुबुध्नोदराद्याकारव्यतिरेकेण घटः, नोपलभ्यते च चैतन्यव्यतिरेकेण बुद्धिरिति।

यदपि—'इन्द्रियमनोवृत्तिद्वारेण' इत्याद्युक्तम्[२]; तदप्ययुक्तम्; इन्द्रियादिवृत्तेः प्रागेव अपास्तत्वात्। अस्तु वाऽसौ; तथापि एतद्द्वारेण प्रतिप्राणि प्रसृतानां बुद्धिवृत्तीनां ज्ञानान्तरवेद्यत्वे यौगपक्षोक्ताऽशेषदोषाऽनुषङ्गः। सङ्क्रान्तविषयाऽऽकारत्वाच्चाऽऽत्मनः बुद्धिरेवावगच्छति, आत्मा वा? न तावद् बुद्धिरेव; स्वयं स्वात्मनोऽप्रतिपत्तौ 'अहमनेन समाना' इति प्रतिपत्तेरयोगात्, तथा तत्प्रतिपत्तौ तु सिद्धं स्वसंविदितत्वम्।

स्वयं ज्ञानान्तरेण वा बुद्धेरर्थसारूप्यप्रतिपत्तौ[३] वा बौद्धपक्षनिक्षिप्ताऽशेषदोषाऽनुषङ्गः। आत्माऽपि बुद्ध्यर्थौ प्रतिपद्य तत्सारूप्यं प्रतिपद्येत, अप्रतिपद्य वा? न तावदप्रतिपद्य; अर्थस्य बुद्धेश्च अप्रतिपत्तौ तत्प्रतिपत्तेरनुपपत्तेः, द्वयोर्हि स्वरूपप्रतिपत्तौ 'अयमनेन समानः' इति सारूप्यप्रतिपतिर्युक्ता, न पुनस्तदप्रतिपत्तौ। तथाहि—सादृश्यप्रतिपत्तिः तँदुभयप्रतिपत्तिपूर्विका सादृश्यप्रतिपत्तित्वात् गो-गवयसादृश्यप्रतिपत्तिवत्। अथ बुद्ध्यर्थौ प्रतिपद्यतेऽसौ; किं स्वतः, बुद्ध्यन्तरेण वा? स्वतस्तत्प्रतिपत्तौ बुद्धिकल्पनावैफल्यम्। क्रियायाः करणमन्तरेणाऽनुपपत्तेः तत्साफल्यम्; इत्यपि श्रद्धामात्रम्; इन्द्रियाऽन्तःकरणयोरेव तत्र करणत्वोपपत्तेः। बुद्ध्यन्तरेण तत्प्रतिपत्तौ च अनवस्था। न च प्राक्तनबुद्धिकाले बुद्ध्यन्तरमस्ति; ज्ञानयौगपद्याऽनभ्युपगमात्, अतः कथं तेनापि तत्काले स्वयमसता तत्प्रतिपत्तिः स्यात्? साकारताऽभ्युपगमे च दूराऽतीतादिव्यवहाराऽभावो बौद्धपक्षोक्तः अत्रापि द्रष्टव्य इति[४]।

एतेन[५] 'न ज्ञानं स्वसंविदितम् भूतपरिणामत्वात् घटादिवत्' इत्याचक्षाणश्चार्वाकोऽपि प्रत्याख्यातः; ज्ञानस्य ज्ञानान्तरवेद्यतायां यौग-साङ्ख्यपक्षोक्ताऽशेषदोषाऽनुषङ्गात्। भूतपरिणामत्वञ्च असिद्धम् आत्मपरिणामत्वात्तस्य। आत्मसिद्धिश्च प्रमेयपरिच्छेदे चार्वाकमतपरीक्षावसरे विधास्यते इत्यलमतिप्रसङ्गेन।

१—रेण च भा—आ०, भां०। २ पृ० १९० पं० १। ३—त्तौ बौ—अ०। ४ तद्वदुभय—आ०, भां०। ५ अस्य च प्रधानपरिणामात्मकबुद्धिवादस्य पर्यालोचनं निम्नग्रन्थेषु द्रष्टव्यम्—न्यायसू०, भाष्य, वार्त्तिक, ता० टीका १।१।१५। ३।२।३-५। न्यायमं० पृ० ४९०। तत्त्वसं० पृ० ११५। प्रमाणपरी० पृ० ६१। प्रमेयक० पृ० २६। स्या० रत्ना० पृ० २३३। न्यायवि० टी० पृ० १२० उ०। ६ "न स्वसंवेद्यं ज्ञानं कायाकारपरिणतभूतपरिणामत्वात् पित्तादिवत्..." प्रमाणपरी० पृ० ६२।

तदेवं कारिकायाः पूर्वभागं व्याख्याय उत्तरभागव्याख्यानार्थमुपक्रम्यते—

अवग्रहादीनां प्राक् प्रतिपादितविज्ञानविशेषाणां मध्ये **पूर्वस्य पूर्वस्य प्रमाणत्वम्** **स्यात्** भवेत् उत्तरपरिच्छित्तिविशेषं प्रति साधकतमत्वात्। **उत्तरम्** **उत्तरम्** विज्ञानं **फलम्** तत्प्रसाध्यत्वात्। तद् यद्या (यथा) अवग्रहस्य प्रमाणत्वे ईहा फलम्, एवम् उत्तरत्रापि योज्यम्। ५

कारिकोत्तरार्द्धव्याख्यानम्—

ननु चास्तु उक्तप्रकारेणैषां प्रमाण-फलव्यवस्था; तत्प्रामाण्यं तु स्वतः अभ्युपगन्तव्यम्, परतस्तदभ्युपगमे अनेकदोषोपनिपातात्। तथाहि—प्रमाणस्य भावः अर्थपरिच्छेदिका शक्तिः, कर्म वा अर्थपरिच्छेदः प्रामाण्यम्। तच्च स्वतः—विज्ञानमात्रोत्पादकसामग्रीतो जायते। न हि तत् स्वात्मनि स्वव्यापारे वा तदुत्पादकसामग्रीव्यतिरिक्तं किञ्चिदधिकं गुणादिकमपेक्षते; तस्य विधिमुखेन कार्यमुखेन चाऽप्रतीतेः अनुमानवत्। न हि अनुमाने ज्ञानोत्पादकं त्रैरूप्याऽतिरिक्तं कारणान्तरं प्रामाण्योत्पादकमुपलभ्यते; अन्वय-व्यतिरेकाभ्यां तत एव तदुत्पत्तिप्रतीतेः। किञ्च, अर्थतथात्वपरिच्छेदिका शक्तिः प्रामाण्यम्, शक्तयश्च भावानां स्वत एव आविर्भवन्ति न उत्पादककारणाधीनाः। तदुक्तम्—

स्वतः प्रामाण्यवादिनो मीमांसकस्य पूर्वपक्षः— १० १५

"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्।

न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते॥" [मीमांसाश्लो० सू० २ श्लो० ४७]

नन्वेतत् सत्कार्यदर्शनसमाश्रयणाद् अभिधीयते, किन्तु यः कार्यगतो धर्मः कारणे समस्ति स कार्यवत् तत एवोत्पद्यते, यथा मृत्पिण्डे विद्यमाना रूपादयो घटेऽपि मृत्पिण्डादुपजायमाने मृत्पिण्डरूपादिद्वारेण उत्पद्यन्ते। ये तु कार्यधर्माः कारणेष्वविद्यमाना न ते तत एवोत्पद्यन्ते किन्तु स्वत एव, यथा तस्यैव उदकाहरणशक्तिः। एवं विज्ञानेऽपि अर्थतथात्वपरिच्छेदशक्तिः चक्षुरादिष्वविद्यमाना तेभ्यो नोदयमासादयति किन्तु स्वत एव आविर्भवति। उक्तञ्च— २०

"आत्मलाभे हि भावानां कारणापेक्षिता भवेत्।

लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु॥" [मी० श्लो० सू० २ श्लो० ४८]

---

१ "प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः। नैयायिकास्ते परतः सौगताश्चरमं स्वतः॥ प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः। प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्॥" सर्वद० जैमिनिद०। "सर्वविज्ञानविषयमिदं तावत् प्रतीक्ष्यताम्। प्रमाणत्वाप्रमाणत्वे स्वतः किं परतोऽथवा ?॥ ३३॥" "·····स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्···॥ ४७॥" मीमांसाश्लो० सू० २। २–पातात् अर्थपरि–आ०। ३ उद्धृतञ्चैतत्–तत्त्वसं० पृ० ४७५। न्यायमं० पृ० १६५। प्रमेयक० पृ० ३९ उ०। सन्मति० टी० पृ० ४। ४ "न चैतत्सत्कार्यदर्शनसमाश्रयणादभिधीयते; किन्तु यः···" प्रमेयक० पृ० ३९ उ०। ५ मृत्पिण्डाज्जाय–श्र०। ६ उद्धृतञ्चैतत्– प्रमेयक० पृ० ३९ उ०। सन्मति० टी० पृ० ४। तत्त्वसंग्रहे तु पूर्वपक्षे कुमारिलकर्तृकतया (पृ० ७५६) उपलभ्यते।

यथा—"मृद्-दण्ड-चक्र-सूत्रादि घटो जन्मन्यपेक्षते ।
उदकाहरणे त्वस्य परापेक्षा न विद्यते ॥" [ ]

तत्र उत्पत्तौ प्रामाण्यं गुणादिकमपेक्षते । नापि अर्थपरिच्छेदलक्षणे स्वव्यापारे स्वग्रहणम्, अगृहीतप्रामाण्यादपि प्रमाणाद् अर्थपरिच्छेदप्रतीतेः । यदि पुनः संवादकज्ञानात् गुणज्ञानात् अर्थक्रियाज्ञानाद्वा प्रामाण्यनिश्चयः स्यात्, तदा अनवस्थादिदोषाऽनुषङ्गः—संवादज्ञानस्य संवादज्ञानान्तराऽपेक्षणात्, गुणज्ञानस्य गुणज्ञानान्तरापेक्षणात्, अर्थक्रियाज्ञानस्य च तदितराऽपेक्षणात् । प्रथमज्ञानस्य द्वितीयात्, द्वितीयस्य च प्रथमात् प्रामाण्यनिश्चये अन्योन्याश्रयः । संवादादिज्ञानस्य संवाद्यनपेक्षस्यैव तन्निश्चये प्रथमस्य तथा तद्भावे प्रद्वेषः किन्निबन्धनः ? उक्तञ्च—

"यथैव प्रथमं ज्ञानं तत्संवादमपेक्षते ।
संवादेनापि संवादः परो मृग्यस्तथैव हि ॥" [ ]
"कस्यचित्तु यदीष्येत स्वत एव प्रमाणता ।
प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना ॥" [मीमांसाश्लो० सू० २ श्लो० ७६]
"संवादस्याथ पूर्वेण संवादित्वात् प्रमाणता ।
अन्योन्याश्रयभावेन प्रामाण्यं न प्रकल्प्यते ॥" [ ]

तस्मात् स्वत एव सर्वत्र प्रामाण्यम् ।

अप्रामाण्यं तु परतः, तत् खलु उत्पत्तौ ज्ञानोत्पादककारणाऽतिरिक्तं दोषाख्यं कारणान्तरमपेक्षते, निवृत्त्याख्ये च स्वकार्ये स्वग्रहणम् । अप्रमाणं हि संशय-विपर्यय-अज्ञानभेदात् त्रिविधम् । तत्र अज्ञानस्य ज्ञानाऽभावस्वरूपतया स्वतः सिद्धत्वान्न तत्र काचिदपेक्षा, संशय-विपर्ययोस्तु उत्पत्तौ प्रमातृदोषाः क्षुदादयः, मनोदोषा अप्रणिधानादयः, इन्द्रियदोषाः तिमिरादयः, विषयदोषाः चलत्वादयः, यथासंभवं कारणत्वेन अनुमन्यन्ते । निवृत्त्याख्ये स्वकार्ये स्वज्ञप्त्यपे-

---

१ मृत्पिण्डचक्रसूत्रादि भां० । न्यायमं० पृ० १६२ । 'मृत्पिण्डदण्डचक्रादि' प्रमेयक० पृ० ३९ उ० । सन्मति० टी० पृ० ४ । तत्त्वसंग्रहे तु पूर्वपक्षे कुमारिलकर्तृकतया । (पृ० ७५७) उपलभ्यते । "सर्वे हि भावाः स्वात्मलाभायैव स्वकारणमपेक्षन्ते । घटो हि मृत्पिण्डादिकं स्वजन्मन्येव अपेक्षते नोदकाहरणेऽपि । तथा ज्ञानमपि स्वोत्पत्तौ गुणवत् इतरद्वा कारणमपेक्षतां नाम स्वकार्ये तु विषयनिश्चये अनपेक्षमेव ।" मीमांसाश्लो० टी० सू० २ श्लो० ४८ । २ एतत्कारिकात्रयं निम्नग्रन्थेषु उद्धृतं वर्त्तते—प्रमेयक० पृ० ४० पू० । सन्मति० टी० पृ० ६ । स्या० रत्ना० पृ० २५१ । 'कस्यचित्तु' इत्येका तु न्यायमं० पृ० १६३ । 'प्रद्वेषः किन्निबन्धनः' मीमांसाश्लो० । पूर्वे द्वे कारिके तत्त्वसंग्रहे पूर्वपक्षे कुमारिलकर्तृकतया (पृ० ७५७) उपलभ्येते । ३ "अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः । वस्तुत्वाद् द्विविधस्यात्र संभवो दुष्टकारणात् ॥ ५४ ॥" मीमांसाश्लो० सू० २ । ४ "अप्रमाणं पुनः स्वार्थग्राहकं स्यात् स्वरूपतः । निवृत्तिरतस्य मिथ्यात्वे नाऽगृहीते परैर्भवेत् ॥ ८५ ॥" मीमांसाश्लो० सू० २ । ५—ख्ये अकार्ये आ० ।

क्षा च; उत्पन्नमात्रे ज्ञाने प्रतीतिमात्रे च साधारणे न तावत् पुरुषं निव[1]र्त्तयति यावत् कारणदोषज्ञानादिना तत् मिथ्यात्वेन नाऽवधार्यते। न च प्रामाण्यमपि उत्पत्तौ गुणाख्यं कारणान्तरमपेक्षते अतस्तदपि परतः इत्यभिधातव्यम्; गुणानां कुतश्चिदप्यप्रसिद्धेः, सिद्धौ वा न तदुत्पत्तौ व्यापारः दोषा[2]पसारणे ए[3]व तेषां चरितार्थत्वात्। एवंविधमेव हि पदार्थानां स्वरूपम्–यत् स्वयं [4]संभवन्तः स्वप्रतिपक्षमुन्मीलयन्ति, गुणाश्च दोषप्र[5]तिपन्थिनः, अतः तैरपसा[6]रितेषु तेषु स्वरूपत एव कारणानि व्याप्रियमाणानि प्रमाणभूतमेव ज्ञानं जनयन्ति। यदि पुनः निष्प[7]न्नेऽपि ज्ञाने स्वव्यापारकरणसामर्थ्यं स्वतो न स्यात् तदा तत्स्वरूपमेव अनिष्पन्नं स्यात्। नहि अप्रकाशकत्वधर्मोपेते वह्नौ निष्पन्ने प्रकाशकत्वादयो धर्माः कारणान्तरेण उत्तरकालमाधीयन्ते इति प्रातीतिकम्। अस्तु वा गुणानां प्रमाणभूतज्ञानोत्पा[8]दने व्यापारः; तथापि न प्रामाण्यस्य परतो भावः, प्रामाण्यं हि बोधकत्वम्, तच्च ज्ञानस्य अन्याऽनपेक्षस्य जन्मसमकालञ्चेत् संवृत्तम् तदा सिद्धा स्वतः प्रामाण्यप्रसिद्धिरप्रतिहतप्रसरा। एवञ्च सर्वेषामेव ज्ञानानामौत्सर्गिके बोधकत्वलक्षणे प्रामाण्ये स्थिते यत्र [9]बा[10]धकप्रत्ययः कारणदोषज्ञानञ्च उत्पद्यते तत्र अप्रामाण्यं परतो निश्चीयते इति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[11]–'अर्थपरिच्छेदिका शक्तिः प्रामाण्यम्'; तत्र किम् अर्थमात्रपरिच्छेदिका शक्तिः प्रामाण्यस्वरूपं स्यात्, यथार्थपरिच्छेदिका वा? प्रथमपक्षे संशय-विपर्यय-स्वप्नादिज्ञानैः तल्लक्षणव्यभिचारः, तेषामप्रामाण्येऽपि अर्थमात्रपरिच्छेदिकायाः शक्तेः सद्भावात्। द्वितीयपक्षे तु परतः प्रामाण्यप्रसिद्धिः, विज्ञानमात्रोत्पादिकायाः चक्षुरादिसामग्रीतो यथार्थपरिच्छेदसामर्थ्यलक्षणप्रामाण्यस्यानुत्पत्तेः, गुणयुक्तायाः एव तत्सामग्र्याः तदुत्पादने सामर्थ्यसंभवात्। ननु गुणानां विधिमुखेन कार्यमुखेन वा प्रतीत्यभावात् कथं तदधीना तस्योत्पत्तिः? इत्यसमीक्षिताभिधानम्; तेषां सकलजनसाक्षिकत्वेन प्रतीतिभूधरा[12]धिरूढत्वात्। न हि 'चक्षुरादिगता नैर्मल्यादयः, विषयगताश्च आसन्न-निश्चलत्वादयः, मनोगताः प्रणिधानादयः, आत्मगताः [13]सन्तृप्तत्वस्वस्थतादयः, प्रकाशगताः स्फुटत्वादयः गुणा न सन्ति' इत्यभिदधानो लोकप्रतीत्या न बाध्यते।

स्वतः प्रामाण्यवादप्रतिक्षेपपुरस्सरं प्रामाण्यस्य कथञ्चित्स्वतः-परतस्त्वप्रसाधनम्–

ननु नैर्मल्यादि चक्षुरादेः स्वरूपम् न पुनर्गुणः। अथ कुतोऽस्य तत्स्वरूपतासिद्धिः–तद्यु-

---

१–र्त्तयन्ति आ०। २ "प्रामाण्यं तत्र गुणतो नैव स्यादित्युदाहृतम् ॥ ६४ ॥ तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः। अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः ॥ ६५ ॥" मीमांसाश्लो० सू०२। ३ एवेतेषाम् आ०। ४ संभवात् स्व–भां०, श्र०। ५–प्रतिबन्धिनः भां०, श्र०। ६–सारितेषु ते स्व–आ०। –सारितेषु स्व–भां०। ७ निष्पन्ने स्व–आ०, भां०। ८ स्यात् तथा च प्रकाश–आ०। ९–दनव्या–श्र०। १० "तस्माद् यस्य च दुष्टं कारणं यत्र च मिथ्येति प्रत्ययः स एव असमीचीनः प्रत्ययो नान्यः।" शाबरभा० १।१।५। ११ पृ० १९५ पं० ८। १२–रारूढ–आ०। १३ संतृप्तस्वस्थानादयः आ०।

तस्यैव उत्पादात्, तद्व्यतिरेकेण अनुपलभ्यमानत्वाद्वा ? प्रथमपक्षे रूपादिभिर्व्यभिचारः, घटादेः तद्युक्तस्यैवोत्पादेऽपि तेषां तद्गुणत्वप्रतीतेः । कथञ्चैवंवादिनः काचकामलादेः दोषता सिद्ध्येत् जाततैमिरिकस्य तद्युक्तस्यैव चक्षुरादेरुत्पादात् ? एतेन द्वितीयपक्षोऽपि प्रत्युक्तः; काचकामलादेः चक्षुषः रूपादेश्च घटादेर्भेदेनाऽनुपलभ्यमानस्यापि दोष-गुणत्वप्रतीतेः । कश्चात्र स्वरूपशब्दार्थः– तादात्म्यम्, तन्मात्रत्वं वा ? तत्र आद्यविकल्पे नैर्मल्यादेर्न गुणत्वनिषेधः तादात्म्यस्य तद्प्रतिद्वन्द्वित्वात्, अन्यथा रूपादेरपि गुणत्वाऽभावः स्यात् । द्वितीयविकल्पस्तु अयुक्तः; चक्षुरादौ अनुवर्तमानेऽपि अस्य निवर्तमानतया तन्मात्रत्वाऽनुपपत्तिः । यस्मिन्ननुवर्तमानेऽपि यन्निवर्तते न तत् तन्मात्रमेव, यथाऽनुवर्तमानेऽपि पटे नीलादिसंयोगान्निवर्तमानः शुक्लादिगुणः, अनुवर्तमानेऽपि चक्षुरादौ निवर्तते च कामलिनः कुपितादेर्वा नैर्मल्यादिकमिति ।

यदि च गुणाः चक्षुरादौ नेष्यन्ते तर्हि तत्पटुत्वतारतम्यसद्भावो न प्राप्नोति, अस्ति चायम्– 'अयं पट्विन्द्रियः अयं पटुतरेन्द्रियः' इत्यादिप्रतीतेः । कथं वा गुणाऽनभ्युपगमे *"गुणेभ्यो दोषाणामभावः"* [मीमांसाश्लो० सू० २ श्लो० ६५] इत्यादि स्थाने स्थाने गुणसद्भावाऽऽवेदको वार्त्तिककारोद्गारः शोभते ? न च 'गुणो नाम न कश्चिदस्ति दोषाऽभावमात्रे तद्व्यवहारात्' इत्यभिधातव्यम्; दोषस्याप्येवम् असत्त्वाऽनुषङ्गात् तत्रापि 'गुणाऽभावमात्रे दोषव्यवहारः' इत्यभिदधतो न वक्त्रं वक्रीभवति । नैर्मल्यादेर्मलाऽभावरूपतया अगुणत्वे च कथं तद्दर्शने लोकस्य 'इदं गुणवच्चक्षुः' इति व्यवहारः स्यात् ? अञ्जनादिना च चक्षुषो गुणातिशयाधानं सुप्रतीतमेव, कथमन्यथा बहलान्धकारायां निशीथिन्यां व्याघ्रादिनेत्रचूर्णाञ्जनाद् रूपविशेषोपलम्भः, शिशुमारवसाञ्जनात् जलान्तरितार्थस्य ग्रहणं वा ? न च सत्त्वेऽपि गुणानां दोषापसारणे व्यापारेण प्रामाण्याऽहेतुत्वात् स्वतस्तत् इत्यभ्युपगन्तव्यम्; अप्रामाण्यस्याप्येवं स्वतः सत्त्वप्रसङ्गात् दोषाणां गुणापसारणहेतुत्वेन अप्रामाण्याऽजनकत्वात् । तस्माद् उभयं स्वतः, परतो वा अभ्युपगन्तव्यं समानाऽऽक्षेपसमाधानत्वात् । न च 'उत्पन्नायाः ज्ञानव्यक्तेः पश्चात् कारणान्तरात् प्रामाण्यमुत्पद्यते वस्त्रस्य लाक्षादे रक्ततादिवत्' इत्यभ्युपगम्यते, येन 'उत्पत्त्यनन्तरमेव विज्ञानस्य प्रध्वंसात् किमाश्रयं प्रामाण्यं स्यात्' इत्ययं दोषोऽवकाशं लभेत्, स्वसामग्रीतः अर्थान्यथात्वपरिच्छेदसामर्थ्यलक्षणाऽप्रामाण्यवत् अर्थतथाभावपरिच्छेदसामर्थ्यलक्षणप्रामाण्यस्यापि उत्पत्त्यभ्युपगमात् ।

१–देप्येषां श्र० । २ तत्र पटुत्व–भां० । ३ कुमारिलस्य मीमांसाश्लोकवार्तिककर्त्तुः उद्गारः । ४ वक्रंभ– आ० । ५ जलजन्तुविशेषः । शिंशुमार–भां०, श्र० । ६ "तस्मादेव च ते न्यायादप्रामाण्यमपि स्वतः । प्रसक्तं शक्यते वक्तुं यस्मात्तत्राप्यदः स्फुटम् ॥ ३०६६ ॥ तस्माद्दोषेभ्यो गुणानामभावस्तदभावतः । प्रमाणरूपनास्तित्वं तेनोत्सर्गोऽनपोदितः ॥ ३०६७ ॥" तत्त्वसं० । "तेषां स्वतोऽप्रमाणत्वमज्ञानानां भवेन्न किम् । तत एव विशेषस्याभावात् सर्वत्र सर्वथा ॥ ९५ ॥" तत्त्वार्थश्लो० पृ० १७५ । प्रमेयक० पृ० ४१ उ० । सन्मति० टी० पृ० ९ । स्या० रत्ना० पृ० २४३ ।

यदप्युक्तम्[1]–'अनुमानप्रामाण्योत्पत्तौ त्रैरूप्यातिरिक्तं गुणान्तरं नोपलभ्यते' इत्यादि; तदप्यविचारितरमणीयम्; तदुत्पत्तौ साध्याऽविनाभावित्वस्यैव गुणस्य सद्भावात्। ननु साध्याऽविनाभावित्वं हेतोः स्वरूपसाकल्यं कथं गुणः ? तर्हि तदविनाभावित्वाऽभावोऽपि हेतोः स्वरूपवैकल्यम् न पुनर्दोषः, इत्यप्रामाण्यमपि अनुमाने दोषेभ्योऽसंभाव्यम्। अथ स्वरूपवैकल्यमेवाऽत्र दोषः; तर्हि तत्साकल्यमेव गुणोऽस्तु विशेषाऽभावात्। अतः सिद्धम् अनुमानेऽपि गुणप्रभवं प्रामाण्यम्। आगमप्रामाण्योत्पत्तौ तु विधिरूपस्य यथार्थदर्शनादेर्गुणस्य व्यापारः सुप्रसिद्धः, अयथार्थदर्शनादेर्दोषस्य इव तदप्रामाण्योत्पत्तौ।

यदप्युक्तम्[3]–*'आत्मलाभे तु भावानाम्'* इत्यादि; तदप्ययुक्तम्; अप्रामाण्यस्याप्येवं स्वतो भावाऽनुषङ्गात्, यथैव हि यथार्थप्रकाशनशक्तिः प्रामाण्यरूपा चक्षुरादिकारणेषु अविद्यमाना ज्ञाने भवन्ती स्वतोऽभिधीयते तथा अयथार्थप्रकाशनशक्तिरपि अप्रामाण्यरूपाऽभिधीयताम् अविशेषात्, न हि सापि तद्वत् तत्र विद्यते। तथाच *"वस्तुत्वाद् द्विविधस्यात्र संभवो दुष्टकारणात्"* [मीमां० श्लो० सू० २ श्लो० ५४] इत्यस्य विरोधः।

किञ्च, उत्पत्तौ, ज्ञप्तौ, स्वकार्ये वा स्वतः प्रमाणानां प्रामाण्यं स्यात् ? तत्र न तावदुत्पत्तौ; तथाहि–प्रामाण्यं[4] प्रमाणोत्पादककारणकलापातिरिक्तकारकोत्पाद्यं तदनुवृत्तावपि व्यावर्त्तमानत्वात्, यद् यदित्थं तत् तत्तथा यथा घटानुवृत्तावपि व्यावर्त्तमानः तद्व्यतिरिक्तः संयोगादिः, तथा चेदम्, तस्मात्तथेति। न चायमसिद्धो हेतुः; मिथ्याज्ञाने प्रामाण्याश्रयबोधसद्भावेऽपि प्रामाण्याऽनुत्पत्तेः। नापि विरुद्धः; विपक्ष एवाऽवृत्तेः। नाप्यनैकान्तिकः; विपक्षाद् व्यावृत्तत्वादेव। नापि कालात्ययापदिष्टः; विपरीतार्थोपस्थापकस्य अध्यक्षादेरभावात्।

किञ्च, अयं स्वशब्दः[5] आत्मा-आत्मीय-ज्ञाति-धनेषु मध्ये अत्र कस्मिन्नर्थे प्रवर्त्तमानो गृह्यते ? तत्र ज्ञाति-धनयोः अत्राऽसंभवात् आत्मा-आत्मीयौ एवाऽवशिष्येते। तत्रापि स्वतः 'कारणमन्तरेण आत्मनैव प्रामाण्यमुत्पद्यते' इत्यर्थः स्यात्, आत्मनो वा सकाशात्, आत्मीयायाः सामग्रीतो वा ? प्रथमपक्षे निर्हेतुकस्याऽस्य देश-कालनियमाऽयोगात् सर्वत्र सर्वदा तत्प्रसङ्गः। द्वितीयविकल्पेऽपि 'स्वतः' इति प्रामाण्यविशेषणम्, प्रमाविशेषणं[6] वा ? प्रामाण्यविशेषणत्वे 'प्रामाण्यं प्रामाण्याद् आत्मलाभमनुभवति' इत्यायातम्; तच्च अयुक्तम्; एकस्य वस्तुनः स्वात्मापेक्षया[7] उत्पाद्योत्पादकत्वधर्माप्रतीतेः। अनुपपत्तेश्च; तथाहि–प्रामाण्यं स्वात्मन एव नोत्पद्यते कार्यत्वाद् अप्रामाण्यवत् घटादिवद्वा।

---

१ पृ०१९५पं०११। २ "अनुमानोत्पादकहेतोस्तु साध्याविनाभावित्वमेव गुणो यथा तद्वैकल्यं दोषः…।" प्रमेयक० पृ० ४२ उ०। सन्मति० टी० पृ० ११। स्या० रत्ना० पृ० २४८। ३ पृ० १९५ पं० २२। ४ "प्रामाण्यं प्रमाणोत्पादककारणकलापातिरिक्तकारकोत्पाद्यम्"… ५ "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ॥ २१० ॥" अमरको० नानार्थवर्ग। ६ प्रमाणवि–भा०, श्र०। ७ स्वापेक्षया भां०, श्र०।

एतेन द्वितीयविकल्पोऽपि प्रत्याख्यातः। आत्मीया च सामग्री–विज्ञानमात्रोत्पादिका, विशिष्टा वा ? विशिष्टा चेत्; सिद्धसाधनम्, स्वसामग्रीविशेषात् निखिलार्थानामुत्पत्त्यभ्युपगमात्। तथा च अप्रामाण्यस्य अखिलार्थानाञ्च स्वत एव सिद्धिः स्यात् तद्वत्, विशिष्टत्वञ्च तत्सामग्र्याः प्रागेव प्रतिपादितम्। 'विज्ञानमात्रोत्पादिका' इत्यपि श्रद्धामात्रगम्यम्; प्रमाणाऽप्रमाणव्यक्तिव्यतिरिक्तस्य ज्ञानमात्रस्य क्वचित् कदाचिदप्यनुपलम्भात् धवादिव्यक्तिव्यतिरिक्तवृक्षमात्रवत्। ज्ञानमात्रस्य च वृक्षमात्रवत् सामान्यरूपत्वात्, तस्य च भवन्मते कुतश्चिदनुत्पत्तेः कथं तदुत्पादिका काचित् सामग्री स्यात् ? विज्ञानमात्रोत्पादकसामग्रीतः प्रामाण्योत्पत्त्यभ्युपगमे च संशयादावपि तदुत्पत्तिप्रसङ्गः तस्याः तत्राप्यविशेषात्। अथ संशयादौ शुद्धा विज्ञानसामग्री नास्ति, अतः कथं तदुत्पादः ? यद्येवं विज्ञानस्याऽप्युत्पादो न स्यात् तत्सामग्र्याः अशुद्धत्वेन अपरिपूर्णत्वात्। ननु परिपूर्णैव सामग्री, परम् अधिककाचकामलादिदोषाऽनुप्रवेशः; तर्हि अधिककारणानुप्रवेशात् तज्जन्यमप्रामाण्यमपि उपजायताम्, प्रामाण्यं तु विज्ञानसामग्रीप्रभवं विज्ञानवत् प्रादुर्भवद् दुर्निवारम्। अथ दोषाऽभावविशिष्टायाः सामग्रीतः प्रामाण्यमुत्पद्यते नान्यस्याः; सिद्धं तर्हि परतः प्रामाण्यम्, विज्ञानकारणाऽतिरिक्तदोषाऽभावाख्यकारणात् तदुत्पत्तिप्रसिद्धेः। न हि दोषाऽभावो विज्ञानकारणम्; तमन्तरेणापि मिथ्याज्ञाने विज्ञानोत्पत्तिप्रतीतेः, प्रामाण्योत्पत्तौ तु भवत्येव असौ कारणम् अन्वयव्यतिरेकोपपत्तेः। अन्वय-व्यतिरेकाभ्यामवधृतसामर्थ्यस्याऽप्यस्य प्रामाण्याऽजनकत्वे दोषाणामपि अप्रामाण्यजनकत्वाऽभावः स्यात्।

किञ्च, दोषैः चक्षुरादीनां किं क्रियते येन ते तत्सन्निधाने प्रामाण्यं नोत्पादयन्ति ? तदुत्पादिका शक्तिश्चेदपनीयते; ननु यैव विज्ञानमात्रोत्पादने तेषां शक्तिः सैव प्रामाण्योत्पादनेऽपि, अन्या वा ? सैव चेत्; तर्हि तदपगमे कथं तेषां तन्मात्रोत्पादनेऽपि व्यापारः स्यात् ? अथ अन्या; कथन्न परतः प्रामाण्यम् ? तन्नोत्पत्तौ स्वतः प्रामाण्यं घटते।

नापि ज्ञप्तौ; प्रामाण्यनिश्चयस्य कादाचित्कतया निर्निमित्तत्वाऽनुपपत्तेः। तथाहि–यत् कादाचित्कं तन्न निर्निमित्तम् यथा घटादि, कादाचित्कश्च प्रामाण्यनिश्चय इति। निमित्तञ्चास्य–स्वरूपम्, अन्यद्वा स्यात् ? न तावत् स्वरूपम्; अस्वसंविदितत्वोपगमात्। नापि अन्यत्; स्वतः प्रामाण्यव्याघातप्रसङ्गात्। यच्च अन्यन्निमित्तम् तत् किं प्रत्यक्षम्, उत अनुमानम् अन्यस्याऽनधिकारात् ? प्रत्यक्षञ्चेत्; न; अस्य इन्द्रियसम्बद्धे विषये व्यापारात्, न च इन्द्रियाणाम् अर्थसंवेदनेन सह सम्बन्धोऽस्ति येनास्य यथार्थपरिच्छेदस्वभावं प्रामाण्यं प्रत्यक्षतः प्रतीयेत, प्रतिनियते रूपादौ तद्वति चाऽर्थे तेषां सम्बन्धात्। नापि मनोव्यापारप्रभवप्रत्यक्षगम्यं तत्;

१–ण व्यति–आ०, भां०। २ शुद्धविज्ञा–श्र०। ३–रेकेणोप–भां०। ४ प्रामाण्याऽनिश्चय ब०, ज०। ५ "सनिमित्तत्वे किं स्वनिमित्ता अन्यनिमित्ता वा ?" प्रमेयक० पृ० ४२ उ०। सन्मति० टी० पृ० १३। ६ अन्यं स्या–आ०। ७ प्रतीयते ब०, ज०।

तथाविधाऽनुभवाऽभावात्। नापि अनुमानगम्यम्; लिङ्गाऽभावात्। अर्थप्राकट्यं लिङ्गमिति चेत्; किं यथार्थविशेषणम्, निर्विशेषणं वा? न तावद् यथार्थविशेषणम्; प्रामाण्यनिश्चयात् प्राग् अर्थप्राकट्यस्य यथार्थत्वविशेषणाऽसिद्धेः। तन्निश्चयात् तत्सिद्धौ च इतरेतराश्रयः। निर्विशेषणस्य चास्य प्रामाण्यनिश्चायकत्वे मिथ्याज्ञानेऽपि तन्निश्चायकत्वप्रसङ्गः अविशेषात्। तन्न ज्ञप्तावपि स्वतः प्रामाण्यं युक्तम्। ५

नापि स्वकार्ये; यतः अस्य कार्यं पुरुषप्रवृत्तिः, अर्थपरिच्छेदो वा? तत्र पुरुषप्रवृत्तिहेतुत्वं प्रामाण्यस्य निश्चितस्यैव युक्तम् निवृत्तिहेतुत्ववदप्रामाण्यस्य। न हि अर्थित्वमात्रेण प्रेक्षापूर्वकारिणः प्रवर्तन्ते, रसायनादौ उपयोगिन्यौषधे जरा-मृत्युहरणादिसामर्थ्योपेते तथात्वेनाऽनिश्चिते प्रकृष्टायामप्यर्थितायां तेषां प्रवृत्त्यभावात्, निश्चयापेक्षा एव हि सर्वे धर्माः प्रवृत्तिहेतवः। नापि अर्थपरिच्छेदाख्ये स्वव्यापारे प्रामाण्यं स्वग्रहणाऽनपेक्षम्; यतोऽस्य अर्थपरिच्छेदमात्रं कार्यम्, यथार्थपरिच्छेदो वा? न तावद् अर्थपरिच्छेदमात्रम्; तस्य अप्रामाण्येऽपि संभवात्। यथार्थपरिच्छेदश्च नाऽगृहीतप्रामाण्यात् प्रमाणात् संभवति, ततः प्रमाणाऽप्रमाणसाधारणस्य अर्थपरिच्छेदमात्रस्यैवोत्पत्तेः। न च तद्ग्रहणे अनवस्थादिदोषाऽनुषङ्गः; अभ्यासावस्थायां स्वतः प्रामाण्यनिश्चयतः संवादाद्यपेक्षाऽभावतः अनवस्थाद्यनवतारात्। नहि अभ्यासक्रोडीकृते जले जलज्ञानम् आत्मनोऽर्थतथाभावपरिच्छेदसमर्थस्वभावताप्रतिपत्तौ संवादादिकमपेक्षते, निरारेकस्य 'इदमित्थमेव' इत्यध्यवसायात्मनोऽस्य प्रतिप्राणि प्रसिद्धत्वादप्रामाण्यवत्। न खलु स्वभ्यस्ते विषये मरीचिकादौ जलादिप्रतिभासः स्वात्मनोऽर्थान्यथात्वपरिच्छेदसमर्थस्वभावताप्रतिपत्तौ विसंवादादिकमपेक्षते, तत्स्वभावतया अस्यात्र स्वतः सर्वेषां सुप्रसिद्धत्वात् इत्युभयं तत्र स्वतः सिद्धमभ्युपगन्तव्यम्। अनभ्यासावस्थायां

१ "तद्धि फलं निर्विशेषणं वा स्वकारणस्य ज्ञातृव्यापारस्य प्रामाण्यमनुमापयेद्, यथार्थत्वविशिष्टं वा?" न्यायमं० पृ० १६८। प्रमेयक० पृ० ४२ उ०। सन्मति० टी० पृ० १४। स्या० रत्ना० पृ० २५६। २–विशेषासि–आ०। ३ "तस्मात् प्रेक्षावतां युक्ता प्रमाणादेव निश्चितात्। सर्वप्रवृत्तिरन्येषां संशयादेरपि क्वचित्॥ १२३॥" तत्त्वार्थश्लो० पृ० १७६। ४–तायां प्रवृ–भां०। ५ एव सर्वे आ०। ६ तथा अप्रा–ब०, ज०। "नार्थपरिच्छेदमात्रं प्रमाणकार्यमप्रमाणेऽपि तस्य भावात्।" सन्मति० टी० पृ० १२। ७ "आभ्यासिकं यथा ज्ञानं प्रमाणं गम्यते स्वतः। मिथ्याज्ञानं तथा किञ्चिदप्रमाणं स्वतः स्थितम्॥३१००॥" तत्त्वसं०। "नहि बौद्धैः एषां चतुर्णामेकतमोऽपि पक्षोऽभीष्टः अनियमपक्षस्य इष्टत्वात्; तथाहि–उभयमप्येतत् किञ्चित् स्वतः किञ्चित् परतः इति पूर्वमुपवर्णितम्...।" तत्त्वसं० पं० पृ०८११। "तत्राभ्यासात् प्रमाणत्वं निश्चितं स्वत एव नः। अनभ्यासे तु परतः इत्याहुः केचिदञ्जसा॥ १५२॥ तच्च स्याद्वादिनामेव स्वार्थनिश्चयनात् स्थितम्। न तु स्वनिश्चयोन्मुक्तनिःशेषज्ञानवादिनाम्॥१२६॥ क्वचिदित्यन्ताभ्यासात् स्वतः प्रमाणत्वस्य निश्चयाज्ञानवस्थादिदोषः।" तत्त्वार्थश्लो० पृ० १७७। "इति स्थितमेतत्–प्रमाणादिष्टसंसिद्धिः तदाभासाद्विपर्ययः। प्रामाण्यं तु स्वतः सिद्धमभ्यासात् परतोऽन्यथा॥" प्रमाणपरी० पृ० ६३। ८–तः प्रसि– श्र०।

तु[1] परतः। न चैवमनवस्था; तस्य अभ्यस्तविषयत्वेन स्वतः प्रामाण्यप्रसिद्ध्या प्रमाणान्तराऽनपेक्षणात्। अनभ्यस्तविषये हि जलप्रतिभासे अर्थक्रियाज्ञानाद् दर्दुराऽऽरावोदकाहरणादिलिङ्गोत्थाऽनुमानाद्वा जलाविनाभावित्वेन असकृन्निश्चयतः स्वतः सिद्धप्रामाण्यात् प्रामाण्यं निश्चीयते।

ननु[2] च अर्थक्रियाज्ञानमपि अर्थाऽभावेऽपि स्वप्नावस्थायां दृश्यते, तत् कोऽस्य पूर्वज्ञानाद् विशेषः ? इत्यप्यसुन्दरम्; जाग्रद्दशायां तद्विसंवादाऽदर्शनात्। न खलु यथा जाग्रद्दशायामर्थज्ञानम् अर्थमन्तरेणाप्युपलभ्यते तथा अर्थक्रियाज्ञानमपि, येन अस्यापि तदा व्यभिचाराऽऽशङ्कया अर्थक्रियाज्ञानान्तरात् प्रामाण्यं निश्चीयते, तद्दशाञ्चाश्रित्य प्रमाणादिचिन्ता प्रतन्यते। अतो[3] न स्वप्नदृशोपलब्धेन जाग्रद्दशोपलब्धस्य साम्याऽऽशङ्कापि श्रेयसी। नहि प्रेक्षापूर्वकारी स्वप्नदशासमानां जाग्रद्दशां मन्यते, तद्दृष्टान्तेनैव अशेषप्रत्ययानां निरालम्बनत्वाऽनुषङ्गतो बहिरर्थाऽभावप्रसङ्गात् क कस्य प्रामाण्यमप्रामाण्यं वा स्यात् ?

ननु च अर्थक्रियाज्ञानात् पूर्वज्ञानस्य प्रामाण्ये मणिप्रभायां मणिबुद्धेः कूटेऽपि द्रमे[4] तद्बुद्धेश्च प्रामाण्यप्रसङ्गः; तन्न; एवम्भूताऽर्थक्रियाज्ञानात् पूर्वज्ञाने अप्रामाण्यस्यैव प्रसिद्धेः तेन संवादाऽसंभवात्। 'कुच्चिकाविवरस्थायां हि मणिप्रभायां मणिज्ञानम्, अपवरकान्तर्देशसम्बद्धे तु मणौ अर्थक्रियाज्ञानम्' इति भिन्नदेशार्थग्राहकत्वेन भिन्नविषययोः तयोः कथमविसंवादः तिमिराद्याहितविभ्रमज्ञानवत् ? कूटे च द्रमे किं कूटज्ञानम्, द्रमज्ञानम्, खरकज्ञानं वा प्रमाणमापद्येत ? तत्राद्यपक्षद्वये सिद्धसाधनम्। तृतीयपक्षस्त्वयुक्तः; तत्साध्यार्थक्रियासंवादाऽसंभवात्, सम्पूर्णचेतना (र्णवेर्तन) लाभो हि खरँकद्रमस्य अर्थक्रिया न कतिपयचेतना (यवेतन) लाभः।

यच्चोक्तम्[5]–'प्रामाण्यं हि बोधकत्वम्' इत्यादि; तत्रापि किं बोधकत्वमात्रं प्रामाण्यम्, उत अर्थबोधकत्वम् ? तत्राद्यपक्षोऽसंभाव्यः; बोधकत्वमात्रस्य क्वचिज्ज्ञाने प्रतीत्यभावात्,

---

१ तु तेषां पर–भां। २ "ननु चार्थक्रियाभासि ज्ञानं स्वप्नेऽपि विद्यते। न च तस्य प्रमाणत्वं तद्धेतोः प्रथमस्य च ॥ २९८० ॥ नैवं भ्रान्ता हि सावस्था सर्वा बाह्यानिबन्धना। न बाह्यवस्तुसंवादः तास्ववस्थासु विद्यते ॥ २९८१ ॥" तत्त्वसं०। प्रमेयक० पृ० ४३ पू०। सन्मति० टी० पृ० १५। ३ अतो न स्वप्नदशोपलब्धस्य साम्या–आ०। ४ अनृते। भाषायां 'जाली' इति। ५ द्रम इति मुद्राविशेषः। ६ मूल्यम्। "कर्मण्या तु विधा भृत्या भृतयो भर्म वेतनम्। भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि॥" अमरको० शूद्रव० ३८। ७ खरकं सत्यम्, 'खरा' इति भाषायाम्। "क्वचित्कूटेऽपि जयतुङ्गे ज्ञानं प्रमाणं कतिपयार्थक्रियादर्शनात्; तत्र कूटे कूटज्ञानं प्रमाणमेव अकूटज्ञानं तु न प्रमाणं तत्संवादाभावात्। सम्पूर्णचेतनालाभो हि तस्यार्थक्रिया न कतिपयचेतनालाभ इति।" प्रमेयक० पृ० ४३ उ०। ८ पृ० १९७ पं० ११। "अपरे तु अन्यथा प्रतिज्ञार्थं वर्णयन्ति–बोधात्मकत्वं नाम प्रामाण्यम्... तदेतदसम्यक्; यतो न बोधात्मकत्वमेव प्रामाण्यं युक्तं विपर्ययज्ञानेऽपि संभवात्।" तत्त्वसं० पं० पृ० ८११।

सकलज्ञानानां बहिरन्तः स्वार्थावबोधकत्वेनैव अध्यवसायात् । द्वितीयपक्षेऽपि अर्थमात्रबोधकत्वं तत् स्यात्, अवितथार्थबोधकत्वं वा ? न तावद् अवितथार्थबोधकत्वम्[2]; अस्य विशिष्टकारणकलापाधीनत्वप्रतिपादनात् । नापि अर्थमात्रबोधकत्वम्; द्विचन्द्रादिवेदनस्यापि[3] प्रामाण्यप्रसङ्गात्, तथा च तद्वेद्यस्य द्विचन्द्रादेर्नाऽसत्यत्वम् । यत् खलु प्रमाणभूतवेदनवेद्यं तन्नाऽसत्यम् यथा सुखादि, प्रमाणभूतवेदनवेद्यश्च द्विचन्द्रादीति । प्रमाणभूतत्वश्च द्विचन्द्रादिवेदनस्य 'बोधरूपतैव प्रामाण्यम्' इत्यभिदधतां नासिद्धम्; प्रयोगः—यद् यतो न व्यतिरिच्यते तत् तत्स्वरूपमात्राऽनुबन्धि यथा शाखादिमत्त्वादव्यतिरिच्यमानं वृक्षत्वं तन्मात्रानुबन्धि, न व्यतिरिच्यते च बोधरूपतातः प्रामाण्यमिति । ननु च अनुत्पन्नबाधकस्य बोधस्य प्रमाणभूतत्वं स्वरूपम्, अत्र च बाधकमुत्पद्यते, अत एव अस्माभिः अप्रामाण्यं परतः अङ्गीक्रियते; तदप्यसुन्दरम्; बोधस्य किल स्वरूपसमकालभाविप्रामाण्यम्, तस्मिन् स्थिते कुतः परतोऽप्रामाण्यस्याऽवकाशः ?

किञ्च, इदमप्रामाण्यं किं प्रामाण्यस्याऽभावः, वस्तुभूतो वा धर्मः ? प्रथमपक्षे प्रामाण्याभावो ज्ञानत्वाऽभाव एव उक्तः स्यात्, 'ज्ञानत्वमेव हि प्रामाण्यम्' इति भवतां पक्षः, तथा च परैतः[4] 'ज्ञानस्य ज्ञानत्वाऽभावः' इति न किञ्चित् सङ्गतम्। यद्धि यादृग्रूपनियतं तद् अतादृग्रूपं नान्यतो भवति यथा घटः पृथुबुध्नोदराद्याकारः[5], प्रमाणरूपनियतश्च[6] ज्ञानम्, इति न बाधकज्ञानाद् अप्रामाण्यं युक्तम्।

किञ्च, कारणदोषज्ञानं बाधकज्ञानवच्चाऽप्रवर्तमानं कथमतीतज्ञानस्य प्रामाण्याऽभावमापादयितुं शक्नोति ? न हि पूर्वज्ञानकाले तदस्ति, तत्काले वा पूर्वज्ञानमिति । स्वस्मिन्नेव काले तेन तस्य अप्रमाणतासम्पादने अतिप्रसङ्गः घटज्ञानस्यापि पटज्ञानकालेऽप्रामाण्यप्रसङ्गात्[7]। नहि अन्यद् अन्यकालेऽप्रमाणत्वेन केनचिद् इष्टम् । अथ वस्तुभूतो धर्मः अप्रामाण्यम्; स वक्तव्यः कौऽसौ इति ? संशय-विपर्ययौ इति चेत्; ननु तयोर्ज्ञानात्मकत्वात् नाऽप्रमाणता युक्ता; तथाहि-संशयविपर्ययौ नाऽप्रमाणं ज्ञानत्वात् प्रमाणत्वाभिमतज्ञानवदिति ।

किञ्च, सर्वत्र ज्ञाने [10]औत्सर्गिके प्रामाण्ये सति कुतः संशय-विपर्ययलक्षणधर्मसंभवः ? स हि ज्ञानस्य स्वत एव आयातः, विषयात्, सहकारिभ्यः, प्रमातुः, ज्ञानान्तरप्रभावात्, इन्द्रियादेः, आधारसम्बन्धाद्वा ? प्रथमपक्षे सर्वदा तस्य तथात्वप्रसङ्गः; प्रयोगः—यद् यस्य स्वरूपत एव भवति तत् तस्य न कदाचिदपि निवर्त्तते यथा नीलस्य नीलता, तथा च ज्ञानस्य संशया-

---

१ बहिरन्तश्चार्था—आ० । २ "बोधविशेषः प्रामाण्यमिति चेत्; न तर्हि वक्तव्यम्—तच्च ज्ञानानां स्वाभाविकमेव न गुणकृतम् ।" तत्त्वसं० पं० पृ० ८११ । ३—वेदकस्या—श्र० । ४ दोषादेः । ५ ज्ञानाभावः भां० । ६—दराकारः ब०, ज० । ७ प्रमाणनियतरूपश्च भां०, श्र० । ८—श्चावर्तमानम् आ०, ब०, ज० । ९ पटज्ञानेऽप्रा—ब०, ज० । १० अत्सर्गिके आ०, ब०, ज० । "प्रामाण्यनिश्चयो यस्मात्तत्र तन्मात्रभाविकः । तस्मिन् जाते च सन्देहविपर्यासावनास्पदौ ॥ २९२९ ॥" तत्त्वसं० ।

दिरूपतेति। द्वितीयपक्षेऽपि विषयमात्रस्य संशयादिरूपोत्पत्तौ व्यापारः, विशिष्टस्य वा विषयस्य ? विषयमात्रस्य चेत्; सर्वं ज्ञानं संशयादिरूपं स्यात्। विशिष्टस्य चेत्; ननु किमिदं विषयस्य विशिष्टत्वम्–अविवेचितत्वम्, सादृश्योपहतत्वं वा ? अविवेचितत्वे विषयमात्रमेव अङ्गीकृतं स्यात्, तत्र च उक्तो दोषः। अथ सादृश्योपहतो विषयो विरुद्धविशेषस्मरणद्वारेण विपर्ययज्ञानं जनयति, उभयविशेषस्मरणद्वारेण च संशयज्ञानम्; तदप्यचारु; सर्वस्यैव विषयस्य अवश्यं केनचित् सादृश्यसंभवात् सर्वदैव तथाविधज्ञानोत्पत्तिः स्यात्। गृहीतं सादृश्यं तथा करोति इति चेत्; सन्निहितेऽपि कुर्यात्। विशेषाऽग्रहणमपि तत्कारणम्, सन्निहिते च तदभावात् तन्न करोति इति चेत्; ननु सतो विशेषस्य अग्रहणमपि कुतः ? अदृष्टाच्चेत्; तन्न; अदृष्टस्य अविकलसामग्र्यां कार्यप्रतिबन्धकत्वाऽदर्शनात्। तद्वशाद्धि कदाचित् सामग्री एव न संयुज्यते, संयुक्ता वा विजातीयेन युज्यते येन सामग्र्यन्तरतामास्कन्दयति, अत्र च इन्द्रियादिसामग्री नान्यथाभूता नाप्यसंयुक्ता इति कथं विशेषाऽग्रहणम् ? किञ्च, विशेषाऽग्रहणवत् प्रामाण्याऽप्रामाण्योत्पादनेऽपि अदृष्टस्य व्यापारः किन्न स्याद् यतोऽप्रामाण्यवत् प्रामाण्यमपि परतो न स्यात् ?

एतेन तृतीयपक्षोऽपि प्रत्याख्यातः; सहकारिभिः अधर्मादिभिः अप्रामाण्यं संशयादिरूपमापाद्यते, धर्मादिभिस्तु प्रामाण्यम् अवितथार्थनिश्चयस्वरूपमिति। नापि प्रमात्रा तत्र तद्रूपमापाद्यते; प्रतीतिविरोधात्, न हि कस्यचित् प्रमातुः ईदृशी प्रतीतिः 'संशयवानहं भूयासम्' इति। अभ्युपगमे वा नास्य ज्ञानस्याऽप्रामाण्यहेतुत्वम्; तथाहि–'संशयो मे स्यात्' इति ज्ञानं नाऽप्रामाण्यकारणं ज्ञानत्वात् 'घटं जानीयाम्' इत्यादिज्ञानवत्। अथ ज्ञानान्तरप्रभावाद् आविर्भूतोऽसौ विशेषः; तत्रापि किं स्वकीयात्, परकीयाद्वा तदन्तरप्रभावादसौ आविर्भवेत् ? यदि स्वकीयात्; तदा स्वकाले सतो ज्ञानस्य तेनाऽसौ विशेषो विधीयते, असतो वा ? न तावत् सतः; ज्ञानान्तरकाले प्राक्तनज्ञानस्याऽसंभवात्, अन्यथा युगपज्ज्ञानद्वयाऽनभ्युपगमविरोधः। स्वकालेऽसतश्च कथं तेनाऽसौ विधातुं शक्यः भिन्नकालत्वात्, यद् यतो भिन्नकालं न तेन तस्य विशेषो विधातुं शक्यः यथा भूत-भविष्यत्कालभाविजपापुष्पेण वर्तमानकालीनस्फटिके, भिन्नकालश्च इदं ज्ञानान्तरमिति। नापि परकीयात् ततः संशयाद्युत्पत्तिः; तथा प्रतीत्यभावात्। ननु 'चैत्रस्य संशयमुत्पादयामि' इति प्रमात्रन्तराणां प्रतीतिरस्ति; तन्न; सार्वत्रिकसंशये प्रमात्रन्तरज्ञानस्य नियतसद्भावाऽसंभवात्। यत् खलु यत्र कारणं तत् तत्र नियतसद्भावम् यथा अन्त्यदशाप्राप्तं बीजमङ्कुरस्य, न च प्रमात्रन्तरज्ञानं नियतसद्भावं संशयादिकार्ये इति। इन्द्रियादेश्च तद्धेतुत्वे सर्वत्र ज्ञाने संशयादिरूपोत्पत्तिप्रसङ्गः। अथ आधारसम्बन्धात्तत्र तदुत्पत्तिः; ननु तत्सम्बन्धः प्रमाणतः प्रतिपन्नः, न वा ? प्रतिपन्नश्चेत्; कथं संशयविपर्या-

---

१ 'विषयस्य' नास्ति ब०, ज०। २ नाप्यन्यसं–श्र०। ३ ज्ञाने। ४–मानस्फ–ब०, ज०। ५ चैत्रस्य आ०, श्र०।

सकारिणमाधारं जानानोऽधितिष्ठेद् अप्रामाणिकत्वप्रसङ्गात् ? अप्रतिपन्नश्चेत्, कथं 'तत्कृता ज्ञाने संशयादिरूपता' इति प्रतिपत्तिः ?

किञ्च, इदं संशयादिरूपमप्रामाण्यं बोधस्वरूपादतिरिक्तम्, अनतिरिक्तं वा ? अनतिरेके[1] कथम् अतिरिक्तकारणापेक्षा ? अतिरेके तद्वद् यथार्थनिश्चयस्वरूपप्रामाण्यस्यापि अतोऽतिरेकप्रसिद्धेः सिद्धमुभयस्य विज्ञानकारणातिरिक्तकारणाज्जन्म, इत्यलमतिप्रसङ्गेन[2]। ततः परतो लब्धप्रमाणभावस्य अवग्रहादेः ईहादिकं फलम् इति युक्तमुक्तम्।

एतदसहमानस्य सौगतस्य मतं तावन्निराकुर्वन्नाह–**'परमार्थे'** इत्यादि। **परमार्थेन** अकल्पितरूपेण **एका** निरंशा या **संवित्तिः** तस्याः यो **वेद्याकारः** वेद्यस्य नीलादेराकार इव तदाकारः यश्च **वेदकाकारः** वेद्याकारग्राहकाऽऽकारः तयोर्या **प्रमाणफलव्यवस्था** वेद्याकारस्य प्रमाणव्यवस्था *"सारूप्यमस्य[3] प्रमाणम्"* [न्यायवि० १।१६] इत्यभिधानात्, वेदकाकारस्य च फलव्यवस्था *"अधिगतिः फलम्"* [ ] इति वचनात्। तस्यामङ्गीक्रियमाणायाम् **क्षणभङ्गादेरपि** क्षणभङ्गः आदिर्यस्य, आदिशब्दोऽयं प्रकारवाची तेन क्षणभङ्गप्रकारः सर्वो निरंशत्वादिस्वभावो लिङ्गादभिन्नो गृह्यते, तस्यापि **न केवलं** सत्त्वादिहेतोः **प्रत्यक्षत्वं** प्रत्यक्षविषयत्वम् **प्रसज्येत। ततः** तस्मात् तत्प्रत्यक्षत्वात् **किं** दूषणं स्याद् इति चेत्, अत्राह–**'गृहीत'** इत्यादि। **गृहीतस्य** दर्शनविषयीकृतस्य **ग्रहणात् तदनुमानं** क्षणभङ्गाद्यनुमानं **प्रमाणं न स्यात् संवृतिवत्** प्रत्यक्षपृष्ठभाविविकल्पवत्। ननु गृहीतेऽपि क्षणभङ्गादौ विपरीतारोपव्यवच्छेदफलत्वात् नानुमानम् अप्रमाणमिति चेत्, अत्राह–**'तत्'** इत्यादि। **तयोः** प्रमाणाऽप्रमाणतया अङ्गीकृतयोः **अनयोः** संवृति-अनुमानयोर्मध्ये न केवलं प्रत्यक्षाद् अनुमानस्य अपि तु **संवृतेरपि** ताभ्यां **प्रमाणान्तरत्वं स्यात्।** कुत एतत् इति चेत्? अत्राह–**समारोपव्यवच्छेदाऽविशेषात्।** यथैव हि अनुमानात् क्षणविवेकनिश्चये निश्चेय-आरोपमनसोर्बाध्यबाधकभावात् भावी समारोपो न जायते इति तद्व्यवच्छेदकं तत्, तथा संवृत्या नीलादेर्निश्चये अनीलादिरूपोऽसौ न जायते इति सापि तद्व्य-

विवृतिव्याख्यानम्–

१–नतिरिक्ते आ०, भां०। २ स्वतःप्रामाण्यवादस्य विविधरीत्या समीक्षा निम्नग्रन्थेषु द्रष्टव्या–तत्त्वसं० स्वतःप्रामाण्यपरी० पृ० ७४४। न्यायवा० ता० टी० पृ० ११। न्यायमं० पृ० १६७। न्यायकुसुमा० द्वि० स्त०। तत्त्वार्थश्लो० पृ० १७५। प्रमाणपरी० पृ० ६३। प्रमेयक० पृ० ३८ उ०। सन्मति० टी० पृ० २। स्या० रत्ना० पृ० २४०। प्रमेयरत्नमा० १।१२। ३ "अर्थसारूप्यमस्य प्रमाणम्" न्यायबि०। "स्वसंवित्तिःफलञ्चास्य तद्रूपादर्थनिश्चयः। विषयाकार एवास्य प्रमाणं तेन मीयते॥" प्रमाणसमु० १।१०। "विषयाधिगतिश्चात्र प्रमाणफलमिष्यते। स्ववित्तिर्वा प्रमाणं तु सारूप्यं योग्यतापि वा॥ १३४३॥" तत्त्वसं०। ४ "निश्चयारोपमनसोर्बाध्यबाधकभावतः।" प्रमाणवा० १।५०।

वच्छेदिकाऽस्तु । भवत्वेवम्, को दोषः इति चेत् ? अत्राह–**'सर्वस्यैव'** इत्यादि । **सर्वस्य** चतुर्विधस्यापि प्रत्यक्षस्य **प्रामाण्यं न स्यात्** 'न क्वचित् नीलादौ क्षणक्षयादौ वा प्रामाण्यं स्यात्' इति एवकारार्थः । कस्य ? **निर्विकल्पकज्ञानस्य,** कथम्भूतस्य ? **समारोपव्यवच्छेदाऽऽकाङ्क्षिणः** समारोपव्यवच्छेदहेतुत्वात् क्षणक्षयादौ अनुमानम्, नीलादौ च संवृतिः तद्व्यवच्छेदः तम् आकाङ्क्षति इत्येवंशीलस्य । अयमर्थः–यथा क्षणभङ्गादौ तदपेक्षस्य निर्विकल्पकप्रत्यक्षस्य न प्रामाण्यम् अनुमानस्यैव तत्र प्रामाण्यात् तथा नीलादावपि तत्रापि संवृतेरेव प्रामाण्यात् । पूर्वफक्किकया प्रमाणान्तरम्, अनया पुनः इष्टस्यापि प्रत्यक्षप्रमाणस्य अभावं दर्शयति । ननु प्रवर्त्तकं[2] प्रमाणं नान्यत्, अतिप्रसङ्गात् । प्रवर्त्तकञ्च अभ्यासदशायां निर्विकल्पकं ज्ञानम्, अनभ्यासदशायां तु अनुमानम् । न च अन्या[3] दशा समस्ति यस्यां विकल्पकज्ञानं प्रवर्तकत्वात्प्रमाणं स्यात्, इत्यत्राह–**'ततः'** इत्यादि । **ततः** निर्विकल्पकज्ञानात् अभ्यासे **संव्यवहारस्य** प्रवृत्तिनिवृत्तिलक्षणस्य **अभावात्** । एतच्च सविकल्पकसिद्ध्यवसरे प्रपञ्चतः प्रतिपादितम् ।

स्यान्मतम्–सकलप्रत्ययानां भ्रान्तत्वाऽभ्युपगमतः प्रत्यक्षस्यापि प्रामाण्याऽनभ्युपगमात् कथम् **'संवृतेरपि प्रमाणान्तरत्वं स्यात्'** इत्युक्तं शोभेत ? इत्यत्राह–**'अर्थक्रियार्थी हि'** इत्यादि । सकलप्रमाणाऽभाववादिना अर्थ्यते अभिलष्यते इति **अर्थः** सकलप्रमाणाभावः, तस्य **क्रिया** उपादानम् **तदर्थी हि प्रमाणमन्वेषते** । किमिव ? **अप्रमाणं वा** अप्रमाणमिव 'प्रमाणाऽभाववत्' इत्यर्थः, 'नहि प्रमाणमन्तरेण तदभावः सिद्ध्यति' इत्युक्तं माध्यमिकं प्रति बहिरर्थसिद्धिप्रघट्टके ।

यदि वा, **अर्थः** हेय उपादेयश्च तस्य **क्रिया** प्राप्तिः परिहारश्च **तदर्थी**[6] **हि** यस्मात् **प्रमाणं** यतस्तयोः प्राप्ति-परिहारौ स्तः **अप्रमाणं वा** यतस्तयोः तौ न भवतः इति **अन्वेषते** । न च निर्विकल्पकात् तौ भवतः इति तात्पर्यार्थः । अन्वेषते एव तर्हि प्रमाणमिति चेत्, अत्राह–**'रूपादि'** इत्यादि । **रूपम् आदिः** यस्य रसादेः स तथोक्तः, **क्षणक्षय आदिः** यस्य निरंशत्वादेः सोऽपि तथोक्तः, तयोः **स्फुटस्य** विशदस्य **प्रतिभासस्य अविशेषतः खण्डशः प्रामाण्यम्** रूपादौ न क्षणक्षयादौ **यदपेक्षम्** यम् स्वार्थनिश्चयम्[7] अपेक्षते, यस्मिन् वा अपेक्षा यस्य तद् **यदपेक्षम् तदेव** नाऽधिगतिमात्रम् **फलं युक्तम्** उपपन्नम् । अथ इष्यते एव निर्णयः फलम् *"यत्रैव जनयेदेनां तत्रैवाऽस्य प्रमाणता"* [ ] इत्यभिधानात् । स तु निर्विकल्पकात् इति चेत्, अत्राह–**'तत्कृतः'** इत्यादि । तेन निर्विकल्पकेन कृतः **तत्कृतः निश्चयः तत्त्वतः** परमार्थतो **न भवति** 'कल्पनया केवलं भवति' इत्यर्थः । **'तत्त्वतः तत् ततो न भवति'**

१ आकांक्षते ब०, ज० । २–कं ज्ञानं ना–ब०, ज० । ३ अन्यदशा श्र० । ४ इत्याह ब०, ज० । ५ "अर्थक्रियार्थी हि सर्वः प्रेक्षावान् प्रमाणमप्रमाणं वाऽन्वेषते ।" हेतुबिन्दु परि० १ । ६ तदर्थं हि आ० । ७ स्वार्थेनिश्चयं आ०, भां० ।

इति[1] च क्वचित् पाठः । **तत्** निर्णयफलम् **ततो** निर्विकल्पकात् **न भवति** इति । यथा च तत्[2] ततो न भवति तथा सविकल्पकसिद्धौ प्रतिपादितमेव । अभ्युपगम्यापि अतो निर्णयं दूषणमुपदर्शयन्नाह–**'भावे वा'** इत्यादि । **भावे वा** उत्पत्तौ वा ततो निर्णयस्य **निर्णीतिः** स्वार्थव्यवसायः **अखण्डशः** रूपादाविव क्षणक्षयादावपि **कुतो न भवेत्**[3] परिस्फुटतया प्रतिभासस्य उभयत्राऽविशेषात्, 'दर्शनपाटवादिकमपि अनंशस्य दर्शनस्य उभयत्राऽवशिष्टम्' इत्युक्तं सविकल्पकसिद्धौ । ५

ननु यथा परमार्थैकसंविदो वेद्य-वेदकाकारयोः प्रमाण-फलव्यवस्था विरुद्ध्यते तथा अवग्रहादेरपि, सामान्यवद् विशेषस्यापि अवग्रहेणैव ग्रहणात्; अन्यथा गृहीतेतररूपे द्वे वस्तुनी स्याताम् । यथा च अविकल्पकप्रत्यक्षस्य अनुपलक्ष्यमाणत्वादप्रामाण्यम् तथा अवग्रहादेरपि, तस्यापि अनुपलक्षणाऽविशेषात्; इत्याशङ्क्य आह–**'बहुबहुविध'** इत्यादि । **बहु-बहुविध-क्षिप्र-अनिसृत-अनुक्त-ध्रुवाः, इतरे** च अवग्रहादयः ये **विकल्पाः** भेदाः तेषां सम्बन्धीयः **अवग्रहादिः** तस्य **न विरुद्ध्यते, 'प्रमाणफलव्यवस्था'** इति सम्बन्धः । कुत एतत् इति चेत् ? अत्राह–**'स्वभावभेदात्'** इति, स्वः आत्मीयः अवग्रहादेर्भावः यो ग्राह्योऽर्थः तस्य कथञ्चिद्भेदात् । अथवा **स्वभावभेदात्** अवग्रहादेः स्वरूपभेदात् इति ग्राह्यम् । १०

यदप्युक्तम्–'तस्य अनुपलक्षणात्' इति, तत्राह–**'प्रतिभासभेदेऽपि'** इत्यादि । **प्रतिभासस्य** स्वरूपसंवित्तेः **भेदेऽपि** नानात्वेऽपि, अवग्रहादेः **स्वभावभेदाऽभावकल्पनायां** स्वभावस्य स्वरूपस्य यो भेदः तस्य अभावकल्पनायाम् अद्वयज्ञानकल्पनायाम्[4] । किम् ? इत्यत्राह–**'क्रमेण'** इत्यादि । **क्रमेण वृत्तिः** वर्तनं येषाम् उपादानोपादेयरूपाणां दर्शनस्मरणादीनां तेषाम् **अपि** न केवलम् अवग्रहादीनाम् **तथाभावात्** तेन स्वभावभेदाऽभावकल्पनाप्रकारेण भावात् कारणात् । **कुतः** प्रमाणात्, न कुतश्चित् **क्रमः** कार्यकारणभावः **सुखदुःखादिभेदो वा** आदिशब्देन हर्षनीलादिपरिग्रहः **परमार्थतः प्रतिष्ठाप्येत** व्यवस्थाप्येत ? पुरुषाद्वैतं स्यात् इति भावः । १५ २०

ननु यदि अवग्रहादेः प्रतिभासभेदः कथमेकत्वम् ? इत्यत्राह–**'सहप्रतिभासवत्'** इति । सहप्रतिभासा बुद्धेर्नीलादय आकाराः तेषामिव तद्वत् इति । **'तद्'** इत्यादिना उक्तार्थोपसंहारमाह–यत एवं **तत्** तस्मात् **अयं** सौगतः **एकम्** अभिन्नम् **अनेकाकारम्** चित्राकारम् **क्षणिकज्ञानम्** पूर्वोत्तरकोटिविविक्तमध्यक्षणवेदनं **कुतश्चित्** कस्याश्चिद् अभिन्नयोग-क्षेमलक्षणायाः अशक्यविवेचनतालक्षणाया वा **प्रत्यासत्तेः** नैकट्यात् । केषां सम्बन्धिन्यास्तस्याः ? इत्याह– २५

---

१ इति क–आ० । २ तत्त्वतो आ० । ततो ब० । तत्तो ज० । ३–त् इति स्फुट–ब०, ज० । ४–षस्य च–आ० । ५–प्रत्ययस्य भां० । ६–अद्वयाज्ञा–आ० । ७–भेदभाव–ब०, ज० ।

'प्रतिभासभेदानाम्' इति । प्रतिभासभेदाः बुद्धेर्नीलादय आकारविशेषाः तेषाम् **उपयन्** अभ्युपगच्छन्, **क्रमवर्तिनामपि** क्रमेण वर्त्तितुं शीलानामपि **तथा** अशक्यविवेचनत्वप्रत्यासत्तिप्रकारेण, केवलस्य अभिन्नयोग-क्षेमप्रत्यासत्तिप्रकारस्य सन्तानान्तरज्ञानैर्व्यभिचारात् **एकत्वं प्रतिपत्तुमर्हति**। केषाम्? इत्यत्राह–**'हर्षविषादादीनाम्'** इति । **अतः** अस्मात् तदेकत्वात् **अनेकान्तसिद्धिः** प्रत्येया, **'प्रत्येयम्'** इत्यनेन वक्ष्यमाणेन जातलिङ्गपरिणामेन सम्बन्धात् ।

ननु प्रमाणफलयोः क्रमभाविनोर्भेदात् सन्तानान्तरवत् तद्भावो न प्राप्नोति इति चेत् ; अत्राह–**'प्रमाण'** इत्यादि । **'अतः'** इत्यनुवर्तते **अतो** न्यायात् **प्रमाणफलयोः** अवग्रहेहयोः ईहाऽवाययोः अवायधारणयोः **क्रमभावेऽपि तादात्म्यम्** कथञ्चिदेकत्वम् ।

प्रमाणफलयोः सर्वथाभेदवादिनो नैयायिकस्य पूर्वपक्षः—

ननु प्रमाणफलयोस्तादात्म्यमनुपपन्नम् प्रमाणविरोधात् ; तथाहि–प्रमाणम् आत्मव्यतिरिक्तक्रियाकारि कारकत्वात्, यत् कारकं तद् आत्मव्यतिरिक्तक्रियाकारि प्रतिपन्नम् यथा कुठारादि, कारकञ्च प्रमाणम्, तस्माद् आत्मव्यतिरिक्तक्रियाकारि इति । तथा, प्रमाणं स्वतो विभिन्नफलविधायि करणत्वात्, यत् करणं तत् स्वतो विभिन्नफलविधायि प्रसिद्धम् यथा वास्यादि, करणञ्च प्रमाणम्, तस्मात् स्वतो विभिन्नफलविधायि इति । न चायं साध्यविकलो दृष्टान्तः ; न हि करणं वास्यादि स्वात्मनि क्रियां कुर्वद् दृष्टम्, न च अकुर्वतः करणत्वं युक्तम् अतिप्रसङ्गात्, तस्मात् स्वतो विभिन्नं फलं कर्त्तरि कर्मणि वा कुर्वत् करणं

---

१ उपनयन् श्र० । २–चनप्रत्या–भां०, ब०, ज० । ३ "प्रतिक्षणं विषयपरिच्छेदलक्षणो योगः, तदर्थक्रियाऽनुष्ठानलक्षणश्च क्षेमः परिपालनरूपः···।" हेतुबि० टी० पृ० ५६ । ४ "यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः, यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम् ।···" न्यायभा० १।३ । "तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं प्रमाणम्···प्रमितिः द्रव्यादिविषयं ज्ञानम्···अथवा सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षं प्रमाणम्··· प्रमितिः गुणदोषमाध्यस्थ्यदर्शनमिति ।" प्रशस्त० भा० पृ० १८७ । "सर्वञ्च प्रमाणं स्वविषयं प्रति भावसाधनं प्रमितिः प्रमाणम् इति, विषयान्तरं प्रति करणसाधनं प्रमीयतेऽनेन इति प्रमाणम् । यदि भावसाधनः प्रमाणशब्दः किं फलं विषयस्याधिगतत्वात् ? उक्तं फलं हानादिबुद्धय इति··· ।" न्यायवा० १।३। पृ० २९ । ५ "करणं हि प्रमाणमुच्यते प्रमीयतेऽनेन इति । न च क्रियैव क्वचित् करणं भवति, क्रियायां साध्यायां कारकं किमपि करणमुच्यते यथा दात्रेण चैत्रः शालिस्तम्बं लुनाति इति कर्तृकर्मकरणानि क्रियातो भिन्नान्युपलभ्यन्ते तथेहापि चक्षुषा घटं पश्यतीति दर्शनक्रियातः पृथग्भाव एव तेषां युक्तो न दर्शनं करणमेव इति । प्रमा प्रमाणमिति तु फले प्रमाणशब्दस्य साधुत्वाख्यानमात्रम् कृतिः करणमितिवत्···तेन चक्षुरादेः ज्ञानक्रियामुपजनयतः करणत्वं ज्ञानस्य फलत्वमेवेति युक्तः तथाव्यपदेशः···" न्यायमं० पृ० ७० । "स्वातिरिक्तेत्यादिना शंकरस्वामी प्रमाणयति–स्वातिरिक्तक्रियाकारि प्रमाणं कारकत्वतः वास्यादिवत्··· ॥ १३५३-॥" तत्त्वसं०।

प्रतिपत्तव्यम्। विरुद्धा च प्रमाणस्यैव फलरूपता ; न हि एकस्य एकदा स्वात्मापेक्षया करण-रूपता फलरूपता चोपपन्ना विरुद्धयोर्धर्मयोः सकृदेकत्र समावेशाऽसंभवात्, अतः प्रमाण-फलयोर्भेद एव ज्यायान्। विशेषणज्ञानं हि प्रमाणं विशेष्यज्ञानं फलम्, तयोश्च कथमभेदः ? विभिन्नसामग्रीप्रभवतया विभिन्नविषयतया च भेदस्यैवोपपत्तेः ; ययोर्विभिन्नसामग्रीप्रभवत्वं विभिन्नविषयत्वं[2]च तयोर्भेदः यथा घटपटज्ञानयोः, विभिन्नसामग्रीप्रभवत्वं[3] विभिन्नविषयत्व- ५
च्च विशेषण-विशेष्यज्ञानयोरिति। नचायमसिद्धो हेतुः ; विभिन्ना हि विशेषणज्ञानोत्पत्तौ विशे-षणाऽक्षसन्निकर्षलक्षणा सामग्री, विभिन्ना च विशेष्यद्रव्यादिज्ञानोत्पत्तौ तदिन्द्रियसन्निकर्षलक्षणा सामग्री। विषयभेदस्तु तज्ज्ञानयोः सुप्रसिद्ध एव, अन्योन्यविलक्षणयोः विशेषण-विशेष्ययो-स्तदालम्बनत्वात्।

अत्र प्रतिविधीयते। यत्तावत्–प्रमाणफलयोः भेदे साध्ये 'कारकत्वात्' इति साधनमुक्तम्[4] ; १०
तदसमीचीनम् ; यतोऽतः किमनयोः कथञ्चिद्भेदः साध्येत, सर्वथा वा ? यदि कथञ्चित् ; सिद्धसाध्यता, अज्ञाननिवृत्तेः प्रमाणधर्मतया हानोपादानादेश्च तत्कार्यतया प्रमाणात् कथञ्चि-द्भेदाऽभ्युपगमात्। द्विविधं[5] हि प्रमाणस्य फलम्–ततो भिन्नम्, अभिन्नञ्चेति। तत्र अभिन्नम् अज्ञाननिवृत्तिः तद्धर्मत्वात्[6]। यो यद्धर्मः स ततोऽभिन्नः यथा १५
प्रदीपात् स्व-परप्रकाशः, प्रमाणधर्मश्च अज्ञाननिवृत्तिः स्वपररूपव्यामोहविच्छेदलक्षणा

प्रमाणफलयोः सर्वथा भेद-प्रतिविधानपूर्विका कथ-श्चित्तादात्म्यसिद्धिः–

---

१ "यदा निर्विकल्पकं सामान्यविशेषज्ञानं प्रमाणम् तदा द्रव्यादिविषयं विशिष्टं ज्ञानं प्रमितिः इत्यर्थः। यदा निर्विकल्पकं सामान्यविशेषज्ञानमपि प्रमारूपमर्थप्रतीतिरूपत्वात् तदा तदुत्पत्तावविभक्तमालोचनमात्रं प्रत्यक्षम्···विशेष्यज्ञानं हि विशेषणज्ञानस्य फलम् विशेषणज्ञानं न ज्ञानान्तरफलम्···यदा निर्विकल्पकं सामान्यविशेषज्ञानं फलं तदा इन्द्रियार्थसन्निकर्षः प्रमाणम्, यदा विशेष्यज्ञानं फलं तदा सामान्यविशेषालोचनं प्रमाणम् इत्युक्तं तावत्। सम्प्रति हानादिबुद्धीनां फलत्वे विशेष्यज्ञानं प्रमाणमित्याह···" प्रश० कन्दली पृ० १९९। मीमांसाश्लो० सू० ४ श्लो० ७०–७३। २–त्वंवा आ०। ३–त्वं विषय– आ०। ४ पृ० २०८ पं० १०। ५ "उपेक्षा फलमाद्यस्य शेषस्यादानहानधीः। पूर्वा वाऽज्ञाननाशो सर्वस्यास्य स्वगोचरे ॥१०२॥" आप्तमीमांसा। "प्रमाणस्य फलं साक्षादज्ञानविनिवर्त्तनम्। केवलस्य सुखोपेक्षे शेषस्यादानहानधीः ॥२८॥" न्यायावतार। "उपेक्षा अज्ञाननाशो वा फलम्···" सर्वार्थसि० १।१०। "प्रमाणस्य फलं साक्षात् सिद्धिः स्वार्थविनिश्चयः।" सिद्धिवि० टी० पृ० १२६ पू०। "प्रमाणस्य फलं तत्त्वनिर्णयादानहा-नधीः। निःश्रेयसं परं वेति केवलस्याप्युपेक्षणम् ॥" न्यायवि० ३। ९०। पृ० ५९६। "हानादिवेदनं भिन्नं फलमिष्टं प्रमाणतः। तदभिन्नं पुनः स्वार्थाज्ञानव्यावर्तनं समम् ॥ ४२ ॥" तत्त्वार्थश्लो० पृ० १२७। "अज्ञाननिवृत्तिर्हानोपादानोपेक्षाश्च फलम्। प्रमाणाद्भिन्नमभिन्नञ्च।" परीक्षामुख ५।१,२। प्रमाणनय० ६।१।२२। प्रमाणमीमांसा १।१।३५, ३९, ४१, ४२। ६ "क्रियाकरणयोरैक्यविरोध इति चेदसत्। धर्मभेदाभ्युपगमाद्वस्त्वभिन्नमितीष्यते ॥" प्रमाणवा० ३।३१८।

इति । न हि सर्वथा भेदे अभेदे वा धर्म-धर्मिभावो घटते विरोधात् ; तथाहि—ययोः सर्वथा भेदः न तयोर्धर्म-धर्मिभावः यथा सह्य-विन्ध्ययोः, सर्वथा भेदश्च धर्म-धर्मिणोः भवद्भिरभिप्रेत इति । तथा, यत्र सर्वथाऽभेदः न तत्र धर्म-धर्मिभावः यथा धर्मधर्मिणोरन्यतरस्वरूपे, सर्वथाऽभेदश्च धर्म-धर्मिणोर्भवद्भिरिष्ट इति । अतः सर्वथाभेदोऽभेदपक्षे तयोः तद्भावाऽनुपपत्तेः कथञ्चिद्भेद एव ज्यायान् , साधकतमस्वभावतया हि ज्ञानस्य प्रमाणता अज्ञाननिवृत्त्यात्मकतया च फलरूपता इति । साधकतमस्वभावता च अस्य स्वपरग्रहणव्यापार एव तद्ग्रहणाऽभिमुख्यलक्षणः । ज्ञानं हि स्वकारणकलापादुपजायमानं स्वार्थग्रहणव्यापारलक्षणोपयोगरूपं सत् स्वार्थव्यवसायरूपतया परिणमते[3] । इत्थं कथञ्चिदभेदेऽपि अनयोः कार्यकारणभावो न विरुद्ध्यते । तथा च 'एकस्य एकदा स्वात्मापेक्षया करणरूपता[4] फलरूपता[5] चानुपपन्ना' इत्याद्ययुक्तम् ; एकस्यापि अपेक्षाभेदाद् अनेककारकरूपतोपपत्तेः, यथा 'वृक्षस्तिष्ठति, वृक्षेण कृतम्, वृक्षादपेतम्, वृक्षं पश्य' इत्यादौ, एवं प्रमाणस्यैकस्यापि साधकतम-स्वपररूपव्यामोहविच्छेदलक्षण-अज्ञाननिवृत्तिस्वभावाऽपेक्षया प्रमाणरूपता फलरूपता च न विरोधमध्यास्ते ।

ननु च अज्ञाननिवृत्तिः ज्ञानमेव, न च तदेव तस्यैव कार्यं युक्तं विरोधात्, अतः कथमस्याः प्रमाणफलत्वं स्यात् ? इत्यप्यविचारितरमणीयम् ; यतः अज्ञाननिवृत्तेः स्वार्थव्यवसायपरिणतिलक्षणायाः स्वार्थग्रहणव्यापारलक्षण-उपयोगरूपप्रमाणेन कार्यत्वाऽविरोधात् , साधकतमांशस्य इतरांशात् कथञ्चिद्भेदप्रतिपादनात् ।

किञ्च, धर्मरूपताम् , धर्मिरूपतां वा[6] अभ्युपगम्य 'अज्ञाननिवृत्तिः ज्ञानमेव' इत्यभ्युपगम्येत ? यदि धर्मिरूपताम् ; तत्रापि किंमपेक्षया[7] अज्ञाननिवृत्तेः धर्मित्वं परिकल्प्येत—ज्ञानापेक्षया, धर्मान्तराऽपेक्षया वा ? प्रथमपक्षे 'तन्निवृत्तेः धर्मित्वम् , ज्ञानस्य तु धर्मत्वम्' इति वैपरीत्यमायातम् , न चैतद्युक्तं तस्याः तदाश्रितत्वात्। यद् यदाश्रितं न तस्य स्वाश्रयापेक्षयैव धर्मित्वं दृष्टम् यथा सुख-रूपादेः, ज्ञानाश्रिता च अज्ञाननिवृत्तिः इति, अतः कथस्या धर्मित्वम् ? नियमेन अस्याः पराश्रितायाः धर्मस्वभावत्वस्यैव उपपत्तेः तल्लक्षणत्वात्तस्य । अथ धर्मान्तरापेक्षया; तदा ज्ञानापेक्षया किमस्याः स्यात् ? धर्मरूपता चेत् ; कथमेवम् 'ज्ञानमेव अज्ञाननिवृत्तिः' इति अभेदाऽभिधानं युज्यते ? 'ज्ञानस्य अज्ञाननिवृत्तिः धर्मः' इति भेदाऽभिधानस्यैव उपपन्नत्वात् , न खलु उपचारादन्यत्र धर्म-धर्मिणोरभेदाऽभिधानं युक्तम् अतिप्रसङ्गात् ।

किञ्च, असौ कार्या, अकार्या वा स्यात् ? यदि अकार्या; सर्वत्र सर्वदा सत्त्वप्रसङ्गात् सर्वः

---

१ "भेदैकान्ते पुनर्न स्यात् प्रमाणफलतागतिः । सन्तानान्तरवत् स्वेष्टेऽप्येकत्रात्मनि संविदोः ॥४५॥" तत्त्वार्थश्लो० पृ० १२८ । "अभेदे तद्व्यवहारानुपपत्तेः । भेदे तु आत्मान्तरवत्तदनुपपत्तेः ।" परीक्षामुख ६।६७, ७१ । २—निवृत्त्यात्मना च श्र० । ३ परिणमति ब०, ज० । ४ करणता आ०, भा० । ५—ता वानुपपत्तेः ब०, ज० । ६ च आ० । ७ किमपेक्ष्य आ०, भां० ।

सर्वदर्शी स्यात्, देशादिनियतकारणाधीनतया हि भावानां देशादिनियमः नान्यथा। अथ कार्या असौ; कुतो जायेत–प्रमाणाभिमतज्ञानात्, अन्यतो वा ? यदि अन्यतः; प्रमाणाभिमतज्ञानोत्पत्तेः प्रागुत्तरकालश्च तदुत्पत्तिप्रसक्तिः, न हि तदकार्यस्य तत्सत्ताकाले एव आत्मलाभो युक्तः। प्रयोगः–यद् यदकार्यं न तद् आत्मलाभे तत्सत्तामपेक्षते यथा घटाऽकार्यः पटो नात्मलाभे घटसत्ताम्, प्रमाणाऽकार्या च अज्ञाननिवृत्तिः अन्यत उत्पत्तिमत्त्वेन इति। अथ प्रमाणादेव असौ उत्पद्यते; सिद्धं तर्हि प्रमाणफलत्वमस्याः, तथा च 'ज्ञानमेव अज्ञाननिवृत्तिः' इति दुर्घटम्। ५

सुघटत्वेऽपि वा, किं ज्ञानमात्रमेव अज्ञाननिवृत्तिः, विशिष्टं वा ज्ञानम् ? प्रथमपक्षे अनध्यवसायादेः दत्तो जलाञ्जलिः–ज्ञानमात्रधर्मतया अज्ञाननिवृत्तेः स्वपररूपव्यामोहविच्छेदलक्षणायाः तत्रापि सत्त्वप्रसङ्गात्। व्यामोहो हि अनध्यवसायादिस्वभावः, स कथं तद्विपक्षभूतया अज्ञाननिवृत्त्या क्रोडीकृते ज्ञानमात्रे अवकाशं लभेत ? यत्र यत्सत्तामात्रनिबन्धनो यद्विपरीतधर्मसद्भावः न तत्र तत्संभवः यथा आत्मसत्तामात्रनिबन्धनेन अमूर्त्तचेतनत्वादिधर्मेण क्रोडीकृते आत्मनि न मूर्त-अचेतनत्वादिधर्मसंभवः, ज्ञानसत्तामात्रनिबन्धनेन अज्ञाननिवृत्तिधर्मेण अनध्यवसायादिविरोधिना क्रोडीकृतश्च ज्ञानमिति। अथ विशिष्टज्ञानधर्मता अज्ञाननिवृत्तेः इष्यते; ननु किमिदं ज्ञानस्य विशिष्टत्वं नाम–स्वपररूपयोः व्यामोहविच्छेदहेतुत्वम्, अबाधितत्वम्, संस्कारजननयोग्यता, विशिष्टकारणकलापादात्मलाभो वा ? प्रथमविकल्पे अस्मन्मतसिद्धिः, स्याद्वादिभिः अनध्यवसायादिलक्षणव्यामोहविच्छेदहेतोः ज्ञानविशेषस्य अज्ञाननिवृत्तिधर्माश्रयत्वाऽभ्युपगमात्। उत्तरविकल्पत्रयमपि अस्मन्मतमेव अवगाहते, स्वपररूपयोः व्यामोहविच्छेदं कुर्वतो ज्ञानविशेषस्य अबाधितस्य संस्कारजननयोग्यस्य विशिष्टकारणकलापादाविर्भावमाबिभ्रतः अज्ञाननिवृत्तिधर्माधारत्वोपपत्तेः। ततः सूक्तम्–प्रमाणधर्मत्वाद् अज्ञाननिवृत्तिलक्षणं फलं प्रमाणादभिन्नम्, हानोपादानादिकं तु भिन्नम्। १० १५ २०

ननु यथा स्वार्थग्रहणाभिमुख्यलक्षणोपयोगरूपं ज्ञानं स्वपरप्रमितिरूप-अज्ञाननिवृत्तिरूपतया परिणमते तथा हानादिरूपतयापि, तत्कथमस्य भिन्नफलत्वमिति चेत् ? तद्व्यवहितत्वात्, समुत्पन्ने हि अज्ञाननिवृत्तिलक्षणे फले हानोपादानादिलक्षणं फलमुत्पद्यते इति अज्ञाननिवृत्तिलक्षणेन फलेन अस्य व्यवधानाद् भिन्नत्वम्, अज्ञाननिवृत्तेस्तु अपरेण स्वग्रेऽपि अव्यवधानादभिन्नत्वम्। तन्न कारकत्वलक्षणाद् हेतोः प्रमाण-फलयोः सर्वथा भेदः सिद्ध्यति। नापि करणत्वात्; उक्ताऽशेषदोषाऽनुषङ्गात्। २५

यदप्यभिहितम्[६]–'विशेषणज्ञानं प्रमाणम् विशेष्यज्ञानं फलम्' इत्यादि; तदप्यपेशलम्;

१–सत्तानिब–आ०। २ ज्ञानमात्रमिति आ०, ब०, ज०। ३–जनने योग्य– ब०, ज०। ४–दात्मनो लाभो श्र०। ५–नादिकंल–ब०, ज०। ६ पृ० २०९ पं० ३।

विशेषण-विशेष्ययोर्विभिन्नज्ञानालम्बनत्वाऽभावात्। एकमेव हि ज्ञानं तदालम्बनम्, न हि 'शुक्लः पटः, दण्डी पुरुषः' इत्यादौ विशेषणविशेष्ययोर्ज्ञानभेदोऽनुभूयते ; प्रतीतिविरोधात्। न च विषयभेदात् ज्ञानभेदः ; पञ्चाङ्गुलादेर्विषयस्य अनेकस्यापि एकज्ञानाऽलम्बनत्वात्, कथमन्यथा 'सदसद्वर्गः कस्यचिद् एकज्ञानालम्बनम् अनेकत्वात् पञ्चाङ्गुलवत्' इत्यत्र अस्य दृष्टान्तता ? कथं वा अवयविनः सिद्धिः, ऊर्ध्वा-ऽधो-मध्यभागानामपि एकज्ञानालम्बनत्वाऽभाव-प्रसङ्गतः तद्व्यापित्वेन अस्य सिद्ध्यनुपपत्तेः ?

याऽपि विशेषणाक्षसन्निकर्षादिलक्षणा विभिन्ना सामग्री प्रतिपादिता[1] ; सापि अनुपपन्ना; सन्निकर्षस्य प्रागेव प्रतिक्षिप्तत्वात्। सति[2] च कार्यभेदे कारणभेदः कल्पयितुं युक्तः, न चात्र तद्भेदोऽस्ति इत्युक्तम्। ततः **सूक्तम्–प्रमाणफलयोः क्रमभावेऽपि तादात्म्यम् अभिन्न-विषयत्वञ्च प्रत्येयम्** इति।

निर्मूल्य लक्षणमथान्यमतप्ररूढम्,
प्रत्यक्षलक्षणमिदं गदितं प्रमायाः।
तारप्रभाप्रकटितं खलु वस्तुजातम्,
इन्दुः प्रकाशयति तत्र किमस्ति चित्रम्॥ १॥

इति प्रभाचन्द्रविरचिते न्यायकुमुदचन्द्रे लघीयस्त्रयालङ्कारे
प्रत्यक्षपरिच्छेदः प्रथमः।
ग्रं–४५००।

---

१ पृ० २०९ पं० ६। २ सति का–आ०, भां०।

प्रमाणप्रवेशे द्वितीयो विषयपरिच्छेदः ।

यत्रार्थे प्रमितेः प्रवृत्तिरखिलव्यामोहविच्छेदतः,
तद्रूपप्रतिपादनार्थममलः प्रारभ्यते प्रक्रमः ।
मिथ्यैकान्तमहान्धकारनिचयप्रच्छादितार्थं स्फुटम्,
स्याद्वादाऽप्रतिमप्रचण्डतरणेर्नान्यः क्षमो द्योतितुम् ॥१॥

सम्यग्विषयवता हि प्रमाणेन भवितव्यम्, समीचीनश्च विषयः प्रमाणस्य यादृशो भवति, तं दर्शयन् प्रकृतमर्थञ्चोपसंहरन्नाह—

तद्द्रव्यपर्यायात्माऽर्थो बहिरन्तश्च तत्त्वतः ॥ ७ ॥

विवृतिः—भेदाऽभेदैकान्तयोरनुपलब्धेः अर्थस्य सिद्धिः अनेकान्तात् । नान्तर्बहिर्वा स्वलक्षणं सामान्यलक्षणं वा परस्पराऽनात्मकं प्रमेयं यथा मन्यते परैः ; द्रव्यपर्यायात्मनोऽर्थस्य बुद्धौ प्रतिभासनात् । न केवलं साक्षात्करणम् एकान्ते न संभवति, अपि तु—

कारिकाविवरणम्—

यतोऽवग्रहादीनां प्रमाण-फलभूतानां क्रमभावेऽपि तादात्म्यम् अभिन्नविषयत्वञ्च **तत्** तस्मात् **अर्थः** अर्थक्रियासमर्थः प्रमाणगोचरो भावः **द्रव्यपर्यायात्मकः** बहिः घटादिः इत्यर्थः । किमिव ? इत्यत्राह— **'अन्तश्च'** इति । **च**शब्द इवार्थे निपातानामनेकार्थत्वात्, अन्तरिव । कल्पनातः स तथाविधः स्यात्, इत्यत्राह— **तत्त्वतः** परमार्थतः ।

विवृतिव्याख्यानम्—

'भेद' इत्यादिना तद् व्याचष्टे—**भेदाऽभेदैकान्तयोरनुपलब्धेः** कारणात् **अर्थस्य सिद्धिः** निष्पत्तिः निर्णीतिर्वा **अनेकान्तात्** अनेकान्तेन हेतुना,[2] तं वा आश्रित्य । नहि भेदैकान्ते वैशेषिकाभ्युपगते षट्पदार्थलक्षणे, नैयायिकाभ्युपगते वा षोडशपदार्थलक्षणे अर्थस्य[3] सिद्धिः घटते ; प्रमाणतोऽप्रसिद्धस्वरूपाणां तेषामर्थसिद्धिनिबन्धनत्वाऽनुपपत्तेः । यत् प्रमाणतोऽप्रसिद्धस्वरूपं न तद् अर्थसिद्धिनिबन्धनम् यथा गगनेन्दीवरम्, प्रमाणतोऽप्रसिद्धस्वरूपाश्च यौगाभ्युपगताः पदार्था इति ।

१—ना एतद् श्र० । २ तदाश्रित्य ब० । ३ अर्थसिद्धिः ब०, ज० ।

षट्पदार्थवादे वैशेषिकस्य पूर्वपक्षः—

ननु वैशेषिकैरभ्युपगता द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाख्याः षट् पदार्थाः अभा-[2]वाख्यश्च सप्तमः, ते च अन्योन्याऽसंभविलक्षणलक्षितत्वेन अन्योन्यमे-कान्ततो भिन्नाः प्रमाणतः सुप्रसिद्धा एव । तथाहि–द्रव्यलक्षणं[3] तावद् गुणादिषु न संभवति। तस्य हि लक्षणम्–द्रव्यत्वाभिसम्बन्धः, क्रियावद्गुणवत्समवायिकारणत्वञ्च । तथा च सूत्रम्–"*क्रियावद् गुणवत् समवायिकारणं द्रव्यम्*" [वैशे० सू० १।१।१५] इति । तल्लक्षितानि पृथिवी-अप्-तेजः-वायु-आकाश-काल-दिक्-आत्म-मनांसि नवैव द्रव्याणि । तत्र पृथिव्यप्तेजोवायवो द्विविधा नित्याऽनित्यभेदात्। तत्र परमाणुरूपा नित्याः सदकारणवत्त्वात्[4]। द्व्यणुकाद्यवयविरूपास्तु अनित्या उत्पत्तिमत्त्वात्। आकाशकालदिगात्ममनांसि तु नित्यानि एव ।

तच्चेदं द्रव्यलक्षणं केवलव्यतिरेक्यनुमानम्; तथाहि–द्रव्यम् इतरेभ्यो भिद्यते द्रव्यत्वाभिसम्बन्धात् क्रियावद्गुणवत्समवायिकारणत्वाद्वा, यत् पुनः इतरेभ्यो न भिद्यते न तत्तथा यथा गुणादि, तथा च तत्, तस्माद् इतरेभ्यो भिद्यते । व्यवहारो वा साध्यः–विवादास्पदीभूतं वस्तु 'द्रव्यम्' इति व्यवहर्त्तव्यम् प्राक्तनादेव हेतोः, यत्तु नैवं व्यवह्रियते न तत् तथा यथा गुणादि, तथा चेदम्, तस्मात् 'द्रव्यम्' इति व्यवहर्त्तव्यम्। एवं शेषलक्षणान्यपि; "*पृथिवीत्वाभिसम्बन्धात् पृथिवी*" [प्रश० भा० पृ० २०] "*अप्त्वाभिसम्बन्धाद् आपः*" [प्रश० भा० पृ० ३५] "*तेजस्त्वाभिसम्बन्धात् तेजः*" [प्रश० भा० पृ० ३८] "*वायुत्वाभिसम्बन्धाद् वायुः*" [प्रश०भा० पृ० ४४] इत्येतानि बोद्धव्यानि । आकाश-काल-दिशां तु एकैकत्वात् तल्लक्षणभूताऽपरसामान्याऽभावेऽपि पारिभाषिकाः (क्यः) तिस्रः संज्ञा लक्षणम्–'आकाशम्, कालः, दिक्' इति।

---

१ "धर्मविशेषप्रसूताद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ।" वै०सू० १।१।४ । २ "भावपरिज्ञानापेक्षित्वादभावस्य पृथगनुपसंख्यानम्···" प्रश० व्यो० पृ० २० । "अभावस्य पृथगनुपदेशः भावपारतन्त्र्यात् नत्वभावात् ।" प्रश० कन्दली पृ० ७ । "अभावस्य च समानतन्त्रसिद्धस्याऽप्रतिषिद्धस्य न्यायदर्शने मानसेन्द्रियतासिद्धिवदत्राप्यविरोधात् अभ्युपगमसिद्धान्तसिद्धत्वात् ।" न्यायली० पृ० ३ । ३–णं गुणा–आ० । ४ "क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् ।" वै० सू० १।१।१५ । ५ "पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ।" वै० सू० १।१।५ । ६ "सदकारणवन्नित्यम् ।" वै०सू० ४।१।१ । ७ "लक्षणं च भेदार्थं व्यवहारार्थं चेति। तथाहि–पृथिव्यादीनि इतरस्माद् भिद्यन्ते द्रव्याणीति वा व्यवहर्त्तव्यानि द्रव्यत्वयोगात् ।" प्रश० व्योम० पृ० १५० । "पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः ।" प्रश० भा० पृ० २० । "एतेन द्रव्यादिपदार्थस्य इतरेभ्यो भेदलक्षणमुक्तम् ।" प्रश० कन्दली पृ० २० । ८ द्रव्यत्वात् ब०, ज० । ९ "आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति आकाशं कालो दिगिति ।" प्रश० भा० पृ० ५८ ।

तथाहि–आकाशम् इतरेभ्यो भिद्यते, विवादास्पदीभूतं द्रव्यम् 'आकाशम्' इति व्यवहर्त्तव्यम्, अनादिकालप्रवाहाऽऽयात-आकाशशब्दवाच्यत्वात्, यत्तु इतरेभ्यो न भिद्यते न च 'आकाशम्' इति व्यवह्रियते न तद् अनादिकालप्रवाहाऽऽयाताऽऽकाशशब्दवाच्यम् यथा रूपादि, तच्छब्दवाच्यश्चेदम्, तस्मादुक्तसाध्यमिति । एवं [2]दिक्कालयोरपि लक्षणं द्रष्टव्यम् । *"आत्मत्वाऽभिसम्बन्धाद् आत्मा"* [प्रश० भा० पृ० ६६] *" मनस्त्वाभिसम्बन्धात् मनः"* [प्रश० भा० पृ० ८६] इत्यत्रापि पूर्ववत् केवलव्यतिरेक्यनुमानं द्रष्टव्यम् । एवं रूपा[3]दयः चतुर्विंशतिर्गुणाः । उत्क्षेपणा[4]दीनि पञ्च कर्माणि । परा[5]ऽपरभेदभिन्नं द्विविधं सामान्यम् अनुगतज्ञानकारणम् । नित्यद्रव्यवृत्तयः [6]अन्त्या विशेषाः अत्यन्तव्यावृत्तबुद्धिहेतवः । अयु[7]तसिद्धानामाधार्याधारभूतानाम् 'इह' इति प्रत्ययहेतुर्यः सम्बन्धः स समवाय इति ।

षट्पदार्थपरीक्षायां पार्थिवादिपरमाणुलक्षणनित्यद्रव्यनिराकरणम् –

अत्र प्रतिविधीयते । यत्तावदुक्तम् †–'पृथिव्यप्तेजोवायवो द्विविधाः' इत्यादि; तदसमीचीनम्; परमाणुरूपाणां तेषां सद्भावे प्रमाणाऽभावात् । नहि तत्सद्भावे अस्मदादिप्रत्यक्षं प्रवर्तते अतीन्द्रियत्वात्तेषाम् । नाप्यनुमानम्; तत्सद्भावाऽऽवे[8]दिनस्तस्याऽसंभवात् । नन्विदमस्ति–द्व्यणुकादिकार्यं स्वपरिमाणादल्पपरिमाणकारणाऽऽरब्धं कार्यत्वात् घटादिवत्; इत्यप्यसमीक्षिताभिधानम्; कार्यस्य स्वपरिमाणादल्पपरिमाणकारणारब्धत्वनियमाऽसंभवात् । तथाहि–किं कार्यमात्रं तदारब्धं प्रसाध्येत, द्रव्यत्वविशिष्टं वा कार्यम् ? प्रथमपक्षे बुद्ध्यादिभिर्व्यभिचारः, तेषां कार्यत्वे सत्यपि स्वपरिमाणादल्पपरिमाणकारणारब्धत्वनियमाऽसंभवात् । द्वितीयपक्षे तु भस्मादिना अनेकान्तः, तस्य द्रव्यत्वे सति कार्यत्वे सत्यपि ततोऽल्पप-

---

१ "आकाशमितरेभ्यो भिद्यते अनादिकालप्रवाहायाताकाशशब्दवाच्यत्वात् ।" प्रश० व्योम० पृ० ३२२ । २ "दिक् पूर्वापरादिप्रत्ययलिङ्गा ।" प्रश० भा०पृ० ६६ । "कालः परापरव्यतिकरयौगपद्ययौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम् ।" प्रश० भा० पृ० ६३ । ३ "रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः ।" वैशे० सू० १।१।६। "·····इति कण्ठोक्ताः सप्तदश, चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्त इत्येवं चतुर्विंशतिर्गुणाः ।" प्रश० भा० पृ० १० । ४ "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ।" वैशे० सू० १।१।७। ५ "सामान्यं द्विविधं परमपरं च···अनुवृत्तिप्रत्ययकारणम् ।" प्रश० भा० पृ० ३११ । ६ "अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद् विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वाकाशकालदिगात्ममनःसु प्रतिद्रव्यमेकैकशो वर्तमानाः अत्यन्तव्यावृत्तिबुद्धिहेतवः ।" प्रश० भा० पृ० ३२१ । ७ "अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः ।" प्रश० भा० पृ० ३२४। ८ "तथा कार्यादल्पपरिमाणं समवायिकारणम् तस्याप्यन्यद् अल्पपरिमाणम् इत्याद्यं कार्यं निरतिशयपरमाणुपरिमाणैरारब्धमिति ज्ञायते ।" प्रश० व्यो० पृ० २२४ । ९–रब्धत्वाऽसंभवात् ब०, ज०, भां०, श्र० । † पृ० २१४ पं० ७ ।

रिमाणकारणारब्धत्वाऽप्रतीतेः । न खलु 'कार्यपरिमाणादल्पपरिमाणमेव द्रव्यं कारणम्' इति सर्वत्र व्याप्तिः, किन्तु 'कार्यं कारणं विना न भवति' इति व्याप्तिः, कार्यपरिमाणाद् अधिकस्य न्यूनस्य समस्य वा द्रव्यस्य कारणत्वप्रतीतेः । तत्र महतः पलालकूटात् प्रशिथिलावयवकार्पासपिण्डाच्च न्यूनपरिमाणस्य भस्मनः निबिडाऽवयवकार्पासपिण्डस्य च प्रादुर्भावः प्रतीयते, अल्पपरिमाणाच्च बीजात् महापरिमाणस्य वृक्षादेः, समपरिमाणाच्च दुग्धादेः समपरिमाणस्य दध्यादेः इति । न च किञ्चित् कार्यद्रव्यं स्वपरिमाणादल्पपरिमाणकारणपूर्वकमुपलभ्य सर्वं कार्यद्रव्यं तथा साधयितुं युक्तम्; शब्द-विद्युत्-प्रदीपादीनां क्षणिकत्वमुपलभ्य सकलार्थानां सत्त्वादेः क्षणिकत्वसाधनप्रसङ्गात् । 'दृष्टान्तमात्रसद्भावेऽपि अत्र साकल्येन व्याप्तेरभावान्न तत्साधकत्वम्' इत्यन्यत्रापि समानम् । अतः परमाणूनां सद्भावस्य कुतश्चित् प्रमाणादप्रसिद्धेः 'परमाणुरूपाः पृथिव्यादयो नित्याः सदकारणवत्त्वात्' इत्यत्र हेतोर्विशेषणाऽसिद्धत्वम् ।

विशेष्याऽसिद्धत्वञ्च स्कन्धभेदपूर्वकत्वात्तेषाम्; तथाहि–परमाणवः स्कन्धाऽवयविद्रव्यविनाशकारणकाः तद्भावभावित्वात् घटविनाशपूर्वककपालवत् । नचेदमसिद्धम्; द्व्यणुकाद्यवयविद्रव्यविनाशे एव परमाणुसद्भावप्रसिद्धेः । विभाग एव तद्विनाशाज्जायते नाणवः; इत्ययुक्तम्; स्कन्धस्याप्येवमहेतुकत्वप्रसङ्गात् । शक्यते हि वक्तुम्–'संयोग एव अणुसङ्घाताज्जायते न स्कन्धः' इति । सर्वदा स्वतन्त्रपरमाणूनां तद्विनाशमन्तरेणाऽपि सद्भावसंभवाद् भागाऽसिद्धो हेतुः; इत्यपि मनोरथमात्रम्; तेषामसिद्धेः, 'विवादापन्नाः परमाणवः स्कन्धभेदपूर्वका एव तत्त्वात् द्व्यणुकादिभेदपूर्वकपरमाणुवत्' इत्यनुमानविरोधाच्च । ननु पटोत्तरकालभावितन्तूनां पटभेदपूर्वकत्वेऽपि तत्पूर्वकालभाविनां तेषामतत्पूर्वकत्ववत् परमाणूनामपि अस्कन्धभेदपूर्वकत्वं केषाञ्चित् स्यात्; इत्यप्यसुन्दरम्; तेषामपि प्रवेणीभेदपूर्वकत्वेन स्कन्धभेदपूर्वकत्वप्रसिद्धेः ।

ननु परमाणूनां ग्राहकप्रमाणाऽभावतो भवद्भिरेव अभावप्रतिपादनात् न तेषां स्कन्धभेदपूर्वकत्वप्रतिज्ञा श्रेयसी; इत्यप्यनुपपन्नम्; भवतामेव अनवद्यतत्साधकप्रमाणाऽभावतः तदभावप्रतिपादनात्, अस्माकन्तु निरवद्यतत्साधकाऽनुमानस्य सद्भावतः तेषां सद्भावोपपत्तेः तद्भे-

---

१ "श्लिथावयवकार्पासपिण्डसंघाततो यथा । घनावयवकार्पासपिण्डः समुपजायते ॥ ७ ॥···कश्चित् परिमाणादणुपरिमाणकारणपूर्वकः कश्चित् महापरिमाणकारणपूर्वकः कश्चित् समानकारणारब्धः ।" तत्त्वार्थश्लो० पृ० ४३२ । "हेतुश्चानैकान्तिकः प्रशिथिलावयवमहापरिमाणकार्पासपिण्डात् अल्पपरिमाणनिबिडावयवकार्पासपिण्डोत्पत्तिदर्शनात् ।" अष्टसह० पृ० २१० । प्रमेयक० पृ० ७५ उ० । स्या० रत्ना० पृ० ८७० । २ इत्यत्रापि ब०, ज०, भां०, श्र० । ३ –दप्रसिद्धे पर–आ० । ४ "भेदादणु ।" तत्त्वार्थसू० ५।२७ । ५ "विभागः परमाणूनां स्कन्धभेदान्न वाऽणवः । नित्यत्वादुपजायन्ते मरुत्पथवदित्यसत् ॥ २ ॥ संयोगः परमाणूनां संघातादुपजायते । न स्कन्धस्तद्भदेवेति वक्तुं शक्तेः परैरपि ॥ ३ ॥" तत्त्वार्थश्लो० पृ० ४३१ । प्रमेयक० पृ० १६० उ० । ६ तेषां तत्पू–श्र० । ७–त्पूर्वकत्वात् आ०, ब०, ज०, भां० । ८ "तस्यापि तन्त्वादेः कार्पासप्रवेणीभेदादेव उत्पत्तिप्रसिद्धेः ।" तत्त्वार्थश्लो० पृ० ३९३ ।

दपूर्वकत्वप्रतिज्ञा उपपन्नैव । तथाहि–अणुपरिमाणतरतमादिभेदः क्वचिद् विश्रान्तः परिमाण-तर-तमादिभेदत्वात् महत्परिमाणतरतमादिभेदवत् । यत्र च अस्य विश्रान्तिः ते परमाणवः, इति न तेषां सद्भावाऽसंभवः ।

नित्यैकरूपताया एव असंभवात्, तद्रूपतायां तेषां क्रम-यौगपद्याभ्यामर्थक्रियाकारित्वाऽनुपपत्तेः ; तथाहि–एकान्ततो नित्यस्वभावाः सन्तः परमाणवः सर्वदा कार्याऽजननस्वभावा इष्यन्ते, तद्विपरीता वा ? प्रथमविकल्पे द्व्यणुकादिकार्यस्य सर्वदाऽसत्त्वप्रसङ्गः सर्वदा तदजननस्वभावेभ्यः तेभ्यः तदुत्पत्त्यनुपपत्तेः ; यद् यदजननस्वभावम् न ततस्तदुत्पत्तिः यथा शालिबीजाद् यवाङ्कुरस्य, द्व्यणुकादिकार्याऽजननस्वभावाश्च सर्वदा भवद्भिः परिकल्प्यन्ते परमाणव इति । तथा च परमाणूनामपि असत्त्वमेव स्यात्, कार्याऽकारित्वात्, यत् कार्याऽकारि न तत् सत् यथा गगनेन्दीवरम्, कार्याऽकारिणश्च सर्वदा तदजननैकस्वभावतया भवन्मते परमाणव इति । अथ सर्वदा कार्यजननैकस्वभावास्तेऽभ्युपगम्यन्ते तँत्रापि–किम् एकाकिनस्ते तज्जननैकस्वभावा इष्यन्ते, सहकारिसमन्विता वा ? यदि एकाकिनः ; तदा तत्प्रभवकार्याणां सकृदेव उत्पत्तिः स्यात्, अविकलकारणत्वात्, ये अविकलकारणाः ते सकृदेव उत्पद्यन्ते यथा समानसमयोत्पादा बहवोऽङ्कुराः, अविकलकारणाश्च जननैकस्वभावाऽणुकार्यत्वेन अभिमताः सर्वे भावा इति । तथाभूतानामप्येषामतोऽनुत्पत्तौ सर्वदाऽनुत्पत्तिप्रसङ्गः अविशेषात् ।

नँनु समवायि-असमवायि-निमित्तभेदात् त्रिविधं कारणं कार्यजन्मनि व्याप्रियते । यत्र हि कार्यं समवैति तत् समवायिकारणम् यथा द्व्यणुकस्य अणुद्वयम् । यच्च कार्यैकार्थसमवेतं कार्यकारणैकार्थसमवेतं वा कार्यमुत्पादयति तद् असमवायिकारणम् यथा पटारम्भे तन्तुसंयोगः, पट-

---

१ "तथा घटादिकारणकारणेषु अल्पतरादिभावः क्वचिद्विश्रान्तः तरतमशब्दत्वाच्यत्वात् महापरिमाणवत्, यत्र विश्रान्तस्ते परमाणवः इति ।" प्रश० व्यो० पृ० २२४ । "अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवत्, यत्रेदं विश्रान्तं यतः परमाणुर्नास्ति स परमाणुः ।" प्रश० कन्दली पृ० ३१ । स्या० रत्ना पृ० ८७० । २ महापरि–आ०, ब०, ज० । ३–वाः परमा–ब०, ज० । ४ अत्रापि भां० । ५ ते जननैक–ब०, ज० । ६ "नित्यत्वे सकलाः स्थूला जायेरन् सकृदेव हि । संयोगादि न चापेक्ष्यं तेषामस्त्यविशेषतः ॥ ५५२ ॥ यदि पर्वतादीनां स्थूलानां कारणभूताः परमाणवो नित्याः सन्तीत्यभ्युपगम्यन्ते तदा तत्कार्याणां स्थूलानामविकलकारणत्वात् सकृदेवोत्पत्तिप्रसङ्गः । प्रयोगः–ये समग्राऽप्रतिबद्धकारणाः ते सकृदेव भवन्ति, यथा बहवोऽङ्कुरास्तुल्योत्पादाः···।" तत्त्वसं० पं० पृ० १८६ । प्रमेयक० पृ० १५९ उ० । सन्मति० टी० पृ० ६५७ । स्या० रत्ना० पृ० ८७० । ७ "स्यादेतत् त्रिविधं कारणमिष्टं समवायिकारणमसमवायिकारणं निमित्तकारणं च···तत्र अपेक्षणीयस्य संयोगादेरसन्निहितत्वात् समग्रकारणत्वमसिद्धम् अतोऽसिद्धो हेतुः, इत्याशंक्याह–संयोगादीति । यदि हि संयोगादिना कश्चिद् विशेषोऽणूनामाधीयेत तदा ते तमपेक्षेरन् । यावत् परैरनाधेयविशेषा एवाणवो नित्यत्वात् तत्कथं संयोगादि तेषामपेक्ष्यं स्यात् ।···" तत्त्वसं० पं० पृ० १८६ ।

समवेतद्रव्यारम्भे पटोत्पादकतन्तुरूपादि च। शेषं तूत्पादकं निमित्तकारणम् अदृष्ट-आकाशादि। तत्र संयोगादेरपेक्षणीयस्य अभावात् अविकलकारणत्वं तेषामसिद्धम्; इत्यपि श्रद्धामात्रम्; संयोगादिना अनाधेयाऽतिशयत्वेनाऽणूनां तदपेक्षाऽनुपपत्तेः। अथ संयोग एव अमीषामतिशयः; स किं नित्यः, अनित्यो वा? नित्यश्चेत्; सर्वदा कार्योत्पत्तिः स्यात् तदतिशयभूतस्य संयोगस्य सदा सत्त्वात्। अथ अनित्यः; तदा तदुत्पत्तौ कोऽतिशयः स्यात्–संयोग एव, क्रिया वा? संयोगश्चेत्; किं स एव, संयोगान्तरं वा? न तावत् स एव; अस्य अद्याप्यसिद्धेः, स्वोत्पत्तौ स्वस्यैव व्यापारविरोधाच्च। नापि संयोगान्तरम्; तस्य अनभ्युपगमात्, अभ्युपगमे वा तदुत्पत्तावपि अपरसंयोगातिशयकल्पनाप्रसङ्गाद् अनवस्था स्यात्। नापि क्रिया अतिशयः; तदुत्पत्तावपि पूर्वोक्तदोषाऽनुषङ्गात्। किञ्च, 'अदृष्टापेक्षाद् आत्माऽणुसंयोगात् परमाणुषु क्रिया उत्पद्यते' इति भवताऽभ्युपगमात्, आत्म-परमाणुसंयोगोत्पत्तावपि अपरोऽतिशयः कल्पनीयः तत्र च तदेव दूषणम्, इति अपराऽनवस्था।

किञ्च, असौ संयोगो द्व्यणुकादिनिर्वर्त्तकः किं परमाण्वाश्रितः, तदन्याश्रितः, अनाश्रितो वा? तत्र आद्यपक्षे तदुत्पत्तौ आश्रयः उत्पद्यते, न वा? यदि उत्पद्यते; तदा अणूनामपि कार्यताऽनुषङ्गः असंयोगरूपतापरित्यागेन संयोगरूपतया परिणमनात्। अथ नोत्पद्यते; कथं तर्हि असौ तदाश्रितः स्यात्, विरुद्धधर्माऽध्यासतः ततस्तस्य अत्यन्तभेदप्रसङ्गात्? तथाभूतोऽप्यसौ तत्सम्बद्धत्वात् तदाश्रितः इति चेत्; केन पुनः सम्बन्धेन असौ तत्सम्बद्धः–समवायेन, संयोगेन, कार्यकारणभावेन वा? न तावत् समवायेन; अस्याऽसत्त्वात्, तदसत्त्वञ्च अग्रे निराकरिष्यमाणत्वात् सिद्धम्। नापि संयोगेन; संयोगे संयोगस्याऽसंभवात् गुणत्वेन अस्य द्रव्यवृत्तित्वात्। नापि कार्यकारणभावेन; संयोगं प्रति अणूनां कारणत्वाऽभावात्, तदभावश्च अनतिशयत्वात्। अनतिशयानामपि जनकत्वे सर्वदा जनकत्वप्रसङ्गः अविशेषात्। अतिशयान्तरकल्पने च अनवस्था तदुत्पत्तावपि अपराऽतिशयपरिकल्पनप्रसङ्गात्। अन्याश्रितत्वे तु संयोगस्य परमाण्वतिशयत्वाऽनुत्पत्तिः तत्सम्बन्धाऽभावात्, यत्रैव हि असौ आश्रितः तस्यैव अतिशयः नान्यस्य अतिप्रसङ्गात्। अनाश्रितत्वं तु तस्य अनुपपन्नम्, गुणत्वात्, यो गुणः नासौ अनाश्रितः यथा रूपादिः, गुणश्च भवद्भिरभिप्रेतः संयोग इति। अनाश्रितत्वे वा गुणत्वाऽनुपपत्तिः; यदनाश्रितम् न तद् गुणः यथा आकाशादि, अनाश्रितश्च परमाण्वतिशयरूपतया भवत्कल्पितः संयोग इति।

---

१ "…सर्वात्मगतवृत्तिलब्धाऽदृष्टापेक्षेभ्यः तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ…" प्रश० भा० पृ० ४८। "सर्वात्मगताश्च वृत्तिलब्धाश्च अदृष्टाश्च तानपेक्षन्ते ये तत्संयोगाः आत्माणुसंयोगाः तेभ्यः पवनपरमाणुषु कर्माण्युत्पद्यन्ते। पवनपरमाणवः समवायिकारणम्, लब्धवृत्त्यदृष्टवदात्मपरमाणुसंयोगः असमवायिकारणम्, अदृष्टं निमित्तकारणम्…।" प्रश० कन्दली पृ० ५२। २ परमाण्वादावाश्रितः ब०, ज०। ३–न संयोगस्या–आ०, ब०।

किञ्च, असौ संयोगः तेषां सर्वात्मना, एकदेशेन वा स्यात् ? यदि सर्वात्मना; पिण्डोऽणुमात्रः स्यात्[1]। अथ एकदेशेन; तदा अणूनां सांशत्वप्रसङ्गः। तन्न एकाकिनां तेषां[2] तज्जननैकस्वभावता घटते। नापि सहकारिसमन्वितानाम्; यतः तेषां सहकारिणः स्वगताऽतिशयविशेषा एव, वस्त्वन्तराणि वा ? प्रथमपक्षे प्रागुक्त-अशेषदोषाऽनुषङ्गः। द्वितीयपक्षेऽपि वस्त्वन्तराणि अणूनामुपकारं कुर्वन्ति, न वा ? कुर्वन्ति चेत्; किं भिन्नम्, अभिन्नं वा ? यदि अभिन्नम्; तदा तेषां कार्यत्वम्। अथ[3] भिन्नम्; तदा तत एव कार्यनिष्पत्तेः परमाणूनामकारकत्वं स्यात्। अथ तत्कृतोपकारसहकारिणस्ते कारकाः; ननु उपकारस्य[4] तत्सहकारित्वम् उपकारान्तरेण, सत्तामात्रेण वा ? तत्र आद्यविकल्पे अनवस्था उपकारान्तरस्यापि उपकारान्तरकारित्वेनैव सहकारित्वप्रसङ्गात्। द्वितीयविकल्पे तु अतिप्रसङ्गः, सत्तामात्रेण सर्वस्य सर्वं प्रति सहकारित्वप्रसक्तेः।

किञ्च, एते सहकारिणः परस्परोपकार्योपकारकभावेन अणूनुपकुर्वन्ति, अन्यथा वा ? यदि उपकार्योपकारकभावेन; तदा पुनरपि उपकारस्य तेभ्यो भेदाऽभेदपक्षयोः प्रागुक्ताऽशेषदोषोपनिपातप्रसङ्गः। अथ सहकारिणः अणूनां परस्परस्य[5] वा न किञ्चित् कुर्वन्ति, कार्यस्यैव मिलित्वा तैः निर्वर्तनात्; एतदप्ययुक्तम्; यतः प्रत्येकं समर्थाः सन्तोऽणवः सहकारिभिः सह मिलित्वा कार्यं कुर्वन्ति, असमर्था वा ? यदि समर्थाः; तदा प्रत्येकं तेषाञ्च कार्यजनकत्वप्रसङ्गात् तावद्भा कार्यस्य भेदप्रसङ्गः, सहकार्यपेक्षावैयर्थ्यञ्च स्यात्। अथ प्रत्येकमसमर्थास्ते; तर्हि तत्सन्निधाने कुतस्तेषां सामर्थ्यं स्यात् ? सहकारिभ्य एव इति चेत्, ननु तैस्तेभ्योऽभिन्नम्, भिन्नं वा सामर्थ्यं विधीयते ? यदि अभिन्नम्; तदा तेषां कार्यत्वप्रसङ्गः। अथ भिन्नम्; तदा तेषां तेन सम्बन्धाऽनुपपत्तिः समवायादेरसंभवात्, तत एव कार्योत्पत्तिप्रसक्तितः अणूनामकारकत्वञ्च स्यात्।

अस्तु वा यथाकथञ्चित् तेषां सामर्थ्यम्; तथापि येन[6] रूपेण एकं कार्यं परमाणवो जनयन्ति तेनैव कार्यान्तरम्, रूपान्तरेण वा ? यदि तेनैव; तदा सकलकार्याणामेकत्वप्रसङ्गः, एकस्वभावकारणकार्यत्वात्, यत् एकस्वभावकारणकार्यम् तद् एकम् यथा विवक्षितकार्यम्, तथाभूतानि च परमाणुकार्यतयाऽभिमतानि अखिलकार्याणि इति। अथ रूपान्तरेण; तदा तत्काले प्राक्तनं तद्रूपं निवर्त्तते, न वा ? यदि निवर्त्तते; तदा अणूनामनित्यत्वप्रसङ्गः, स्वरूपप्रच्युतिलक्षणत्वात्तस्य, यस्य स्वरूपप्रच्युतिः तदनित्यम् यथा घटादि, प्राक्तनस्वरूपप्रच्युतिश्च रूपान्तरोत्पत्तिसमयेऽणूनामिति। अथ न निवर्त्तते; तदा कथं तेषां रूपान्तरसंभवः ? यत्र प्राक्तनं

१ "षट्केन युगपद् योगात् परमाणोः षडंशता। षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः॥१२॥" विंश० विज्ञप्तिमा०। २–षां जननैक–ब०, ज०। ३ अथ तु भि–अ०। ४ उपकारकस्य ब०, ज०। ५ परस्य वा आ०। ६ "किं येन स्वभावेन आद्यामर्थक्रियां करोति किं तेनैव उत्तराणि कार्याणि, समासादितस्वभावान्तरः करोति ?···" तत्त्वोप० पृ० १२६।

रूपं न निवर्त्तते न तत्र रूपान्तरस्य संभवः यथाऽनिवर्त्तमानसङ्कोचितरूपायामङ्गुल्यां प्रसारितरूपस्य, न निवर्तते च उत्तरकार्यजननस्वरूपसमये प्राक्तनं कार्यजननस्वरूपं परमाणूनाम् इति। तत्समये तेषां तत्सम्भवे वा युगपत् सकलकार्यजननसामर्थ्यसंभवाद् युगपदेव अखिलकार्याणामुत्पादः स्यात्। तदेवमेकान्ततो नित्यैकस्वभावतायां परमाणूनां कार्यकारित्वाऽनुपपत्तेः प्राक्तन-अजनकस्वभावपरित्यागेन विशिष्टसंयोगपरिणामपरिणतानां जनकस्वभावसंभवात् सिद्धं कथञ्चिदनित्यत्वम्। प्रयोगः—ये क्रमवत्कार्यहेतवः ते अनित्याः यथा क्रमवदङ्कुरादिनिर्वर्त्तका बीजादयः, तथाभूताश्च परमाणव इति। तन्न भवत्परिकल्पितं पार्थिवादिपरमाणुलक्षणं नित्यद्रव्यं व्यवतिष्ठते।

नापि तदारब्धं द्व्यणुकाद्यवयविद्रव्यम्, सिद्धे हि कार्य-कारणभावे तदारब्धत्वं द्व्यणुकादेः वक्तुं शक्येत, न च भवन्मते असौ सिद्धः विचार्यमाणस्य अस्य अत्राऽनुपपद्यमानत्वात्। तथाहि—यौगमते तावत् किमिदं द्व्यणुकाद्यवयविद्रव्यस्य कार्यत्वं नाम—स्वकारणसत्तासमवायः, अभूत्वाभावित्वं वा? प्रथमपक्षे किं कार्यस्य स्वकारणैः सत्तया च समवायः, किं वा स्वकारणानां सत्तया समवायः, आहोस्वित् सत्तया युक्तस्तत्समवाय इति? तत्र आद्यपक्षे किं कार्यस्य उत्पन्नस्य तैः तया च समवायः, अनुत्पन्नस्य, उभयरूपस्य, अनुभयरूपस्य वा? यदि उत्पन्नस्य; अन्योन्याश्रयः—सिद्धे हि स्वकारणसत्तासमवाये कार्यस्य उत्पत्तिसिद्धिः, तत्सिद्धौ च तत्समवायसिद्धिरिति। तत्समवायनिरपेक्षस्य चाऽस्य स्वातन्त्र्येणोत्पत्तौ तत्समवायकल्पनानर्थक्यम्, यत् स्वातन्त्र्येण प्रसिद्धम् न तत् क्वचिदन्यत्र समवैति यथा घटः पटे, स्वातन्त्र्येण प्रसिद्धश्च भवन्मते कार्यमिति। कारणवार्त्ता चात्र अतिदुर्लभा, पदार्थात्मलाभे हि व्याप्रियमाणस्य वस्तुनः कारणत्वं व्यपदिश्यते नान्यस्य अतिप्रसङ्गात्। निष्पन्ननिष्पत्त्यर्थश्चास्य व्यापारे सर्वदाऽनुपरतिप्रसङ्गात् न कदाचित् कार्यस्य स्वरूपसिद्धिः स्यात्। अनुत्पन्नस्य चास्य आकाशकुशेशयप्रख्यत्वात् कथं स्वकारणैः सत्तया च समवायः स्यात्? उत्पन्नाऽनुत्पन्नत्वञ्च एकस्यैकदाऽतिदुर्घटम्, न हि एकत्रैकदा परस्परविरुद्धौ धर्मौ एकान्तवादिनो घटेते। अनुभय-

षट्पदार्थपरीक्षायां तदारब्धस्य द्व्यणुकाद्यवयविरूपपृथिव्यादिद्रव्यस्य कार्यकारणभावनिरसनपुरस्सरं प्रतिविधानम्—

---

१ प्राक्तनकार्य—ब०, भां०। २ "स्वकारणे समवायः, प्रागसतः सत्तासमवायो वा कार्यत्वमित्येके; तदयुक्तम्; प्रध्वंसे तदभावात्, तस्मात् कारणाधीनः स्वात्मलाभः कार्यत्वम्…।" प्रश० कन्द० पृ० १८। "किमिदं कार्यत्वं नाम? स्वकारणसत्तासम्बन्धः, तेन सत्ता कार्यमिति व्यवहारात्। अभूत्वा भवनम् इत्येके…।" प्रश० व्यो० पृ० १२९। "कार्यत्वमभूत्वाभावित्वम्…।" प्रश० किरणा० पृ० २९। न्यायभा० ५।१।३७। ३—भयस्य वा ब०, ज०। ४ वास्य ब०, ज०। ५ यद्यर्था—ब०, ज०। ६ च आका—आ०।

रूपता तु अस्य अनुपपन्ना ; विधिप्रतिषेधधर्मयोर्मध्ये एकतरनिषेधे अन्यतरविधेरवश्यंभावित्वात्। कारणानां तु सत्तया समवाये कार्यस्य किमायातम् ? नहि घटस्य सत्तया समवाये पटस्य किञ्चिद् भवति ।

किञ्च, कार्यस्वरूपमपेक्ष्य कारणस्य कारणव्यपदेशो भवति, न च अश्वविषाणप्रख्यस्य कार्यस्य किञ्चिद्रूपं पश्यामः यदपेक्ष्य अस्य कारणत्वं स्यात् , अकारणत्वे चास्य कथं कार्यनिष्पादकत्वम् ? अथ सत्तया सहितः तत्समवाय एव कार्यस्य कार्यत्वम् ; तन्न; समवायस्यासिद्धस्वरूपतया तल्लक्षणत्वाऽयोगात् , तदसिद्धस्वरूपता चास्य अग्रे निराकरिष्यमाणत्वात् सुप्रसिद्धा । अस्तु वाऽसौ ; तथापि अस्य नित्यतया आत्मादिवत् कार्यत्वाऽयोगः, तत्त्वे वा नित्यत्वाऽनुपपत्तिः; यत् कार्यम् न तन्नित्यम् यथा घटादि, कार्यञ्च भवद्भिः परिकल्पितः समवाय इति । सत्तायुक्तसमवायस्य च कार्यलक्षणत्वे तथाविधस्यास्य सर्वत्र सर्वदा सर्वान् प्रत्यविशेषात् आकाशादीनामपि कार्यत्वप्रसङ्गः । किञ्च, अयं समवायः सम्बन्धः, सम्बन्धश्च सम्बन्धिकार्यः सम्बन्ध्याश्रितश्च भवति यथा संयोगः। कार्यभूतस्य च सम्बन्धिनोऽनिष्पन्नत्वात् न तत्कार्यत्वं तदाश्रितत्वं वा समवाये घटते, तन्निष्पत्तौ वा युतसिद्धत्वेन तत्र संयोग एव स्यात् न समवायः , तस्य अयुतसिद्धसम्बन्ध्याश्रितत्वेन योगैः अभ्युपगमात्। अथ विलक्षणोऽयं सम्बन्धः यदसिद्धेऽपि सम्बन्धिनि स्यात् ; तदसत्; यतः 'सम्बध्नाति सम्बन्धिनौ' इति सम्बन्धः, स च असति सम्बधिनि कथं स्यात् ? अन्यथा वन्ध्यायाः तत्सुते सम्बन्धः स्यात्। प्रध्वंसस्य च सत्तासमवायाऽभावतः अकार्यत्वप्रसङ्गात् तदुत्पत्तये मुद्गरादिकारणवैयर्थ्यम् ।

अथ अभूत्वाभावित्वं कार्यत्वम्; तदपि कस्य ? योऽभूत्वा भवति तस्य इति चेत्; ननु चात्र अभवने भवने च कस्य कर्तृत्वम् ? कार्यस्य तावत् शशविषाणप्रख्यत्वात् न कर्तृत्वम्, भवनं हि स्वरूपस्वीकारः, स च असतो दुर्घटः। तन्न कार्यत्वं परस्य किञ्चिद् घटते ।

नापि कारणत्वम् ; तद्धि कार्यमात्रनिष्पादकत्वम्, नियतकार्यनिष्पादकत्वं वा स्यात्? प्रथमपक्षे सर्वं सर्वस्य कारणं स्यात् तन्मात्रनिष्पादकत्वस्य सर्वत्र संभवात् , इति न नियतकार्यार्थी कश्चित् नियतकारणोपादानं कुर्यात्। द्वितीयपक्षे तु कार्यस्य अश्वविषाणप्रख्यत्वात् कथं कारणस्वरूपं तेन अवच्छिद्येत ? वास्तवं हि रूपं सता एव अवच्छिद्यते । असता अवच्छेदे च कारणस्यापि असत्त्वप्रसङ्गः 'असन् घटः' इति यथा । विकल्पमात्रकल्पितेन तेन तस्य अवच्छेदे तु कारणत्वमपि तादृगेव स्यात्, नहि कल्पितेन अवच्छेदे वस्तुनो वास्तवं रूपं सिद्ध्यति, यथा सिंहो माणवक इति । किञ्च, कारणानां कार्यालम्बना प्रवृत्तिः , अनालम्बना वा ? यदि अनालम्बना; न

१–ख्यस्य कि–आ०, ब०, ज०, भां० । २–न्न प्रमाणतः सम–भां० । ३–द्धरूप–ब०, ज०, । ४–द्धरूप–ब०, ज० । ५–स्य स–आ० । ६–द्यते आ० ।

क्वचित्तानि विरमेयुः, ततश्च खरविषाणादीनामपि उद्भवः स्यात्। अथ कार्यालम्बना ; तदाऽस्य सत्ता अङ्गीकृता स्यात्, इति कारणव्यापारवैफल्यम्।

ननु कारणानां न व्यापारवशेन कारणत्वम्, किन्तु यद्भावाऽभावाभ्यां यस्य भावाऽभावौ 'तत् तस्य कार्यम् इतरत् कारणम्' इति व्यपदिश्यते; तदसत्यम्; एवं सति यथा 'तदभावे न भवति' इत्यत्र न कश्चिद् व्यापारः कारणगतः तथा 'तद्भावे भवति' इति कारणसद्भावमात्रं प्रतिपादितं स्यात्, न कार्यविषये किञ्चित्करत्वम्। कथञ्चैवंवादिनः गगनादेः क्वचित् कारणत्वसिद्धिः तस्य नित्यत्व-व्यापित्वाभ्यां देशकालकृतव्यतिरेकाऽसंभवात्। किञ्च, 'तस्मिन् सति भवति' इति 'तच्छब्देन' यो निर्दिष्टः 'भवति' इत्यनेन च, तयोरुपकार्योपकारकभावाऽभावे [२]संभवति 'स भवति' इति मृदर्थमात्रप्रतिपादनमेव कृतं स्यात्, ततश्च [३]परापेक्षाप्रतिलब्धकर्माद्यभिधानप्रवृत्तद्वितीयादिविभक्तिवाच्यता न क्वचित् स्यात्, इति स्वरूपसत्तामात्रेणैव अर्थाः प्रतिपादिताः स्युः न सामर्थ्यभाक्त्वेन।

अथ पूर्वकालभावित्वमात्रं कारणत्वम् न तु व्यापारः कश्चित् ; तर्हि सर्वेषां पूर्वकालभाविनां जगदुदरवर्तिनां [४]कारणत्वप्रसङ्गादतिप्रसङ्गः स्यात्। अथ नियमेन पूर्वकालभावित्वं[५] ; तर्हि मेर्वादेरपि पटं प्रति कारणत्वं स्यात् तदविशेषात्। ननु नैव मेर्वादिः पूर्वमेव भवति उत्तरकालमपि अनुवृत्तेः ; इत्यन्यत्रापि समानम्, नहि तन्तवः पटोत्पत्त्युत्तरकालं नानुवर्त्तन्ते प्रतीतिविरोधात्। ननु नियतकाल एव कार्यकारणभावः अन्त्यतन्तुसंयोगोपलक्षितायाः सामग्र्या एव पटं प्रति कारणत्वात्, पटस्यापि स्वसत्तालाभक्षणे एव कार्यत्वम्, अन्यथा अविकलकारकसामग्रीसन्निधाने पुनः पटान्तरोत्पत्तिः स्यात्। [६]नन्वेवं पूर्वक्षणभाविनि कारणे अनन्तरक्षणभाविनि च कार्ये स्वकालनियते सहभावाऽभावात् इतरेतरसव्यपेक्षं यत् कार्यत्वं कारणत्वञ्च तद् दुर्घटम्।

किञ्च, असति व्यापारे नियमेन पूर्वकालभावित्वमात्रेण कारणत्वकल्पने बीजपूरकादिरूपोत्पत्तौ तदवयवगतानां रसादीनामपि कारणत्वं स्यात्, तथा रसाद्युत्पत्तौ तदवयवगतरूपस्यापि, अतश्च रूपादीनां नियमेन सजात्यारम्भकत्वं न स्यात्। तदेवं परमते कार्यकारणभावस्य विचार्यमाणस्य अनुपपद्यमानत्वात् 'द्व्यणुकाद्यवयविरूपाः पृथिव्यादयोऽनित्याः उत्पत्तिमत्त्वात्' इत्याद्ययुक्तम् ; हेतोः स्वरूपाऽसिद्धत्वात्। उत्पत्तिमत्त्वं हि कार्यत्वमुच्यते, तच्च उक्तप्रकारेण भवन्मते सर्वथाऽसिद्धम्। आश्रयाऽसिद्धश्च ; स्वावयवेभ्योऽत्यन्तविभिन्नस्य पृथिव्याद्यवयविनः कुतश्चित् प्रमाणादप्रसिद्धेः।

१–कभावे भां०, श्र०। २ संभवति सति इति सप्तमी बोध्या। कारणे कार्ये च तच्छब्दनिर्देशेन तस्मिन् मृल्लक्षणेऽर्थे 'स भवति' इति मृल्लक्षण एवार्थो भवतीति अयमर्थः स्यात् न 'घटो भवति' इत्यर्थः। ३ परोक्षप्रति–आ०। ४–प्रवृत्ति–ब०, ज०। ५ कारणप्रसङ्गः स्यात् आ०। ६–त्वं तर्त्तर्हि श्र०। ७ नत्वेवं पूर्वक्षणेभा–आ०। ८ कार्यकारणनानात्वस्य खण्डनम् अष्टसहस्र्याः चतुर्थपरिच्छेदे द्रष्टव्यम्।

ननु अतोऽनुमानात् तस्य तेभ्यः सर्वथा विभिन्नस्य प्रसिद्धिः–अवयव-अवयविनौ अत्यन्तं भिन्नौ भिन्नप्रतिभासत्वात् घटपटवत्, घटपटादौ हि भिन्नप्रतिभासित्वमत्यन्तभेदे सत्येव उपलब्धम् इति अवयव-अवयविनोः तद् उपलभ्यमानं कथन्नात्यन्तभेदं प्रसाधयेत् ? अन्यत्रापि अस्य तदप्रसाधकत्वप्रसङ्गात्। नचानयोर्भिन्नप्रतिभासत्वमसि- ५

षट्पदार्थपरीक्षायाम् 'अवयव-अवयविनौ अत्यन्तं भिन्नौ भिन्नप्रतिभासत्वादिभ्यः' इति यौगानां पूर्वपक्षः–

द्धम्; पटाद्यवयविप्रतिभासस्य तन्त्वाद्यवयवप्रतिभासवैलक्षण्येन अशेषप्राणिनां सुप्रसिद्धत्वात्। तथा विरुद्धधर्माध्यासतोऽपि अनयोर्जल-अनलवद् भेदः। नच विरुद्धधर्माध्यासोऽप्यनयोः असिद्धः; पटो हि पटत्वजातिसम्बन्धी विलक्षणाऽर्थक्रियासम्पादकः अतिशयेन महत्त्वयुक्तः, तन्तवः तन्तुत्वजातिसम्बन्धिनः अल्पपरिमाणादिधर्मोपेताश्च, इति कथन्नाऽतो भिद्यन्ते? विभिन्नकर्तृकत्वाच्च घट-पटवत्, तन्तवो हि चात्र प्रवेणी-रण्डाकरव्यापाराद् आत्मलाभं प्रतिपद्यन्ते, १०
तुरि-तन्तु-वेम-शलाका-तन्तुवायव्यापारात्तु पट इति। विभिन्नशक्तिकत्वाच्च विष-अगदवद् अवयव-अवयविनोर्भेद एव, पूर्वोत्तरकालभावित्वाच्च पिता-पुत्रवत्, विभिन्नपरिमाणत्वाच्च बदर-आमलकवत्। प्रतिभासभेदे विरुद्धधर्माध्यासादौ च सत्यपि अनयोरभेदे पदार्थसङ्करः स्यात् सर्वत्र भेदव्यवहारोच्छेदप्रसङ्गात्, नहि प्रतिभासभेदादिकं विहाय अन्यत् तद्व्यवहार- १५
निबन्धनमुत्प्रेक्षामहे।

तादात्म्याऽभ्युपगमे च अवयवाऽवयविनोः प्रतिभासभेदादिकमतिदुर्लभम्; तादात्म्यं हि एकत्वमुच्यते, तस्मिन् सति कथं प्रतिभासभेदो विरुद्धधर्माध्यासादिकं वा स्यात् विभिन्नविषयत्वात् तयोः ? यदि च तन्त्वाद्यवयवेभ्यो नार्थान्तरं पटाद्यवयवी; तर्हि तन्तवोऽपि स्वांशुभ्यो नाऽर्थान्तरम् तेऽपि स्वाऽवयवेभ्यः इति एवं तावत् यावन्निरंशाः परमाणवः, तेभ्यश्च अभेदे सर्वस्य कार्यग्रामस्य अनुपलम्भः स्यात्। तस्माद् अर्थान्तरमेव अवयवेभ्यः अवयवी २०
प्रतिपत्तव्य इति।

यदप्युच्यते–अवयवेभ्यो नास्ति अर्थान्तरभूतोऽवयवी वृत्तिविकल्पाद्यनुपपत्तेः खरविषाणवत्। न चेयमसिद्धा; तथाहि–अर्थान्तरभूतः पटाद्यवयवी तन्त्वाद्यवयवेषु एकदेशेन वर्त्तेत, सर्वात्मना वा ? न तावद् एकदेशेन; अवयवव्यतिरेकेण अवयविनोऽपरदेशाऽभावात्, भावे वा तेष्वपि अनेन 'इत्थं वर्त्तितव्यम्' इति अनवस्था स्यात्। सर्वात्मना वृत्तौ; एकत्रैव अव- २५
यवे सर्वात्मनाऽस्य वृत्तत्वाद् अन्येषामवयवानामवयविशून्यताप्रसङ्गः, यावन्तो वाऽवयवाः तावन्तोऽवयविनः स्युः प्रत्यवयवं तस्य सर्वात्मना परिसमाप्तत्वात्।

---

१ तदनुप–ब्र०। २–सोऽनयोः आ०, ब०, ज०, भां०। ३–कर्तृत्वाच्च आ०। "विभिन्नकर्तृशक्तयादेः भिन्नौ तन्तुपटौ यथा। विरुद्धधर्मयोगेन स्तम्भकुम्भादिभेदवत् ॥ ५६१ ॥" इति पूर्वपक्षरूपेण तत्त्वसं० पृ० १८९। ४ भेदव्यवच्छेद–ब्र०, ज०। ५–न् व्यवहारनिबन्धनमुपेक्षामहे आ०।

तदप्यसमीचीनम्; यतः[1] अवयविनो निरासे स्वतन्त्रमिदं साधनम्, प्रसङ्गसाधनं वा ? यदि स्वतन्त्रम्; धर्मि-साध्यपदयोः व्याघातः यथा 'इदञ्च, नास्ति च' इति । हेतोश्च आश्रयाऽसिद्धता, अवयविनोऽसिद्धत्वात् । न च वृत्त्या सत्त्वं व्याप्तम्, समवायवृत्तेरनभ्युपगमेऽपि भवता रूपादेः सत्त्वाभ्युपगमात् । एकदेशेन सर्वात्मना वा अवयविनो वृत्तिप्रतिषेधे विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाविषयत्वात् प्रकारान्तरेण वृत्तिरभ्युपगता स्यात्, अन्यथा 'न वर्तते' इत्येव अभिधातव्यम् । वृत्तिश्च समवायः, तस्य सर्वत्र एकत्वात् निरवयवत्वाच्च कात्स्न्यैंकदेशशब्दाऽविषयत्वम्, कात्स्न्यैंकदेशशब्दयोर्भेदविषयत्वाच्च अभिन्नेऽवयविनि प्रवृत्तिरयुक्ता । 'कृत्स्नम्' इति हि अनेकत्वे सति अशेषस्याऽभिधानम्, 'एकदेश' इति च अनेकत्वे सति कस्यचिदभिधानम् । तौ एतौ कात्स्न्यं-एकदेशशब्दौ भेदे सत्येव प्रतिपन्नत्वाद् एकस्मिन् अवयविनि अनुपपन्नौ । तन्नेदं स्वतन्त्रसाधनम् ।

अथ प्रसङ्गसाधनम्[3] परस्येष्ट्या अनिष्टाऽऽपादनात्; ननु परेष्टिः प्रमाणम्, अप्रमाणं वा ? यदि प्रमाणम्; तर्हि तयैव बाध्यमानत्वाद् अनुत्थानं विपरीताऽनुमानस्य । न[4] च अनेनैव अस्या बाधा, तामन्तरेण अस्याऽपक्षधर्मतया प्रामाण्यस्यैव असंभवात् । अथ अप्रमाणं सा; तर्हि 'प्रमाणं विना प्रमेयस्याऽसिद्धिः' इत्येतदेव अभिधातव्यम्, किमनुमानोपन्यासाऽऽयासेन इति ?

अत्र प्रतिविधीयते । यत्तावदुक्तम्[6]—'भिन्नप्रतिभासत्वात्' इति साधनम्; अतः अवयव-

अवयवेभ्योऽत्यन्तभिन्नस्य नित्यनिरंश-अवयविनः प्रतिविधानम्—

अवयविनोः किं कथञ्चिद्भेदः साध्यते, सर्वथा वा ? यदि कथञ्चित्; तदा सिद्धसाधनम् तयोः कथञ्चिद्भेदस्य अस्माभिरपि इष्टत्वात् । अथ सर्वथा; तदा पक्षस्य अध्यक्षबाधा, कथञ्चित्तादात्म्यापन्नयोरेव अनयोः अबाधाऽध्यक्षे प्रतिभासनात् । यद्

---

१ "तथा हि वृत्त्यनुपपत्तेरसत्त्वमिति किमिदं स्वतन्त्रसाधनमुत प्रसङ्गसाधनमिति । यदि स्वतन्त्रसाधनम्; अवयवी धर्मी, नास्तीति साध्यमिति प्रतिज्ञावाक्यपदयोः व्याघातः यथा इदं नास्ति चेति । हेतोराश्रयासिद्धत्वं च धर्मिणोऽप्रसिद्धत्वात् । तथा स्वमते रूपादीनां सत्त्वं न च वृत्तिरस्ति इति व्यभिचारः समवायानभ्युपगमात् ।...न च परस्य वृत्त्या सत्त्वं व्याप्तम्...।" प्रश० व्यो० पृ० ४५ । २ "एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ।" न्यायसू० ४।२।११ । "किं प्रत्यवयवं कृत्स्नोऽवयवी वर्त्तते अथैकदेशेन इति नोपपद्यते प्रश्नः । कस्मात् ? एकस्मिन् भेदाभावात् भेदशब्दप्रयोगानुपपत्तेः । कृत्स्नमिति हि एकस्य अशेषाभिधानम् । एकदेश इति नानात्वे कस्यचिदभिधानम् । ताविमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविनि उपपद्येते भेदाऽभावात् ।" न्यायभा० ४।२।११ । ३ "अथ परव्याप्त्या परस्य अनिष्टापादनमिति...तत्र यदि परेण प्रमाणात् प्रतिपन्नः तेनैव बाध्यमानत्वादनुत्थानं विपरीतानुमानस्य । न चानेनैव तस्य बाधात् तदन्तरेण पक्षधर्मत्वादिति । अथाप्रमाणेन प्रतिपन्नः तर्हि प्रमाणं विना प्रमेयस्यासिद्धिरिति वाच्यं किमनुमानोपन्यासेन तस्य अपक्षधर्मतयाऽप्रमाणत्वात्...?" प्रश० व्यो० पृ० ४६ । ४ न चास्या बाधा आ० । ५ इत्येतावदेव ब०, ज०, भां०, श्र० । अनयैव दिशा पूर्वपक्षः—तत्त्वसं० पृ० १८९ । प्रमेयक० पृ० १५५ पू० । सन्मति० टी० पृ० ६५८ । स्या० रत्ना० पृ० ८७३ । अवयव-अवयविभेदविषयिणी चर्चा च—न्याय सू०, भा०, वा०, ता० टी० २।१।३२, ४।२।५। न्यायमं० पृ० ५५० । प्रश० व्यो० पृ० ४४ । प्रश० कन्दली पृ० ४१ । इत्यादिषु द्रष्टव्या । ६ पृ० २२३ पं २ ।

यथा अबाधाऽध्यक्षे प्रतिभासते तत् तथैव अभ्युपगन्तव्यम् यथा नीलं नीलतया, अबाधाऽध्यक्षे प्रतिभासेते च कथञ्चित्तादात्म्येन अवयव-अवयविनौ इति । न च तत्प्रतिभासिनोऽध्यक्षस्य अबाधत्वविशेषणमसिद्धम्; तद्बाधकस्य कस्यचिदपि प्रमाणस्य असंभवात् ।

न खलु प्रत्यक्षं तद्बाधकम्; अत्यन्ततद्भेदस्य अत्राप्रतिभासमानत्वात् । अनुमानमपि भिन्नप्रतिभासत्वाद् हेतोराविर्भूतं तद्बाधकं स्यात्, भिन्नार्थक्रियाकारित्वात्, भिन्नकारणप्रभवत्वात्, भिन्नकालत्वात्, विरुद्धधर्माध्यासात्, विभिन्नशक्तिकत्वात्, विभिन्नपरिणामत्वाद्वा ? न तावद् भिन्नप्रतिभासत्वाद् आविर्भूतादनुमानाद् अवयवाऽवयविनोः आत्यन्तिको भेदः सिद्ध्यति; प्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वेन अस्य 'अनुष्णोऽग्निः द्रव्यत्वात्' इत्यादिवत् कालात्ययापदिष्टत्वात्, दूराऽऽसन्नपुरुषप्रतिभासिना पादपाद्यर्थेन अनैकान्तिकत्वाच्च । नापि भिन्नार्थक्रियाकारित्वात्; नर्तक्यादिना व्यभिचारात्, एकाऽपि हि नर्तकी करण-अङ्गहार-भ्रूभङ्ग-अक्षिविक्षेपाद्यनेककक्रियां प्रेक्षकजनानां हर्ष-विषादाद्यनेकार्थक्रियाश्च परस्परविलक्षणां विदधातीति । भिन्नकारणप्रभवत्वमपि अङ्कुरादिनाऽनैकान्तिकम्, एकस्यापि अङ्कुरस्य क्षित्याद्यनेककारणकलापादुत्पत्तिप्रतीतेः । भिन्नकालत्वादपि रण्डाकरण्डावस्थतन्तुभ्यः पटस्य भेदः प्रसाध्यते, पटावस्थतन्तुभ्यो वा ? प्रथमपक्षे सिद्धसाधनम्, तेभ्यः तद्भेदस्य अस्माभिरप्यभ्युपगमात् । द्वितीयपक्षे तु असिद्धो हेतुः; पटावस्थतन्तूनां पटाद् भिन्नकालत्वस्याऽसंभवात् ।

विरुद्धधर्माध्यासोऽपि धूपदहनादिना अनैकान्तिकत्वान्न तदत्यन्तभेदप्रसाधकः; न खलु हस्तलग्न-इतरप्रदेशयोः शीत-उष्णस्पर्शलक्षणविरुद्धधर्माऽध्यासेऽपि धूपदहनादेर्भेदोऽस्ति । न च हस्तलग्नेतरप्रदेशयोरेव शीतोष्णस्पर्शाधारता न धूपदहनाद्यवयविनः इत्यभिधातव्यम्; प्रत्यक्षविरोधात् ।

[6]भिन्नशक्तित्वाद् [8]भिन्नपरिणामत्वाच्च तन्तु-पटादीनां कथञ्चिदवस्थाभेद एव सिद्ध्येन्न पुनः आत्यन्तिको भेदः, तत्र च सिद्धसाधनम् । अतो भिन्नप्रतिभासत्वादेरपि अवयवाऽवयविनोः कथञ्चिद्भेदस्यैव प्रसिद्धेः [10]सिद्धं कथञ्चित्तदभेदग्राहिणोऽध्यक्षस्य अबाधत्वविशेषणम् । यद् यद्रूपतया प्रमाणतो न प्रतीयते तत् तद्रूपं न भवति यथा घटः पटरूपतया, न प्रतीयते च अत्यन्त-

---

१–न्तं तद्भे– ब०, ज० । २–नन्तरप्र– ब०, ज० । ३ अनेकान्ताच्च श्र०, ब०, ज० । ४ "नहि एकत्र नर्त्तक्यादिक्षणे युगपदुपनिबद्धदृष्टीनां प्रेक्षकजनानां विविधं कर्म बुद्धिव्यपदेशसुखादिकार्यमसिद्धं येन स्वभावाऽभेदेऽपि विविधकर्मता न भवेत् ।" अष्टसह० पृ० ९५ । ५ "प्रथमेभ्यश्च तन्तुभ्यः पटस्य यदि साध्यते । भेदः साधनवैफल्यं दुर्निवारं तदा भवेत् ॥५७९॥ प्राप्तावस्थाविशेषा हि ये जातास्तन्तवोऽपरे । विशिष्टार्थक्रियासक्ताः प्रथमेभ्यो विलक्षणाः ॥५८०॥" तत्त्वसं० पृ० १९४ । प्रमेयक० पृ० १५७ पू० । ६–रभ्यु– ज० । ७–कालस्य ब०, ज० । ८ विभिन्न– ब०, ज०, श्र० । ९ विभिन्न– ब०, ज०, श्र० । १० प्रसिद्धं श्र० ।

भेदरूपतया अवयवाऽवयविनौ इति । तन्त्वाद्यवयवानां हि अवस्थाविशेषः स्वात्मभूतः शीतापनोदाद्यर्थक्रियाकारी पटाद्यवयवी प्रतिभासते न पुनः तेभ्योऽत्यन्तमर्थान्तरभूतः, तथाविधस्य अस्य स्वप्नेऽप्यप्रतिभासनात् ।

तथा तदप्रतिभासनं हि अदृश्यस्वभावत्वात्, समवायात्, कार्यकारणभावात्, विशेषण-विशेष्यभावाद्वा ? न तावद् अदृश्यस्वभावत्वात्; 'भूयोऽवयवग्रहणे सति अवयविनो ग्रहणम्' इत्यभ्युपगमव्याघातप्रसङ्गात्। नापि समवायात्; कथञ्चित्तादात्म्यव्यतिरेकेण अपरस्य समवायस्य समवायनिषेधे निषेत्स्यमानत्वात् । नापि कार्यकारणभावात् ; कुम्भ-कुम्भकारयोरप्यभेदप्रतिभासप्रसङ्गात् । तन्त्वाद्यवयवानां पटाद्यवयविनं प्रति समवायिकारणत्वात्तत्रैव अभेदप्रतिभासः; इत्यप्यसुन्दरम् ; समवायाऽसिद्धौ समवायिकारणत्वस्याप्यसिद्धेः, नहि कथञ्चित्तादात्म्यमन्तरेण अन्यः समवायः, तथापरिणामित्वव्यतिरेकेण वा अन्यत् समवायिकारणं क्वापि प्रसिद्धम् । नापि विशेषणविशेष्यभावात्; दण्ड-पुरुषयोरपि अभेदप्रतिभासप्रसङ्गात्, यथैव हि 'पटविशिष्टास्तन्तवः' इति तन्तुपटयोर्विशेषणविशेष्यभावोऽस्ति तथा दण्ड-पुरुषयोरपि । अतः अवयवेभ्यः अवयविनोऽत्यन्तभेदे सति अनुपलम्भकारणाऽभावात् तथैव असौ उपलभ्येत, न च उपलभ्यते, अतो नाऽसौ ततोऽत्यन्तभिन्न इति । यद् यतः अत्यन्तभेदेन भिन्नं नोपलभ्यते न तत् ततोऽत्यन्तभिन्नम् यथा अवयविनः स्वरूपम्, अवयवेभ्योऽत्यन्तभेदेन भिन्नो नोपलभ्यते च अवयवीति ।

यदप्युक्तम्[3]–'स्वतन्त्रसाधनं प्रसङ्गसाधनं वा' इत्यादि; तदप्यसारम् ; यतो भवतु प्रसङ्गसाधनं स्वतन्त्रं वा, किमेतावता भवतः ? यदपि 'स्वतन्त्रसाधने धर्मि-साध्यपदयोर्व्याघातः' इत्याद्युक्तम्; तदप्ययुक्तम् ; यतो नाऽवयविनः सद्भावनिरासार्थमिदमुच्यते, किं तर्हि ? तदत्यन्तभेदस्य । 'नहि अवयवेभ्योऽत्यन्तभिन्नोऽवयवी कुतश्चिदपि प्रतीयते' इत्युक्तम् , यस्तु प्रती-

---

१ "तथाहि–केचित्तन्तवो विशिष्टावस्थाप्राप्ताः शीतापनोदनाद्येकार्थक्रियासमर्था भवन्ति नापरे ये योषित्कर्तृकाः तत्रैकार्थक्रियोपयोगिनस्तन्तून् विशिष्टान् प्रतिपादयितुं पट इत्येका श्रुतिः विनिवेश्यते व्यवहर्तृभिः··· ।" तत्त्वसं० पं० पृ० १९५ । प्रमेयक० पृ० १५७ पू० । सन्मति० टी० पृ० ६६२। २ "भूयोऽवयवेन्द्रियसन्निकर्षानुगृहीतेन अवयवेन्द्रियसन्निकर्षेण ग्रहणात्··· ।" प्रश० व्यो० पृ० ४६ । ३ पृ० २२४ पं० १ । ४ "स्वातन्त्र्येण इत्यादिना शंकरस्वामिनः परिहारमाशङ्कते–स्वातन्त्र्येण प्रसङ्गेन साधनं यत्प्रवर्त्तते । स्वयं तदुपलब्धौ हि सत्यं संगच्छते न तु ॥ ६१४ ॥ न च कात्स्न्यैंकदेशाभ्यां वृत्तिः क्वचन लक्षिता । अस्याऽसंभवाद् द्रव्यमसत्स्यादपरोऽपि च ॥ ६१५ ॥ दृष्टौ वा क्वचिदेतस्या द्रव्यादावनिवारणात् । अथ तस्मिन्नदृष्टौ तु भेदे प्रश्नो न युज्यते ॥६१६॥ एतावत्तु भवेद्वाच्यं वृत्तिर्नास्तीति तच्च न । युक्तं प्रत्यक्षतः सिद्धेरिहेदमिति बुद्धितः ॥ ६१७ ॥ प्रत्यक्षं न तदिष्टं चेद्बाधकं किञ्चिदुच्यताम् । रूपादिचेतसोऽपि स्यान्नैव प्रत्यक्षताऽन्यथा ॥ ६१८ ॥" तत्त्वसं० पृ० २०४ । ५–न्त्रसाधनं वा ब०, ज० । ६–ता यदपि ब०, ज०, भां० । ७ पृ० २२४ पं० २ । ८ तदयुक्तम् भां० ।

तिसिद्धः तन्त्वाद्यवयवानामाऽऽतानवितानीभावादिपरिणतानाम् आत्मभूतोऽवस्थाविशेषः पटाद्यवयवी नाऽसौ निरस्यते, तत्र वृत्तिविकल्पादिदूषणाऽनवतारात्। अर्थान्तरभूतं हि वस्तु वर्तमानम् 'एकदेशेन सर्वात्मना वा वर्तते' इत्यादिदोषमास्कन्दति, न पुनः स्वात्मभूतम् तस्य तथापरिणामात्। यत् स्वात्मनोऽर्थान्तरे वर्त्तते तत् सर्वात्मना एकदेशेन वा, यथा कुण्डे बिल्वादि अनेकाऽऽसनेषु देवदत्तादि च, स्वात्मनोऽर्थान्तरेष्ववयवेषु वर्तते च अवयवीति। ५

यच्चान्यदुक्तम्[2]–'वृत्तिश्च समवायः' इत्यादि; तदप्युक्तिमात्रम्; समवायस्य निर्मूलमुन्मूलितत्वेन आकाशकुशेशयवत् कस्यचित् क्वचिद् वृत्तित्वाऽनुपपत्तेः। यदप्यभिहितम्[3]–'कात्स्न्यैंकदेशशब्दयोर्भेदविषयत्वाद् अभिन्नेऽवयविनि प्रवृत्तिरयुक्ता' इत्यादि; तदप्यभिधानमात्रम्; अनेकाऽवयवेषु एकस्याऽनंशस्य अर्थान्तरभूतस्याऽवयविनो वर्तमानस्य अप्रतीतेः, कात्स्न्यैंकदेशश्च परित्यज्य प्रकारान्तरेण वृत्तेरप्यप्रतीतेः। यत् खलु यत्र वर्तते तद् एकदेशेन यथा स्थूणासु वंशः, १० सर्वात्मना वा यथा कुण्डे दधीति। अतः प्रकारद्वयाऽनभ्युपगमेऽवयविनोऽवयवेषु वृत्त्यनुपपत्तिः, तद्व्यापकयोः[4] एकदेश-साकल्ययोरभावात्, तदनुपपत्तौ च अस्य अतः सर्वथा भेदाऽभावः। तथाहि–तन्त्वाद्यवयवेभ्यो न सर्वथा भिन्नः पटाद्यवयवी, कात्स्न्यैंकदेशाऽवृत्तित्वात्, यत्तु यतः सर्वथा भिन्नम् न तत्र तस्य कात्स्न्यैंकदेशाऽवृत्तिः यथा कुण्डादौ दध्यादेः, कात्स्न्यैंकदेशाऽवृत्तिश्च अवयवेषु अवयविन इति। १५

निरंशैकस्वभावत्वे च अवयविनः सकृदनेकाऽवयवव्यापित्वाऽनुपपत्तिः; तथाहि–यत् निरंशैकस्वभावं द्रव्यम् तन्न सकृदनेकद्रव्यव्यापि यथा परमाणुः, निरंशैकस्वभावश्च अवयविद्रव्यमिति। न च आकाशादिनाऽनेकान्तः; तस्य अनन्तादिप्रदेशतया निरंशत्वाऽसिद्धेः। यदि वा, यद्[5] अनेकं द्रव्यं तन्न सकृन्निरंशैकद्रव्यव्याप्तम् यथा कटकुड्यादि परमाणुना, अनेकद्रव्याणि च अवयवा इति। निरंशत्वे[6] च अवयविनः कोपीनादिना शरीरस्य एकदेशाऽऽवरणे सकलशरीर- २० मात्रियते, न वा? यदि आत्रियते; तर्हि विवक्षिताऽवयववत् सकलस्याऽस्य अनुपलब्धिप्रसङ्गः।

---

१ "कृत्स्नैकदेशशब्दाभ्यामयञ्चार्थः प्रकाशते। नैरंश्येनास्य किं वृत्तिः किं वा तस्यान्यथैव सा ॥ ६२० ॥ यथा पात्रादिसंस्थस्य श्रीफलादेर्यथाऽथवा। अनेकासनसंस्थस्य चैत्रादेरुपलक्षिता ॥ ६२१ ॥" तत्त्वसं० पृ० २०५। प्रमेयक० पृ० १६२ उ०। सन्मति० टी० पृ० ६६८। "नानाकारैकविज्ञानं स्वाधारे बदरादिवत्। तादात्म्येन पृथग्भावे सति वृत्तिर्विकल्प्यते ॥ १०७ ॥" न्यायवि० पृ० ४८१ उ०। २ पृ० २२४ पं० ६। ३ पृ० २२४ पं० ७। ४ "एकावयव्यनुगता नैव तन्तुकरादयः। अनेकत्वाद्यथा सिद्धाः कटकुड्यकुटादयः ॥ ६०५ ॥ यदि वाऽभिमतं द्रव्यं नानेकावयवाश्रितं। एकत्वादणुवद्वृत्तेरयुक्तिर्बाधिका प्रमा ॥ ६०६ ॥" तत्त्वसं० पृ० २०१। सन्मति० टी० पृ० ६६५। ५ अवयविनः इ–ब०, ज०। ६ "स्थूलस्यैकस्वभावत्वे मक्षिकापदमात्रतः। पिधाने पिहितं सर्वमासज्येताविभागतः ॥ ५९३ ॥ रक्ते च राग एकस्मिन् सर्वं रज्येत रक्तवत्। विरुद्धधर्मभावे वा नानात्वमनुषज्यते ॥५९४॥" तत्त्वसं० पृ० १९८। प्रमाणवा० २।८५। सन्मति० टी० पृ० ६६३। स्या० रत्ना० पृ० ८८३। ७–कलं श–भ०।

अथोच्यते–तदावरणेऽपि न शरीरस्यावरणम् अवयवाऽऽवारकद्रव्यसंयोगस्य तदावरणे सामर्थ्याऽभावात्, न खलु यावानवयवद्रव्यसंयोगोऽवयवमावृणोति तावानेव अवयविनम् तस्य महत्त्वात्। यद्येवम्; प्रदेशतः तदावरणम् अस्ति, न वा ? अस्ति चेत्; न; अनंशस्य प्रदेशाऽभावतः तथा तदावरणाऽनुपपत्तेः, उपपत्तौ वा अनंशताव्याघातः विरुद्धधर्मसंसर्गात्। यद् विरुद्धधर्मसंसर्गि न तद् अनंशम् यथा जलाऽनलादि, विरुद्धधर्मसंसर्गि च आवृताऽनावृतस्वभावतया अवयविस्वरूपम् इति। विरुद्धधर्मसंसर्गेऽपि अस्य अभेदे सर्वत्र भेदवार्तोच्छेदः, विश्वस्य विश्वरूपत्वेऽपि एकद्रव्यत्वप्रसङ्गात्। अथ अवयवाऽऽवारकद्रव्यसंयोगेन अवयविनः प्रदेशतोऽपि नास्त्यावरणम्; तर्हि तत्प्रदेशेऽप्यस्य उपलब्धिप्रसङ्गात् समग्रोऽप्यवयवी उपलभ्येत अविशेषात्, नहि अवयवाऽऽवरणे अनावरणे वा अवयविनः कश्चिद् विशेषोऽस्ति उभयत्राऽस्याऽनावृतत्वाऽभ्युपगमात्। ननु समग्र-असमग्रशब्दयोर्भेदविषयत्वात् अभिन्नेऽवयविनि प्रवृत्तिरयुक्ता; इत्यपि प्रागेव कृतोत्तरम्, अवयविनः कथञ्चिद् भेदप्रतिपादनात्। अवयवाऽऽवरणेऽपि अवयविनोऽनावरणे च तस्य तत्र वृत्तिविरोधः, यत् खलु यत्र वर्त्तते तस्याऽऽवरणे तदपि आव्रियमाणं दृष्टम् यथा कुण्डाऽऽवरणे दधि, वर्तते च अवयवेषु अवयवीति। तथा, यदुपलब्धिपूर्विका यस्योपलब्धिः न तस्य अनुपलब्धौ तदुपलब्धिः यथा त्र्यस्रादिसंस्थानाऽनुपलब्धौ सृङ्गाटकादेः, अवयवोपलब्धिपूर्विका च अवयविनः उपलब्धिः इति। अथ आवृतावयवप्रदेशे तस्य अनुपलभ्यत्वमिष्यते; कथमेवम् अस्यैकत्वं स्यात् उपलभ्याऽनुपलभ्यत्वलक्षणविरुद्धधर्माध्यासतः कथञ्चिद्भेदप्रसिद्धेः ?

रक्ताऽरक्तत्वलक्षणविरुद्धधर्माध्यासाच्च; तथाहि–एकस्मिन् तन्त्वाद्यवयवे रज्यमाने पटाद्यवयवी रज्यते, न वा ? यदि रज्यते; कृत्स्नेऽप्यवयविनि रक्तप्रत्ययप्रसङ्गः। ननु च अवयविनो

---

१ "यो विरुद्धधर्मसंसर्गवान् नासावेकः यथा घटादिरर्थः, विरुद्धधर्माध्यासवांश्च स्थूलो नीलादिरर्थ इति।" (पृ०७८) "अथवा अन्यथाऽयं विरुद्धधर्मसंसर्गः। तथाहि–आवृते एकस्मिन् पाण्यादौ स्थूलस्यार्थस्य आवृतानावृतरूपे युगपद् भवन्तौ विरुद्धधर्मद्वयसंयोगमस्य आवेदयतः।" अवयविनिरा०पृ० ८५। २ "एकावयवावरणेऽपि अवयव्यावरणस्याऽभावात्।" प्रश० कन्दली पृ० ४२। न्यायवा०ता० टी० १।१।३२। पृ० ३८३। "अर्धावरणेऽप्यवयविनोऽनावृतैकरूपत्वात्।" न्यायली०पृ० ९। ३ शृंगाटकादेः ब०, ज०। 'सिंघाड़ा' इति भाषायाम्। ४ "नचैकमेकरागादौ समरागादिदोषतः ॥८८॥" न्यायवि०पृ० १९७ उ०। "तथा रागाऽरागाभ्यां विरोधः संभावनीयः।..." अवयविनिरा० पृ० ८७। ५ "रागद्रव्यसंयोगो रक्तत्वम्, अरक्तत्वञ्च तदभावः, उभयञ्चैकत्र भवत्येव संयोगस्य अव्याप्यवृत्तिभावात्।" प्रश० कन्दली पृ० ४२। न्यायली० पृ० ९। "ननु च इत्यादिना शंकरस्वामिनः परिहारमाशङ्कते–ननु चाव्याप्यवृत्तित्वात् संयोगस्य न रक्तता। सर्वस्यासज्यते नापि सर्वमावृतमीक्ष्यते ॥६००॥" तत्त्वसं० पृ० १९९। "शंकरस्वामी अत्राह–वस्त्रस्य रागः कुङ्कुमादिद्रव्येण संयोग उच्यते। स चाव्याप्यवृत्तिः, तत एकत्र रक्ते न सर्वस्य रागः, न च शरीरादेरेकदेशावरणे सर्वस्यावरणं युक्तमिति।" सन्मति० टी० पृ० ६९४।

रक्तत्वं कुङ्कुमादिद्रव्येण संयोगः, स च अव्याप्यवृत्तिः, नहि रूपादिवत् स्वाश्रयमसौ व्याप्नोति अवयवान्तरे तदुपलब्धावपि अनुपलभ्यमानत्वात्, तत् कथमेकत्र रागे सर्वत्र रागप्रसङ्गः ? इत्यप्यसाम्प्रतम्; निरंशेऽवयविनि संयोगस्य अव्याप्यवृत्तित्वाऽनुपपत्तेः। तस्याऽव्याप्यवृत्तित्वं हि सर्वद्रव्याऽव्यापकत्वम्, नियतप्रदेशे वर्त्तमानत्वम्, अवयवान्तरेऽवयविन्युपलभ्यमानेऽपि अनुपलभ्यमानत्वं वा ? तत्र आद्यविकल्पोऽनुपपन्नः ; द्रव्यस्यैकस्य सर्वशब्दविषयत्वाऽनभ्युपगमात्, निरंशत्वे चास्य कथं तत्संयोगेन साकल्यतः तदव्याप्तिः ? तथा तदव्याप्तौ वा निरंशत्वविरोधः। द्वितीयविकल्पस्तु उपपन्नो यदि अवयविनो नियतप्रदेशत्वमभ्युपगम्येत, तदभ्युपगमे च अपसिद्धान्तप्रसङ्गः, योगैस्तस्याऽप्रदेशत्वप्रतिज्ञानात्। तृतीयविकल्पोऽप्येतेन प्रत्याख्यातः ; तस्य नियतप्रदेशत्वाऽनभ्युपगमे अवयवान्तरेऽवयविन्युपलभ्यमाने तत्संयोगस्याऽनुपलभ्यमानत्वाऽनुपपत्तेः। तन्नास्य अव्याप्यवृत्तित्वमुपपद्यते, तदुपपत्तौ वा सिद्धो विरुद्धधर्माऽध्यासः, तत्कथमस्य सर्वथैकत्वं स्यात् ? अथ तस्मिन् रज्यमानेऽपि असौ न रज्यते; तदप्ययुक्तम्; दृष्टेष्टविरोधात्, 'नहि तन्त्वाद्यवयवे रज्यमाने पटो न रज्यते' इति केनचिद् दृष्टमिष्टं वा।

निरंशत्वे च अवयविनः चित्ररूपप्रतिपत्त्यनुपपत्तिः, नीलादिचित्राऽऽकाराणां विभिन्नप्रतिभास-विरुद्धधर्माऽऽक्रान्तानामेकत्वाऽयोगात्, नहि [3]नीलम् 'पीतम्' इति शक्यं वक्तुम्, तथाभूतानामप्येषामैक्ये नानेकं जगत् स्यात्। ननु न नीलादीनि तत्र रूपाणि 'चित्रम्' इति व्यपदिश्यन्ते तेषां विभिन्नप्रतिभासादितया चित्रज्ञानाऽगोचरत्वात्, किन्तु एकमेव तत् चित्रसंज्ञकं रूपम्, तद्योगात् अवयवी चित्रः यथा शुक्लयोगात् शुक्ल इति ; अत्रापि किं शुक्लादिविशेषशून्यं रूपमात्रं चित्रम्, शुक्लादय एव वा समुदिताः, शुक्लादिरूपविलक्षणं वा तद्रूपम् ? तत्र न तावद् रूपमात्रम्; विशेषशून्यस्य सामान्यस्य क्वचिदप्यनुपलब्धेः। नापि नीलादय एव समुदिताः; प्रत्येकं तेषां चित्रत्वाऽभावात्, नहि 'नीलं चित्रम्' 'पीतं चित्रम्' इत्येकैकशः तेषां चित्ररूपत्वमस्ति। समुदितानां तद् भविष्यति; इत्यप्यसम्भाव्यम्; समुदिता हि बहवः उच्यन्ते, 'चित्रम्' इत्येकम्, न च बहूनामप्राप्तावस्थाविशेषाणामेकं रूपं भवितुमर्हति।

---

१ "यदि सर्वं द्रव्यं न व्याप्नोतीत्यर्थः; तदयुक्तम् ; द्रव्यस्य सर्वशब्दाविषयत्वाभ्युपगमात्। आश्रयस्यैकदेशे वर्तते; तदप्ययुक्तम्; तस्यैकदेशासंभवात्।···" तत्त्वसं० पं० पृ० २००। २-गम्यते श्र०। ३ नीलमेव पीतम्। ४ "अचित्राणि रूपाणि संहत्य पटे चित्रं रूपमुत्पादयन्तीति पक्ष आश्रीयते। एवं चैतस्मिन्न किञ्चिद् बाध्यते।" न्यायवा० ४।२।११-१२ पृ० ५०७। "इष्यत एव अस्माभिर्यथा अवयवसमवेतैः सितहरितलोहितादिभिः असमवायिकारणैः अवयविनि चित्रं रूपमारभ्यत इति।" न्यायवा० ता० टी० ४।२।१२। "तस्मात् संभूय तैरारभ्यते। तच्चारभ्यमाणं विविधकारणस्वभावानुगमात् श्यामशुक्लहरितात्मकमेव स्यात् चित्रमिति च व्यपदिश्यते।" प्रश० कन्दली पृ० ३०।

किञ्च[1], एते नीलादयः किम् आश्रयव्यापिनः, एकदेशवृत्तयो वा ? यदि आश्रयव्यापिनः; तदा एकेनैव नीलेन आश्रयस्य व्याप्तत्वाद् अन्येषां निरवकाशता। एकदेशवृत्तित्वञ्च अयुक्तम्; नहि आश्रयस्य देशाः सन्ति निरंशत्वादवयविनः। अथ अवयवानामेव तानि रूपाणि; तर्हि अवयवी नीरूपः स्यात्, तथा च अस्याऽप्रत्यक्षत्वम्, नीरूपस्यापि प्रत्यक्षत्वे गगनादेरपि प्रत्यक्षताप्रसङ्गः। अथ शुक्लादिरूपविलक्षणं तत् चित्रं[2] रूपम्; तर्हि परिदृश्यमाननीलादिविशेषव्यतिरेकेण विलक्षणैव प्रतीतिः स्यात्, न पुनस्तत्र प्रत्यभिज्ञायमाना नीलादयः प्रतिभासेरन्, न हि शुक्लादिविलक्षणे पीतादौ प्रतिभासमाने शुक्लप्रत्यभिज्ञानमस्ति।

किञ्च, एते नीलाद्युपाधयः अवयविनोऽपकारकाः, उपकारका वा ? तत्राद्यपक्षोऽयुक्तः; अपकारकाणामुपाधित्वाऽयोगात्। द्वितीयपक्षे तु समस्तोपकारकोपाध्यग्रहणे तदुपकार्यत्वेन उपाधिमतोऽप्यग्रहणात् सर्वाऽग्रहणप्रसङ्गः। नियतोपाध्युपकार्यत्वेन अस्य प्रतीतेर्न तत्प्रसङ्गश्चेत्; तर्हि तदुपकार्यत्वेन अस्य प्रतीतौ समस्तोपाध्युपकार्यरूपत्वात् तदुपकार्यत्वेनाप्यस्य ग्रहणप्रसङ्गात् सर्वग्रहणाऽनुषङ्गः[3]। अथ एकोपाध्युपकार्यत्वेन अस्य प्रतिपत्तौ तदुपाधिविशिष्टत्वेनैव ग्रहणात् उपाध्यन्तरविशिष्टत्वेनाऽग्रहणान्न सर्वग्रहणप्रसङ्गः; तर्हि एकस्यावयविनो गृहीताऽगृहीतरूपद्वयप्रसङ्गात् निरंशत्वव्याघातः। नहि तस्य एकोपाध्युपकार्यत्वमेव रूपम्, अपि तु समग्रोपाध्युपकार्यत्वम्, तच्च अखिलोपाध्यप्रतिपत्तौ प्रत्येतुं न शक्यते।

ननु प्रत्युपाध्युपकार्याः तस्य शक्तयो भिन्नाः, तत्र एकोपाध्युपकार्यशक्तिविशिष्टस्य उपाधिमतो ग्रहणेऽपि उपाध्यन्तरोपकार्यशक्तिविशिष्टस्य अग्रहणात् न समग्रग्रहणमिति; अत्रापि उपाधिमतोऽशेषशक्त्यात्मकत्वाद् एकशक्तियुक्तस्य ग्रहणे अशेषशक्तियुक्तस्य ग्रहणप्रसङ्गात् उपाधिवर्गस्याप्यशेषस्य ग्रहणाऽनुषङ्गतः समग्रग्रहणमनिवार्यम्। येनैव हि रूपेण असौ एकां शक्तिं[4] बिभर्त्ति तेनैव अपराम्, तत्रापि रूपान्तरविकल्पनेऽनवस्था निरंशाऽवयवविप्रतिज्ञाक्षतिश्च[5]। किञ्च, हस्तआकाशविभागाद् यदैव शरीर-आकाशविभागः तदैव पाद-आकाशसंयोगजः शरीर-आकाशसंयोगः, इति एक एव अवयवी एकेनैवाऽऽकाशेन एकदैव संयुक्तो वियुक्तश्च इति अन्योन्यविरुद्धरूपद्वयाऽऽक्रान्तः कथमेकान्तेन एकत्वभाग् भवेत् ? यद् अन्योन्यविरुद्धरूपद्वयाऽऽक्रान्तम् न तद् एकान्तेनैकम् यथा प्रसारितेतराङ्गुलिस्वरूपम्, अन्योन्यविरुद्धरूपद्वयाऽऽक्रान्तश्च आकाशादिना संयुक्तेतररूपः शरीराद्यवयवीति।

---

१ "अतो बहूनां रूपाणामेकस्यां पृथिव्यामभ्युपगमे व्याघातः। अभ्युपगम्यापि च ब्रूमः। शुक्लादीनां बहूनामेकत्र सद्भावे किमाश्रयव्यापित्वं प्रदेशवर्तित्वं वा ?..." प्रश० व्यो० पृ० २२१। २ चित्ररूपम् ज०। ३ "एकोपकारके ग्राह्येऽदृष्टाः तस्मिन्न सन्ति ते। सर्वोपकारकं ह्येकं तद्ग्रहे सकलग्रहः॥" प्रमाणवा० १।५६। "तदुक्तम्–एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे। दृष्टे यस्मिन्नदृष्टास्ते तद्ग्रहे सकलग्रहः।" अष्टसह० पृ० १५२। ४–किं निधत्ते ते–आ०। ५–रपरिकल्पने ब०, ज०, भां०, श०।

एवं चलोऽचलादिलक्षणविरुद्धधर्मद्वयेऽपि एकान्तेन एकत्वप्रतिक्षेपो द्रष्टव्यः, पाण्याद्यवयवे हि चलति तत्प्रदेशे शरीराऽवयविनः चलत्वम् अन्यत्र च अचलत्वमिति। ततो न अवयवेभ्योऽत्यन्तभिन्नो निरंशोऽवयवी प्रतिपत्तव्यः, किं तर्हि ? तन्त्वाद्यवयवानामेव आतानविता-नीभूताद्यवस्थाविशेषविशिष्टानां कथञ्चिदेकत्वपरिणतिलक्षणोऽवस्थाविशेषः पटाद्यवयवी प्रतिपत्तव्यः, तस्यैव 'यमहमद्राक्षम् एतर्हि तमेव संस्पृशामि' इति प्रतीतेरिति। ५

प्रासङ्गिकः 'रूपादिव्यतिरिक्तो नास्ति अवयवी' इति बौद्धस्य पूर्वपक्षः—

नन्वु रूपादिव्यतिरिक्तस्य अवयविनः कुतश्चित् प्रमाणादप्रतीतेः कथं तदभ्युपगमः प्रेक्षावतां युक्तः ? तथाहि—तद्व्यतिरिक्तः अवयवी प्रत्यक्षतः प्रतीयेत, अनुमानतो वा ? न तावत् प्रत्यक्षतः; चक्षुरादीन्द्रियप्रभवप्रत्यये हि रूपादिकमेव अवभासते नापरोऽवयवी, तस्यैव अवयवित्वव्यपदेशे न किञ्चिदनिष्टम्, संज्ञामात्रभेदात्। नाप्यनुमानतः; १० प्रत्यक्षाऽविषये तस्याप्रवृत्तेः। यदि हि कदाचित् प्रत्यक्षतोऽवयवी प्रतिपन्नः स्यात्, तेन च अविनाभूतं किञ्चिल्लिङ्गम्; तदा क्वचित् धूमादग्निवत् तद्दर्शनादसौ अनुमीयेत, न च रूपादिव्यतिरेकेण स्वप्नेऽप्यसौ प्रत्यक्षे प्रतिभासते, अतः अस्य ग्राहकप्रमाणाऽभावाद् अभाव एव ज्यायान्। यद्ग्राहकं प्रमाणं नास्ति तदसत् यथा खरविषाणम्, नास्ति च अवयविनो ग्राहकं किञ्चित् प्रमाणमिति।

तदुत्पत्तौ कारणाऽनुपपत्तेश्च; यदुत्पत्तौ कारणं नोपपद्यते तत् नास्ति यथा वन्ध्यास्तनन्धयः, नोपपद्यते च अवयव्युत्पत्तौ किञ्चित्कारणमिति। नचेदमसिद्धम्; द्व्यणुकाद्यवयव्युत्पत्तौ हि कारणं परमाणुसंयोगः, स च तेषां सर्वात्मना एकदेशेन वा नोपपद्यते। सर्वात्मना हि परमाणूनां संयोगे पिण्डस्याऽणुमात्रत्वप्रसङ्गाद् दत्तोऽवयविने जलाञ्जलिः। नाप्येकदेशेन; अणूनां देशाऽसंभवात्, तत्संभवे तेषां परमाणुत्वाऽनुपपत्तेः दिग्भागभेदतः परमाणुषट्केन युगपत् संयुज्यमानानां तेषां षडंशतापत्तेः। तस्मादयःशलाकाकल्पाः परमाणव एव परमार्थतोऽभ्युपगन्तव्याः। न च अवयविद्रव्याऽनभ्युपगमे अन्योन्याऽसम्बद्धेषु अयःशलाकाकल्पेषु अणुषु स्थूलैकाकारप्रतिपत्तिर्न स्यादित्यभिधातव्यम्; केशेषु तैमिरिकोपलब्धिवत् तत्र तत्प्रतिपत्त्यु-

१ "पाण्यादिकम्पे सर्वस्य जन्मप्राप्तेर्विरोधिनः। एकत्र कर्मणोऽयोगात् स्यात् पृथक् सिद्धिरन्यथा॥" प्रमाणवा० २।८४। "तत्र पाण्यादावेकस्मिन् कम्पमाने स्थूलोऽर्थः सकम्पनिष्कम्पे रूपे युगपत् प्रतिपद्यमानः कथं विरुद्धधर्मसंसर्गवान्न स्यात्···?" अवयविनिरा० पृ० ८१। २—त्वे प्र—आ०। एकप्रति—ब०, ज०। ३ प्रतीतेः ननु आ०। ४ 'ननु' इत्यतः प्राक् आदर्शे लिखितः 'बौद्धः' इति शब्दः टिप्पणीगत एवेति प्रतिभाति। ५ "षट्केन युगपद्योगात्" इत्यादि; विज्ञप्तिमा० कारि० १२। "यद्वा सर्वात्मना वृत्तौ अनेकत्वं प्रसज्यते। एकदेशेन चानिष्टा नैको वा न क्वचिच्च सः॥ ६१३॥" तत्त्वसं०। ६—पत्तिः श्र०। ७—पत्तिः श्र०। ८ "अयःशलाकाकल्पा हि क्रमसंगतमूर्त्तयः। दृश्यन्ते व्यक्तयः सर्वाः कल्पनाभिश्रितात्मकाः॥ ४२॥" "अणुसंहतिमात्रञ्च घटाद्यस्माभिरिष्यते॥ ७८॥" तत्त्वसं०। ९ "यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम्॥ १॥" विंश० विज्ञप्ति०। "समानज्वालासंभूतेर्यथा दीपे न विभ्रमः। नैरन्तर्यस्थितानेकसूक्ष्मवित्तौ तथैकधा॥५८९॥" तत्त्वसं०।

पपत्तेः । यथैव हि तैमिरिकस्य स्थूलैकाकाररहितेष्वपि केशेषु तदाकारा प्रतीतिर्भवति एवमस्मदादेः परमाणुष्वपि, नहि एकैकशः तैमिरिकेण केशाः कदाचिदपि प्रतीयन्ते । अतः स्थूलादिप्रतीतिर्भ्रान्ता अतस्मिंस्तद्ग्रहणरूपत्वात्, स्थाणौ पुरुषप्रतीतिवत् ।

किञ्च, अनेकाऽवयवव्यापित्वं रूपरसाद्यात्मकत्वञ्च अवयविनो भवद्भिरिष्यते, तच्च अस्याऽखिलावयवग्रहणे सत्येव ग्रहीतुं शक्यम् नान्यथा । तद्ग्रहणञ्च अर्वाग्भागभाव्यवयवग्राहिणा प्रत्यक्षेण स्यात्, परभागभाव्यवयवग्राहिणा, उभयप्रत्यक्षेण वा ? न तावद् अर्वाग्भागभाव्यवयवग्राहिणा ; तस्य परभागभाव्यवयववार्त्ताऽनभिज्ञत्वात्, न च व्याप्याऽग्रहणे तद्व्यापित्वं ग्रहीतुं शक्यम् अतिप्रसङ्गात् । यद् येन रूपेण प्रतिभासते तत् तथैव सद्व्यवहारविषयः यथा नीलं नीलरूपतयाऽवभासमानं तथैव सद्व्यवहारविषयः, अर्वाग्भागभाव्यवयवसम्बन्धितया प्रतिभासते च अवयवीति । तथा च अर्वाग्भागभाव्यवयवसम्बन्ध्यवयविस्वरूपात् परभागभाव्यवयवसम्बन्धितत्स्वरूपस्य विरुद्धधर्माऽध्यासतो भेदसंभवात् कथं निखिलाऽवयवानामेकेनाऽवयविना व्याप्तिः सिद्ध्येत् ? तत्सम्बन्धित्वलक्षणविरुद्धधर्माऽध्यासेऽपि अस्याऽभेदे भेदवार्त्तोच्छेदः स्यात् । तथा यस्मिन् प्रतिभासमाने यन्न प्रतिभासते तत् ततो भिन्नम् यथा घटे प्रतिभासमानेऽप्रतिभासमानः पटः, न प्रतिभासते च अर्वाग्भागभाव्यवयवसम्बन्ध्यवयविस्वरूपे प्रतिभासमाने परभागभाव्यवयवसम्बन्ध्यवयविस्वरूपम् , इति प्रतिभासभेदादपि अस्य भेदः । एतेन परभागभाव्यवयवग्राहिणा प्रत्यक्षेण तद्व्यापित्वग्रहणं प्रत्याख्यातम् । नाप्युभयप्रत्यक्षेण; तस्याऽसंभवात्, नहि अर्वाक्-पर-मध्यभागभाव्यवयवग्राहि एकं प्रत्यक्षं कदाचित् प्रतीयते ।

रूपरसाद्यात्मकत्वमपि अस्य एतेनैव प्रतिविहितम् ; नहि रूपग्राहिणा रसग्राहिणा उभयग्राहिणा प्रत्यक्षेण तद्ग्रहणमुपपद्यते, रूपग्राहिणश्चाक्षुषप्रत्यक्षस्य रसेऽप्रवृत्तेः, तद्ग्राहिणश्च रासनप्रत्यक्षस्य रूपेऽप्रवृत्तेः, उभयग्राहि च प्रत्यक्षं न स्वप्नेऽपि प्रतिभासते इति ।

अत्र प्रतिविधीयते । यत्तावदुक्तम्[४] ' चक्षुरादीन्द्रियप्रभवप्रत्यये ' इत्यादि; तत्र किं तत्प्रभवप्रत्यये घटादिव्यपदेशार्हं रूपम् एकत्वपरिणतिविशिष्टम् ऊर्ध्वाधोमध्यभागात्मकं विशिष्टाऽऽकारोपेतं प्रतिभासते, अन्योन्यविलक्षणाऽनंशपरमाणुप्रचयरूपं वा ? प्रथमपक्षे कथमवयविद्रव्यस्य तत्प्रभवप्रत्ययेऽप्रतिभासः, तद्भागात्मिकाया विशिष्टाकारान्वितायाः तत्परिणतेरेव अवयवित्वात् ? रूपाद्यतिरिक्तस्याऽवयविनः प्रतिभासाभावाद् असत्त्वाऽभ्युपगमे रूपादेरप्यसत्त्वप्रसङ्गः, तद्व्यतिरेकेण अस्याप्यप्रतिभासनात् । न खलु बिल्वाऽऽमलकादि-अवयविद्रव्यरहिताः तद्रूपादयः स्वप्नेऽप्युपलभ्यन्ते । यद् यद्रूपतया निर्बाधबोधे प्रतिभासते तत् तद्रूपमेव प्रतिपत्तव्यम् यथा नीलं नीलरूपतया, प्रतिभासते च एकत्वपरिणत्यादिलक्षण-अव-

तत्प्रतिविधानपुरस्सरा अवयवेभ्यः कथञ्चिदभिन्नस्य एकाऽनेकात्मकस्य अवयविनः सिद्धिः—

१–चित् प्रती–अ०। २ तथाऽर्वा–आ०, भां०। ३–मध्यभाव्य–आ०। ४ पृ० २३१ पं० ८।

यविरूपतया तत्र विल्वाऽऽमलकादिरूपमिति । न च तत्प्रतिभासिनो बोधस्य निर्बाधत्वविशेषणमसिद्धम्; तद्बाधकस्य कस्यचिदपि प्रमाणस्यासंभवात्। न हि प्रत्यक्षादिप्रमाणं तद्बाधकम्; शतशो विचारयतोऽपि एकत्वाद्यात्मनैव अर्थानामवभासनात्।

ननु च अवयवसंयोगपूर्विका एकत्वादिपरिणतिर्भवति, 'न च अवयवानां संयोगः सर्वात्मना एकदेशेन वा घटते' इत्युक्तम्; तदयुक्तम्; यस्मादेवं वदतो भवतःकिं तत्र सम्बन्धाऽभावोऽभीष्टः, कात्स्न्यैंकदेशं परित्यज्य प्रकारान्तरेण वा सम्बन्धोऽभिप्रेत इति ? तत्र आद्यविकल्पे प्रत्यक्षविरोधः, अर्थानामवयवसम्बन्धस्य प्रत्यक्षे प्रतिभासनात्, तदसम्बन्धे रज्जु-वंश-दण्डादेः एकदेशाऽऽकर्षणे तदन्याऽऽकर्षणं न स्यात्। यद् येनासम्बद्धम् न तस्याऽऽकर्षणे तदन्यस्याऽऽकर्षणं दृष्टम् यथा कुम्भाऽऽकर्षणे कुड्यस्य, असम्बद्धश्च भवन्मते रज्जु-वंश-दण्डादेः अवाग्भागः परभागेन इति । अथ कात्स्न्यैंकदेशं परित्यज्य प्रकारान्तरेण अन्योन्यमवयवानां सम्बन्धोऽभिप्रेतः; तद् युक्तम्; स्निग्धरूक्षत्वलक्षणप्रकारान्तरेणैव अर्थानां सम्बन्धोपलब्धेः, नहि सक्तु-तौयादौ तत्परित्यज्य अन्यत्प्रकारान्तरं सम्बन्धहेतुः प्रतीयते ।

यापि अणूनां षडंशतापत्तिः उक्ता; सा किम् आरम्भकदेशापेक्षया, संयोगहेतुभूतस्वभावाऽपेक्षया वा? तत्र प्रथमपक्षे परस्परविरोधः–'परमाणवः' 'षडंशारब्धाश्च' इति । षडंशारभ्यत्वे हि तेषां स्वावयवापेक्षया अधिकपरिमाणत्वसंभवात् कथं परमाणुत्वम् ? यस्य हि निरतिशयमल्पं परिमाणं स परमाणुः । द्वितीयपक्षस्तु न दोषाय, दिग्भागभेदेन अणुसंयोगहेतुभूतस्वभावलक्षण-अंशानां परमाणुष्वभिप्रेतत्वात्, कथमन्यथा जलधारणाहरणाद्यर्थक्रियाकारिणो घटादेर्निष्पत्तिः ? न खलु परमाणवः अयःशलाकाकल्पास्तत्कारिणः, परस्परमसम्बद्धत्वात्, ये परस्परमसम्बद्धाः न ते जलधारणाद्यर्थक्रियाकारिणः यथाँ विभिन्नदेशाः परमाणवः, परस्परमसम्बद्धाश्च घटादिव्यपदेशार्हा भवन्मते परमाणव इति । अथ देशप्रत्यासत्तिविशिष्टास्ते तत्कारिणो नान्ये; तन्न; अवयविनोऽनभ्युपगमे देशप्रत्यासत्तेरप्यनुपपत्तेः देशस्याप्यवयवित्वात्।

एतेन 'अन्योन्यविलक्षणाऽनंशपरमाणुप्रचयरूपं घटादिस्वरूपम् अक्षप्रभवप्रत्यये प्रतिभासते' इति पक्षः प्रत्याख्यातः ; नहि यथोपवर्णितस्वभावाः परमाणवः अक्षप्रभवप्रत्यये कस्यचिदपि अवभासन्ते, स्थिर-स्थूल-साधारणस्वरूपस्यैवाऽर्थस्य अखिलप्राणिनां तत्र प्रतिभासनात्।

१–धवि–आ० । २ "धारणाकर्षणोपपत्तेश्च ।" न्यायसू० २।१।३५ । "कार्यकारणादेरभेदैकान्ते धारणाकर्षणादयः परमाणूनां संघातेऽपि माभूवन् विभागवत् ।" अष्टश०, अष्टसह० पृ० २२३ । प्रमेयक० पृ० १५२ पू० । सन्मति० टी० पृ० २५३ । ३ "स्निग्धरूक्षत्वाद् बन्धः ।" तत्त्वार्थसू० ५।३३ । "सर्वात्मनैकदेशेन वाऽणूनामसम्बन्धात्, सम्बन्धस्य च प्रतीतेः प्रकारान्तरेण एषां सम्बन्ध इति कल्पना युक्तिमुक्तैव ।" सन्मति० टी० पृ० २५२ । ४ पृ० २३१ पं० २१ । ५–हेतुस्व–ब०, ज०, भां०, श्र० । ६–धारणाद्य–आ० । ७–था भिन्न–ब०, ज० । ८–दिरूपम् श्र० । ९ "चक्षुरादिबुद्धौ स्थूलैकाकारः प्रतिभासमानः परमाणुभेदैकान्तवादं प्रतिहन्ति ।" अष्टश०, अष्टसह० पृ० २२३ । "तदनेकार्थसंश्लेषविश्लेषपरिणामतः । स्कन्धस्तु सप्रदेशांशो बहिः साक्षात्कृतो जनैः ॥१०६॥" न्यायवि० पृ० ४८१ उ०।

तैमिरिकोपलब्धिवत् तत्र[1] तत्प्रतिभासः[2]; इत्यप्यसमीचीनम्; नहि [3]तैमिरिकस्यापि अन्योन्यमसम्बद्धाः केशाः कदाचिदपि उपलब्धिविषयाः, संयोगविशेषलक्षणसमूहावस्थापन्नानामेव तेषां तद्विषयत्वप्रतीतेः। केशदृष्टान्ताच्च अवयविप्रतिषेधोऽनुपपन्नः; केशानामेव अवयवित्वात्।

किञ्च, अवयविनोऽनभ्युपगमे घटादिप्रत्ययो निर्विषयः, सविषयो वा स्यात्? न तावन्निर्विषयः; 'घटमहं जानामि' इत्याद्युल्लेखेन अस्य विषयसंवेदकत्वात्, तन्निर्विषयत्वे प्रमाणाऽभावाच्च। 'सर्वे प्रत्यया निरालम्बनाः प्रत्ययत्वात् स्वप्नादिप्रत्ययवत्' इत्यादि च तन्निर्विषयत्वप्रसाधकं प्रमाणं बाह्यार्थसिद्धौ विस्तरतः प्रतिव्यूढम्।

अथ सविषयः; कोऽस्य विषयः? परमाणुसमूहश्चेत्; कः पुनरयं परमाणुसमूहो नाम–किं परमाणव एव, तद्धर्मो वा? तत्राद्यविकल्पोऽनुपपन्नः; परमाणूनामत्यन्तं[4]मणुत्वेन अतीन्द्रियत्वतः प्रत्यक्षविषयत्वाऽनुपपत्तेः, तथा च सर्वाऽग्रहणप्रसङ्गात् न क्वचित् प्रत्यक्षव्यवहारः स्यात्, गुणकर्मसामान्यादेरपि अवयव्यात्मकस्यैव प्रत्यक्षविषयत्वप्रतीतेः 'गौः' 'शुक्लः' 'चलति' इत्यादिवत्। अथ तद्धर्मः संयोगरूपः तत्समूहशब्दवाच्यः; तन्न; अणूनां संयोगाऽभ्युपगमे अवयविप्रत्याख्यानाऽनुपपत्तेः न्यायस्य समानत्वात्, येनैव हि न्यायेन अँयमेकोऽनेकत्र वर्त्तते तेनैव अवयव्यपि। किञ्च, अयं तत्संयोगः वास्तवः, अवास्तवो वा? यद्यवास्तवः; कथं प्रत्यक्षविषयः? यद्वास्तवम् न तत् प्रत्यक्षविषयः यथा गगनेन्दीवरम्, अवास्तवश्च भवद्भिरभिप्रेतोऽणुसंयोग इति। वास्तवत्वेऽपि अस्य अस्मदादिप्रत्यक्षविषयत्वमयुक्तम्, निरतिशयपरिमाणद्रव्यसंयोगत्वात्, यो निरतिशयपरिमाणद्रव्यसंयोगः स न अस्मदादिप्रत्यक्षविषयः यथा आकाशपरमाणुसंयोगः, निरतिशयपरिमाणद्रव्यसंयोगश्च अणूनामन्योन्यसंयोग इति।

ननु न तत्संयोगः अस्मदादिप्रत्यक्षविषयः, किं तर्हि? [10]सञ्चिताः परमाणव एव; इत्यपि अयुक्तम्; परमाणुप्रत्यक्षतापक्षस्य कृतोत्तरत्वात्। [11]सञ्चितत्वञ्चामीषां देशप्रत्यासत्तिः, संयोगविशिष्टत्वं वा स्यात्? उभयत्रापि अवयविसिद्धिः, देशस्य स्वयमवयवित्वात्, संयोगे च समानन्यायात्। यदि च परमाणवस्तद्विषयाः; तदा 'महान् एको घटः' इत्यादिप्रत्ययो न स्यात्, तेषां महत्त्वाऽभावाद् बहुत्वाच्च।

---

१ तत्र प्र–आ०। २ तत्प्रतिभासते श्र०। ३ "केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः।" "स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः।" न्यायसू० ४।२।१३, १४। ४ पृ० १३५। ५–न्तपरमाणु–भां०। "तत्र दिग्भागभेदेन षडंशाः परमाणवः। नो चेत् पिण्डोऽणुमात्रः स्यान्न च ते बुद्धिगोचराः॥ ८७॥" न्यायवि० पृ० १९७। ६–त्मकस्यैकस्यैव श्र०। ७ संयोगः। ८–त्वं न युक्तम् ब०, ज०, भां०, श्र०। ९–णसंयो–आ०, ब०, ज०। १० "सञ्चयमात्रं विषय इति चेन्न; सञ्चयस्य संयोगभावात्तस्य चातीन्द्रियस्याग्रहणादयुक्तम्···।" न्यायभा० ४।२।१४। ११ "सन्निवेशस्तेषां देशप्रत्यासत्तिः, संयोगविशेषो वा?" स्या० रत्ना० पृ० ८८६।

अथ सेना-वनप्रत्ययवत् तत्रासौ घटते, यथैव हि सेनाङ्गेषु वनाङ्गेषु[2] बहुषु दूरादगृह्यमाण-पृथक्त्वेषु 'एकं वनम्, एका सेना' [3]इति एकप्रत्ययः प्रादुर्भवति एवं परमाणुष्वत्यन्तप्रत्यासन्नेषु पृथक्त्वस्याऽग्रहणात् 'महान् एको घटः' इत्यादिप्रत्ययः प्रादुर्भवतीति; तदसाम्प्रतम्; परमाणूनामतीन्द्रियत्वेनाऽनुपलब्धौ तत्प्रत्ययविषयत्वाऽनुपपत्तेः, उपलभ्यमानानां हि रथादिसेनाङ्गानां धवादिवनाङ्गानाञ्च 'एका सेना' इत्याद्यभेदप्रत्ययविषयत्वं दृष्टम् नाऽनुपलभ्यमानानाम्। ५
न च अवयव्यनभ्युपगमे 'सेना-वनप्रत्ययवत्' इति दृष्टान्तो घटते; सेना-वनाङ्गानामवयवित्वेन अनुपपत्तौ सेना-वनप्रत्ययस्याप्यनुपपत्तेः। यदि च एकाऽवयव्यनपेक्षः तद्वद् अवयवेषु एकप्रत्ययः स्यात्; तदा देशभेदे ग्रहणभेदोपलम्भः स्यात्, यत्र एकाऽवयव्यनपेक्षोऽभेदस्वरूपमात्रनिबन्धनः अभेदप्रत्ययः तत्र देशभेदे ग्रहणभेदो दृष्टः यथा सेनावनाङ्गेषु, एकावयव्यनपेक्षश्च अवयवेषु अभेदप्रत्ययो भवता इष्ट इति। सुप्रसिद्धो हि सेना-वनाङ्गेषु देशभेदाद् ग्रहणभेदः १०
दूराद् एकत्वग्रहणस्य आसन्नेऽनेकत्वग्रहणस्य च अवभासनात्, नचैवं देशविकल्पे ग्रहणविकल्पोपपत्तिर्घटादावस्ति। किञ्च, तदङ्गेषु एकाऽवयव्यभावेऽपि देशप्रत्यासत्तेः संयुक्तसंयोगस्य वा एकस्य निमित्तस्य सद्भावात् 'एका सेना' इत्याद्यभेदप्रत्ययो युक्तः, परमाणुषु तु कस्यचिदप्येकस्य निमित्तस्याऽसंभवात् कथमसौ युक्तः?

यच्चान्यदुक्तम्[4]–'स्थूलादिप्रतीतिर्भ्रान्ता अतस्मिंस्तद्ग्रहणरूपत्वात्' इत्यादि; तदप्यसमी- १५
क्षिताऽभिधानम्; अतस्मिंस्तत्प्रत्ययस्य मुख्योपलम्भमन्तरेण अनुपपत्तेः। नहि अप्रसिद्धमुख्यपुरुषस्य स्थाणावपुरुषे पुरुषप्रत्ययो दृष्टः, न च स्थौल्यादिकं मुख्यतो भवतः क्वचित् प्रसिद्धम् अवयविसिद्धिप्रसङ्गात्।

यदप्यभिहितम्[5]–'अर्वाग्भागभाव्यवयवग्राहिणा' इत्यादि; तदप्यभिधानमात्रम्; प्रत्यक्षस्मरणादिसहायेन आत्मना अर्वाक्-परभागभाव्यवयवव्यापकत्वस्य अवयविनो ग्रहणोपपत्तेः। २०
नहि अस्माभिः प्रत्यक्षादिज्ञानपर्याय[6] एव अर्थग्राहकोऽभिप्रेतः येनाऽयं दोषः स्यात्, किं तर्हि? तत्परिणत आत्मा, तत्सद्भावश्च सन्तानविचाराऽवसरे प्रसाधितः[7]।

अर्वाक्-परभागभाव्यवयवसम्बन्धितया च विरुद्धधर्माध्यासात् प्रतिभासभेदाच्च अवयविनः कथञ्चिद्भेदः प्रसाध्येत, सर्वथा वा? यदि कथञ्चित्; तदा सिद्धसाधनम्, न खलु तत्सम्बन्धिनोऽवयविनो यौगवत् निरंशत्वम् अस्माभिरभिप्रेतम्, प्रतिसम्बन्धं सम्बन्धिनः कथञ्चिद्भे- २५
दाऽभ्युपगमात्। सर्वथा ततस्तद्भेदसाधने तु रूपादिक्षणेन अनेकान्तः, तस्य रूप-रसादिक्षणान्तरं प्रति उपादान-सहकारिशक्तिलक्षणविरुद्धधर्माध्यासेऽपि अभेदाऽभ्युपगमात्। नहि रूपक्षणस्य

---

१ "सेनावनवद् ग्रहणमिति चेन्न; अतीन्द्रियत्वादणूनाम्।" न्यायसू० २।१।३६। २–ङ्गेषु दूरा–श्र०। ३ इतिप्र–आ०। ४ पृ० २३२ पं० ३। ५ पृ० २३२ पं० ५। ६–य पदार्थ–ब०, ज०। ७ पृ० ९। ८ प्रतिसम्बन्धि सम्ब–ब०, ज०।

रूपक्षणान्तरं प्रति उपादानशक्तिरेव रसादिक्षणान्तरं प्रति सहकारिशक्तिः; रसादेरपि रूपत्वप्रसङ्गात्। तथाहि–रसो रूपस्वभावः रूपेण उपादानशक्त्या उत्पाद्यमानत्वात् उत्तररूपक्षणवत्। नापि सहकारिशक्तिरेव इतरा; तज्जन्योत्तररूपस्यापि रसत्वप्रसङ्गात्। तथाहि–रससहभावि रूपं रसस्वभावम् प्राक्तनरूपेण सहकारिशक्त्या उत्पाद्यमानत्वात् रसवत्। ततो रूप-रसयो-
५ र्भेदमिच्छता कारणस्य उपादानेतरशक्त्योर्वास्तवो भेदोऽभ्युपगन्तव्यः। अथ कल्पितत्वात् तत्र तद्भेदोऽवास्तवः; तन्न; अस्य अवास्तवत्वे कार्यकारणभावस्यापि अवास्तवत्वप्रसक्तितो रसाद् रूपादेरव्यभिचारिणोऽनुमानस्य अनुपपत्तेः कथम् "एकसामग्र्यधीनस्य[2] रूपादेरसतो गतिः" [प्रमाणवा० १।१०] स्यात्?

यदप्युक्तम्[3]–'रूपरसाद्यात्मकत्वमपि' इत्यादि; तदप्यसङ्गतम्; 'यमहमद्राक्षम् एतर्हि तमेव
१० स्पृशामि' इत्यनुसन्धानप्रत्ययाद् अवयविनो रूपाद्यात्मकत्वप्रसिद्धेः। नहि द्वाभ्यामिन्द्रियाभ्यां रूपस्पर्शाधारैकार्थग्रहणमन्तरेण अनुसन्धानप्रत्ययो घटते, रूपस्पर्शयोश्च प्रतिनियतेन्द्रियग्राह्यत्वाद् असौ न संभवति। तदेवं प्रसिद्धसद्भावस्य अवयविनो नाऽपह्नवो युक्तः, तदपह्नवे परमाणुमात्रत्वस्यापि अपह्नवप्रसङ्गात्, तमन्तरेण अन्यस्य तद्व्यवस्थापकोपायस्यासत्त्वात्। 'यत् कार्यं तत् स्वपरिमाणादल्पपरिमाणकारणारब्धम् यथा पटः, कार्यञ्च द्व्यणुक इति'
१५ एतस्मात्, 'अल्पपरिमाणं क्वचित् परमकाष्ठामापन्नम् प्रकृष्यमाणत्वात् महापरिमाणवत्' इत्यतो वा तद्व्यवस्थापने; कथन्न अवयविप्रसादादेव तद्व्यवस्थापनं स्यात्? कथञ्च अवयविनोऽपह्नवे सकलानुमानोच्छेदो न स्यात्, धर्मि-हेतु-दृष्टान्तानामवयवित्वभावानां भवतोऽप्रसिद्धेः? तत्प्रसिद्धौ वा कथं तदपह्नवः तेषामपरमाणुरूपाणामेव प्रसिद्धेरिति?

ततः सिद्धः स्वावयवेभ्यः कथञ्चिदभिन्नो वास्तवो घटादिरेकोऽनेकस्वभावः अवयवी।
२० इति न परपरिकल्पितं कार्यकारणभूतं परमाणु-द्व्यणुकाद्यवयविद्रव्यमवतिष्ठते। अतः 'पृथिव्यप्तेजोवायवो द्विविधाः नित्याऽनित्यभेदात्' इत्यादि प्रत्युक्तम्; उक्तप्रकारेण परपरिकल्पितस्य परमाण्वादिद्रव्यस्य अव्यवस्थितेः।

कुतश्च अस्य द्रव्यत्वं सिद्ध्येत्? द्रव्यत्वयोगाच्चेत्; ननु द्रव्यस्य भावो द्रव्यत्वम्, तच्च द्रव्ये ज्ञाते ज्ञायते, द्रव्यत्वञ्च विना न द्रव्यज्ञप्तिः, वैशेषिकैः

षट्पदार्थपरीक्षायां वैशेषिकोक्तद्रव्यलक्षणस्य प्रतिविधानम्—

२५ जातिद्वारेणैव द्रव्यादिप्रतिपत्त्यभ्युपगमात्, इत्यन्योन्याश्रयः। किञ्च, सामान्यं संस्थानादिना केनचिद् व्यज्यते यथा गोत्वं खुर-ककुदादिसंस्थानेन, घृततैलादीनां वा तप्तानां गन्धेन, न

१–णलक्षणस्यापि ब०, ज०। २ "हेतुधर्मानुमानेन धूमेन्धनविकारवत्।" इति उत्तरार्द्धांशः प्रमाणवा० १।१०। तत्त्वसं० पं० पृ० ४१७। न्यायवा० ता० टी० पृ० १६२। ३ पृ० २३२ पं० १८। ४ "कार्यभ्रान्तेरणुभ्रान्तिः कार्यलिङ्गं हि कारणम्। उभयाभावतस्तत्स्थं गुणजातीतरच्च न ॥ ६८ ॥" आप्तमी०, अष्टसह० पृ० २२३। ५ परका–आ०। ६ कथन्नाम अ–भां०। ७ देशकालानु–भां०। ८ "द्रव्यत्वयोगाद् द्रव्यम् इति चेन्न; उभयासिद्धेः···।" सर्वार्थसि०, तत्त्वार्थराज० ५।२। ९ वा इवार्थे।

च इह किञ्चिद् व्यञ्जकमस्ति । क्रियावत्त्वं गुणवत्त्वं समवायिकारणत्वम् अत्राऽस्ति, इति चेत्; तत् किं व्यस्तम्, समस्तं वा व्यञ्जकम् ? न तावद् व्यस्तम्; क्रियावत्त्वस्य आकाशादिद्रव्यव्यक्तिषु असंभवात्। गुणवत्त्वस्यापि[2] सद्यः समुत्पन्नेषु पटादिष्वसंभवान्न व्यञ्जकत्वम्। लब्धात्मलाभो हि अवयवी गुणोत्पत्तौ समवायिकारणं भवति, इति सद्यः समुत्पन्ने पटे गुणाभावो भवद्भिरेव इष्टः, इति योगिनां तत्र द्रव्यबुद्धिर्न स्यात्। नापि समवायिकारणत्वं तद्व्यञ्जकम्; तस्यापि सर्वदाऽसंभवात्, नहि सर्वः सर्वदा समवायिकारणम्, इति अस्य लक्षणस्य सर्वत्राऽव्याप्तिदोषः[3]। किञ्च, यदा कारणं तदा न समवायि, यदा समवायि न तदा कारणम्, 'कार्याद्धि पूर्वस्मिन् क्षणे कारणम् न च तदा कार्यमस्ति येन कार्यसमवायि स्यात्, यदा[4] च कार्यसमवायि तदा निष्पन्नत्वात् कार्यस्य न कारणम्' इति असंभवो लक्षणदोषः। 'यद् यत्र संभवति तत् तत्र लक्षणम्' इत्यत्रापि सद्यः समुत्पन्ने घटादौ असंभव एव तद्दोषः, तत्र कस्यचिदपि तल्लक्षणस्याऽसंभवात्। समुदितानां[5] तल्लक्षणत्वेऽपि अव्याप्तिरेव, सद्यः समुत्पन्ने घटादौ त्रितयस्याप्यभावात्, आकाशादौ तु क्रियावत्त्वस्य इति ।

यदपि 'द्रव्यम् इतरेभ्यो भिद्यते द्रव्यत्वाऽभिसम्बन्धात्' इत्याद्यनुमानम्; तदप्यसाम्प्रतम्; अनुमानं खलु उभयवादिप्रसिद्धे धर्मिणि पर्वतादौ सति प्रवर्तते, अन्यथा हेतूनामाश्रयाऽसिद्धता स्यात्, दृष्टान्ते च उभयवादिसम्प्रतिपन्ने, साध्यधर्मे वह्नौ साध्यधर्मिणि सन्दिग्धे, अन्यथा अप्रसिद्धविशेषणः पक्षः स्यात्; धर्मिणि च उभयवादिसम्प्रतिपन्ने साधनधर्मे धूमे, अन्यथा असिद्धो हेतुः स्यात्। न च इह नवद्रव्यप्रकारो धर्मी कस्यचित् केनचित्प्रमाणेन प्रसिद्धः, नापि तत्र प्रवर्त्तमानं द्रव्यत्वादिसाधनम्, भेदाख्यश्च साध्यधर्मः इति । भेदो हि इतरेतराभावः, स च प्रतियोगिसव्यपेक्ष एव प्रतीयते, प्रतियोगिनश्च द्रव्यव्यतिरेकिणोऽनन्ताः, ते अयोगिनां कस्य प्रमाणस्य ग्राह्याः इति चिन्त्यम् ? किञ्च, प्रतियोगिनो गृह्यमाणाः किं द्रव्याद्भिन्ना गृह्यन्ते, अभिन्ना वा ? प्रथमपक्षे भेदग्राहकप्रमाणेनैव द्रव्यस्य अन्येभ्यो भेदः प्रसिद्धः इति इदमनुमानमनर्थकम्। द्वितीयपक्षे तु परस्परसङ्कीर्णेषु गृह्यमाणेष्वर्थेषु कस्य कस्माद् भेदः इति अप्रसिद्धविशेषणः पक्षः स्यात्।

---

१ "न च लक्षणमप्येकं पृथिव्यादिषु पञ्चसु क्रियावत्स्वेव क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणस्य भावात्। निष्क्रियेषु आकाशकालदिगात्मसु क्रियावत्त्वस्याभावात्।" आप्तप० पृ० ५। स्या० रत्ना० पृ० ८४५। २ "तत्र तावद् गुणाश्रयो द्रव्यमित्यलक्षणं यतः-'अव्याप्तेरतिव्याप्तेर्द्रव्यं नैव गुणाश्रयः। आद्ये क्षणे गुणाभावाद् गुणादावपि वीक्षणात्॥ उत्पन्नमात्रं द्रव्यं क्षणमगुणं तिष्ठतीत्यंगीकारादव्याप्तेः। गुणादावपि 'चतुर्विंशतिर्गुणाः' इत्यादि संख्यागुणान्वयवीक्षणादतिव्याप्तेः।" चित्सुखी पृ० १७५। खंडनखंड० पृ० ५७९। ३-व्याप्तिः दो-आ०, श्र०। ४ यदा तु ज०। ५-नां लक्ष-आ०, ब०, ज० भां०। ६ पटादौ ब०, ज०। ७ क्रियावत्त्वस्य गुणवत्त्वस्य समवायिकारणत्वस्य च। ८-प्यसंभा-भां।

किञ्च, केवलव्यतिरेकी हेतुः स उच्यते यस्य पक्षव्यापकत्वे सति केवलो व्यतिरेकः नान्वयः स्यात्, ततश्च 'यत्र भेदाख्यः साध्यधर्मो नास्ति तत्र द्रव्यत्वमपि नास्ति' इति व्यतिरेकोऽनयोर्धर्मयोः असति प्रतिबन्धे कथं निश्चेतुं शक्यते ? 'किं भेदाऽभावात् तत्र द्रव्यत्वं नास्ति वस्त्वन्तराऽसत्त्वाद्वा' इति सन्देहः। यत्र हि प्रतिबन्धप्रतिपत्तिः तत्र 'एकाऽभावे द्वितीयो नास्ति' इति युक्तम्, यथा अग्निधूमयोः प्रत्यक्षाऽनुपलम्भादिप्रमाणेन प्रतिपन्ने कार्यकारणभावे 'अग्न्यभावे धूमो नास्ति' इति। इह पुनः साध्यसाधनधर्मयोः उक्तप्रकारेण स्वरूपतोऽसिद्धत्वात् केनचित्प्रमाणेन अविनाभावस्याऽगृहीतत्वात् न साध्याऽभावे साधनाऽभावप्रतिपत्तिः, इति केवलव्यतिरेकिणोऽनुमानस्य अननुमानत्वात् न तेन इतरेभ्यो भेदः व्यवहारो वा शक्यते व्यवस्थापयितुम्। एतेन 'पृथिवीत्वाभिसम्बन्धात्' इत्यादि केवलव्यतिरेक्यनुमानं प्रत्याख्यातम्; उक्तदोषाणामत्राप्यविशेषात्। किञ्च, पृथिव्यादीनामन्योन्यम् अत्यन्तमर्थान्तरत्वे सिद्धे सति एतद्वक्तुं शक्यते, न च तत् सिद्धम् पुद्गलात्मनाऽन्योन्यं तेषां कथञ्चिदभेदात्।

'पुद्गलात्मकत्वे पृथिव्यादीनां न प्रतिनियतगन्धादिगुणाधारतानियमः' इति यौगानां पूर्वपक्षः—

ननु एकपुद्गलात्मकत्वे तेषां प्रतिनियतगन्धादिगुणाधारतानियमो न प्राप्नोति पुद्गलानामविशेषतो रूप-रस-गन्ध-स्पर्शात्मकत्वाऽभ्युपगमात्, अतः तदात्मकत्वे पृथिव्यादीनां चतुर्णामपि अविशेषेणैव गन्धादिप्रतीतिः स्यात्, न चैवम्, चतुर्ष्वपि एतेषु गन्धादिगुणचतुष्टयस्य प्रतिनियमेनैव आधेयत्वप्रतीतेः। उक्तञ्च—"*गन्धः[1] पृथिव्यामेव, अप्सु रसः, तेजस्नि रूपम्, वायौ स्पर्शः।*" [ ] इति। पृथिवीत्वादिप्रतिनियतजातिसम्बन्धोऽपि तेषामेकत्वे दुर्घटः, अन्योन्यं हि तेषां तत्त्वान्तरत्वाभावेनाभिन्नजातीयत्वे अबादीनामपि अविशेषतः पृथिवीत्वाद्यभिसम्बन्धः स्यात्। न खलु घट-घटी-शराव-उदञ्चनादीनां तथाऽभिन्नजातीयत्वेऽविशेषतः पृथिवीत्वाऽभिसम्बन्धो न दृष्टः, न च तेषामविशेषतः तत्सम्बन्धोऽस्ति, पृथिव्यामेव पृथिवीत्वाभिसम्बन्धप्रतीतेः, अबादावेव अप्[2]त्वादिसम्बन्धप्रतीतेः इति।

तत्प्रतिविधानपुरस्सरं तेषाम् एकपुद्गलात्मकत्वप्रसाधनम्—

अत्र प्रतिविधीयते। यत्तावदुक्तम्—'एकपुद्गलद्रव्यात्मकत्वे' इत्यादि; तदसमीक्षिताभिधानम्; यतः प्रतिनियतगन्धादिगुणाधारतानियमस्तत्र तत्सत्तापेक्षया, तदभिव्यक्त्यपेक्षया वा स्यात् ? तत्राद्यविकल्पोऽयुक्तः; पृथिवीवत् जलादावपि गन्धादिगुणचतुष्टयसद्भावतः तदाधारताप्रतिनियमाऽनुपपत्तेः। कुतः प्रमाणात् तत्र तत्सद्भावः सिद्धः इति चेत् ? 'अनुमानात्' इति ब्रूमः; तथाहि—जलादयो[3] गन्धादिमन्तः स्पर्शवत्त्वात्,

---

१ "कथं तर्हि इमे गुणा विनियोक्तव्या इति ? एकैकश्येन उत्तरोत्तरगुणसद्भावादुत्तराणां तदनुपलब्धेः।" न्यायसू० ३।१।६४। २ तत्त्वाभा—आ०। तत्त्वान्तराभा—ब०, ज०। ३ अबादिस—श्र०। ४ "आपो गन्धवत्यः स्पर्शवत्त्वात् पृथिवीवत्"...।" सर्वार्थसि० ५।३।

यत् स्पर्शवत् तद् गन्धादिमत् प्रसिद्धम् यथा पृथिवी, स्पर्शवन्तश्च जलादय इति । 'यत् पुनर्गन्धादिमन्न भवति न तत् स्पर्शवत्, यथा आत्मादि' इति विपक्षे बाधकं प्रमाणम् ।

अथ गन्धादिगुणानाम् अभिव्यक्त्यपेक्षया पृथिव्यादौ तदाधारताप्रतिनियमोऽभिधीयते; अभिधीयताम्, तथापि न तावता तत्र द्रव्यान्तरत्वसिद्धिः, जल-कनकादिसंयुक्ताऽनलेन अनेकान्तात् । नहि अनभिव्यक्तभासुररूपोष्णस्पर्शो जल-कनकादिसंयुक्ताऽनलः अभिव्यक्तभासुररूपोष्णस्पर्शादनलाद् द्रव्यान्तरं भवतां प्रसिद्धः, द्रव्यसंख्याव्याघातप्रसङ्गात् । एवं पृथिव्यादिरपि अनभिव्यक्तेनाप्यविशिष्टगुणेन उपेतत्वात् नाऽन्योन्यम् अत्यन्तद्रव्यान्तरत्वेन अर्थान्तरम् ; यद् अविशिष्टगुणोपेतम् न तद् अन्योन्यम् अत्यन्तद्रव्यान्तरत्वेन अर्थान्तरम् यथा आत्मादि, अविशिष्टरूपादिगुणोपेतश्च पृथिव्यादि इति । यथैव हि आत्मनां बुद्ध्यादिमत्त्वाऽविशेषात् नाऽन्योन्यम् अत्यन्ततत्त्वान्तरत्वेनाऽर्थान्तरत्वम् तथा पृथिव्यादीनामपि रूपादिमत्त्वाऽविशेषात् न तथा तत्त्वान्तरत्वम् ।

यदप्युक्तम्[3]–'पृथिवीत्वादिप्रतिनियतजातिसम्बन्ध' इत्यादि ; तदप्यविचारितरमणीयम् ; अवान्तरजातिसम्बन्धस्य सर्वथा तत्त्वभेदाऽप्रसाधकत्वात्, व्यक्तिभेदमेव हि असौ प्रसाधयति न तत्त्वभेदम् , अन्यथा क्षत्रियत्वाद्यवान्तरजातिसम्बन्धात् आत्मनामपि तत्त्वान्तरत्वप्रसङ्गात् तत्संख्याव्याघातः स्यात् । जातिभेदेन अन्योन्यं पृथिव्यादीनामात्यन्तिकभेदाऽभ्युपगमे च उपादानोपादेयभावो न स्यात् ; येषां जातिभेदेन आत्यन्तिको भेदः न तेषाम् उपादानोपादेयभावः यथा आत्म-पृथिव्यादीनाम् , तथा तद्भेदश्च पृथिव्यादीनां भवद्भिरिष्ट इति । तन्तु-पटाद्युपादानोपादेयभावेन व्यभिचारपरिहारार्थम् आत्यन्तिकविशेषणम् , नहि तत्र आत्यन्तिकः तद्भेदोऽस्ति पृथिवीत्वादिसामान्यस्य अभिन्नस्यापि संभवात् । नन्वेवं द्रव्यत्वादिना पृथिव्यादीनामपि अभेदसंभवात् तद्भावोऽस्तु; इत्यप्ययुक्तम् ; आत्म-पृथिव्यादीनामप्येवं तद्भेदाऽभावाद् उपादानोपादेयभावः स्यात्, तथा च आत्माऽद्वैतप्रसङ्गात् पृथिव्यादिद्रव्यप्रपञ्चाय दत्तो[4] जलाञ्जलिः ।

तन्न आत्यन्तिकभेदाऽभ्युपगमे पृथिव्यादीनां तद्भावो घटते; अस्ति चासौ, चन्द्रकान्ताज्जलस्य जलादेश्च मुक्ताफलादेरुत्पत्तिप्रतीतेः । अतो न तेषां सर्वथा तत्त्वान्तरत्वेन भेदः ; येषाम् उपादानोपादेयभावः न तेषामन्योन्यमत्यन्ततत्त्वान्तरत्वेन भेदः यथा तन्तुपटादीनाम् , उपादानोपादेयभावश्च पृथिव्यादीनामिति । चन्द्रकान्ताद्यन्तर्भूतात् जलादिद्रव्यादेव जलादेरुत्पत्तिः; इत्यप्यनुपपन्नम् ; तत्र तत्सद्भावाऽऽवेदकप्रमाणाऽभावात् । 'विजातीयाद् विजातीयस्योत्पत्तौ तत्त्वव्यवस्थाऽभावप्रसङ्गात्, तदन्तर्भूतात् तद्द्रव्यादेव तदुत्पत्तिः' इत्यभ्युपगमे 'मृत्पिण्डाद्यन्तर्भूताद् घटादेरेव घटाद्युत्पत्तिः' इत्यप्यभ्युपगम्यतामिति सांख्यदर्शनसिद्धिः । ततो मृत्पिण्डादौ

---

१ प्रसिद्धश्चेत ज० । २–थाऽर्थान्तरत्वम् श्र० । ३ पृ० २३८ पं० १८ । ४ सत्त्वभे–श्र० । ५ दत्ता ब०, ज० । ६ "चन्द्रकान्ताज्जलस्य जलान्मुक्ताफलादेः काष्ठादनलस्य व्यजनादेश्च अनिलस्योत्पत्तिप्रतीतेः ।" प्रमेयक० पृ० १६३ पू० । तत्त्वार्थश्लो० पृ० २९ ।

घटादिवत् चन्द्रकान्तादौ जलादेरप्रतीतितोऽभावात्, आत्यन्तिकभेदे च उपादानोपादेयभावाऽनुपपत्तेः 'पर्यायभेदेन अन्योन्यं पृथिव्यादीनां भेदः, रूप-रस-गन्धस्पर्शात्मकपुद्गलद्रव्यरूपतया च अभेदः' इति प्रेक्षादक्षैः प्रतिपत्तव्यम्। तन्न नित्यादिस्वभावम् आत्यन्तिकभेदभिन्नं परपरिकल्पितं पृथिव्यादिचतुःप्रकारं द्रव्यं व्यवतिष्ठते। नाप्याकाशद्रव्यम्; परपरिकल्पितस्वभावस्य अस्यापि सद्भावे प्रमाणाऽभावाऽविशेषात्।

ननु तत्सद्भावे शब्दलिङ्गप्रभवमनुमानमस्त्येव प्रमाणम्; तथाहि–शब्दः क्वचिदाश्रितः गुणत्वात् रूपादिवत्। न चास्य गुणत्वमसिद्धम्; गुणः शब्दः द्रव्य-कर्मान्यत्वे सति सत्तासम्बन्धित्वात्, यद् यदेवंविधम् तत् तद् गुणः यथा रूपादि, तथा च शब्दः, तस्मात्तथा इति। न च द्रव्यकर्माऽन्यत्वमसिद्धम्; तथाहि–शब्दो द्रव्यं न भवति एकद्रव्यत्वात् रूपादिवत्। किञ्चिद्धि द्रव्यम् अद्रव्यं भवति नित्यत्वात् यथा आत्मादि, किञ्चित्तु अनेकद्रव्यम् कार्यत्वात् यथा घटादि, न तु एकद्रव्यम्। शब्दस्य एकद्रव्यत्वं कुतः सिद्धमिति चेत्? 'एकद्रव्यं शब्दः सामान्य-विशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात् रूपादिवत्' इत्यतोऽनुमानात्। अत्र च 'सामान्यविशेषवत्त्वात्' इत्युच्यमाने परमाण्वादिभिर्व्यभिचारः स्यात्; तन्निवृत्त्यर्थम् 'इन्द्रियप्रत्यक्षत्वात्' इत्युक्तम्। तथापि घटादिना अनेकान्तः; तन्निरासार्थम् एकविशेषणम्। 'एकेन्द्रियप्रत्यक्षत्वात्' इत्युच्यमाने आत्मना व्यभिचारः; तन्निवृत्त्यर्थं बाह्यविशेषणम्। रूपत्वादिना व्यभिचारपरिहारार्थञ्च 'सामान्यविशेषवत्त्वे सति' इति विशेषणम्। तथा, कर्माऽपि न भवत्यसौ संयोग-विभागाऽकारणत्वात् रूपादिवदेव। इतश्च न द्रव्यं न कर्म शब्दः, अनित्यत्वे सति नियमेन अचाक्षुषप्रत्यक्षत्वात्, यद् यद् एवम् तत् तत् तथा यथा रसादि, तथा च शब्दः, तस्मात्तथा इति। आत्मना व्यभिचारनिवृत्त्यर्थम् 'अनित्यत्वे सति' इति विशेषणम्। तथापि अचाक्षुषप्रत्यक्षप्रतीयमानद्रव्य-कर्मभ्यां व्यभिचारः; तत्परिहारार्थम् 'निय-

षट्पदार्थपरीक्षायां 'शब्दगुणकम् आकाशम्' इति वैशेषिकस्य पूर्वपक्षः—

---

१ "शब्दः क्वचिदाश्रितः गुणत्वात्'''यथा रूपादिः।" प्रश० व्यो० पृ० ३२२। २ "प्रसक्तयोः द्रव्यकर्मणोः प्रतिषेधे सामान्यादावप्रसङ्गाच्च गुण एवावशिष्यते शब्दः। कथं पुनः न द्रव्यं शब्दः? एकद्रव्यत्वात्। अद्रव्यं वा भवति द्रव्यम् आकाशपरमाण्वादि, अनेकद्रव्यं वा द्व्यणुकादिकार्यद्रव्यम्, एकद्रव्यं तु शब्दः एकाकाशाश्रितत्वात्। तस्मान्न द्रव्यम्। नापि कर्म शब्दः शब्दान्तरजनकत्वात्। कर्मणो हि समानजात्यारम्भकत्वं नास्ति। सत्ताशब्दत्वादिसामान्यसम्बन्धाच्च सामान्यादित्रयप्रसङ्गोऽस्य नास्ति इति पारिशेष्याद् गुण एव शब्दः।" न्यायमं० पृ० २२९। "न द्रव्यकर्मजातीयः शब्दः श्रोत्रग्रहणयोग्यत्वात् शब्दत्वादिवत्। गुणः शब्दः द्रव्यकर्मान्यत्वे सति सत्तासम्बन्धित्वात् रूपादिवत्।" प्रश० व्यो० पृ० ६४९। ३ न द्रव्यं समवायिकारणं यस्य तत्। ४ एकद्रव्यः श्र०। ५ "शब्दो गुणः जातिमत्त्वे सति अस्मदादिबाह्याचाक्षुषप्रत्यक्षत्वाद् गन्धवत्।" न्यायलीला० पृ० २५। ६ तत्तथा आ०। ७ अचक्षुष्यप्र–आ०।

मेन' इति विशेषणम्, तयोः शब्दादिवद् अचाक्षुषप्रत्यक्षत्वनियमाऽसंभवात्। तथा शब्दो न द्रव्यं न कर्म, व्यापकद्रव्यसमवेतत्वात्, यद् यदित्थम् तत् तत् तथा यथा सुखादि, तथा च शब्दः, तस्मात्तथा इति। ततः सिद्धं 'द्रव्यकर्मान्यत्वे सति' इति विशेषणम्। 'द्रव्यकर्मान्यत्वात्' इत्युच्यमाने सामान्यादिना व्यभिचारः; तन्निवृत्त्यर्थं 'सत्तासम्बन्धित्वात्' इत्युक्तम्।

अतः सिद्धं गुणत्वेन शब्दस्य क्वचिदाश्रितत्वम्। यश्च अस्याऽऽश्रयः तत् पारिशेष्याद् आकाशम्; तथाहि—न तावत् स्पर्शवतां परमाणूनां विशेषगुणः शब्दः; अस्मदादिप्रत्यक्षत्वात् कार्यद्रव्यरूपादिवत्। नापि कार्यद्रव्याणां पृथिव्यादीनां विशेषगुणोऽसौ; कार्यद्रव्यान्तराऽप्रादुर्भावेऽप्युपजायमानत्वात् सुखादिवत्, अकारणगुणपूर्वकत्वाद् इच्छादिवत्, अयावद्द्रव्यभावित्वात्, अस्मदादिपुरुषान्तरप्रत्यक्षत्वे सति पुरुषान्तराऽप्रत्यक्षत्वाच्च तद्वत्, आश्रयाद् भेर्यादेः अन्यत्रोपलब्धेश्च। स्पर्शवतां हि पृथिव्यादीनां यथोक्तविपरीता गुणाः प्रतीयन्ते इति। नाप्यात्मविशेषगुणः; अहङ्कारेण विभक्तग्रहणात्, बाह्येन्द्रियप्रत्यक्षत्वात्, आत्मान्तरग्राह्यत्वाच्च, बुद्ध्यादीनां च आत्मगुणानां तद्वैपरीत्योपलब्धेः। नापि मनोगुणः; अस्मदादिप्रत्यक्षत्वात् रूपादिवत्। नापि दिक्कालविशेषगुणः; तयोः पूर्वाऽपरादिप्रत्ययहेतुत्वात्। अतः पृथिव्यादिव्यतिरिक्ताश्रयाऽऽश्रितोऽसौ तद्वृत्तिबाधकप्रमाणसद्भावे सति गुणत्वात्, यस्तु एवं न भवति

---

१ "कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः।" वैशे० सू० २।१।२५। "कार्यान्तरस्य स्वावयवकार्यसजातीयस्य अप्रादुर्भावाद् अननुभवात् अर्थात् भेर्यादौ। अयं भावः—यथा भेर्यादौ रूपादयो विशेषगुणाः स्वावयवरूपादिसजातीया अनुभूयन्ते तथा स्वावयवशब्दसजातीयः शब्दः भेर्यादौ नोपलभ्यते। निःशब्दैरपि भेर्याद्यवयवैः भेर्याद्यारम्भात्।" वै० सू० वि० पृ० ९०। २ "शब्दः प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वात्, अयावद्द्रव्यभावित्वात्, आश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः।" प्रश० भा० पृ० ५८। "समवायिकारणेषु गुणाः कारणगुणाः ते पूर्वं कारणं यस्य गुणस्य असौ कारणगुणपूर्वकः यथा पटरूपादिः तन्तुरूपादिपूर्वक इति। न चैवम्, शब्दकारणस्याकाशस्य अकार्यत्वेन समवायिकारणगुणाभावात्।..." प्रश० व्यो० पृ० ३२३। "स्वाश्रयस्य यत् समवायिकारणं तद्गुणपूर्वः शब्दो न भवति पटरूपादिवदाश्रयोत्पत्त्यनन्तरमनुत्पादात् अतः सुखादिवत् स्पर्शवतां विशेषगुणो न भवति।" प्रश० कन्द० पृ० ५९। ३ "यावद्द्रव्यं शब्दो न भवति सत्येव आश्रये शङ्खादौ तद्विनाशात्।" प्रश० कन्दली पृ० ५९। प्रश० किरणा० पृ० १०७। ४ अस्मदादिपुरुषान्तराणां समीपदेशवर्त्तिनां प्रत्यक्षत्वेऽपि पुरुषान्तराणां दूरदेशवर्तिनामप्रत्यक्षत्वं शब्दस्य। ५ "स्पर्शवद्विशेषगुणत्वे शब्दस्य शङ्खादिराश्रयो वाच्यः। स च तस्मादन्यत्र दूरे कर्णशष्कुलीदेशे समुपलभ्यते। न चान्यगुणस्य अन्यत्र ग्रहणमस्ति तस्मान्न स्पर्शवद्विशेषगुणः।..." प्रश० कन्द० पृ० ६०। "आश्रयाभिमताच्छङ्खादेरन्यत्र कर्णशष्कुल्यवच्छिन्ने नभसि उपलब्धेः।" प्रश० किरणा० पृ० १०७। "अन्यत्रशब्दो विनार्थः तेन आश्रयं विना उपलब्धियोग्यत्वात् इत्यर्थः अयोग्याश्रयकत्वादिति यावत्।" न्यायली० प्रका० पृ० २७७। ६ "परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः।" वै० सू० २।१।२६। "बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः।" प्रश० भा० पृ० ५८। ७—ग्रहणादात्मान्तर—आ०। ८—त्वात् ब०, ज०। ९—नां तु भां०, श्र०। १० "श्रोत्रग्राह्यत्वाद् वैशेषिकगुणभावाच्च न दिक्कालमनसाम्।" प्रश० भा० पृ० ५८। ११ "शब्दः पृथिव्युदकज्वलनपवनदिक्कालात्ममनोव्यतिरिक्तद्रव्याश्रयः तद्वृत्तिबाधकप्रमाणसद्भावे सति गुणत्वात्।" प्रश०व्यो०पृ० ३२९।

नाऽसौ तथा यथा रूपादिः, तथा च शब्दः, तस्मात् तद्व्यतिरिक्ताश्रयाऽऽश्रित इति । यदाश्रितश्च असौ तदाकाशम् । शब्दलिङ्गाऽविशेषाद् विशेषलिङ्गाऽभावाच्च एकं विभु च, निरतिशयपरिमाणाऽधिकरणत्वाच्च परमाणुवत् नित्यं सिद्धम् ।

तल्लिङ्गभूतस्य च शब्दस्य उत्पत्तिप्रक्रिया प्रदर्श्यते ; तथाहि—संयोगाद् विभागात् शब्दाच्च शब्द उत्पद्यते । तत्र संयोगात् तदुत्पत्तौ आकाशं समवायिकारणम् , भेर्याद्याकाशसंयोगः असमवायिकारणम् , भेरीदण्डसंयोगः निमित्तकारणम् । विभुद्रव्यविशेषगुणानां संयोगनिमित्तानां संयोगाऽसमवायिकारणत्वाऽव्यभिचारात् ; प्रयोगः—संयोगनिमित्ता विभुद्रव्यविशेषगुणाः संयोगाऽसमवायिकारणाः, संयोगनिमित्तत्वे सति विभुद्रव्यविशेषगुणत्वात् , यद् यदित्थम् तत् तथा यथा बुद्ध्यादयः, तथा च शब्दः, तस्मात्तथा इति । तथा विभागादपि शब्दोत्पत्तौ आकाशं समवायिकारणम् , वंशदल-आकाशविभागोऽसमवायिकारणम् , वंशदलविभागः निमित्तकारणम् । ननु वंशदलविभागोत्तरकालं शब्दोत्पत्तिदर्शनात् युक्तं तस्य तन्निमित्तत्वम् , न पुनः वंशदल-आकाशविभागस्य असमवायिकारणस्य, तत्सद्भावे प्रमाणाऽभावात् ; इति च न चेतसि निधेयम् ; शब्दनिमित्तानामनेकद्रव्यगुणानां समानजातीयाऽसमवायिकारणसमन्वितानां शब्दारम्भकत्वप्रतीतेः । प्रयोगः—विभागः स्वसमानजातीयेन असमवायिकारणेन सहितः शब्दमारभते, अनेकद्रव्यगुणत्वे सति शब्दारम्भकत्वात् , यो य एवम् स स तथा यथा भेरीदण्डसंयोगः, तथा च विभागः, तस्मात्तथा इति । शब्दात् शब्दोत्पत्तौ तु आकाशं समवायिकारणम् , प्राक्तनः शब्दः असमवायिकारणम् , अदृष्टादिकं निमित्तकारणमिति ।

अत्र प्रतिविधीयते । यत्तावदुक्तम्—'शब्दः कचिदाश्रितः' इत्यादि; तदसमीक्षिताऽभिधानम् ; यतः किम् अतोऽनुमानात् शब्दस्य आश्रयमात्राश्रितत्वं प्रसाध्यते, नित्यैकव्यापि-आश्रयाऽऽश्रितत्वं वा ? प्रथमपक्षे कथमतो नभोद्रव्यसिद्धिः आश्रयमात्रस्यैव सिद्धिप्रसङ्गात्? तत्र च सिद्धसाध्यता, शब्दस्य पुद्गलपरिणामतया तदाश्रितत्वाऽभ्युपगमात् । नित्यैकव्यापि-आश्रयाऽऽश्रितत्वे तु साध्ये साध्यविकलो दृष्टान्तः ; रूपादीनां तद्विपरीताश्रयाऽऽश्रितत्वात् । गुणत्वञ्च अस्य असिद्धम् ; तत्प्रसाधकप्रमाणाऽभावात् ।

शब्दस्य आकाशगुणत्वाभावप्रसाधनपूर्विका द्रव्यत्वसिद्धिः, आकाशस्य सर्वथा नित्य-निरवयवत्वनिरसनपुरस्सरा युगपन्निखिलार्थावगाहनहेतुतया सिद्धिश्च—

---

१ "शब्दलिङ्गाविशेषात् विशेषलिङ्गाभावाच्च ।" वै०सू० २।१।३० । २—त्तिक्रिया आ० । ३ "संयोगाद्विभागात् शब्दाच्च शब्दनिष्पत्तिः ।" वै०सू० २।२।३१। ४ "भेर्याकाशसंयोगादुत्पद्यते—अत्रापि आकाशं समवायिकारणम्'''।" प्रश०व्यो०पृ० ६५० । प्रश० कन्द० पृ० २८९ । ५—णासद्भावात् श्र० । ६—त्वाप्रतीतेः श्र० । ७ पृ० २४० पं० ६ । ८ "यदि सामान्येन आश्रितत्वमात्रमेषां साध्यते शब्दानां तदा सिद्धसाध्यता ।" तत्त्वसं० पं० पृ० २०७ । "पुद्गलस्कन्धस्यैकद्रव्यस्य शब्दाश्रयत्वोपपत्तेः सिद्धसाधनत्वात्'''।" तत्त्वार्थश्लो० पृ० ४२२ । प्रमेयक० पृ० १६४ पू० । सन्मति०टी० पृ० ६९० । ९ "एकव्यापिध्रुवव्योमसमवायस्तु सिद्ध्यति । नैषामन्वयवैकल्याद्यक्रमाद्याप्तितस्तथा ॥ ६२८ ॥" तत्त्वसं० ।

यदपि 'द्रव्यकर्माऽन्यत्वे सति सत्तासम्बन्धित्वात्' इति तत्प्रसाधकं साधनमुपन्यस्तम्[1]; तदपि विशेषणैकदेशाऽसिद्धत्वात् न तत्प्रसाधकम्। कर्माऽन्यत्वे सत्यपि हि शब्दस्य द्रव्यान्यत्वमसिद्धम्; द्रव्यलक्षणलक्षितत्वेन अस्य द्रव्यत्वोपपत्तेः, गुण-क्रियावत्त्वं हि द्रव्यलक्षणम्, तच्च अविकलं शब्देऽस्तीति। अतः द्रव्यं शब्दः गुण-क्रियावत्त्वात्, यद् गुणक्रियावत् तद् द्रव्यम् यथा वाणादि, गुण-क्रियावांश्च शब्द इति। न चायमसिद्धो हेतुः; तस्य तद्वत्त्वप्रसाधक- ५
प्रमाणसद्भावात्। तथाहि–गुणवान्[2] शब्दः स्पर्श-अल्पत्व-महत्त्वपरिमाण-संख्या-संयोगाऽऽश्रयत्वात्, यद् एवंविधम् तद् गुणवत् तथा बदर-आमलकादि, तथा च शब्दः, तस्मात्तथा इति।

तत्र न तावत् स्पर्शाऽऽश्रयत्वमस्य असिद्धम्; तथाहि–स्पर्शवान् शब्दः स्वसम्बद्धाऽर्थान्तराऽभिघातहेतुत्वात्[3], यद् इत्थम् तद् इत्थम् यथा मुद्गरादि, तथा च शब्दः, तस्मात्तथा इति। न चेदमसिद्धम्; कंसपात्र्यादिध्वानाऽभिसम्बन्धे श्रोत्राऽभिघातप्रतीतेः। न च शब्दसह- १०
चरितेन वायुना अत्र अभिघात इत्यभिधातव्यम्; शब्दान्वय-व्यतिरेकानुविधायित्वात्, तथाभूतस्याप्यस्य अन्यहेतुत्वकल्पने न क्वचिद् हेतु-फलभावप्रतिनियमः स्यात्। गुणत्वेन अस्य निर्गुणत्वतः स्पर्शाऽभावात् तदभिघाताऽहेतुत्वे चक्रकप्रसङ्गः–'गुणत्वं हि अद्रव्यत्वे सिद्धे सिद्ध्येत्, तदपि अस्पर्शवत्त्वे[4], तदपि गुणत्वे' इति। तथा 'स्पर्शवान् शब्दः स्पर्शवताऽर्थेन अभिहन्यमानत्वात् तृणादिवत्' इत्यतोऽपि अनुमानाद् अस्य स्पर्शवत्त्वसिद्धेः। न चेदमसि- १५
द्धम्; प्रतिवात-भित्त्यादिभिः स्पर्शवद्भिः तदभिघातप्रतीतेः। तन्न अस्य स्पर्शाश्रयत्वमसिद्धम्।

नापि अल्पत्व-महत्त्वपरिमाणाश्रयत्वम्; अल्प-महत्त्वप्रतीतिविषयत्त्वात्, यत् तत्प्रतीतिविषयः तत् तत्परिमाणाश्रयः यथा बदर-आमलकादि, तत्प्रतीतिविषयश्च शब्द इति। न चायमसिद्धो हेतुः; 'अल्पः शब्दः, महान् शब्दः' इति तत्प्रतीतिविषयतया अस्य आबालं सुप्रसिद्धत्वात्। तथाभूतस्याप्यस्य तत्प्रतीतिविषयत्वाऽपह्नवे बदरादावपि तत्प्रतीतिविषयत्वापह्नवप्रस- २०
ङ्गात् सर्वत्र तत्परिमाणाभावः स्यात्। न खलु प्रतीतेरन्यतः तत्र तत्परिमाणसिद्धिः। अथ बदरादेर्द्रव्यत्वात् तत्परिमाणप्रसिद्धिर्युक्ता न शब्दे विपर्ययात्; तदप्यसत्; अन्योन्याश्रयाऽनुषङ्गात्–सिद्धे हि शब्दस्य अद्रव्यत्वे तत्परिमाणाऽभावसिद्धिः, तत्सिद्धौ च अद्रव्यत्वसिद्धिरिति। तत्र तत्परिमाणाऽनभ्युपगमे च किन्निबन्धना शब्दे तत्प्रतीतिः स्यात्? कारणगताऽल्पत्वमहत्त्वपरिमाणनिबन्धना चेत्; बदरादावपि असौ स्वकारणाऽल्पत्वमहत्त्वपरिमाणनिबन्धनाऽस्तु, २५
तथा अन्यत्राप्येवम् इति न क्वचित् मुख्यतोऽल्पमहत्त्वपरिमाणनिबन्धना तत्प्रतीतिः स्यात्, प्रतीतिविरोधः अन्यत्राप्यविशिष्टः। तन्न अस्य अल्पत्वमहत्त्वपरिमाणाश्रयत्वमप्यसिद्धम्।

---

१ पृ० २४० पं० ८। २ "द्रव्यं शब्दः स्पर्शाल्पत्व···" प्रमेयक० पृ० १६४ पू०। ३ "कर्णशष्कुल्यां कटकटायमानस्य प्रायशः प्रतिघातहेतोर्भवनाद्युपघातिनः शब्दस्य प्रसिद्धिः अस्पर्शत्वकल्पनामस्तङ्गमयति···।" अष्टश०, अष्टसह० पृ० १०८। ४–त्वे सिद्धे सिद्ध्यत् तदपि श्र०। ५–ण प्रसिद्धिः ब०, ज०, भां०। ६–णाल्पमहत्त्व–ब०, ज०, आ०। ७–मसि–ब०, ज०, आ०।

नापि संख्याश्रयत्वम् ; 'एकः शब्दः, द्वौ शब्दौ, बहवः शब्दाः' इति प्रतीत्या घटादिवत् शब्दे संख्यावत्त्वप्रसिद्धेः । अथ उपचारात् शब्दे संख्यावत्त्वप्रतीतिः; ननु किंगता संख्या तत्र उपचर्य्यते–कारणगता, विषयगता वा ? यदि कारणगता; तत्रापि किं समवायिकारणगता, कारणमात्रगता वाऽसौ तत्र उपचर्येत ? तत्राद्यपक्षे 'एकः शब्दः' इति सर्वदा व्यपदेशप्रसङ्गः गगनलक्षणतत्समवायिकारणस्य एकत्वात् । द्वितीयपक्षे तु 'बहवः शब्दाः' इति सदा व्यपदेशः स्यात् तन्मात्रस्य बहुत्वात् । विषयसंख्योपचारे तु गगन-आकाश-व्योमादिशब्दाः बहुव्यपदेशभाजो न स्युः तद्विषयस्य एकत्वात् , पश्वादीनाञ्च बहुत्वात् 'एको [1]गोशब्दः' इति व्यपदेशः स्वप्नेऽपि दुर्लभः । यथाऽविरोधं संख्योपचारः; इत्यप्ययुक्तम् ; स्वयं संख्यावत्त्वे एव अविरोधसंभवात् । किञ्च, विपरीतोपलम्भ[2]स्य बाधकस्य सद्भावे सति उपचारकल्पना स्यात् 'अग्निर्माणवकः' इत्यादिवत् , न च अग्निरहितमाणवकस्य इव एकत्वादिसंख्यारहितशब्दस्य उपलम्भोऽस्ति, इति कथम् उपचारतस्तत्र तत्कल्पना स्यात् ? तथापि तत्तथात्वकल्पने अनुपचरितमेव न किञ्चित् स्यात् । कथमेवं भवतामपि 'एकं रूपम्' इत्यादिगुणेषु संख्याव्यपदेशः ? इत्यप्ययुक्तम् ; यन्मते हि संख्याया गुणत्वम् तन्मते एव अस्यास्तत्राऽसंभवतः तद्व्यपदेशाऽभावप्रसङ्गः , नाऽस्माकम् प्रमेयत्ववस्तुत्वादिवत् तद्धर्मतया तस्या अभ्युपगमात् । धर्माणाञ्च गुणादौ भावो न विरुद्ध्यते, अन्यथा तेषामप्रमेयत्वादिप्रसङ्गः । कथमन्यथा 'षट् पदार्थाः' [3]इत्यादिव्यपदेशः स्यात् ? तन्न संख्याऽऽश्रयत्वमपि अस्य असिद्धम् ।

नापि संयोगाऽऽश्रयत्वम् ; वाय्वादिना अभिहन्यमानत्वात् , यद् वाय्वादिनाऽभिहन्यमानम् तत् संयोगाश्रयः यथा पांश्वादि, तेन अभिहन्यमानश्च शब्द इति । न चेदमसिद्धम् ; देवदत्तं प्रति आगच्छतः शब्दस्य प्रतिवातादिना प्रतिनिवर्त्तनप्रतीतेः , यत्र येन प्रतिनिवर्त्तनं प्रतीयते तत्र तेन अभिघाँतोऽस्ति यथा पांश्वादौ, प्रतिवातादिना प्रतिनिवर्त्तनं प्रतीयते च शब्दे इति । तत्प्रतिनिवर्तनप्रतीतिश्च अन्यदिगवस्थितस्य अस्य अन्यदिगवस्थितेन ग्रहणादवसीयते, यद् अन्यदिगवस्थितम् अन्यदिगवस्थितेन गृह्यते तत्र प्रतिनिवर्त्तनमस्ति यथा तृणादौ, तथाभूतः तथाभूतेन गृह्यते च शब्द इति । ननु गन्धादयो देवदत्तं प्रत्यागच्छन्तः तेन प्रतिनिवर्त्यन्ते, न च तेषां तेन संयोगः निर्गुणत्वाद् गुणानाम् ; इत्यप्यचोद्यम् ; तद्वतो द्रव्यस्यैव अनेन प्रतिनिवर्त्तनात् , केवलानां तेषां निष्क्रियत्वेन आगमनप्रतिनिवर्त्तनाऽनुपपत्तेः । अतः सिद्धं शब्दस्य संयोगाऽऽश्रयत्वम् ; क्षकारादौ अक्षरसंयोगप्रतीतेश्च । जात्यन्तरस्य अस्योत्पत्तौ सर्वत्र संयोगवार्त्तोच्छेदप्रसङ्गः, दण्ड्यादेरपि जात्यन्तरस्यैव उत्पत्तिप्रसक्तेः । तन्नासिद्धं शब्दस्य गुणवत्त्वम् ।

---

१ गौशब्दः आ०, ब०, ज०, भां० । २–लम्भस्य सद्भा–ब०, ज० । ३ इत्यादिगुणेषु संख्यान्य–श्र० । ४–त्तोऽप्यस्ति श्र० ।

नापि क्रियावत्त्वम्; पूर्वदेशत्यागेन देशान्तरे समुपलभ्यमानत्वात्, यद् इत्थं देशान्तरे समुपलभ्यते तत् क्रियावद् दृष्टम् यथा बाणादि, तथा तत्र समुपलभ्यते च शब्द इति। न चेदमसिद्धम्; वक्तृमुखप्रदेशत्यागेन श्रोतृश्रोत्रप्रदेशे शब्दस्योपलब्धेः सकलजनप्रसिद्धत्वात्। नापि सामान्यादिना व्यभिचारि; तत्र विशेषणस्यास्याप्रवृत्तेः। ननु न आद्य एव आकाश-तच्छङ्खमुखसंयोगादेः समवायि-असमवायि-निमित्तकारणाज्जातः शब्दः श्रोत्रेण आगत्य सम्बद्ध्यते येनास्य क्रियावत्त्वं स्यात्, किन्तु वीचीतरङ्गन्यायेन अपरापर एव आकाश-शब्दादिलक्षणात् समवायि-असमवायि-निमित्तकारणाज्जातः अन्य एव, अतः कथमस्य क्रियावत्त्वसंभावना ? इत्यप्यसमीक्षिताभिधानम्; सर्वत्र एवं क्रियोच्छेदप्रसङ्गात्, 'बाणादयोऽपि हि पूर्वपूर्वसमानजातीयक्षणप्रभवा लक्ष्यप्रदेशव्यापिनः न पुनः ते एव' इति कल्पयतो न वक्त्रं वक्रीभवेत्। प्रत्यभिज्ञानाद् अत्र स्थायित्वसिद्धेः नैवं कल्पना, इत्यन्यत्रापि समानम्— 'उपाध्यायोक्तं शृणोमि शिष्योक्तं शृणोमि' इति एकत्वग्राहिणः प्रत्यभिज्ञानस्य शब्देऽपि प्रतीतेः।

ननु प्रत्यभिज्ञानस्य भवन्मते दर्शन-स्मरणकारणकत्वात्, अत्र च तदभावात् कथं तदुत्पत्तिः ? न खलु उपाध्यायाद्युक्ते शब्दे दर्शनवत् स्मरणं संभवति अस्य पूर्वदर्शनाद्याहितसंस्कार-प्रबोधनिबन्धत्वात्, न च कारणाऽभावे कार्यस्य उत्पत्तिर्युक्ता अतिप्रसङ्गात्; इत्यप्यनुपपन्नम्; सम्बन्धिताप्रतिपत्तिद्वारेण अत्र एकत्वस्य प्रतीतेः, सम्बन्धितायाश्च दर्शन-स्मरणयोः सद्भावसंभवात् प्रत्यभिज्ञानस्य उत्पत्तिरविरुद्धा। तथाहि—प्रत्यक्षानुपलम्भतोऽनुमानतो वा तत्कार्यतया तत्सम्बन्धिनं शब्दं प्रतिपद्य इदानीं तद्दर्शनस्मृतिप्रभवं प्रत्यभिज्ञानं तत्सम्बन्धितया शब्दं प्रतिपद्यमानम् एकत्वविशिष्टमेव प्रतिपद्यते व्यजनाऽनिलवत्, कथमन्यथा 'उपाध्यायोक्तं शृणोमि' इत्यादि प्रतीतिः स्यात् ? 'तदुक्तोद्भूतं तत्सदृशं शब्दान्तरं शृणोमि' इति प्रतीतिप्रसङ्गात्। अथ लून-पुनर्जातनख-केशादिवत् सदृश-अपरापरोत्पत्तिनिबन्धनमेतत् प्रत्यभिज्ञानम् नैकत्वनिबन्धनम्; तदेतद् बाणादावपि समानम्, इति अशेषाऽर्थानां क्षणिकत्व-प्रसङ्गात् सौगतमतसिद्धिः स्यात्।

ननु शब्दः तीव्रतमं-तीव्रतर-तीव्र-मन्द-मन्दतर-मन्दतमलक्षणषड्विधभेदभिन्नः प्रतीयते न बाणादिः, अतः तत्र तद्भेदप्रतीत्यन्यथाऽनुपपत्त्या क्षणिकत्वं परिकल्प्यते, न बाणादौ विपर्ययात्, तत्कथं सौगतमतसिद्धिः स्यात् ? इत्यप्यविचारितरमणीयम्; तद्भेदप्रतीतेः क्षणिकत्वाऽप्रसाधकत्वात्, अन्यथा वायोरपि क्षणिकत्वप्रसङ्गः, व्यजनादिकारणकलापप्रभवस्य अस्यापि

१ "वीचीसन्तानवच्छब्दसन्तान इत्येवं सन्तानेन श्रोत्रप्रदेशमागतस्य ग्रहणम्। श्रोत्रशब्दयोः गमनागमनाभावात् अप्राप्तस्य ग्रहणं नास्ति परिशेषात् सन्तानसिद्धिः।" प्रश० भा० पृ० २८८। "यथाहि महतः पाषाणाद्यभिघातादुपजाता वीची वीच्यन्तरमारभते साऽपि पुनर्वीच्यन्तरमिति सन्तानाः तद्वच्छब्दसन्तानाः…।" प्रश० व्यो० पृ० ६५०। प्रश० कन्द० पृ० २८९। २—ध्यायेनोक्तं ब०, ज०। ३—णत्वात् ब०, ज०। ४ तीव्रतीव्रतरतीव्रतमतीव्रमन्द—ब०, ज०। ५—कल्पते आ०, ब०।

प्रत्यासन्नतमादिपुरुषैः तीव्रतमादिभेदेन प्रतीयमानत्वाऽविशेषात्। बाणादेरपि चैवं तत्प्रसङ्गः लक्ष्यप्रदेशे प्रक्षिप्तस्य अस्यापि तथाविधैस्तैः तद्भेदेन प्रतीयमानत्वसंभवात्। अथ अत्र तीव्रतमादिस्वभावक्रियानिबन्धनः तद्भेदप्रतिभासः; तदेतत् शब्देऽपि समानम्।

अथ अत्र बाधकसद्भावात् क्षणिकत्वकल्पनाऽयुक्ता न बाणादौ विपर्ययात्; ननु अत्र किं बाधकम्–प्रत्यक्षम्, अनुमानं वा? प्रत्यक्षञ्चेत्; किम् एकत्वविषयम्, क्षणिकत्वविषयं वा? न तावद् एकत्वविषयम्; समविषयत्वेन तदनुकूलत्वात्। नापि क्षणिकत्वविषयम्; शब्दे अन्यत्र वा तद्विषयस्य अस्य असिद्धत्वात्। अथ अनुमानं तद्विषयं तद्बाधकम्; तथाहि–क्षणिकः शब्दः अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्य विशेषगुणत्वात् सुखादिवत्; तदपि मनोरथमात्रम्; एकशाखाप्रभवत्ववत् कालात्ययापदिष्टत्वाद् हेतोः। न चास्य तदपदिष्टत्वमसिद्धम्; प्रत्यभिज्ञाख्यप्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वात्। विभुद्रव्यविशेषगुणत्वेऽप्यसिद्धम्; शब्दस्य द्रव्यत्वप्रसाधनात्।

वीचीतरङ्गन्यायेन च शब्दस्य उत्पत्त्यभ्युपगमे प्रथमतो वक्तृव्यापाराद् एकः शब्दः प्रादुर्भवेत्, अनेको वा? यद्येकः; कथं नानादिक्काऽनेकशब्दोत्पत्तिः सकृत् स्यात्? सर्वदिक्कताल्वादिव्यापारजनितवाय्वाकाशसंयोगानाम समवायिकारणानां समवायिकारणस्य च आकाशस्य सर्वगतस्य भावात् सकृत् सर्वदिक्काऽनेकशब्दोत्पत्त्यविरोधे शब्दस्य आरम्भकत्वाऽनुपपत्तिः। यथैव हि आद्यः शब्दो न शब्देनाऽऽरब्धः तालवाद्याकाशसंयोगादेव असमवायिकारणादुत्पत्तेः, तथा सर्वदिक्कशब्दान्तराण्यपि तालवादिव्यापारप्रभववाय्वाकाशसंयोगेभ्य एव असमवायिकारणेभ्यः तदुत्पत्तिसंभवात्। तथा च *"संयोगाद्विभागात् शब्दाच्च शब्दोत्पत्तिः"* [वै० सू० २।२।३१] इति प्रथते। अथ शब्दान्तराणां प्रथमः शब्दः असमवायिकारणं तत्सदृशत्वात्, अन्यथा तद्विसदृशशब्दान्तरोत्पत्तिप्रसङ्गो नियामकाऽभावात्; नन्वेवं 'प्रथमस्यापि शब्दस्य अन्यस्माच्छब्दाद् असमवायिकारणादुत्पत्तिः तस्यापि अन्यस्मात् पूर्वशब्दात्' इति अनादित्वापत्तिः शब्दसन्तानस्य स्यात्। अथ प्रथमः शब्दः प्रतिनियतः प्रतिनियताद् वक्तृव्यापारादेव उत्पन्नः स्वसदृशानि शब्दान्तराणि आरभते; तर्हि किम् आद्येन शब्देन असमवायिकारणेन कल्पितेन? प्रतिनियतवक्तृव्यापारात् तत्प्रभवप्रतिनियतवाय्वाकाशसंयोगेभ्यः स्वसदृश-अपरापरशब्दोत्पत्तिसंभवात्। तन्न एकः शब्दः शब्दान्तरारम्भकः।

नाप्यनेकः; एकस्मात् तालवाद्याकाशसंयोगाद् अनेकशब्दोत्पत्तेरनुपपत्तेः। न च अनेकः

---

१ अथ बाध–भां०। २–भिज्ञानाख्य–श्र०। ३–त्वं वासि–आ०। ४ "शङ्खमुखसंयोगादाकाशे शब्दः प्रादुर्भवन् एक एव प्रादुर्भवेदनेको वा?" तत्त्वार्थश्लो० पृ० ४२१। प्रमेयक० पृ० १६७ पू०। स्या० रत्ना० पृ० ९४२। "वीचीतरङ्गवृत्त्यैवमन्त्यः श्रोत्रेण गृह्यते। अदृष्टकल्पना तस्मिन् पक्षे बह्वी प्रसज्यते॥ ९०॥" मी० श्लो० पृ० ७५३। ५–त्तिः स्यात् त–भां०। ६ अपरस्मात् ब०, ज०। ७–रभेत श्र०। ८–भ्यश्च सदृ–ब०, ज०, भां०।

तालवाद्याकाशसंयोगः सकृद् एकस्य वक्तुः संभवति; प्रयत्नस्य एकत्वात्। न च प्रयत्नभेदमन्तरेण तालवादिक्रियापूर्वकः अन्यतरकर्मजस्तालवाद्याकाशसंयोगो घटते यतोऽनेकः शब्दः स्यात्। अस्तु वा कुतश्चिद् आद्यः शब्दोऽनेकः; तथापि असौ स्वदेशे शब्दान्तराण्यारभते, देशान्तरे वा ? न तावत् स्वदेशे; देशान्तरे शब्दोपलम्भाऽभावप्रसङ्गात्। अथ देशान्तरे[1]; तत्रापि तत्र गत्वा, स्वदेशस्थ एव वा देशान्तरे तान्यसौ जनयेत् ? यदि स्वदेशस्थ एव; तर्हि अदृष्टमपि शरीर- ५
देशस्थमेव देशान्तरवर्तिमणिमुक्ताफलाद्याकर्षणं कुर्यात्, तथा च "*धर्मा[2]ऽधर्मौ स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभेते*" [ ] इत्यस्य विरोधः। श्रोतृश्रोत्रप्रदेशे वा ततः शब्दोत्पत्तेः तद्विषयविज्ञानोत्पत्तेर्वा प्रसङ्गाद् अन्तरालशब्दानां श्रोत्रे प्राप्यकारित्वस्य च कल्पनाऽनर्थक्यम्। न च वीचीतरङ्गादौ अप्राप्तकार्यदेशत्वे सति आरम्भकत्वं दृष्टम्, येन अत्रापि तथा कल्प्येत अध्यक्षविरोधात्। अथ तद्देशे गत्वा; सिद्धं तर्हि शब्दस्य क्रियावत्त्वम्। १०

आकाशगु[3]णत्वे च अस्य अस्मदादिप्रत्यक्षताऽनुपपत्तिः, तस्य अत्यन्तपरोक्षत्वात्, यः अत्यन्तपरोक्षगुणिगुणः नासौ अस्मदादिप्रत्यक्षः यथा परमाणुरूपादिः, तथा च परेण अभ्युपगतः शब्द इति। तत्प्रत्यक्षत्वे वा; अस्य अत्यन्तपरोक्ष-आकाशविशेषगुणत्वाऽयोगः, यद् अस्मदादिप्रत्यक्षम् तन्न अत्यन्तपरोक्षगुणिगुणः यथा घटरूपादयः, तथा च शब्द इति।

यच्चोक्तम्[4]–'सत्तासम्बन्धित्वात्' इति; तत्र किं स्वरूपभूतया सत्तया सम्बन्धित्वं विव- १५
क्षितम्, अर्थान्तरभूतया वा ? प्रथमविकल्पे सामान्यादिभिर्व्यभिचारः, तेषां द्रव्य-कर्माऽन्यत्वे सति तथाभूतया सत्तया सम्बन्धित्वेऽपि गुणत्वाऽभावात्। द्वितीयविकल्पस्तु अयुक्तः; स्वतोऽसतामर्थानाम् अर्थान्तरभूतसत्तातः सत्त्वस्य '**स्वतोऽर्थाः सन्तु सत्तावत्**' इत्यत्र निषेत्स्यमानत्वात्।

यच्चान्यदुक्तम्[5]–'शब्दो द्रव्यं न भवति एकद्रव्यत्वात्' इति; तत्र एकद्रव्यत्वसाधनम- २०
सिद्धम्; यतो गुणत्वे गगने एव एकद्रव्ये समवायेन वर्त्तने च सिद्धे तत् सिद्ध्येत्, तच्च उक्तनीत्या अपास्तमिति कथं तत्सिद्धिः ?

यदपि एकद्रव्यत्वे साधनमुक्तम्[6]–'[7]एकद्रव्यः शब्दः सामान्यविशेषवत्त्वे सति बाह्यै-केन्द्रियप्रत्यक्षत्वात्' इति; तदपि प्रत्यनुमानबाधितम्; तथाहि–अनेकद्रव्यः शब्दः अस्म-

---

१–रे तत्र ग–ब०, ज०। २ "अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणूनां मनसश्चाद्यं कर्म अदृष्टकारितम्।" वैशे० सू० ५।२।१३। "धर्माधर्मौ च स्वाश्रयसमवेते सुखदुःखे पराश्रये तु क्रियामारभेते···।" प्रश० व्यो० पृ० ४३७। ३ "अमूर्त्तगुणस्य आत्मगुणवद् इन्द्रियविषयत्वादर्शनात्।" तत्त्वार्थराज० पृ० ४८। तत्त्वार्थश्लो० पृ० ४२१। "न तावदमूर्त्तद्रव्यगुणः शब्दः गुणगुणिनोरविभक्तप्रदेशत्वेन एकवेदनवेद्यत्वाद् अमूर्त्तद्रव्यस्यापि श्रवणेन्द्रियविषयतापत्तेः।" पञ्चा० टी० पृ० १८५। ४ पृ० २४० पं० ८। ५ पञ्चमपरिच्छेदस्य चत्वारिंशत्तमकारिकाव्याख्यानावसरे। ६ पृ० २४० पं० १०। ७ पृ० २४० पं० १३। ८ एकद्रव्यं आ०। ९ प्रत्यक्षानुमान–ज०।

दादिप्रत्यक्षत्वे सति स्पर्शवत्त्वात् घटादिवत्। वायुना अनेकान्तश्च; स हि सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षोऽपि अनेकद्रव्यः, चक्षुषैकेन प्रतीयमानैश्चन्द्राऽर्कादिभिश्च। अस्मदादिविलक्षणैः बाह्येन्द्रियान्तरेण तत्र प्रतीतिः, शब्देऽपि समाना, अत्र तथाऽनुपलम्भः अन्यत्रापि तुल्यः।

यदपि 'अनित्यत्वे सति नियमेन अचाक्षुषप्रत्यक्षत्वात्' इत्युक्तम्[1]; तदप्ययुक्तम्; वायुना अनैकान्तिकत्वात्, स हि अनित्यत्वे सति नियमेनाऽचाक्षुषप्रत्यक्षोऽपि द्रव्यम् इति।

यदपि–'व्यापकद्रव्यसमवेतत्वात्' इत्यभिहितम्[2]; तदप्यभिधानमात्रम्; असिद्धत्वात्, सिद्धे हि गुणत्वे तत्र अस्य समवेतत्वं सिद्ध्येत्, न च तत्सिद्धम् उक्तप्रकारेण निरस्तत्वात्।

यच्चान्यदुक्तम्[3]–'न तावत्स्पर्शवतां परमाणूनाम्' इत्यादि; तत् सिद्धसाधनम्, तद्गुणत्वस्य शब्देऽनभ्युपगमात्। यथा च अस्मदादिप्रत्यक्षत्वे शब्दस्य परमाणुविशेषगुणत्वविरोधः तथा आकाशविशेषगुणत्वविरोधोऽपि। नहि अस्मदादिप्रत्यक्षत्वं परमाणुविशेषगुणत्वमेव निराकरोति शब्दस्य न आकाशविशेषगुणत्वम् उभयत्राऽविशेषात्। यथैव हि परमाणुगुणो रूपादिः अस्मदाद्यप्रत्यक्षः तथा आकाशगुणो महत्त्वादिरपि।

यदपि–'आश्रयाद् भेर्यादेरन्यत्रोपलब्धेः' इत्याद्युक्तम्[4]; तदप्ययुक्तम्; भेर्यादेः शब्दाऽऽश्रयत्वाऽसिद्धेः तस्य तन्निमित्तकारणत्वात्। आत्मादिगुणत्वनिषेधस्तु सिद्धसाधनात् न समाधानमर्हति।

याऽपि शब्दोत्पत्तौ प्रक्रिया–'आकाशं समवायिकारणम्' इत्यादिका[5]; साऽपि एतेन निरस्ता; शब्दस्य आकाशगुणत्वनिषेधे तं प्रति अस्य समवायिकारणत्वाऽनुपपत्तेः। यदि वा, आकाशं निरवयवं शब्दस्य समवायिकारणं स्यात्; तर्हि तद्वत् तस्यापि व्यापित्वप्रसङ्गः। देशकृतं हि नैयत्यम् अव्यापित्वमुच्यते, तच्च आकाशस्य तत्समवायिकारणस्य अदेशत्वे अतिदुर्घटम्। यो निष्प्रदेशद्रव्यगुणः नासौ स्वाश्रयाऽव्यापकः यथा तन्महत्त्वम्, परमाणुरूपादिर्वा, निष्प्रदेशस्य आकाशस्य गुणश्च भवद्भिः परिकल्पितः शब्द इति। तस्य अव्याप्यवृत्तित्वे वा कथं तदाधारस्य आकाशस्य सावयवत्वं न स्यात् 'प्रदेशवृत्तिर्गुणः, निष्प्रदेशाधारश्च' इति कोऽन्यो जडात्मनो ब्रूयात्? यदि च सावयवं नभो न भवेत् तदा श्रोत्रसमवेतस्येव ब्रह्माण्डवर्तिनोऽपि शब्दस्य अस्मदादिभिरुपलम्भः स्यात् निरवयव-एकाकाँशलक्षणश्रोत्रसमवेतत्वात्। अथ धर्माऽधर्माभिसंस्कृतकर्णशष्कुल्यवरुद्ध आकाशदेश एव श्रोत्रम्[8]; तत्र ब्रह्माण्डवर्त्तिनः शब्दस्य असमवायात् न अस्मदादिभिरुपलम्भः; नन्वयम् अन्धसर्पबिल-[9]

---

१ पृ० २४० पं० १९। २ पृ० २४१ पं० २। ३ पृ० २४१ पं० ६। ४ पृ० २४१ पं० ९। ५–दि सा–आ०। पृ० २४२ पं० ३। ६ च श्र०। ७–कारल–भां०। ८ "श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः शब्दनिमित्तोपभोगप्रापक-धर्माधर्मोपनिबद्धः…।" प्रश० भा० पृ० ५९। ९ "नन्वयमन्धसर्पबिलप्रवेशन्यायेन सावयवत्वाङ्गीकार एव परिहारः।" स्या० रत्ना० पृ० ८९१।

प्रवेशन्यायेन सावयवत्वाऽङ्गीकार एव परिहारः, श्रोत्राऽऽकाशदेशात् ब्रह्माण्डवर्तिशब्दाऽऽधाराकाशदेशस्य अन्यत्वात्।

अव्याप्यवृत्तित्वञ्चास्य पर्युदासरूपम्, प्रसज्यरूपं वा स्यात्? आद्यपक्षे एकदेशवृत्तित्वमेव उक्तं स्यात्, 'आकाशं' हि व्याप्य शब्दो न वर्त्तते' इति ब्रुवता 'तदेकदेशे वर्तते' इत्यभ्युपगतं स्यात्। व्याप्यवृत्तित्वं हि सामस्त्यवृत्तित्वम्, तत्प्रतिषेधे च एकदेशवृत्तित्वं स्यात्, तच्च 'आकाशस्य निष्प्रदेशत्वे अतिदुर्घटम्' इत्युक्तम्। प्रसज्यपक्षे तु वृत्तिप्रतिषेधमात्रमेव उक्तं स्यात्; न चैतदुपपन्नम्। शब्दस्य गुणत्वेन द्रव्याश्रितत्वतः तत्प्रतिषेधविरोधात्, तत्प्रतिषेधे वा गुणत्वाऽनुपपत्तिः। यस्य सर्वथा वृत्तिप्रतिषेधः नासौ गुणः यथा वन्ध्यास्तनन्धयः, सर्वथा वृत्तिप्रतिषेधश्च शब्दस्य इति। समवायस्य तत्र तद्वृत्तेरभ्युपगमात् न 'एकदेशेन सामस्त्येन वा' इत्यादिदोषः; इत्यपि श्रद्धामात्रम्; तस्य अग्रे निराकरिष्यमाणत्वात्। तन्निरवयवत्वे च सन्तानवृत्त्या शब्दस्याऽऽगतस्य श्रोत्रेण उपलब्धिर्न स्यात्; अपरापर-आकाशदेशोत्पत्तिद्वारेण अस्य श्रोत्रसमवेतत्वाऽनुपपत्तेः। वीचीतरङ्गन्यायेन हि अपरापर-आकाशदेशे शब्दोत्पत्तिकल्पने कथन्नास्य सावयवत्वं सिद्ध्येत्? तन्न सर्वथा आकाशस्य अनवयवत्वं युक्तम्।

नापि सर्वथा नित्यत्वम्; तद्वत् शब्दस्यापि[1] नित्यत्वप्रसङ्गात्। तस्य हि विनाशः आश्रयविनाशात्, विरोधिगुणप्रादुर्भावात्, तन्निमित्ताऽदृष्टाऽभावाद्वा? न तावद् आश्रयविनाशात्; तस्य सर्वथा नित्यत्वप्रतिज्ञानात्। नापि विरोधिगुणप्रादुर्भावात्; यतः को विरोधी गुणः—तन्महत्त्वम्, संयोगादिर्वा? तत्राद्यपक्षोऽयुक्तः; तन्महत्त्वस्य एकार्थसमवेतत्वेन विरोधित्वाऽसिद्धेः। तत्सिद्धौ वा श्रवणसमयेऽपि तदभावप्रसङ्गः अनुत्पत्तिरेव[3] वा, सदापि[4] तन्महत्त्वस्य सद्भावात्। द्वितीयपक्षोऽप्यनुपपन्नः; संयोगादेः शब्दोत्पादं प्रति कारणत्वेन विरोधित्वाऽनुपपत्तेः। नापि तन्निमित्तादृष्टाऽभावात् तदभावः; तुच्छाभावस्य अशेषसामर्थ्यशून्यत्वेन अश्वविषाणवत् तद्विनाशाऽहेतुत्वात्।

तदेवम् आकाशहेतुत्वस्य शब्देऽनुपपत्तेः "पौद्गलिकत्वमेव अभ्युपगन्तव्यम्। तथाहि—पौद्गलिकः शब्दः, गुण-क्रियावत्त्वे सति अस्मदादिबाह्येन्द्रियप्रत्यक्षत्वात्, यदेवम् तदेवम् यथा घटादि, तथा च शब्दः, तस्मात्तथा इति। ततः शब्दस्य आकाशगुणत्वाऽसिद्धेः नाऽसौ तल्लिङ्गम्, इति नातः तत्सद्भावसिद्धिः। नन्वेवम् आकाशद्रव्यापह्नवे कथं भवतां नाऽपसिद्धान्तः स्यात्? इत्यप्यसारम्; परपरिकल्पितस्यैव सर्वथा नित्यनिरंशस्वभावस्याऽस्य अस्माभिः प्रतिक्षेपात् न तद्विपरीतस्य, अस्य उक्तदोषाऽगोचरचारित्वात्।

१—शं व्या— आ०। २—स्यापि सर्वथा नि—श्र०। ३ अनुपपत्ति—ब०, ज०। ४ तदा हि तन्महत्त्वसद्भा—भां०। तदापि तन्महत्त्वसद्भा—श्र०। ५ "सद्दो खंदप्पभवो खंदो परमाणुसंघसंघादो। पुट्ठेसु तेसु जायदि सद्दो उप्पादगो णिअदो॥ ७९॥" पञ्चास्तिका०।

कुतस्तत्सद्भावसिद्धिः भवतामपीति चेत् ? 'युगपन्निखिलद्रव्याऽवगाहकार्यात्' इति ब्रूमः । तथाहि–युगपन्निखिलावगाहः साधारणकारणाऽपेक्षः, युगपन्निखिलावगाहत्वात्, य एवंविधोऽवगाहः स एवंविधकारणाऽपेक्षो दृष्टः यथा एकसरःसलिलान्तःपातिमत्स्याद्यवगाहः, तथावगाहश्चायमिति । ननु सर्पिषो मधुन्यवगाहः, भस्मनि जलस्य, जले अश्वादेर्यथा, तथैव आलोक-तमसोः अशेषार्थावगाहो भविष्यति, अतः कथमस्माद् आकाशसिद्धिः ? इत्यप्यसुन्दरम्; अनयोरपि आकाशाऽभावे अवगाहाऽनुपपत्तेः ।

ननु निखिलार्थानां यथा आकाशेऽवगाहः तथा तस्यापि 'अन्यस्मिन्नधिकरणे अवगाहेन भवितव्यम्' इत्यनवस्था, तस्य स्वरूपेऽवगाहे सर्वाऽर्थानां स्वात्मन्यवगाहप्रसङ्गात् कथम् आकाशस्य अतः सिद्धिः ? इत्यप्यपेशलम्; आकाशस्य व्यापित्वेन स्वावगाहित्वोपपत्तितः अनवस्थाऽनुपपत्तेः, अन्येषामव्यापित्वेन स्वावगाहित्वाऽयोगाच्च, नहि किञ्चिदल्पपरिमाणं वस्तु स्वाऽधिकरणं दृष्टम् अश्वादेर्जलाद्यधिकरणत्वप्रतीतेः । कथमेवं दिक्कालात्मनाम् आकाशेऽवगाहः व्यापित्वात् ? इत्यप्यसाम्प्रतम्; तेषां व्यापित्वाऽसिद्धेः, तदसिद्धिश्च दिग्द्रव्यस्यासत्त्वेन कालात्मनोश्च असर्वगतद्रव्यत्वेन वक्ष्यमाणत्वात् सिद्धा । नन्वेवमपि अमूर्त्तत्वेन काल-आत्मनोः पाताऽभावात् कथं तदाधेयता ? इत्यप्ययुक्तम्; अमूर्त्तस्यापि ज्ञानादेः आत्मनि आधेयत्वप्रसिद्धेः ।

एतेन 'अमूर्त्तत्वात् नाऽऽकाशं कस्यचिदधिकरणम्' इत्यपि प्रत्युक्तम्; अमूर्त्तस्याप्यात्मनो ज्ञानाधिकरणत्वप्रतीतेः । समसमयवर्तित्वात् निखिलार्थानां नाधाराऽऽधेयभावः, अन्यथा आकाशादुत्तरकालं तेषां भावः स्यात्; इत्यप्यसमीचीनम्; समसमयवर्तिनामपि आत्म-अमूर्त्तत्वादीनां तद्भावप्रतीतेः, न खलु परेणापि अत्र पूर्वाऽपरीभावोऽभ्युपगम्यते नित्यत्वाऽभावाऽनुषङ्गात् । तन्न परपरिकल्पितम् आकाशद्रव्यं घटते; नापि कालद्रव्यम् ।

---

१ "सव्वेसिं जीवाणं सेसाणं तहय पुग्गलाणं च । जं देदि विवरमखिलं तं लोए हवइ आयासम् ॥ ९० ॥" पञ्चास्तिका० । "अवगाहणालक्खणेण णं आगासत्थिकाए ।" व्या० प्रज्ञ० १३।४।४८१ । "आकाशस्यावगाहः ।" तत्त्वार्थसू० ५।१८ । २ "आकाशधातो रूपधातौ आलोकतमःस्वभावत्वात् ।" स्फुटार्थ अ० पृ० ५८ । ३ ननु अखिला–ब०, ज० । "यद्याकाशं स्वप्रतिष्ठं धर्मादीन्यपि स्वप्रतिष्ठान्येव । अथ धर्मादीनामन्य आधारः कल्प्यतेआकाशस्यापि अन्य आधारः कल्प्यः तथा सत्यनवस्थाप्रसङ्गः इति चेन्नैष दोषः; नाकाशादन्यदधिकपरिमाणं द्रव्यमस्ति यत्राकाशं स्थितमित्युच्यते सर्वतोऽनन्तं हि तत् ।···" सर्वार्थसि० ५।१२ । ४–देः एकात्म–अ० । ५ "युगपद्भाविनामपि आधाराधेयभावो दृश्यते घटे रूपादयः शरीरे हस्तादय इति ।···" सर्वार्थसि० ५।१२ । ६ प्रायः अनयैव प्रक्रियया आकाशद्रव्यस्य चर्चा–तत्त्वार्थश्लो० पृ० ४३१, प्रमेयक० पृ० १६३ उ०, तत्त्वार्थभा० टी० पृ० ३५८, सन्मति० टी० पृ० ६७०, स्या० रत्ना० पृ० ९४१, इत्यादिषु द्रष्टव्या ।

ननु कालद्रव्यस्य पराऽपरादिप्रत्ययलक्षणाल्लिङ्गात् प्रसिद्धेः कथमघटमानता ? तथाहि—

'पराऽपरादिप्रत्ययाल्लिङ्गात् अस्ति नित्यः एकः विभुश्च कालः' इति वैशेषिकस्य पूर्वपक्षः—

दिग्देशकृतपरापरादिप्रत्ययविपरीताः परापरादिविशिष्टप्रत्ययाः विशिष्टकारणपूर्वकाः, विशिष्टप्रत्ययत्वात्, यो विशिष्टप्रत्ययः स विशिष्टकारणपूर्वको दृष्टः यथा 'दण्डी' इत्यादिप्रत्ययः, विशिष्टाश्च एते परा-ऽपर-[1]यौगपद्या-ऽयौगपद्य-चिर-क्षिप्रप्रत्यया इति। ५ पराऽपरयोर्हि दिग्-देशकृतयोर्व्यतिकरोऽत्र [2]दृश्यते—यत्रैव हि दिग्-देशभागे स्थिते पितरि उत्पन्नं परत्वम् तत्रैव स्थिते पुत्रेऽपरत्वम्, यत्र च स्थिते पुत्रेऽपरत्वमुत्पन्नम् तत्रैव स्थिते पितरि परत्वमुत्पद्यमानं दृष्टम् इति। अतः दिग्देशाभ्याम् अन्यन्निमित्तान्तरम् अत्र प्रत्यये अभ्युपगन्तव्यम्, तदन्तरेण तद्व्यतिकराऽनुपपत्तेः। न च पराऽपरादिप्रत्ययानाम् आदित्यादिक्रिया वलिपलितादिकं वा निमित्तं युक्तम्; तत्प्रत्ययविलक्षणत्वात् पटादिप्रत्ययवत्[3]। तथा च सूत्रम्— १० *"अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रम् इति कालालिङ्गानि"* [वै० सू० २।२।६]। तल्लिङ्गाऽविशेषाद् विशेषलिङ्गाऽभावाच्च आकाशवत् तस्य एकत्व-नित्यत्व-विभुत्वादयो धर्माः प्रतिपत्तव्याः। तथाभूतस्य च कालद्रव्यस्य इतरस्माद् भेदे 'कालः' इति वा व्यवहारे साध्ये पराऽपरादिप्रत्यय एव लिङ्गम्; तथाहि—कालः[5] इतरस्माद् भिद्यते, 'कालः' इति वा व्यवहर्त्तव्यः, पराऽपरादिप्रत्ययलिङ्गत्वात्, यस्तु न इतरस्माद्भिद्यते 'कालः' इति वा न व्यवह्रियते १५ नाऽसौ उक्तलिङ्गः यथा पृथिव्यादिः, तथा च कालः, तस्मात्तथा इति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[6]—'पराऽपर' इत्यादि; तदसमीचीनम्; यतः अतो लिङ्गात् कालः किम् एकद्रव्यस्वरूपः, अनेकद्रव्यस्वरूपो वा साध्येत ? तत्र आद्यपक्षोऽनुपपन्नः; नित्यनिरंशैकरूपतया विचार्यमाणस्य अस्यानुपपद्यमानत्वात्। यद् यद्रूपतया विचार्यमाणं नोपपद्यते न तत् तद्रूपतया अभ्युपगन्तव्यम् यथा जगत् ब्रह्माद्यद्वैतरूपतया, नित्यनिरंशैकरूपतया विचार्यमाणो नोपपद्यते च काल इति। न चेदमसिद्धम्; तत्र तद्रूपतायाः परस्परविलक्षणपराऽपरप्रत्ययादिकार्यभेदाऽनुपपत्त्या अतीतादितद्रूपभेदाऽनुपपत्त्या च अनुपपद्यमानत्वात्। नहि सर्वथा नित्यस्य निरंशस्य एकस्वभावस्य च अर्थस्य अनित्यै-विभिन्नदेशानेकस्वभावकार्यकारित्वं घटते; ब्रह्मणोऽप्येवंविधस्य अनेकग्रामारामादि- २५

षट्पदार्थपरीक्षायां कालस्य नित्यैकनिरंशरूपतानिरसनपुरस्सरा अणुरूप-अनेकद्रव्यत्वसिद्धिः—

१—यौगपद्यचिर—ब०, ज०। २ "यत्र हि दिग्विवक्षयोत्पन्नं परत्वं तत्रैवापरत्वं यत्रैवापरत्वं तत्रैव परत्वमुत्पद्यमानं दृष्टम्।···" प्रश० व्यो० पृ० ३४३। ३—यलिंगत्ववत् श्र०। ४ तथा सू—आ०, ब०, ज०। ५ "काल इतरस्माद् भिद्यते···व्यवहारो वा साध्यते विवादापन्नं काल इति व्यवहर्त्तव्यम् परापरव्यतिकरादिलिङ्गत्वात्।···" प्रश० व्यो० पृ० ३४२। ६ पृ० २५१ पं० १। ७ "निरंशैकस्वभावत्वात् पौर्वापर्य्याद्यसंभवः। तयोः सम्बन्धिभेदाच्चेदेवं तौ निष्फलौ ननु ॥ ६३० ॥" तत्त्वसं०। प्रमेयक० पृ० १६९ उ०। स्या० रत्ना० पृ० ८९२। ८—त्यावि—आ०।

कार्यकर्तृत्वाऽनुषङ्गतः तदद्वैतसिद्धिप्रसङ्गात्। 'विचित्रसहकारिवशात् तथाविधस्यापि तत्कर्तृत्वाऽविरोधः' इत्यपि अन्यत्राऽविशिष्टम्, अविद्यादेः सहकारिणो ब्रह्मण्यपि संभवात्। न च स्वरूपमभेदयतां सहकारित्वं संभवति इत्युक्तम् ईश्वरपरमाणुविचारप्रक्रमे। अतोऽत्र यौगपद्यादिप्रत्ययाऽनुत्पत्तिरेव, यत् खलु कार्यजातम् एकस्मिन् काले कृतम् तद् 'युगपत्कृतम्' इत्युच्यते, कालस्य[1] च नित्यैकत्वादिरूपत्वे तदुत्पाद्यत्वेन कार्याणाम् एकदैवोत्पत्तिप्रसङ्गान्न किञ्चिद् अयुगपत्कृतं स्यात्।

चिर-क्षिप्रव्यवहाराऽभावश्च; यद्धि बहुना कालेन कृतं तत् 'चिरेण कृतम्' इत्युच्यते, यच्च स्वल्पेन कृतं तत् 'क्षिप्रं[2] कृतम्' इति, तच्चैतदुभयं कालस्य सर्वथा नित्यादिरूपतायां दुर्घटम्। ननु कालस्य तद्रूपतायां सत्यामपि उपाधिभेदाद् भेदोपपत्तेर्न यौगपद्यादिप्रत्ययाभावः, तदुक्तम्—

"*मणिवत् पाचकवद्वा उपाधिभेदात् कालभेदः*[3]" [ ] इति; तदप्यसमीक्षिताऽभिधानम्; यतः अत्र उपाधिभेदः कार्यभेद एव, स च 'युगपत्कृतम्' इत्यत्राप्यस्त्येव इति किमित्ययुगपत्प्रत्ययो न स्यात्? अथ क्रमभावी कार्यभेदः कालभेदव्यवहारहेतुः; अथ कोऽस्य क्रमभावः? युगपदनुत्पादश्चेत्; ननु 'युगपदनुत्पादः' इत्यस्य भाषितस्य कोऽर्थः? एकस्मिन् कालेऽनुत्पादश्चेत्; नन्वयम् इतरेतराश्रयः—यावद्धि कालस्य भेदो न सिद्ध्यति न तावत् कार्याणां भिन्नकालोत्पादलक्षणः क्रमः सिद्ध्यति, यावच्च कार्याणां तथाविधः क्रमो न सिद्ध्यति न तावत् कालस्य उपाधिभेदाद् भेदः सिद्ध्यति। ततः स्वरूपत एव कालस्य भेदोऽभ्युपगन्तव्यः, तथा च 'एककालमिदम्, चिरोत्पन्नम्, अनन्तरोत्पन्नम्' इत्यादिव्यवहारः सुघटः, नान्यथा।

एतेन परापरव्यतिकरोऽपि चिन्तितः, सर्वथा नित्यादिस्वभावे काले तस्याप्यनुपपद्यमानत्वात्। यथैव हि भूम्यवयवैः आलोकाऽवयवैर्वा बहुभिरन्तरितं वस्तु 'विप्रकृष्टम्, परम्' इति च उच्यते स्वल्पैस्तु अन्तरितं 'सन्निकृष्टम्, अपरम्' इति च, तथा बहुभिः क्षणैः अहोरात्रादिभिश्च अन्तरितम् 'विप्रकृष्टम्, परम्' इति च उच्यते स्वल्पैस्तु अन्तरितम् 'सन्निकृष्टम्, अपरम्' इति च। बहु-अल्पभावश्च गुरुत्व-परिमाणादिवद् अपेक्षानिबन्धनः कालैकत्वे सर्वथा दुर्घटः। यत् परापरादिप्रत्ययहेतुः तद् अनेकम् यथा भूम्यादिप्रदेशाः, पराऽपरादिप्रत्ययहेतुश्च काल इति।

यच्चान्यदुक्तम्[4]—'तल्लिङ्गाऽविशेषात्' इत्यादि; तदप्युक्तिमात्रम्; तदविशेषस्य असिद्धत्वात्। नहि यौगपद्यादिप्रत्ययाः तल्लिङ्गभूताः स्वरूपतोऽन्योन्यमविशिष्टाः, परस्परस्वरूपविविक्ततया तेषां प्रत्यक्षतः प्रतीतेः। प्रत्येकमपि च एषां विशिष्टताऽनुभूयत एव, नहि 'युगपद्भुक्ताः युग-

---

१—स्य नि—ब०, ज०, आ०। २ क्षिप्रकृतम् आ०। ३ "उपाधिभेदान्मणिवत् पाचकवद्वा नानात्वोपचारः।" प्रश० भा० पृ० ६४। "यथा मणेः स्वरूपापरित्यागेनैव उपाधिभेदादुपचर्यते नानात्वं पीतो रक्त इति···यथा वा स्वरूपापरित्यागेनैव पुरुषस्य नानाक्रियावशात् पाचकादिभेदः तद्वदिहापि।···" प्रश० व्यो० पृ० ३५१। प्रश० कन्द० पृ० ६६। ४ पृ० २५१ पं० १२।।

पत्सुप्ताः स्थिता गता वा' इत्यादौ तत्प्रत्ययानामविशेषोऽस्ति प्रतीतिविरोधात्। अस्तु वा तत्प्रत्ययाऽविशेषः; तथापि अतः कालस्यैकत्वाऽभ्युपगमे गुरुत्वादिप्रत्ययाऽविशेषात् गुरुत्वपरिमाणादेरपि एकत्वप्रसङ्गः तुल्याऽऽक्षेपसमाधानत्वात्। ततो गुरुत्व-परिमाणादेः अनेकगुणरूपतावत् कालस्य अनेकद्रव्यरूपता अभ्युपगन्तव्या।

नित्य-निरंशैकद्रव्यरूपत्वे चास्य अर्थानां भूत-भविष्यत्-वर्तमानत्वं दुर्घटम्, अतीताऽनागत-वर्त्तमानकालभेदाऽभावात्, सिद्धे हि तद्भेदे तत्सम्बन्धादर्थानां तथा व्यपदेशः स्यात्, नान्यथा अतिप्रसङ्गात्। न चास्य तत्सिद्धिर्घटते, नित्य-निरंशैकरूपत्वात्, यद् एवंविधम् न तत्र अतीतादिस्वरूपभेदः यथा परमाणौ, नित्यनिरंशैकरूपश्च भवद्भिः परिकल्पितः काल इति।

अस्तु वा तत्र तद्भेदः; तथापि असौ स्वतः, अपराऽतीतादिकालसम्बन्धात्, अतीतादिक्रियासम्बन्धाद्वा स्यात्? न तावत् स्वतः; निरंशत्व-भेदरूपत्वयोर्विरोधात्। नाप्यपराऽतीतादिकालसम्बन्धात्; तस्य एकरूपतया अपरकालस्यैव असंभवात्, संभवे वा अनवस्था, तदतीतत्वादेरपि अपराऽतीतादिकालसम्बन्धेनैव उपपत्तेः। अथ अतीतादिक्रियासम्बन्धात् तस्य अतीतादित्वम्; ननु क्रियाणां कुतः अतीतादिरूपतासिद्धिः—अपराऽतीतादिक्रियासम्बन्धात्, तथाविधकालसम्बन्धाद्वा? प्रथमविकल्पे अनवस्था। द्वितीयविकल्पे तु अन्योन्याश्रयः—सिद्धे हि क्रियाणामतीतादित्वे तत्सम्बन्धात् कालस्य अतीतादित्वसिद्धिः, तत्सिद्धौ च तत्सम्बन्धात् तासां तत्सिद्धिरिति।

भवतु वा कुतश्चित् तत्र अतीतादिभेदसिद्धिः; तथापि कालस्य सर्वथैकत्वप्रतिज्ञाने स्ववचनविरोधः, स्ववाचैव अस्य अतीतादिरूपतया भेदप्रतिपादनात्। लोकविरोधश्च; न खलु लौकिका अतीतादिरूपस्य पूर्वाह्ण-मध्याह्न-अपराह्णस्वभावस्य शीत-उष्ण-वर्षास्वरूपस्य च कालस्य एकत्वं प्रतिपद्यन्ते, प्रत्येकं तस्य तैर्भेदाऽभ्युपगमात्। अनुमानविरोधश्च; तथाहि—यत् सूक्ष्मेतरधर्माऽध्यस्तं द्रव्यम् तदनेकम् यथा पृथिव्यादि, सूक्ष्मेतरधर्माऽध्यस्तश्च कालद्रव्यम् इति। यथैव हि पृथिव्यादिद्रव्याणां परमाणु-इतररूपतया, जीवद्रव्याणाञ्च कुन्थुगजादिजीवद्रव्यप्रभेदस्वभावतया सूक्ष्मेतरधर्माऽध्यस्तत्वाद् अनेकद्रव्यत्वम्, तथा कालद्रव्यस्यापि समय-मुहूर्त्तादितद्विशेषाऽपेक्षया तद्धर्माध्यस्तत्वसंभवात् अनेकद्रव्यत्वं प्रतिपत्तव्यम्। मुख्येतरविकल्पसंभवाच्च; न हि समय-आवलिकादिव्यवहारकालो मुख्यंकालद्रव्यमन्तरेण उपपद्यते यथा मुख्यसत्त्वमन्तरेण क्वचिदुपचरितं सत्त्वम्।

१ "तद्धि किम् अपरातीतादिकालसम्बन्धात्, तथाभूतपदार्थक्रियासम्बन्धाद्वा स्यात्, स्वतो वा? प्रथमपक्षे अनवस्था।..." प्रमेयक० पृ० १४५ पू०। सन्मति० टी० पृ० ६७१। स्या० रत्ना० पृ० ८९४। २ "समयादीनां क्रियाविशेषाणां समयादिभिर्निर्वर्त्यमानानां च पाकानां समयः पाक इत्येवमादिस्वसंज्ञारूढिसद्भावेऽपि समयः कालः ओदनपाककालः इत्यध्यारोप्यमाणः कालव्यपदेशः तद्व्यपदेशनिमित्तस्य मुख्यस्य कालस्य अस्तित्वं गमयति। कुतः? गौणस्य मुख्यापेक्षत्वात्।..." सर्वार्थसि० ५।२२।

स च मुख्यकालः अनेकद्रव्यम्, प्रत्याकाशप्रदेशं व्यवहारकालभेदाऽन्यथानुपपत्तेः। प्रत्याकाशप्रदेशविभिन्नो हि व्यवहारकालः कुरुक्षेत्र-लङ्काऽऽकाशप्रदेशयोः दिवसादिभेदाऽन्यथाऽनुपपत्तेः। ततः प्रतिलोकाकाशप्रदेशं कालस्य अणुरूपतया भेदसिद्धिः। तदुक्तम्[1]–

"लोयागासपयेसे एक्किक्के जे ठिया हु एक्किका।

रयणाणं रासीविव ते कालाणू मुणेयव्वा॥" [ ] इति।

ननु कालद्रव्यस्य विचार्यमाणस्य स्वरूपत एव असंभवात् कस्य एकद्रव्यत्वप्रतिक्षेपेण अनेकद्रव्यत्वं प्रतिपाद्यते। नहि अतीतादिभेदभिन्नः कालः संभवति यत्सम्बन्धादर्थानामतीतादित्वं स्यात्; स्वतः परतो वा अस्य तद्भेदाऽनुपपत्तेः? स्वतो हि कालस्य अतीतादित्वे अर्थानामपि स्वत एव तदस्तु अलं कालकल्पनया। परतोऽपि अतीतादिकालान्तराभिसम्बन्धात्, अतीतादिक्रियाभिसम्बन्धाद्वा तस्य अतीतादित्वाऽभ्युपगमे प्रागुक्तदोषाऽनुषङ्गः। अतः प्रमाणाऽपेक्ष एवायमतीतादिव्यवहारः;

'प्रमाणापेक्ष एव अयम् अतीतादिव्यवहारः न तु कालकृतः' इति कालद्रव्याऽभाववादिनः पूर्वपक्षः—

---

१ "नानाद्रव्यं कालः प्रत्याकाशप्रदेशं युगपद्व्यवहारकालभेदान्यथानुपपत्तेः। प्रत्याकाशप्रदेशभिन्नो व्यवहारकालः सकृत् कुरुक्षेत्राकाशलङ्काकाशदेशयोः दिवसादिभेदान्यथानुपपत्तेः।..." तत्त्वार्थश्लो० पृ० ३९९। २ "अनेकद्रव्यत्वे सति किमस्य प्रमाणम्?...उक्तं च–लोयायास पयेसे...ते कालाणू असंखदव्वाणि।" सर्वार्थसि० ५।३९। तत्त्वार्थश्लो० पृ० ३९९। बृहद्द्रव्यसं० गाथा २२। श्वेताम्बराणां कालद्रव्यविषये मतभेदः; तथाहि–"कालश्च इत्येके" तत्त्वार्थसू० ५।३८। "एके तु आचार्या व्याचक्षते कालोऽपि द्रव्यमिति।" तत्त्वार्थाधि० भा० ५।३८। "तुशब्दो विशेषपरिग्रहार्थः, स च विशेषो भेदप्रधानो नयः तद्बलेन कालोऽपि, अपिशब्दः चशब्दार्थः 'कालश्च द्रव्यान्तरमागमे निरूपितम्' इति कथयन्ति। 'कति णं भन्ते दव्वा पण्णत्ता? गोयमा छद्दव्वा पण्णत्ता, तं जहा धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए पुग्गलत्थिकाए जीवत्थिकाए अद्धा समएअ। (अनुयोगद्वा० द्रव्यगुणपर्यायनामसू० १२४) "विनिवृत्तौ वा तुशब्दः। कस्य व्यावर्त्तकः? धर्मास्तिकायादिपञ्चकाऽव्यतिरिक्तकालपरिणतिवादिनो द्रव्यनयस्य इति...यतः तत्प्रतिद्वन्दिनयानुसारिसूत्रमपरमागमे अस्ति–'किमिदं भन्ते कालोत्ति पउच्चदि? गोयमा–जीवा चेव अजीवा चेव'। इदं हि सूत्रम् अस्तिकायपञ्चकाऽव्यतिरिक्तकालप्रतिपादनाय तीर्थकृतोपादेशि जीवाजीवद्रव्यपर्यायः कालः इति सूत्रार्थः।" तत्त्वार्थभा० टी० पृ० ४३०–३२। "कालद्रव्यस्य नोक्तं प्रदेशपरिमाणं तत्र तद्विवक्षया तु इदमुच्यते–सोऽनन्तसमयः। (तत्त्वार्थाधि० सू० ५।३९)" इत्यादिना कालद्रव्यस्य अनन्तप्रदेशित्वमुक्तं तत्त्वार्थभाष्यटीकायाम्। हेमचन्द्राचार्यास्तु दिगम्बरमतमेवानुसरन्ति; तथाहि–"लोकाकाशप्रदेशस्थाः भिन्नाः कालाणवस्तु ये। भावानां परिवर्त्ताय मुख्यः कालः स उच्यते॥" योगशा०। उक्तमतान्तराणां विशेषपरिशीलनाय–धर्मसं०, द्रव्यानुयोगत० अ० १० श्लो० १०–१८, युक्तिप्रबो० गा० २३। इत्यादयो द्रष्टव्याः। २ लोयायासपएसे श्र०। ४ "विशिष्टसमयोद्भूतमनस्कारनिबन्धनम्। परापरादिविज्ञानं न कालान्न दिशश्च तत्॥ ६२९॥" "विशिष्टसमयः पौर्वापर्यादिदिनोत्पन्नेष्वर्थेषु पूर्वापरादिसंकेतः तदुद्भूतो मनस्कारः आभोगः स निबन्धनमस्येति तत्तथोक्तम्। अत एव नेतरेतराश्रयदोषः; विशिष्टपदार्थसंकेतनिबन्धनत्वादस्य ज्ञानस्येति।" तत्त्वसं० पं० पृ० २०९।

प्रमाणेन हि युगपदनुभूयमानं वस्तु 'वर्त्तमानम्' इत्युच्यते, अयुगपदनुभूयमानं तु पूर्वक्षणभावि 'भूतम्' उत्तरक्षणभावि तु 'भविष्यत्' इति ।

अत्र प्रतिविधीयते । यत्तावदुक्तम्[1]–'कालद्रव्यस्य' इत्यादि ; तदविचारितरमणीयम् ; यतः कुतोऽस्य स्वरूपत एव असंभवः–ग्राहकप्रमाणाऽभावात्, अतीतादिभेदाऽसंभवाद्वा ? तत्र आद्यपक्षोऽनुपपन्नः ; पराऽपरादिप्रत्ययलिङ्गप्रभवाऽनुमानस्यैव तत्सद्भावाऽऽवेदकप्रमाणस्य सद्भावात् । नहि तत्प्रत्यया निर्निमित्ताः कादाचित्कत्वात्, नाप्यविशिष्टनिमित्ता विशिष्टप्रत्ययत्वात्, नापि दिग्-गुण-जातिनिमित्ताः ; तज्जन्यप्रत्ययवैलक्षण्येन उत्पत्तेः । तथा हि–अपरदिग्व्यवस्थितेऽप्रशस्तेऽधमजातीये स्थविरपिण्डे 'परोऽयम्' इति प्रत्ययो दृश्यते, परदिग्व्यवस्थिते च उत्तमजातीये प्रशस्ते यूनि पिण्डे 'अपरोऽयम्' इति ।

तत्प्रतिविधानपुरस्सरा अनेकद्रव्यरूपस्य वास्तवकालद्रव्यस्य सिद्धिः—

अथ आदित्यादिक्रिया तन्निमित्तम्–जन्म[3]नो हि प्रभृति एकस्य आदित्यपरिवर्तनानि भूयांसि इति परत्वम्, अन्यस्य च अल्पीयांसि इति अपरत्वम् । नन्वेवं कथं यौगपद्यादिप्रत्ययप्रादुर्भावः स्यात् कालाऽतिरिक्तस्य निमित्तस्य अत्र विचार्यमाणस्य अनुपपद्यमानत्वात् ? तद्धि आदित्यपरिवर्तनं स्यात्, क्रियाविशेषः, कर्तृकर्मणी वा ? न तावद् आदित्यपरिवर्त्तनम् ; एकस्मिन्नपि आदित्यपरिवर्त्तने सर्वेषामुत्पादात् । आदित्यस्य हि परिवर्त्तनं मेरुप्रादक्षिण्येन परिभ्रमणम् अहोरात्रमभिधीयते, तस्मिन्नेकस्मिन्नपि यौगपद्यादिप्रतीतिविषयभूतानामर्थानामुत्पादः प्रतीयते एव । तथाव्यपदेशा[4]ऽभावाच्च ; 'युगपत्कालः' इति हि व्यपदेशः, न पुनः 'युगपदादित्यपरिवर्तनम्' इति ।

क्रियाविशेषोऽपि–आदित्यपरिवर्त्तनरूपः, घटिकादौ उदकसञ्चारादिरूपो वा ? तत्र आद्यविकल्पोऽयुक्तः ; प्रागुक्तदोषाऽनुषङ्गात् । द्वितीयविकल्पोऽप्यनुपपन्नः ; तस्य तदनुमापकत्वात् ; तथाहि–'एतावति तद्घटिकायाम् उदकसञ्चारे एतावान् कालः' इति क्रियाविशेषः कालाऽनुमापकः, न पुनः स एव कालः । किञ्च, तक्रियाया[5]ः क्रियारूपतया तदन्यक्रियावत्

१ पृ० २५४ पं० ६ । २ "तथा चाधमजातीये दिग्विवक्षया परस्मिन् स्थविरपिण्डे वलिपलितादिसान्निध्यमपेक्षमाणस्य उत्कृष्टजातीयं युवानमवधिं कृत्वा इतरस्मात् परोऽयं विप्रकृष्टोऽयमिति बुद्धिर्भवति ।..." प्रश० व्यो० पृ० ३४३ । तत्त्वार्थभा० टी० पृ० ४२९ । ३ "जन्मनः प्रभृत्येकस्य आदित्यपरिवर्त्तनानि भूयांसि इति परत्वम् अन्यस्य चाल्पीयांसीत्यपरत्वम्, अथादित्यपरिवर्त्तनमेवास्तु किं कालेनेति चेत् ; न; युगपदादिप्रत्ययानुमेयत्वात् । नचादित्यपरिवर्त्तनादेव युगपदादिप्रत्ययाः संभवन्ति इति । एकस्मिन्नेवादित्यपरिवर्त्तने सर्वेषामुत्पादात् ।" प्रश० व्यो० पृ० ३४३ । ४ "व्यपदेशाभावाच्च ; युगपत्काल इति हि व्यपदेशो न युगपदादित्यपरिवर्त्तनमिति । न च क्रियैव काल इति वाच्यम् ; युगपदादिप्रत्ययाभावप्रसङ्गात् ।..." प्रश० व्यो० पृ० ३४३ । ५ "क्रियामात्रमेव कालः तद्व्यतिरेकेणानुपलब्धेरिति चेन्न ; तदभावे कालाभिधानलोपप्रसङ्गात् ।..." तत्त्वार्थराज० पृ० २२८ ।

क्रियाप्रत्ययहेतुत्वं स्यात् न पुनः युगपदादिप्रत्ययहेतुत्वम्, 'युगपत् तदुदकसञ्चारः, क्रमेण तदुदकसञ्चारः' इति क्रियाविशेषोऽपि कालोपाधिक एव प्रतीयते तदन्यक्रियावत् तत्कथं स एव कालः स्यात्? तस्य च उक्तकार्यनिर्वर्त्तकस्य कालस्य 'क्रिया' इति नामान्तरकरणे नाममात्रमेव भिद्येत्।

अथ कर्तृ-कर्मणी एव यौगपद्यादिप्रत्ययस्य निमित्तम्; तदयुक्तम्; यतो यौगपद्यम् बहूनां कर्तॄणां कार्ये व्यापारः 'युगपद् एते कुर्वन्ति' इति प्रतीतिसमधिगम्यः, बहूनां च कार्याणामात्मलाभः 'युगपद् एतानि कृतानि' इति प्रत्ययाधिरूढः; न चात्र कर्तृमात्रं कर्ममात्रं वा आलम्बनम् अतिप्रसङ्गात्, यत्र हि क्रमेण कार्यं जायते तत्रापि कर्तृ-कर्मणोः सद्भावात् स्यादेतद्विज्ञानम्, न चैवम्।

एतेन अयुगपत्प्रत्ययोऽपि चिन्तितः; न हि सोऽपि 'अयुगपद् एते कुर्वन्ति, अयुगपद् एतत्कृतम्' इत्यादिरूपोऽविशिष्टं कर्तृकर्ममात्रमालम्बते अतिप्रसङ्गादेव। अतः तद्विशेषणं कालोऽभ्युपगन्तव्यः, कथमन्यथा चिर-क्षिप्रव्यवहारोऽपि स्यात्? एकः एव हि कर्त्ता किञ्चित्कार्यं चिरेण करोति व्यासङ्गाद् अनर्थित्वाद्वा, किञ्चित्तु क्षिप्रम् अर्थितया, तत्र 'चिरेण कृतम्, क्षिप्रं कृतम्' इति प्रत्ययौ विशिष्टत्वात् विशिष्टं निमित्तमाक्षिपतः इति कालसिद्धिः। तन्न ग्राहकप्रमाणाऽभावात् कालस्यासंभवः।

नापि अतीतादिभेदाऽसंभवात्; स्वरूपत एवास्य अतीतादिभेदसंभवात्, स्वपररूपयोः अतीतादिस्वरूपे स्वरूपतो नियतत्वेन अस्य तत्र परापेक्षाऽनुपपत्तेः। यद् यत्र स्वरूपतो नियतम् न (तत्) तत्र परमपेक्षते यथा स्वपररूपप्रकाशे प्रदीपः, स्वपररूपयोः अतीतादिस्वरूपे स्वरूपतो नियतश्च काल इति। न चैवम् अर्थानामपि स्वत एव अतीतादिस्वरूपभेदोऽस्तु इत्यभिधातव्यम्; प्रतिनियतस्वभावत्वाद् भावानाम्। न हि एकस्य स्वभावः सर्वस्य आपादयितुं युक्तः;

१–कार्यनिवर्त्तक–आ०, ब०, ज०, भां०। "यदि च कर्तृकर्मव्यतिरिक्ता विशिष्टप्रत्ययसम्पादिका क्रिया स्यात् संज्ञाभेदमात्रम्।..." प्रश० व्यो० पृ० ३४३। २–प्रत्ययनि–ब०, ज०। ३ इति सम–आ०, ब०, ज०। "बहूनां कर्तॄणां कार्यकरणम् बहूनां कार्याणामात्मलाभ इति। तथाहि–युगपदेते कुर्वन्तीति कर्त्रालम्बनं ज्ञानं युगपदेतानि कृतानि इति कार्यालम्बनं च दृष्टम्। न चात्र कर्तृमात्रं कार्यमात्रं चालम्बनम् अतिप्रसङ्गात्। तथाहि यत्र क्रमेण कार्यं तत्रापि कर्तृकर्मणोः सद्भावात् स्यादेतद्विज्ञानम्। न चास्ति, कतरस्माद्? विशिष्टं कर्त्तारं कार्यं वाऽऽलम्ब्य उत्पद्यते विज्ञानमेतदिति ज्ञायते..."। प्रश० व्यो० पृ० ३४३। प्रमेयक० पृ० १७० पू०। ४ कार्यमात्रं श्र०। ५ अयुगपदेतत् कु–आ०, ज०। ६ "तथैक एव कर्त्ता किञ्चित्कार्यं चिरेण करोति व्यासङ्गादनर्थित्वाद्वा, किञ्चित् क्षिप्रं तदर्थितया। तत्र चिरेण कृतं क्षिप्रं कृतमिति प्रत्ययो विलक्षणत्वाद् विलक्षणं कारणमाक्षिपति।..." प्रश० व्यो० पृ० ३४४। प्रमेयक० पृ० १७० पू०। तत्त्वार्थभा० टी० पृ० ४३०।

प्रदीपस्य स्वत एव स्वप्रकाशोपलम्भतो घटादीनामपि तथा तत्प्रसङ्गात्, तथा च प्रतिनियतार्थस्वरूपव्यवस्थाविलोपः स्यात्।

यच्चान्यदुक्तम्[2]–'प्रमाणाऽपेक्ष एव' इत्यादि; तत्र किमिदं प्रमाणेन युगपदनुभूयमानत्वं नाम ? प्रमाणेन सह एककालतयाऽनुभूयमानत्वमिति चेन्न; स्ववचनविरोधाऽनुषङ्गात्, एवं वदता हि भवता स्ववचनेनैव कालः प्रतिपादितः, तदनभ्युपगमे 'एककालतया' इत्यभिधातुमशक्तेः, 'पूर्वक्षणभावि भूतम्' इत्यादिवचनाऽनुपपत्तेश्च, कालस्यैव क्षणाऽपरपर्यायेण अभिधानात्। अतः कालोपाधिकमेव इदं भावानां वर्त्तमानत्वादिकं स्वरूपं प्रमाणाऽपेक्षया व्यवह्रियते देशोपाधिकदूर-निकटादिस्वरूपवत्। कालाऽनभ्युपगमे लोकप्रतीतिविरोधश्च; लोके वसन्तादिकालप्रतीतिसद्भावात्, प्रतीयन्ते हि 'प्रतिनियत एव काले प्रतिनियता वनस्पतयः पुष्यन्ति' इत्यादिव्यवहारं कुर्वन्तो निखिलव्यवहारिणः, यथा 'वसन्तादिसमये[3] एव पाटलादयः' इति। एवं कार्यान्तरेष्वपि अभ्यूह्यम् 'प्रसवनकालमपेक्षते' इति व्यवहारात्, समयमुहूर्त्तादिव्यवहाराच्च तत्सिद्धिः। अतः सिद्धो वास्तवः कालः अनेकद्रव्यस्वभावः। तन्न परपरिकल्पितं कालद्रव्यमपि व्यवतिष्ठते; नापि दिग्द्रव्यम्।

नन्वस्य कालकृतपरापरादिप्रत्ययविपरीतपूर्वाऽपरादिप्रत्ययलिङ्गात् प्रतीयमानत्वात् कथमव्यवस्थितिः ? तथाहि–मूर्त्तेष्वेव द्रव्येषु मूर्त्तद्रव्यमवधिं[4]कृत्वा 'इदम् अतः पूर्वेण, दक्षिणेन, पश्चिमेन, उत्तरेण, पूर्वदक्षिणेन, दक्षिणाऽपरेण, अपरोत्तरेण, उत्तरपूर्वेण, अधस्तात्, उपरिष्टात्' इति अमी दश प्रत्यया यतो भवन्ति सा 'दिक्' इति। तथा च सूत्रम्–"*अतस्[5] इदम् इति यतः तद्दिशो लिङ्गम्।*" [वैशे० सू० २।२।१०]

'पूर्वाऽपरादिप्रत्ययलिङ्गात् प्रतीयमाना अस्ति दिक् पृथग् द्रव्यम्' इति वैशेषिकस्य पूर्वपक्षः–

नहि इमे प्रत्यया निर्निमित्ताः कादाचित्कत्वात्। नापि अविशिष्टनिमित्ताः; विशिष्टप्रत्ययत्वात् 'दण्डी' इत्यादिप्रत्ययवत्। न च अन्योऽन्यापेक्षमूर्त्तद्रव्यनिमित्ताः; परस्पराश्रयत्वेन उभयप्रत्ययाऽभावाऽनुषङ्गात्। ततोऽन्यनिमित्तोत्पाद्यत्वाऽसंभवात् एते दिश एव अनुमापकाः। प्रयोगः–यदेतत् पूर्वाऽपरादिज्ञानं तत् मूर्त्तद्रव्यव्यतिरिक्तपदार्थनिबन्धनम् तत्प्रत्ययविलक्षणत्वात् सुखादिप्रत्ययवत्। तथा, दिग्द्रव्यम्[6] इतरेभ्यो भिद्यते, 'दिग्' इति वा व्यवहर्त्तृ-

---

१ तथा प्रस–ब०, ज०। २ पृ० २५४ पं० १२। ३ "वसन्तसमय एव पाटलादिकुसुमानामुद्भवो न कालान्तर इत्येवं कार्यान्तरेष्वप्यूह्यं प्रसवकालमपेक्षते इति व्यवहारात् कारणत्वं कालस्य···।" प्रश० व्यो० पृ० ३४९। प्रमेयक० पृ० १७० पू०। ४–धिकृत्य ब०, ज०। "मूर्त्तद्रव्यमवधिं कृत्वा मूर्त्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेन पश्चिमेन उत्तरेण पूर्वदक्षिणेन दक्षिणापरेण अपरोत्तरेण उत्तरपूर्वेण चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति सा दिगिति।" प्रश० भा० पृ० ६६। ५ "इत इदमिति यतः तद्दिश्यं लिङ्गम्।" वै० सू०। प्रकृतपाठस्तु–प्रमेयक० पृ० १७० पू०, सन्मति० टी० पृ० ६६९। ६ "तथा च दिगितरेभ्यो भिद्यते···।" प्रश० व्यो० पृ० ३५७।

व्यम् पूर्वादिप्रत्ययलिङ्गत्वात्, यत्तु न तथा न तत् पूर्वादिप्रत्ययलिङ्गम् यथा क्षित्यादि, तथा चेदम्, तस्मात्तथा इति। विभुत्व-एकत्व-नित्यत्वादयश्च अस्या धर्माः कालवद् अवगन्तव्याः। न च अस्या एकत्वे प्राच्यादिभेदव्यवहारो दुर्घटः; सवितुर्मेरुप्रदक्षिणमावर्त्तमानस्य लोकपालपरिगृहीतदिक्प्रदेशैः संयोगात् तस्य सुघटत्वादिति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[2]–'मूर्त्तेष्वेव द्रव्येषु' इत्यादि; तदसमीचीनम्; यतोऽमी प्रत्ययाः कार्यभूताः सन्तः किं कारणमात्रस्याऽनुमापकाः, दिग्द्रव्यलक्षणकारणविशेषस्य वा? प्रथमपक्षे कथमतो दिग्द्रव्यस्य सिद्धिः कारणमात्रस्यैव सिद्धेः? तत्र च सिद्धसाध्यता[3] तेषाम् आकाशलक्षणकारणपूर्वकत्वाऽभ्युपगमात्, तस्यैव 'दिग्' इति नामान्तरकरणे नाम्नि एव विवादः नाऽर्थे, दिशः ततो द्रव्यान्तरत्वाऽसिद्धेः। एतेन द्वितीयविकल्पोऽपि प्रत्याख्यातः; दिग्द्रव्यस्य हि शशविषाणवत् सर्वथाऽसंभवे कथं तत्पूर्वकत्वं तत्प्रत्ययानां स्यात् यतस्ते तस्याऽनुमापकाः स्युः? न च तदसंभवे क प्राच्यादिव्यवहारः स्यात् इत्यभिधातव्यम्? आकाशप्रदेशश्रेणिष्वेव[4] आदित्योदयादिवशात् प्राच्यादिव्यवहारोपपत्तेः, तथा च एषां न निर्हेतुकत्वम् नाप्यविशिष्टपदार्थहेतुकत्वं स्यात्। तथाभूतप्राच्यादिदिक्सम्बन्धाच्च मूर्त्तद्रव्येषु पूर्वाऽपरादिप्रत्ययविशेषस्य उत्पत्तेः न परस्परापेक्षया मूर्त्तद्रव्याण्येव तद्धेतवः, येन 'एकतरस्य पूर्वत्वाऽसिद्धौ अपरस्य अपरत्वाऽसिद्धिः, तदसिद्धौ च एकतरस्य पूर्वत्वाऽसिद्धिः' इति इतरेतराश्रयत्वेन उभयाऽभावः स्यात्।

पूर्वोक्तदिग्द्रव्यप्रतिविधानपुरस्सरम् आकाशप्रदेशपङ्क्तेरेव पूर्वाऽपरादिप्रत्ययहेतुत्वप्रसाधनम्—

ननु मूर्त्तद्रव्येषु पूर्वादिप्रत्ययस्य आकाशप्रदेशश्रेणिहेतुत्वे तत्र तत्प्रत्ययस्य किं हेतुत्वं स्यादिति चेत्? 'स्वरूपहेतुत्वमेव' इति ब्रूमः। तत्प्रदेशपङ्क्तेः स्व-पररूपयोः पूर्वाऽपरादिप्रत्ययहेतुस्वरूपत्वात्, प्रकाशस्य स्वपररूपयोः प्रकाशहेतुस्वरूपवत्, कथमन्यथा दिक्प्रदेशेष्वपि तत्प्रत्ययोत्पत्तिः स्यात्? तत्र हि पूर्वाऽपरादिप्रत्ययोत्पत्तिः–स्वभावतः, दिग्द्रव्यान्तराऽपेक्षया, परस्पराऽपेक्षया वा स्यात्? यदि स्वभावतः; तदा तत्प्रत्ययपरावृत्तिर्न स्यात्, यत्र हि दिक्प्रदेशे पूर्वप्रत्ययहेतुत्वं तत्र तदेव न अपरप्रत्ययहेतुत्वं स्यात्, यत्र च तत् न तत्र पूर्व-

---

१ "आदित्यसंयोगाद् भूतपूर्वाद् भविष्यतो भूताच्च प्राची।" "तथा दक्षिणा प्रतीची उदीची च।" "एतेन दिगन्तरालानि व्याख्यातानि।" वै० सू० २।२।१४, १५, १६। "मेरुं प्रदक्षिणमावर्त्तमानस्य भगवतः सवितुर्यें संयोगविशेषाः लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः संज्ञाः…।" प्रश० भा० पृ० ६७। २ पृ० २५७ पं० १५। ३ "…अतः कारणमात्रे साध्ये सिद्धसाध्यता विशेषेण साध्ये अनुमानबाधा…।" तत्त्वसं० पं० पृ० २०९। सन्मति० टी० पृ० ६७०। स्या० रत्ना० पृ० ८९८। ४ "दिशोऽपि आकाशेऽन्तर्भावः आदित्योदयाद्यपेक्षया आकाशप्रदेशपङ्क्तिषु इत इदमिति व्यवहारोपपत्तेः।…" सर्वार्थसि०, राजवा० ५।३। प्रमेयक० पृ० १७० उ०। स्या० रत्ना० पृ० ८९८। ५–काशश्रेणि–अ०।

प्रत्ययहेतुत्वमिति। अस्ति च तत्परावृत्तिः, यत्र हि दिक्प्रदेशे विवक्षितप्रदेशाऽपेक्षया पूर्वप्रत्ययहेतुत्वं दृष्टम् तत्रैव अपरप्रदेशाऽपेक्षया अपरप्रत्ययहेतुत्वम्। तदुक्तम्—

"प्राग्भागो यः सुराष्ट्राणां मालवानां स दक्षिणः।
प्राग्भागः पुनरेतेषां तेषामुत्तरतः स्थितः॥" [ ] इति।

दिग्द्रव्यान्तराऽपेक्षया तत्र तत्प्रत्ययहेतुत्वे तु अनवस्था—तत्रापि तत्प्रत्ययहेतुत्वस्य अपरदिग्द्रव्यहेतुत्वप्रसङ्गात्। परस्परापेक्षया च तत्प्रदेशानां तत्प्रत्ययहेतुत्वे अन्योन्याश्रयानुषङ्गः। 'सवितुर्मेरुप्रदक्षिणमावर्त्तमानस्य' इत्यादिन्यायेन दिग्द्रव्ये प्राच्यादिव्यवहारोपपत्तौ तत्प्रदेशपङ्क्तिष्वपि अत एव तद्व्यवहारोपपत्तेः अलं दिग्द्रव्यकल्पनया। ५

अन्यथा देशद्रव्यस्यापि कल्पनाप्रसङ्गः, 'अयमतः पूर्वो देशः' इत्यादिप्रत्ययस्य देशद्रव्यमन्तरेणाप्यनुपपत्तेः, तथा च 'नव द्रव्याणि' इति द्रव्यसंख्याव्याघातः स्यात्। पृथिव्यादिरेव देशद्रव्यमित्यनुपपन्नम्; तस्य पृथिव्यादिप्रत्ययहेतुत्वेन 'अयमतः पूर्वो देशः' इत्यादिप्रत्ययहेतुत्वाऽनुपपत्तेः। अथ पूर्वादिदिक्कृतः पृथिव्यादिषु पूर्वदेशादिप्रत्ययः; तदेतन्मनोरथमात्रम्; दिशः गगनप्रदेशपङ्क्तेः उक्तन्यायेन अर्थान्तरत्वाऽसिद्धेः। नन्वेवम् आदित्योदयादिवशादेव आकाशप्रदेशपङ्क्तिष्विव पृथिव्यादिष्वपि पूर्वापरादिप्रत्ययसिद्धेः आकाशप्रदेशश्रेणिकल्पनापि अफला; इत्यप्यसमीक्षिताऽभिधानम्; 'पूर्वस्यां दिशि पृथिव्यादयः' इति आधाराऽऽधेयव्यवहारोपलम्भतः पृथिव्यादिद्रव्याद्यधिकरणभूतायाः तत्प्रदेशपङ्क्तेः परिकल्पनस्य सफलत्वात्, प्रसाधितञ्च आकाशं सुदृढप्रमाणेन प्राक् इत्यलं पुनः प्रसङ्गेन। १०

एतेन 'यदेतत्पूर्वाऽपरादिज्ञानम्' इत्याद्यनुमानम्; तत्प्रत्युक्तम्; तज्ज्ञानस्य मूर्त्तद्रव्यव्यतिरिक्त-आकाशप्रदेशपङ्क्तिलक्षणपदार्थनिबन्धनतया दिग्द्रव्यनिबन्धनत्वाऽनुपपत्तेः। अतो दिग्द्रव्यस्य कुतश्चित्प्रमाणादप्रसिद्धेः 'दिग्द्रव्यम् इतरेभ्यो भिद्यते' इत्यादि वन्ध्यासुतसौभाग्यव्यावर्णनप्रख्यमित्युपेक्षते। तन्न परपरिकल्पितं दिग्द्रव्यमपि व्यवतिष्ठते। नापि आत्मद्रव्यम्; तस्यापि सर्वगतत्वादिधर्मोपेतस्य कुतश्चित् प्रमाणादप्रसिद्धेः। १५

नन्विदमयुक्तम्; तद्धर्मोपेतत्वस्य अत्र अनुमानतः प्रसिद्धेः। तथाहि—आत्मा व्यापकः, अणुपरिमाणाऽनधिकरणत्वे सति नित्यद्रव्यत्वात्, यद् यदेवम् तत् तथा यथा आकाशम्, तथा च आत्मा, तस्मात्तथा इति। न चास्य अणुपरिमाणानधिकरणत्वमसिद्धम्; तथाहि—अणुपरिमाणाऽनधिकरण आत्मा अस्मदादिप्रत्यक्षविशेषगुणाऽधिकरण- २०

'अस्त्यात्मा व्यापकः शरीरपरिमाणत्वे दोषसंभवात् स च प्रतिशरीरं भिन्नः' इति वैशेषिकस्य पूर्वपक्षः— २५

---

१ "व्यत्ययदर्शनाच्च; यैवैकत्र पूर्वा दिक् सैवान्यत्र दक्षिणा इति गृह्यते 'प्राग्भागो यः सुराष्ट्राणां मालवानां स दक्षिणः' इति।..." न्यायमं० पृ० १४१। २ उद्धृतञ्चैतत्—न्यायवि० टी० पृ० ५६७ पू०। स्या० रत्ना० पृ० ८५८। ३ "देशद्रव्यस्यापि कल्पनाप्रसङ्गात्..."। प्रमेयक० पृ० १७० उ०। स्या० रत्ना० पृ० ८९९। ४—व्यादिष्वधि— ब०, ब्र०। ५ पृ० २५७ पं० २३।

त्वात् घटादिवत्। तथा, नित्यद्रव्यम् आत्मा अस्पर्शवद्द्रव्यत्वाद् आकाशवत्। यदि वा, नित्य आत्मा क्षणिकविशेषगुणाऽऽधारत्वात् आकाशवत्। तथा, द्रव्यम् आत्मा गुणवत्त्वात् घटवत्।

यदि च आत्मा व्यापको न स्यात्, तदा देवदत्ताङ्गनाङ्गस्य द्वीपान्तरवर्त्तिमणिमुक्ताफलादेश्च देवदत्तोपकारकस्य उत्पादो न स्यात्, तस्य तद्गुणपूर्वकत्वात्, तथाहि–देवदत्ताऽङ्गनाद्यङ्गं देवदत्तगुणपूर्वकम् कार्यत्वे सति तदुपकारकत्वात् प्रासादिवत्। कार्यदेशे च सन्निहितं कारणं कार्यजन्मनि व्याप्रियते नान्यथा अतिप्रसङ्गात्, अतः तदङ्गनाङ्गादिप्रादुर्भावदेशे तत्कारणवत् तद्गुणसिद्धिः, यत्र च गुणाः प्रतीयन्ते तत्र तद्गुण्यपि अनुमीयते तमन्तरेण तेषामनुपपत्तेः।

स्वाश्रयसंयोगाऽपेक्षाणामाश्रयान्तरे कर्माऽऽरम्भकत्वोपपत्तेश्च ; तथाहि–अदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते एकद्रव्यत्वे सति क्रियाहेतुगुणत्वात् प्रयत्नवत्। न चास्य क्रियाहेतुगुणत्वमसिद्धम् ; 'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनम् अणु-मनसोश्च आद्यं कर्म देवदत्तविशेषगुणकारितम् कार्यत्वे सति तदुपकारकत्वात् पाण्यादिपरिस्पन्दवत्' इत्यनुमानतः तत्प्रसिद्धेः। नाप्येकद्रव्यत्वम् ; तथाहि–एकद्रव्यम् अदृष्टम् विशेषगुणत्वात् शब्दवत्। 'एकद्रव्यत्वात्' इत्युच्यमाने रूपादिभिर्व्यभिचारः ; तन्निवृत्त्यर्थं 'क्रियाहेतुगुणत्वात्' इत्युक्तम्। 'क्रियाहेतुगुणत्वात्' इत्युच्यमाने च हस्तमुशलसंयोगेन स्वाश्रयाऽसंयुक्तस्तम्भादिक्रियाहेतुनाऽनेकान्तः ; तत्परिहारार्थं 'एकद्रव्यत्वे सति' इति विशेषणम्। 'एकद्रव्यत्वे सति क्रियाहेतुत्वात्' इत्युच्यमाने च स्वाश्रयाऽसंयुक्तलोहादिक्रियाहेतुना अयस्कान्तेन अनेकान्तः; तन्निवृत्त्यर्थं 'गुणत्वात्' इत्युक्तम्।

किञ्च, आत्मनोऽसर्वगतत्वे दिग्-देशान्तर्वर्त्तिभिः परमाणुभिः युगपत्संयोगाभावः, अतश्च आद्यकर्माऽभावः, तदभावाद् अन्त्यसंयोगस्य तन्निमित्तशरीरस्य तेन तत्सम्बन्धस्य च अभावात् अनुपायसिद्धः सर्वदा सर्वेषां मोक्षः स्यात्। अस्तु वा यथाकथञ्चित् शरीरोत्पत्तिः; तथापि सावयवं शरीरं प्रत्यवयवमनुप्रविशन् आत्मा सावयवः स्यात्, सावयवत्वे चास्य पटादिवत् कार्यत्वप्रसङ्गः। कार्यत्वे चासौ समानजातीयैः, भिन्नजातीयैर्वा कारणैरारभ्येत ?

---

१ अथवा ब०, ज०। २–णाधिकरणत्वात् ब०, ज०, भां०, श्र०। ३ "देवदत्तविशेषगुणप्रेरितभूतकार्याः तदुपगृहीताश्च शरीरादयः कार्यत्वे सति तदुपभोगसाधनत्वात् गृहवदिति।"···प्रश० किरणा० पृ० १४९। ४ "तथा धर्माधर्मयोः आत्मगुणत्वात् तदाश्रयस्य अव्यापकत्वे न स्यात् अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोस्त्वाद्यं कर्म इति तयोः स्वाश्रयसंयोगापेक्षित्वात्। यथा प्रयत्नो हस्तकर्मणि आत्मसंयोगापेक्षः तथा धर्माधर्मौ आत्मसंयोगं विना न कर्म कुर्याताम् आत्मगुणत्वात्। नच तत्रान्यत् कारणमस्ति इति स्वाश्रयसंयोगापेक्षोऽदृष्ट एव कारणम् अतो व्यापकत्वाच्च परममहत्त्वम्···।" प्रश० व्यो० पृ० ४११। प्रश० कन्दली पृ० ८८। ४ आद्यकर्माभावादन्त्यसंयोगस्य आ०।

न तावद् भिन्नजातीयैः ; विजातीयानामनारम्भकत्वात् । अथ समानजातीयैः ; ननु समानजातीयत्वं तेषाम् आत्मत्वाभिसम्बन्धादेव स्यात्, तथा च 'आत्मभिः आत्मा आरभ्यते' इत्यायातम्, एतच्चायुक्तम् ; एकत्र शरीरे अनेकात्मनाम् आत्मारम्भकाणामसंभवात् । संभवे वा प्रतिसन्धानाऽनुपपत्तिः, न हि अन्येन दृष्टम् अन्यः प्रतिसन्धातुमर्हति अतिप्रसङ्गात् । तदारभ्यत्वे चास्य घटवद् अवयवक्रियातो विभागात् संयोगविनाशाद् विनाशः स्यात् । ५

शरीरपरिमाणत्वे च आत्मनो मूर्त्तत्वाऽनुषङ्गात् शरीरेऽनुप्रवेशो न स्यात् मूर्त्तस्य मूर्त्तेऽनुप्रवेशविरोधात्, ततो निरात्मकमेव अखिलं शरीरमनुषज्यते । कथं वा तत्परिमाणत्वे तस्य बालशरीरपरिमाणस्य सतो युवशरीरपरिमाणस्वीकारः स्यात्—तत्परिमाणपरित्यागात्, अपरित्यागाद्वा ? यदि परित्यागात् ; तदा शरीरवत् तस्यानित्यत्वप्रसङ्गात् परलोकाद्यभावाऽनुषङ्गः । अथ अपरित्यागात् ; तन्न ; पूर्वपरिमाणाऽपरित्यागे शरीरवत् तस्य उत्तरपरिमाणोत्पत्त्यनुपपत्तेः । तत्परिमाणत्वे चात्मनः शरीरच्छेदे छेदप्रसङ्ग इति । १०

आत्मनो व्यापकत्वादिनिरसनपुरस्सरं शरीरपरिमाणत्वप्रसाधनम्—

अत्र प्रतिविधीयते । यत्तावदुक्तम्[3]—'आत्मा व्यापकः' इत्यादि; तदसमीचीनम् ; प्रत्यक्षबाधितपक्षनिर्देशाऽनन्तरप्रयुक्तत्वेन हेतोः कालात्ययापदिष्टत्वात् । 'सुखी अहम्' इत्यादिप्रत्यक्षेण हि आत्मा गृह्यमाणः स्वशरीरे एव गृह्यते, न परशरीरे नाप्यन्तराले, अन्यथा सर्वस्य सर्वदर्शित्वापत्तिः भोजनादिव्यवहारसङ्करश्च स्यात् । १५

ननु च अव्यापकत्वेन आत्मनः प्रतिपत्तौ पक्षस्य प्रत्यक्षबाधा युक्ता अनुष्णत्वे साध्ये अग्नेरुष्णत्वेन प्रतिपत्तिवत्, न चास्य तथा प्रतिपत्तिरस्ति नियतदेशाऽवच्छेदाऽभावादिति ; तदयुक्तम् ; यतः कोऽयं तदवच्छेदाभावो नाम—नियतदेशाननुभवः, तदुल्लेखिशब्दाप्रयोगो वा ? तत्र आद्यः पक्षोऽनुपपन्नः ; नियतदेशाऽनुभवस्य आत्मनि प्रतीयमानत्वात्, 'सुख्यहम्' इत्यादिप्रत्ययेन हि आत्मा सुखाद्यात्मकः शरीरप्रदेशे एवाऽनुभूयते, 'घटोऽयम्' इतिप्रत्ययेन पुरोदेशे पृथुबुध्नोदराद्याकारघटवत् । न खलु प्रत्यक्षेण वस्तु नियतदेशकालाकारानुभवव्यतिरेकेण अनुभवितुं शक्तम् अतिप्रसङ्गात् । द्वितीयविकल्पोऽप्ययुक्तः; यतो यदि नाम नियतदे- २०

---

१ सजातीयत्वं आ० । २ "अथ शरीरपरिमाणत्वादसिद्धमात्मनः परममहत्त्वं तथा च अल्पशरीरे अल्पो महति च महानात्मा···नन्वेतस्मिन् पक्षे सङ्कोचविकाशधर्मकत्वात् बालशरीरेऽप्यात्मनो विनाशे वृद्धावस्थायां नानात्मा सम्पद्यते इत्यन्यत्वे स्मरणं न स्यात् । न च पूर्वपरिमाणस्यानिवृत्तौ उत्तरपरिमाणेन शक्यं भवितुमिति पूर्वपरिमाणस्य आश्रयविनाशादेव निवृत्तिः ।···" प्रश० व्यो० पृ० ४११ । "एवं चात्माऽकात्स्न्यम् । शरीरपरिमाणतायां च सत्यां···घटादिवदनित्यत्वमात्मनः प्रसज्येत···समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः··· ।" ब्रह्मसू० शा० भा० २।२।३४ । ३ पृ० २५९ पं० २३ । ४ "न चास्य तदुपेतत्वमुपपद्यते प्रत्यक्षविरोधात् ; प्रत्यक्षेण हि आत्मा···।" प्रमेयक० पृ० १७१ पू० । सन्मति० टी० पृ० १४२। स्या० रत्ना० पृ० ८९९ । ५—देशाव्यवच्छेदा—ब०, ज० ।

शोल्लेखिशब्दाऽप्रयोगः तथापि कथं प्रत्यक्षेण तदननुभवः ? नहि शब्दानुविद्धत्वं प्रत्यक्षस्य स्वरूपम्, येन तदभावे तस्य अर्थस्वरूपविवेचकत्वाऽभावः स्यात्, तत्र तदनुविद्धत्वस्य प्रागेव कृतोत्तरत्वात्। अतः अनुभवोत्तरकालीन एव सर्वत्र शब्दप्रयोगः, अनुभूते हि अनेकधर्माध्यासिते वस्तुनि यत्रांशे अनुभवप्रबोधनिबन्धनं सङ्केतस्मरणमुपजायते तत्रैव शब्दप्रयोगः नान्यत्र, तत्कथं तदप्रयोगात् तदनुभवाऽभावः ? नियतदेशोल्लेखिशब्दाऽप्रयोगात् देशनैयत्यस्य अननुभवे च काल-आकारनैयत्यस्याप्यननुभवः स्यात्, नहि 'घटोऽयम्, सुख्यहम्' इत्यादिबहिरन्तःप्रतीतौ देश-काल-आकारनैयत्योल्लेखिनाम् अत्र-इदानीम्-ईदृशशब्दानां प्रयोगोऽस्ति। अतः अत्र प्रतीतौ प्रतिनियतस्य वस्तुस्वरूपस्य कस्यचिदपि प्रतिभासाऽभावात् खपुष्पप्रतीतितो नाऽस्याः कश्चिद्विशेषः स्यात्। सत्त्वाऽसत्त्वप्रतिभासकृतः सोऽत्रास्तीति चेन्न; सदसत्शब्दयोरप्रयोगे तस्याप्यसंभवात्। अस्तु वाऽसौ ; तथापि परमाण्वाकाशप्रतीतितः किंकृतोऽस्या विशेषः स्यात् ? स्फुटत्व-अस्फुटत्वप्रतिभासकृतः इति चेन्न; नियतदेशकालाऽऽकारग्रहणा-ऽग्रहणव्यतिरेकेण स्फुटत्वाऽस्फुटत्वप्रतिभासस्यैव असंभवात्। ततः प्रत्यक्षप्रतीतेः इतरप्रतीतितो विशेषमिच्छता देशादिनैयत्येन प्रतिभासः तच्छब्दाऽप्रयोगेऽपि अभ्युपगन्तव्यः, इति सिद्धा पक्षस्य प्रत्यक्षबाधा हेतोश्च कालात्ययापदिष्टता।

किञ्च, अणुपरिमाणाऽनधिकरणत्वम् तत्परिमाणाधिकरणत्वप्रतिषेधः, स किं पर्युदासरूपः, प्रसज्यरूपो वा स्यात् ? यदि पर्युदासरूपः ; तदाऽसौ भावान्तरस्वीकारद्वारेण प्रवर्त्तते। भावान्तरञ्चाऽत्र–परममहापरिमाणाऽधिकरणत्वम्, अवान्तरपरिमाणाऽधिकरणत्वं वा स्यात् ? प्रथमपक्षे विशेषणाऽसिद्धो हेतुः, यथा 'अनित्यः शब्दः अनित्यत्वे सति बाह्येन्द्रियप्रत्यक्षत्वात्' इति। द्वितीयपक्षे तु विरुद्धविशेषणः, यथा 'अनित्यः शब्दः नित्यत्वे सति बाह्येन्द्रियप्रत्यक्षत्वात्' इति। प्रसज्यपक्षे तु असिद्धत्वम् ; तुच्छस्वभावाऽभावस्य अभावविचाराऽवसरे प्रमाणाऽगोचरचारितया प्रतिपादयिष्यमाणत्वात्। सिद्धौ वा किमसौ साध्यस्य स्वभावः, कार्यं वा स्यात् ? यदि स्वभावः; तदा साध्यस्यापि तद्वत् तुच्छरूपताऽनुषङ्गः तुच्छस्वभावाऽभावादभिन्नस्वभावत्वाद् गगनेन्दीवरवत्। अथ कार्यम् ; तन्न; तुच्छस्वभावस्यास्य कार्यत्वाऽनुपपत्तेः, यत् तुच्छस्वभावं तन्न कार्यम् यथा खपुष्पम्, तुच्छस्वभावश्च भवद्भिः परिकल्पितोऽणुपरिमाणप्रतिषेध इति। कार्यत्वे चास्य कादाचित्कत्वप्रसङ्गात् तदुत्पत्तेः प्राक् आत्मनोऽणुपरिमाणाधिकरणत्वं स्यात्। कार्यत्वञ्चास्य–स्वकारणसत्तासमवायः, 'कृतम्' इति बुद्धिविषयत्वं वा स्यात् ? तत्राद्यः पक्षोऽयुक्तः ; अभावस्य भवता स्वकारणसत्तासमवायाऽनभ्युपगमात्, अन्यथा भावरूपतैव अस्य स्यात्। द्वितीयपक्षोऽप्यनुपपन्नः ; तुच्छस्वभावाभावस्य तद्विषयत्वाऽनुपपत्तेः,

---

१–चनत्वा–श्र०। २ पृ० १४४। ३ अनुभूयते ब०, ज०। ४–वबोध–आ०। –वभवप्रबोध– श्र०। ५–परिमाणत्वं ब०, ज०। ६ तुच्छस्वभावस्य तद्वि– आ०, ब०, ज०, भां०।

यस्य हि प्रमाणाऽगोचरत्वं तस्य कथं कृतबुद्धिविषयत्वं स्यात् ? तन्न आत्मनो विचार्यमाणोऽणुपरिमाणप्रतिषेधो घटते ।

यदपि तत्सिद्धये 'अस्मदादिप्रत्यक्षविशेषगुणाऽधिकरणत्वात्' इति साधनमुक्तम्[1]; तदप्ययुक्तम् ; तत्प्रतिषेधे प्रोक्ताशेषदोषानुषङ्गात् , सिद्धसाध्यताप्रसङ्गाच्च ; अणुपरिमाणप्रतिषेधमात्रस्य घटादिवद् आत्मन्यपि अभ्युपगतत्वात् । ५

नित्यद्रव्यत्वञ्च आत्मनः कथञ्चिद् विवक्षितम् , सर्वथा वा ? कथञ्चिच्चेत् ; घटादिना अनेकान्तः, तस्य अणुपरिमाणाऽनधिकरणत्वे कथञ्चिन्नित्यद्रव्यत्वे च सत्यपि व्यापित्वाऽभावात् । अथ सर्वथा; तदसिद्धम्; सर्वथा नित्यस्य वस्तुनोऽर्थक्रियाकारित्वाऽभावतः खरविषाणवत् सत्त्वस्यैवाऽसंभवात् ।

एतेन 'अस्पर्शवद्द्रव्यत्वम्'[2] आत्मनो नित्यत्वसाधनाय यदुक्तम्[3] तदपि प्रत्युक्तम् ; अतो १०
हि तस्य कथञ्चिन्नित्यत्वसाधने सिद्धसाध्यता । सर्वथा तत्साधने हेतोरनन्वयत्वम्[4], आकाशादीनामपि सर्वथा नित्यत्वस्य प्रतिषिद्धत्वात् ।

एतेन 'क्षणिकविशेषगुणाधिकरणत्वात्' इत्यपि[5] प्रत्युक्तम् ; विद्युदादिना अनैकान्तिकत्वाच्च; क्षणिकभासुररूपादिलक्षणविशेषगुणाधिकरणत्वेऽपि अस्य सर्वथा[6] नित्यत्वाऽसंभवात् । अथ भासुररूपादेः क्षणिकविशेषगुणत्वं नास्ति वह्न्यादौ तस्य अक्षणिकत्वप्रतीतेः ; तर्हि बुद्ध्यादेरपि १५
तद्विशेषगुणत्वं माभूद् ईश्वरे तस्य अक्षणिकत्वप्रतीतेः ।

यदप्युक्तम्[7]–'देवदत्ताङ्गनाद्यङ्गम्' इत्यादि; तदप्यसाम्प्रतम् ; यतः तत्कारणत्वेनाऽभिप्रेता ज्ञानदर्शनादयो देवदत्तात्मगुणाः, धर्माऽधर्मौ वा ? प्रथमपक्षे कालात्ययापदिष्टो हेतुः ; ज्ञानादीनां देवदत्ताङ्गनाङ्गादिजन्मनि अव्याप्रियमाणानां तद्देहे एव प्रत्यक्षादितः प्रतीतेः । अथ धर्माऽधर्मौ ; तर्हि तदङ्गादिकार्यं तन्निमित्तम् अस्माभिरपि इष्यत एव; तदात्मगुणत्वं तु तयो- २०
र्नेष्यते अचेतनत्वात् शब्दादिवत् । न च सुखादिना हेतोर्व्यभिचारिता; अस्य अचेतनत्वाऽभावात्, तद्विरुद्धेन स्वसंवेदनलक्षणचैतन्येन अस्य व्याप्तत्वात् । नाप्यसिद्धता; तथाहि– अचेतनौ तौ स्वग्रहणविधुरत्वात् घटादिवत् । न ज्ञानेन अनेकान्तः; अस्य स्वग्रहणात्मकत्वप्रसाधनात् । प्रसाधयिष्यते च कर्मणां पौद्गलिकत्वं मोक्षविचाराऽवसरे इत्यलमतिप्रसङ्गेन ।

अस्तु वा तयोस्तद्गुणत्वम्; तथापि न तदङ्गादिप्रादुर्भावदेशे तत्सद्भावसिद्धिः । न खलु २५
'कार्यदेशे सन्निहितमेव सकलं कारणं कार्यजन्मनि व्याप्रियते' इति नियमोऽस्ति, अञ्जनतिलकं[10]-

---

१ पृ० २५९ पं० २७ । २–वद्द्रव्यं आ०, ब०, ज० । ३ पृ० २६० प० १ । ४ पृ० २६० पं० २ । ५–लक्षणगुणा–ब०, ज० । ६–थाऽनित्यत्वसंभ–श्र० । ७ पृ० २६० पं०४ । ८ "यतो देवदत्ताङ्गनाङ्गादिकार्यस्य कारणत्वेनाभिप्रेता ज्ञानदर्शनादयो देवदत्तात्मगुणा धर्माधर्मौ वा ?···" प्रमेयक० पृ० १७१ उ० । सन्मति० टी० पृ० १४७ । स्या० रत्ना० पृ० ९०६ । ९–णात्मत्व–श्र० । १०–क द्रव्यादेः ब०, ज० ।

मन्त्रादेः आकृष्यमाणाऽङ्गनादिदेशेऽसतोऽपि आकर्षणादिकार्यकर्तृत्वोपलम्भात् । 'कार्यत्वे सति' इति विशेषणञ्च किमर्थम् ? काल-ईश्वरादिना व्यभिचारनिवृत्त्यर्थमिति चेत्; तर्हि काल-ईश्वरादिकम् अतद्गुणपूर्वकमपि यदि तदुपकारकम् कार्यमपि किञ्चिद् अन्यपूर्वकमपि तदुपकारकं भविष्यति इति सन्दिग्धविपक्षव्यावृत्तिकत्वाद् अनैकान्तिको हेतुः, सर्वज्ञत्वाऽभावे साध्ये वक्तृत्वादिवत् ।

'प्रासादिवत्' इति दृष्टान्तश्च साध्यविकलः; तत्र हि आत्मनः को गुणः अभिप्रेतः—धर्मादिः, प्रयत्नो वा ? यदि धर्मादिः ; साध्यवत् प्रसङ्गः । अथ प्रयत्नः ; ननु कोऽयं प्रयत्नो नाम ? आत्मनः तदवयवानां वा हस्ताद्यवयवप्रतिष्ठानां परिस्पन्दः, स तर्हि चलनलक्षणा क्रिया कथं गुणः ? अन्यथा गमनादेरपि गुणत्वानुषङ्गात् क्रियावार्त्तोच्छेदः स्यात् ।

एतेन 'अदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते' इत्यादि प्रत्याख्यातम् ; अदृष्टस्य उक्तप्रकारतो गुणत्वाऽसिद्धेः, अतो विशेष्याऽसिद्धो हेतुः । विशेषणाऽसिद्धश्च तदेकद्रव्यत्वाऽप्रसिद्धेः । तद्धि किम् एकस्मिन् द्रव्ये संयुक्तत्वात्, समवायेन वर्त्तनात्, अन्यतो वा स्यात् ? न तावत् संयुक्तत्वात्; संयोगस्य गुणत्वेन द्रव्याश्रयत्वात् अदृष्टस्य च अद्रव्यत्वात्, अन्यथा गुणवत्त्वेन अस्य द्रव्यत्वाऽनुषङ्गात् 'क्रियाहेतुगुणत्वात्' इति वचो विघटते । समवायेन वर्त्तनञ्च समवाये सिद्धे सिद्ध्येत्, स चासिद्धो निषेत्स्यमानत्वात् । तृतीयपक्षस्तु अनभ्युपगमादेव अयुक्तः ।

क्रियाहेतुत्वमप्यस्याऽसिद्धम् ; तथाहि—देवदत्तशरीरसंयुक्तात्मप्रदेशे वर्त्तमानमदृष्टं द्वीपान्तरवर्तिषु मणिमुक्ताफलेषु देवदत्तं प्रति उपसर्पणवत्सु क्रियाहेतुः, उत् द्वीपान्तरवर्त्तिद्रव्यसंयुक्तात्मप्रदेशे, किं वा सर्वत्र ? तत्र आद्यविकल्पोऽनुपपन्नः; अतिव्यवहितत्वेन तत्रास्य संबन्धाऽभावतः क्रियाहेतुत्वाऽनुपपत्तेः । अथ स्वाश्रयसंयोगसम्बन्धसंभवात् तदभावोऽसिद्धः ; तदयुक्तम् ; तस्य सर्वत्र सद्भावतः सर्वस्य आकर्षणप्रसङ्गात् । 'यददृष्टेन यत् जन्यते तददृष्टेन तदेव आकृष्यते न सर्वम्' इत्यप्ययुक्तम् ; देवदत्तशरीरारम्भकपरमाणूनां तददृष्टाऽजन्यतया आकर्षणाऽभावप्रसङ्गात्, तथाप्याकर्षणे अतिप्रसङ्गः ।

द्वितीयविकल्पेऽपि यथा वायुः स्वयमुपसर्पणवान् अन्येषां तृणादीनां तं प्रति उपसर्पणहेतुः तथा अदृष्टमपि स्वयं तं प्रति उपसर्पद् अन्येषामुपसर्पणहेतुः, द्वीपान्तरवर्त्तिद्रव्यसंयुक्तात्मप्रदेशस्थमेव वा ? प्रथमपक्षे स्वयमेव अदृष्टं तं प्रति उपसर्पति, अदृष्टान्तराद्वा ? स्वयमेवास्य तं प्रति उपसर्पणे द्वीपान्तरवर्त्तिद्रव्याणामपि तथैव तत्प्रसङ्गात् अदृष्टकल्पनाऽनर्थ-

---

१—णं कि—आ० । २ "साध्यावकलं चेदं निदर्शनं प्रासादिवदिति तत्र हि आत्मनः···।" प्रमेयक० पृ० १७२ पू० । सन्मति० टी० पृ० १४८ । ३—प्रविष्टानां ब०, ज० । ४ पृ० २६० पं० ९ । ५—ति विय—ब०, ज० । ६ सम्बन्धाभावात् भां० । ७ "अथ यददृष्टेन यज्जन्यते···" प्रमेयक० पृ० १७२उ० । सन्मति टी० पृ० १४३ । स्या० रत्ना० पृ० ९०६ ।

क्यम्, 'यद् देवदत्तं प्रत्युपसर्पति तद् देवदत्तगुणाकृष्टम् तं प्रति उपसर्पणात्' इति हेतुश्च अनैकान्तिकः स्यात्। अदृष्टान्तरात्तस्य तं प्रति उपसर्पणे अनवस्था, तस्यापि अदृष्टान्तरात् तं प्रति उपसर्पणप्रसङ्गात्। अथ द्वीपान्तरवर्त्तिद्रव्यसंयुक्तात्मप्रदेशस्थमेव तत् तेषां तं प्रति उपसर्पणहेतुः; न ; अन्यत्र प्रयत्नादौ आत्मगुणे तथाऽनभ्युपगमात्, न[1] खलु प्रयत्नो ग्रासादि-संयुक्तात्मप्रदेशस्थ एव ग्रासादेः देवदत्तमुखं प्रति उपसर्पणहेतुः अन्तरालप्रयत्नवैफल्यप्रसङ्गात्। सर्वत्र च अदृष्टस्य वृत्तौ सर्वद्रव्यक्रियाहेतुत्वं स्यात्, 'यददृष्टं यद् द्रव्यमुत्पादयति तददृष्टं तत्रैव क्रियां करोति' इत्यत्रापि 'शरीरारम्भकपरमाणुषु क्रिया न स्यात्' इत्युक्तम्।

कालात्ययापदिष्टश्चायं हेतुः; प्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वात्, अदृष्टस्य हि आश्रयः आत्मा, स च द्वीपान्तरवर्तिद्रव्यैर्वियुक्तमेव आत्मानं स्वसंवेदनप्रत्यक्षतः प्रतिपद्यते इति। तद्वियुक्तत्वेन अतस्तत्प्रतीतावपि आत्मनस्तद्द्रव्यैः संयोगाऽभ्युपगमे घटादीनां मेर्वादिभिः संयोगः किन्न स्यात् यतः सांख्यदर्शनं न स्यात्? प्रमाणबाधनम् उभयत्र समानम्।

किञ्च, धर्माऽधर्मयोः द्रव्यान्तरसंयोगस्य च आत्मा एक आश्रयः, स च भवन्मते निरंशः, अतो धर्मेण अधर्मेण उभाभ्यां वा सर्वात्मनाऽस्य आलिङ्गिततनुत्वान्न तत्संयोगादेस्तत्रावकाशः, तेन वा न धर्मादेः इति। अथ तदालिङ्गिततत्स्वरूपपरिहारेण द्रव्यान्तरसंयोगादिः तत्र प्रवर्त्तते; तर्हि घटादिवद् आत्मनः सावयवत्वं स्वारम्भकावयवारभ्यत्वमनित्यत्वञ्च स्यात्।

एतेन एतन्निरस्तम्[2]–'देवदत्तं प्रति उपसर्पन्तः पश्चादयो देवदत्तगुणाकृष्टाः तं प्रति उपसर्पणवत्त्वात् ग्रासादिवत्' इति; तेषां तद्गुणाकृष्टत्वे[3] प्रोक्तशेषदोषानुषङ्गात्। देवदत्त[4]-शब्देन चात्र कोऽर्थः अभिप्रेतः–शरीरम्, आत्मा, तत्संयोगः, आत्मसंयोगविशिष्टं शरीरम्, तत्संयोगविशिष्ट आत्मा, शरीरसंयुक्त आत्मप्रदेशो वा? यदि शरीरम्; तर्हि तं[5] प्रति उपसर्पणात् तद्गुणाकृष्टाः पश्चादयः इत्यात्मविशेषगुणाकृष्टत्वे साध्ये शरीरगुणाकृष्टत्वस्य साधनाद् विरुद्धो हेतुः। अथ आत्मा; तस्य समाकृष्यमाणाऽर्थदेशकालाभ्यां सर्वदाऽभिसम्बन्धात् न तं प्रति किञ्चिद् उपसर्पेत, नहि अत्यन्ताऽऽश्लिष्टकण्ठं कामिनी कामुकमुपसर्पति। अन्यदेशो हि अर्थः अन्यदेशमर्थं प्रति उपसर्पति यथा लक्ष्यं प्रति बाणादिः, अन्यकालं वा प्रति अन्यकालः यथा अङ्कुरं प्रति अपराऽपरशक्तिपरिणामलाभेन बीजादिः। न चैतदुभयं [6]नित्य-व्यापित्वाभ्याम् आत्मनि सर्वत्र सर्वदा सन्निहिते संभवति। अतो 'देवदत्तं

---

१ "न खलु प्रयत्नो ग्रासादिसंयुक्तात्मप्रदेशस्थ एव···।" प्रमेयक० पृ० १७२ उ०। सन्मति० टी० पृ० १४३। २ पृ० २६० पं० ४। ३–त्वेऽत्रोक्ता–ब०, ज०। ४ "तत्र देवदत्तशब्दवाच्यः कोऽर्थः? शरीरमात्मा तत्संयोगो वाऽऽत्मसंयोगविशिष्टं शरीरं वा शरीरसंयोगविशिष्ट आत्मा शरीरसंयुक्त आत्मप्रदेशो वा···।" प्रमेयक० पृ० १७३ उ०। सन्मति० टी० पृ० १४४। ५ तत्प्रति ब०, ज०। ६ नित्यत्वव्या–ब०, ज०।

प्रति उपसर्पन्तः' इति धर्मिविशेषणम् 'देवदत्तगुणाकृष्टाः' इति साध्यधर्मः 'तं प्रति उपसर्पणवत्त्वात्' इति साधनधर्मः परस्य कल्पनाशिल्पिकल्पित एव स्यात्।

शरीरात्मसंयोगस्य च देवदत्तशब्दवाच्यत्वे तं प्रति चैषामुपसर्पणे 'तद्गुणाकृष्टास्ते' इत्यायातम्, न च गुणेषु गुणाः सन्ति निर्गुणत्वात्तेषाम्। आत्मसंयोगविशिष्टं शरीरं तच्छब्दवाच्यम्; इत्यत्रापि तदेव विरुद्धत्वं द्रष्टव्यम्। शरीरसंयोगविशिष्ट आत्मा तच्छब्दवाच्यः; इत्यत्रापि आत्मपक्षभावी दोषः स्यात्, तथाविधस्याप्यस्य नित्य-व्यापित्वेन सर्वत्र सर्वदा सन्निधानाऽनिवारणात्, न खलु घटसंयुक्तमाकाशं मेर्वादौ न सन्निहितम्।

अथ शरीरसंयुक्त आत्मप्रदेशः तच्छब्देन उच्यते; स किं काल्पनिकः, पारमार्थिको वा ? काल्पनिकत्वे 'कल्पितात्मप्रदेशगुणाऽऽकृष्टाः पश्वादयः तल्लक्षणाऽऽत्मानं प्रति उपसर्पणवत्त्वात्' इति तद्गुणानामपि काल्पनिकत्वं प्रसाधयेत्, तथा च सौगतस्य इव तद्गुणकृतः प्रेत्यभावो न पारमार्थिकः स्यात्। नहि कल्पितस्य अग्नेः रूपादयो दाहादिकार्यं वा पारमार्थिकं दृष्टम्। अथ पारमार्थिकः; स किम् आत्मनः अभिन्नः, भिन्नो वा ? यदि अभिन्नः; तदा आत्मैव असौ इति नोक्तदोषपरिहारः। अथ भिन्नः; तर्हि 'तद्विशेषगुणाकृष्टाः पश्वादयः' इत्येतत् तस्यैव आत्मत्वं प्रसाधयति, इति अन्यात्मकल्पनाऽनर्थक्यम्। कल्पने वा 'सावयवत्वेन कार्यत्वम् अनित्यत्वञ्च स्यात्' इत्युक्तम्।

यदप्यभिहितम्[1]—'आत्मनोऽसर्वगतत्वे दिग्देशान्तरवर्त्तिभिः परमाणुभिः' इत्यादि; तदप्यभिधानमात्रम्; 'यद्[2] येन संयुक्तं तं प्रति तदेव उपसर्पति' इति नियमाऽसंभवात्, अयस्कान्तं प्रति अयसः तेनाऽसंयुक्तस्यापि आकर्षणोपलम्भात्। यस्य चात्मा सर्वगतः तस्य आरब्धकार्यैः अन्यैश्च परमाणुभिर्युगपत् संयोगात् तथैव तच्छरीरारम्भं प्रति एकमुखीभूतानां तेषाम् उपसर्पणप्रसङ्गान्न जाने कियत्परिमाणं तच्छरीरं स्यात्। अथ 'ये तत्संयोगाः तददृष्टाऽपेक्षाः ते एव स्वसंयोगिनां परमाणूनामाद्यं कर्म आरचयन्ति नान्ये' इत्युच्यते; ननु केयं तेषां तददृष्टापेक्षा नाम—एकार्थसमवायः, उपकारः, सह आद्यकर्मजननं वा ? तत्र आद्यः पक्षोऽनुपपन्नः; सर्वपरमाणुसंयोगानां देवदत्ताऽऽत्मनि अदृष्टेन सह एकार्थसमवायसंभवात्। द्वितीयपक्षोऽप्ययुक्तः; अपेक्ष्याद् अपेक्षकस्य असम्बन्धाऽनवस्थानुषङ्गेण उपकारस्यैवाऽसंभवात्। सह आद्यकर्मजननम्; इत्यप्यसत्; अविशेषतः सर्वत्र तज्जनैनस्यापि प्रसङ्गात्, तत्संयोगाऽदृष्टयोरन्यतरस्य केवलस्यैव तज्जननसामर्थ्ये परापेक्षाऽनुपपत्तेश्च। यदि पुनः स्वहेतोरेव अदृष्ट-संयोगयोः सहितयोरेव कार्यजननसामर्थ्यमिष्यते; तर्हि तत एव अदृष्टस्यैव स्वाश्रय-

---

१ पृ० २६० पं० १९। २ "स्यादेवं यदि यच्चेन संयुक्तं तं प्रति तदेवोपसर्पति इति नियमः स्यात्, न चास्त्ययस्कान्तं प्रत्ययसः तेनासंयुक्तस्याप्युपसर्पणोपलम्भात्।..."प्रमेयक० पृ० १७५ उ०। स्या० मं० पृ० ६२, कारिका ९। ३—ननस्यातिप्र—आ०, भां०।

संयोगनिरपेक्षस्य तत्सामर्थ्यमिष्यताम्। दृश्यते हि हस्ताद्याश्रयेण अयस्कान्तादिना स्वाश्रयाऽसंयुक्तस्य भूभागस्थितस्य लोहादेः आकर्षणम्।

यच्चान्यदुक्तम्[1]–'सावयवं शरीरमनुप्रविशन्नात्मा' इत्यादि; तदप्युक्तिमात्रम्; सावयवत्वेन भिन्नाऽवयवारब्धत्वस्य घटादावप्यसिद्धेः। न खलु[2] घटादिः सावयवोऽपि प्राक्प्रसिद्धसमानजातीयकपालसंयोगपूर्वको दृष्टः, कुम्भकारकरादिव्यापारान्वितात् मृत्पिण्डात् प्रथममेव पृथुबुध्नोदराद्याकारस्याऽस्य उत्पत्तिप्रतीतेः। द्रव्यस्य हि पूर्वाकारपरित्यागेन उत्तराकारपरिणामः कार्यत्वम्, तच्च बहिरिव अन्तरप्यनुभूयत एव। न च पटादौ स्वावयवसंयोगपूर्वककार्यत्वोपलम्भात् सर्वत्र तथाभावो युक्तः; काष्ठे लोहलेख्यत्वोपलम्भात् वज्रेऽपि तथाभावप्रसङ्गात्, प्रमाणबाधनम् उभयत्रापि तुल्यम्। न च उक्तलक्षणकार्यत्वाभ्युपगमेऽपि आत्मनोऽनित्यत्वाऽनुषङ्गात्[3] प्रतिसन्धानाऽभावोऽनुषज्यते; कथञ्चिदनित्यत्वे सत्येव अस्य उपपद्यमानतया वक्ष्यमाणत्वात्।

एतेन 'बालशरीरपरिमाण' इत्यादि † प्रत्युक्तम्; युवशरीरपरिमाणाऽवस्थायाम् आत्मनो बालशरीरपरिमाणपरित्यागेऽपि सर्वथा विनाशाऽसंभवात् विफणावस्थात्यागेन उत्फणावस्थोत्पादे सर्पवत्। अतः कथं परलोकाभावोऽनुषज्यते पर्यायतः तस्य अनित्यत्वेऽपि द्रव्यतो नित्यत्वात्?

यदप्युक्तम्[4]–'शरीरच्छेदे[5] तस्यापि छेदप्रसङ्गः' इति; तदप्यपेशलम्; कथञ्चित् तच्छेदस्य इष्टत्वात्। शरीरसम्बद्धात्मप्रदेशेभ्यो हि तत्प्रदेशानां[6] छिन्नशरीरप्रदेशे अवस्थानम् आत्मनश्छेदः, स चात्र अस्त्येव; अन्यथा शरीरात् पृथग्भूताऽवयवस्य[7] कम्पोपलब्धिर्न स्यात्। न च [8]छिन्नावयवाऽनुप्रविष्टस्य आत्मप्रदेशस्य पृथगात्मत्वप्रसङ्गः; तत्रैव अनुप्रवेशात्, कथमन्यथा छिन्ने हस्तादौ कम्पादितल्लिङ्गस्यादर्शनम्? न च अन्यत्र गतत्वात्तस्य तत्र[9] तल्लिङ्गाऽनुपलब्धिरित्यभिधातव्यम्; एकत्वादात्मनः शेषस्यापि तेन सह गमनप्रसक्तेः। नापि तदवस्थितस्य अस्य तत्रैव विनष्टत्वान्न तदुपलब्धिः इत्यभिधातव्यम्; शेषस्यापि एकत्वेन [10]तद्वद् विनाशप्रसक्तेः। न चैकत्र सन्ताने अनेक आत्मा; अनेकाऽर्थप्रतिभासिज्ञानानामेकप्रमात्राधारतया प्रतिभासाऽभावप्रसङ्गात् शरीरान्तरव्यवस्थिताऽनेकज्ञानावसेयाऽर्थसंवित्तिवत्। अतः अन्यत्राऽगतेः तत्राऽसत्त्वात् अविनष्टत्वाच्च तत्रैव तदनुप्रवेशोऽनुमीयते। कथं

---

१ पृ० २६० पं० २२। २ "न खलु घटादिः सावयवोऽपि प्राक्प्रसिद्धसमानजातीयकपालसंयोगपूर्वकः।" प्रमेयक० पृ० १७६ पू०। सन्मति० टी० पृ० १४९। स्या० मं० पृ० ६३, का० ९। ३–त्यानु–आ०। ४ "युवशरीरपरिमाणावस्थायामात्मनो बालशरीरपरिमाणपरित्यागे सर्वथा विनाशासंभवात् विफणावस्थोत्पादे सर्पवत् इति कथं परलोकाभावोऽनुषज्यते।..." स्या० मं० पृ० ६५, का० ९। ५ पृ० २६१ पं० ११। ६–दे छेद–ब०, ज०। ७–नां विभिन्नश–भां०, श्र०। ८ शरीरपृ–ज०। ९–स्य सकम्पो–ज०। १० तच्छिन्ना–भां०। ११–त्र लिङ्गा–ब०, ज०। १२ तद्विनाश–आ०। † पृ० २६१ पं० ८।

छिन्नाऽछिन्नावयवयोः सङ्घटनं पश्चादिति चेत् ; न; एकान्तेन छेदाऽनभ्युपगमात् पद्मनाल-तन्तुवद् अच्छेदस्याप्यभ्युपगमात् , तथाभूताऽदृष्टवशाच्च तत्सङ्घटनमविरुद्धमेव ।

यदप्युक्तम्[2]–'शरीरपरिमाणत्वे मूर्त्तत्वाऽनुषङ्गात्' इत्यादि; तत्रैं किमिदं मूर्त्तत्वं नाम यद् आत्मनोऽनुषज्येत–असर्वगतद्रव्यपरिमाणत्वम् , रूपादिमत्त्वं वा ? तत्र आद्यपक्षो न दोषावहः; अभीष्टत्वात् , नहि इष्टमेव दोषाय जायते । द्वितीयपक्षस्तु अनुपपन्नः ; व्याप्त्यभावात् , नहि 'यद् असर्वगतं तत् नियमेन रूपादिमत्' इति अविनाभावोऽस्ति, मनसोऽसर्वगतत्वेऽपि तदसंभवात् । अतो न आत्मनः शरीरेऽनुप्रवेशाऽनुपपत्तिः यतो निरात्मकं तत् स्यात् , असर्वगतद्रव्यपरिमाणलक्षणमूर्त्तत्वस्य मनोवत् तदप्रतिबन्धकत्वात् । 'रूपादिमत्त्वलक्षणमूर्त्तत्वोपेतस्यापि हि जलादेः भस्मादावनुप्रवेशो न प्रतिबध्यते, आत्मनस्तु तद्रहितस्यापि तत्र असौ प्रतिबध्यते' इति महच्चित्रम् !

ततो यद् यथा निर्बाधबोधे प्रतिभासते तत् तथैव परमार्थतः सद्व्यवहारमवतरति यथा पुरः प्रतिनियतदेश-काल-आकारतया घटः, शरीरान्तः प्रतिनियतदेशकालाकारतया निर्बाधबोधे प्रतिभासते च आत्मा इति । न चायमसिद्धो हेतुः; शरीराद् बहिः तत्प्रतिभासाऽभावस्य प्रतिपादितत्वात् । उक्तप्रकारेण च अनवद्यस्य बाधकप्रमाणस्य कस्यचिदप्यसंभवात् न विशेषणाऽसिद्धत्वम् । तथा, आत्मा व्यापको न भवति, सामान्यविशेषवत्त्वे सति अस्मदादिप्रत्यक्षत्वात् , यद् यद् एवंविधं तत् तत् तथा यथा घटादि, सामान्यविशेषवत्त्वे सति अस्मदादिप्रत्यक्षश्च आत्मा, तस्माद् व्यापको न भवतीति । तन्न परेषां यथाभ्युपगतस्वभावम् आत्मद्रव्यमपि घटते । नापि मनोद्रव्यम् ; नित्यादिस्वभावस्य अस्यापि कुतश्चित् प्रमाणादप्रसिद्धेः ।

ननु कार्यत्वाऽनुपपत्तेः नित्यस्वभावता मनसः सिद्धैव, तदनुपपत्तिश्च तदारम्भककारणाऽभावात् सुप्रसिद्धा । तस्य हि आरम्भकं कारणं विजातीयम्, सजातीयं वा स्यात् ? तत्र आद्यपक्षोऽनुपपन्नः ; विजातीयस्य आरम्भकत्वाऽभावात्, "*विजातीयानामनारम्भकत्वम्*" [ ] इत्यभिधानात् । द्वितीयपक्षोऽप्ययुक्तः; यतः मनःप्रादुर्भावे मनस एव सजातीयत्वम्, तथा च एकमनःप्रादुर्भावे कारणभूताऽनेकमनःसद्भावप्रसङ्गः एकस्य द्रव्यान्तरोत्पत्तौ अकारणत्वात्, "*द्रव्याणि द्रव्यान्तरमारभते (रभन्ते)*"

'युगपज्ज्ञानाऽनुत्पत्तेः अस्ति मनः पृथग् द्रव्यम् तच्च नित्यं परमाणुरूपं प्रत्यात्मभिन्नं च' इति वैशेषिकस्य पूर्वपक्षः—

---

१ "ननु कथं छिन्नाछिन्नयोः सङ्घटनं पश्चात् ? न; एकान्तेन छेदानभ्युपगमात् पद्मनालतन्तुवदविच्छेदस्याप्यभ्युपगमात् ।..." प्रमेयक० पृ० १७६ उ० । स्या० मं० पृ० ६५, का० ९ । २ पृ० २६१ पं० ६ । ३ "तत्र केयं मूर्त्तिर्नाम असर्वगतद्रव्यपरिमाणं रूपादिमत्त्वं वा ?" प्रमेयक० पृ० १७४ पू० । सन्मति० टी० पृ० १४५ । स्या० रत्ना० पृ० ९०२ । स्या० मं० पृ० ६४ । ४–र्यतानु–श्र० । ५ तस्य आ–ब० ।

[वैशे० सू० १।१।१०] इति वचनात्। न चैकैकशरीरे अनेकमनःसद्भावोऽस्ति प्रतिशरीरमेकैकतया तेषां स्थितत्वात्, अन्यथा प्रतिशरीरं युगपदेव ज्ञानोत्पत्तिः स्यात्। न च प्रतिनियतशरीरावरुद्धत्वेन अन्योन्यं तेषां संयोगः संभवति, नाप्यसंयुक्तानां तज्जनकत्वम्; अतिप्रसङ्गात्। अथ मुक्तमनसां तदवरुद्धत्वाऽभावतोऽन्योन्यं संयोगसंभवात् तज्जनकत्वमिष्यते; तदयुक्तम्; धर्माऽधर्मानधिष्ठितानां तेषां तज्जनकत्वाऽनुपपत्तेः। अतोऽस्य कार्यत्वानुपपत्तेः सिद्धा नित्यता। ५

सद्भावसिद्धिस्तु युगपज्ज्ञानाऽनुत्पत्तिलिङ्गात्, युगपत्स्वविषयसम्बद्धेषु हि सर्वेष्वपि इन्द्रियेषु यदेव मनसा प्रेर्यते तदेव स्वविषये बुद्धिमुत्पादयतीति। तथा, 'इन्द्रियाऽर्था युगपत्सन्निहिताः स्वकार्ये क्रमवत्कारणापेक्षाः, इतरसामग्रीसद्भावेऽपि क्रमेण कार्यकर्तृत्वात्, हस्ताद्यपेक्ष-अयस्कारादिवत्। चक्षुरादिकं क्रमवत्कारणापेक्षम्, कारणान्तरसाकल्ये सत्यपि अनुत्पाद्योत्पादकत्वात्, वासी-कर्त्तर्यादिवत्। सुखादिज्ञानम् इन्द्रियार्थसन्निकर्षजम्, प्रत्यक्षत्वे सति ज्ञानत्वात्, चक्षुरादिप्रभवरूपादिज्ञानवत्' इत्याद्यनुमानाच्च। तच्च आशुसञ्चारित्वेन अस्खलद्गतित्वाद् अस्पर्शम्, अस्पर्शत्वादेव आकाशवन्नित्यम्, क्रमेण अर्थपरिच्छेदकत्वाद्व्यापकम्, अदृष्टविशेषवशाच्च प्रत्यात्मभिन्नम् इति। १०

अत्र प्रतिविधीयते। यत्तावदुक्तम्—'तस्य आरम्भकं कारणं सजातीयं विजातीयं वा' इत्यादि; तदसमीचीनम्; यतः किमपेक्ष्य कारणस्य सजातीयेतरचिन्ता प्रतन्यते—पृथिव्यादिद्रव्यमपेक्ष्य, अवान्तरसामान्यं वा ? यदि अवान्तरसामान्यम्; तदा तन्तुपटादीनामपि कार्यकारणभावो न प्राप्नोति तेषामन्योन्याऽसंभवि-अवान्तरसामान्याधारतया तद- १५

षट्पदार्थपरीक्षायां वैशेषिकाभ्युपगतस्य पूर्ववर्णितस्वभावस्य मनोद्रव्यस्य खण्डनम्—

१—क्त्र श—श्र०। २ "प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्।" वै० सू० ३।२।३। "ज्ञानायौगपद्यादेकं मनः।" न्यायसू० ३।२।५८। ३ "आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च लिङ्गम्।" वै० सू० ३।२।१। "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।" न्यायसू० १।१।१६। ४ "चक्षुरादयो वा क्रमवत्कारणापेक्षाः सद्भावेऽपि क्रमेण कार्यजनकत्वात्···यथा वासीकर्त्तर्यादि हस्तम्।" प्रश० व्यो० पृ० ४२५। प्रश० कन्दली पृ० ९०। ५ अयस्कान्तादि—भां०। ६ "सत्यपि आत्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते।···" प्रश० भा० पृ० ८९। "आत्मेन्द्रियार्थाः कारणान्तरापेक्षाः सद्भावेऽपि अनुत्पाद्योत्पादकत्वात्, ये हि सद्भावेऽपि कार्यमनुत्पाद्य पश्चादुत्पादयन्ति ते सापेक्षाः यथा तन्त्वादयः अन्त्यसंयोगापेक्षा इति।" प्रश० व्यो० पृ० ४२४। प्रश० कन्दली पृ० ९०। ७ "सुखादिप्रतीतिरिन्द्रियजा अपरोक्षप्रतीतित्वाद् रूपादिप्रतीतिवत्।" प्रश० कन्दली पृ० ९०। ८ "रूपादिग्रहणानि चक्षुरादिव्यतिरेकेण अधिष्ठायकान्तरापेक्षाणि अयुगपदुत्पत्तेः, तद्यथा—अनेकशिल्पपर्यवदातस्य पुरुषस्य अनेकं वास्यादि युगपत् सन्निधानेनोपस्थितं हस्ताद्यधिष्ठायकापेक्षं न युगपदनेकरथक्रियां निर्वर्तयति, तथा चक्षुरादि न युगपदनेकं ज्ञानं करोति तस्मात्तदपि अधिष्ठायकान्तरमपेक्षते इति··· चक्षुरादीन्द्रियं आत्मप्रवृत्तावधिष्ठायकान्तरापेक्षं अयुगपत्प्रवृत्तेः वास्यादिवत्।···" न्यायवा० पृ० ८१। ९ "प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति।" प्रश० भा० पृ० ८९। १० "तदभावादणु मनः।" वै० सू० ७।१।२३। "यथोक्तहेतुत्वाच्चाणु।" न्यायसू० ३।२।६९। ११ "प्रयत्नज्ञानायौगपद्यवचनात् प्रतिशरीरमेकत्वं सिद्धम्।" प्रश० भा० पृ० ८९। १२ पृ० २६८ पं० २०। १३ "तदा तन्तुपटादीनामपि

पेक्षया सजातीयत्वाऽनुपपत्तेः, नहि तन्तुत्वापेक्षया पटस्य सजातीयत्वं संभवति पटत्वापेक्षया तन्तूनां वा। अथ पृथिव्यादिद्रव्यमपेक्ष्य; तर्हि तदपेक्षया यथा तन्तुपटादीनां सजातीयत्वसंभवात् कार्यकारणभावः, तथा पुद्गलद्रव्यापेक्षया अण्वादिना मनसः सजातीयत्वसंभवात् स स्यात्। तथा च सिद्धं मनसः पौद्गलिकत्वम्। प्रयोगः—पौद्गलिकं मनः इन्द्रियत्वात् चक्षुरादिवत्। ननु चक्षुरादीनां प्रतिनियतरूपादिव्यञ्जकतया प्रतिनियतभूतकार्यता प्रतिपन्ना, मनसस्तु अविशेषतो निखिलरूपादिव्यञ्जकतया तत्कार्यत्वाऽसंभवात् कथं तद्दृष्टान्तेन तस्य पुद्गलकार्यता स्यात्? इत्यपि मनोरथमात्रम्; तेषां प्रतिनियतभूतकार्यत्वस्य **'द्रव्येन्द्रियं पुद्गलात्मकम्'** इत्यत्र प्रपञ्चतः प्रतिक्षिप्तत्वात्। तद्भूतजातिभेदस्य च पृथिव्यादिचतुर्विधद्रव्यनिषेधावसरे[3] निषिद्धत्वात्। एकस्यैव रूपादिमतः पुद्गलस्य एते चक्षुरादयः पर्यायाः, अतो न दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यम्। यदि चक्षुरादीनां प्रतिनियतरूपादिव्यञ्जकत्वात् प्रतिनियतभूतकार्यता इष्यते; तदा मनसः सकलरूपादिव्यञ्जकत्वात् सकलभूतकार्यता इष्यताम् अविशेषात्।

यदप्युक्तम्[5]—'नित्यादिस्वभावस्य मनसः सद्भावसिद्धिस्तु युगपज्ज्ञानाऽनुत्पत्तिलिङ्गात्' इत्यादि; तदप्यसमीक्षिताभिधानम्; परमाणुरूपस्य मनसः चक्षुराद्यधिष्ठायकत्वाऽनुपपत्तेः। अनेकरश्मिरूपं हि चक्षुः पार्थिवाद्यवयवस्वभावश्च घ्राणादि, तत् किं मनसा युगपद् अधिष्ठीयते, क्रमेण वा? तत्राद्यपक्षोऽनुपपन्नः; एकपरमाणुरूपेण अनेन युगपदनेकाऽधिष्ठानाऽनुपपत्तेः। यद् एकपरमाणुरूपं न तद् युगपदनेकाऽधिष्ठातृ यथा एकपरमाणुः, तद्रूपश्च भवत्कल्पितं मन इति। द्वितीयपक्षेऽपि प्रत्यासन्न-दविष्ठार्थेषु क्रमेणैव प्रतीतिः स्यात्। आशुसञ्चारित्वात्[7] क्रमप्रतीतावपि युगपत्प्रतीतिभ्रमः; इत्यप्यपेशलम्; अवयविप्रतीतेरपि भ्रान्तित्वप्रसङ्गात्, अनेकस्मिन्नपि हि पुरोवर्त्तिन्यर्थे क्रमेण एकैकरश्मिजनितं ज्ञानं क्रमेण एकैकमेव अर्थं गृह्णीयात्, युगपदखिलाऽवयवेषु एकाकारा प्रतीतिस्तु भ्रान्ता स्यात्, "धत्तूरकपुष्पवद् आदौ सूक्ष्माणामपि अन्ते महत्त्वम्" [ ] इति चैं विघटेत, नहि क्रमप्रवृत्तपरमाणूनां तथात्वं दृष्टम्। असिद्धा च युगपज्ज्ञानाऽनुत्पत्तिः; दीर्घशष्कुलीभक्षणादौ युगपदपि रूपादिज्ञानपञ्चकोत्पत्तिप्रतीतेः। क्रमभावेऽपि आशुवृत्त्या तज्ज्ञानानां यौगपद्यप्रतीतिः; इत्यप्यचारु; निखि-

---

कार्यकारणभावो न स्यात् तेषामन्योन्यासंभव्यवान्तरसामान्याधारतया तदपेक्षया सजातीयत्वासंभवात्।...'' स्या० रत्ना० पृ० ९११।

१—यतका—भां०। २ पृ० १५५। ३ पृ० २३८। ४—पादिवतः आ०। ५ पृ० २६९ पं० ६। ६ "अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात्।" न्यायसू० ३।२।६०। "उत्पलपत्रशतव्यतिभेदाभिमानवद् आशुभावित्वेन यौगपद्याभिमानोऽत्र द्रष्टव्यः।" प्रश० व्यो० पृ० ४२६। ७ एकस्मि—ब०, ज०, भां०, श्र०। ८ संगृ—ज०, भां०। ९ च न घटते श्र०।

लभावानां क्षणिकत्वप्रसङ्गात् अक्षणिकत्वाध्यवसायस्य सर्वत्र आशुवृत्तिप्रवृत्तत्वात्[1], प्रत्यक्षबाधा उभयत्र तुल्या। अथात्र यौगपद्यप्रतीतेर्भ्रान्ततया प्रत्यक्षत्वाऽनुपपत्तेर्न क्रमप्रतीतिबाधकत्वम्; ननु कुतोऽस्या भ्रान्ततासिद्धिः ? एकमनःपूर्वकत्वेन तद्यौगपद्याऽनुपपत्तेः इति चेत्; चक्रकप्रसङ्गः—तत्प्रतीतेर्भ्रान्ततासिद्धौ[2] हि प्रत्यक्षत्वाऽनुपपत्तिसिद्धिः, तत्सिद्धौ च क्रमप्रतीतेरबाध्यत्वसिद्धिः, तत्सिद्धौ च एकमनःसिद्धिरिति। ५

यच्चान्यदुक्तम्[3]—'इन्द्रियार्थाः' इत्यादि; तदप्येतेन प्रत्युक्तम्; क्रमेण कार्यकर्तृत्वस्य एषामसिद्धत्वात्, दीर्घशष्कुलीभक्षणादौ युगपदपि ज्ञानपञ्चककर्तृत्वप्रतिपादनात्। मनसा अनैकान्तिकश्चेदम्; तद्धि इतरकारकसाकल्येऽपि क्रमेण कार्यकर्तृ न च क्रमवत्करणापेक्षम् अनवस्थाप्रसङ्गाद् अपसिद्धान्तप्रसङ्गाच्च।

एतेन 'अनुत्पाद्योत्पादकत्वात्' इत्यपि[4] प्रतिव्यूढम्; भवदभ्युपगतेन[5] मनसैव अनेकान्तात्; १०
न खलु कारकान्तरसाकल्येऽनुत्पाद्योत्पादकमपि मनः क्रमवत्करणान्तराऽपेक्षम् अनवस्थाया अपसिद्धान्तस्य च प्रसङ्गात्। किञ्च, अनुत्पाद्योत्पादकत्वमस्य क्रमेण, युगपद्वा विवक्षितम् ? यदि क्रमेण; तदा असिद्धो हेतुः, दीर्घशष्कुलीभक्षणादौ युगपदपि ज्ञानोत्पत्तिप्रतिपादनात्। अथ युगपत्; तदा विरुद्धः, तथोत्पादकत्वस्य अक्रमिक[6]करणाऽधीनत्वात् प्रसिद्धसहभाव्यनेककार्यकारिसामग्रीवत्। १५

यदप्यभिहितम्[7]—'सुखादिज्ञानम्' इत्यादि; तदप्यभिधानमात्रम्; हेतोः अप्रसिद्धविशेषणत्वात्, नहि[8] सुखादिज्ञानस्य प्रत्यक्षत्वं सिद्धम्। इन्द्रियाश्रितं हि प्रत्यक्षं भवन्मते, न च तज्ज्ञाने किञ्चिदिन्द्रियं कारणभूतमस्ति यदाश्रितत्वेन अस्य प्रत्यक्षता स्यात्। मनोऽस्तीति चेन्न; अस्य कुतश्चिदपि अप्रसिद्धेः। अत एव तत्सिद्धौ अन्योन्याश्रयः—मनःसिद्धौ हि तज्ज्ञानस्य तदाश्रितत्वेन प्रत्यक्षत्वसिद्धिः, तत्सिद्धौ च सविशेषणहेतुसिद्धेर्मनःसिद्धिरिति। विशेष्याऽसिद्धश्चायम्; सुखादेर्भिन्नस्य तद्ग्राहकज्ञानस्य अप्रतीतेः। अत एव आश्रयाऽसिद्धश्चायम्; नहि 'घटादिवत् सुखादि अविदितस्वरूपं पूर्वमुत्पन्नं पुनरिन्द्रियेण सम्बद्ध्यते ततो ज्ञानं ग्रहणञ्च' इति लोके प्रतीतिरस्ति, प्रथममेव इष्टाऽनिष्टविषयाऽनुभवाऽनन्तरं स्वप्रकाशात्मनोऽस्य उदयप्रतीतेः। २०

किञ्च, 'यत्र संयुक्तं मनः तत्र समवेते ज्ञानमुत्पादयति' इत्यभ्युपगमे सकलात्मसमवेते २५
सुखादौ तत् ज्ञानमुत्पादयतु, नित्यव्यापित्वेन मनसा तेषां संयोगाऽविशेषात्, तथा च प्रतिप्राणि भिन्नं मनोऽन्तरं व्यर्थम्। 'यस्य यन्मनः तत् तत्समवायिनि ज्ञानहेतुः' इत्यपि श्रद्धामात्रम्;

१—प्रवर्त्तमानत्वात् ब०, ज०। आशुप्रवृत्तित्वात् श्र०। २—द्धौ प्र—आ०। ३ पृ० २६९ पं० ७। ४ पृ० २६९ पं० ९। ५ "भवदभ्युपगतेन मनसैवानेकान्तात्।...." प्रमेयक० पृ० ३६ उ०। ६ अक्रमकर—ज०, श्र०। ७ पृ० २६९ पं० १०। ८ नहि ज्ञानस्य आ०।

प्रतिनियतात्मसम्बन्धित्वस्यैव अत्रासिद्धेः । तद्धि[1] तत्कार्यत्वात्, तदुपक्रियमाणत्वात्, तत्संयोगात्, तददृष्टप्रेरितत्वात्, तदात्मप्रेरितत्वाद्वा स्यात् ? न तावत् तत्कार्यत्वात्; अपसिद्धान्तप्रसङ्गात्, नित्यत्वविरोधाऽनुषङ्गाच्च । नापि तदुपक्रियमाणत्वात्; सर्वथा नित्यतया अनाधेयाऽप्रहेयाऽतिशये तस्यापि अनुपपद्यमानत्वात् । नापि तत्संयोगात्; सर्वत्राप्यस्य अविशेषतः सर्वसम्बन्धित्वाऽनुषङ्गेण अविशेषतः तत्समवायिनि ज्ञानजनकत्वप्रसङ्गात् ।

नापि यददृष्टप्रेरितं प्रवर्त्तते निवर्त्तते वा तत्तस्य इत्यभिधातव्यम्; अचेतनस्य अदृष्टस्य अनिष्टनरकादिपरिहारेण इष्टे स्वर्गादौ तत्प्रेरणाऽसंभवात्, अन्यथा ईश्वराख्यचेतनाधिष्ठातृपरिकल्पनाऽनर्थक्यम् । 'तस्य अदृष्टप्रेरणे व्यापारात् नाऽनर्थक्यम्' इत्यभ्युपगमे मनस एवाऽसौ प्रेरकोऽस्तु अलमनया परम्परया । तस्य[2] सर्वसाधारणत्वाच्च अतो न तन्नियमो युक्तः । न च अदृष्टस्यापि प्रतिनियमः सिद्धः; तस्य आत्मनोऽत्यन्तभिन्नत्वात् । ततस्तदत्यन्तभेदेऽपि समवायात् प्रतिनियमसिद्धिः; इत्यप्यसुन्दरम्; तस्य असिद्धस्वरूपत्वात् सर्वसाधारणत्वाच्च । 'येन आत्मना यन्मनः प्रेर्यते तत्तस्य' इत्यप्यसारम्; अनुपलब्धस्य प्रेरयितुमशक्यत्वात्, तथाविधस्यापि प्रेरणे अदृष्ट-परमाण्वादेरपि प्रेरणप्रसङ्गात् ईश्वरकल्पनावैयर्थ्यम् । तन्न मनसः कुतश्चित् सिद्धिः, सिद्धौ वा न[3] संयोगः; निरंशयोः आत्म-मनसोः एकदेशेन संयोगे सांशत्वम्, सर्वात्मनैकत्वम् उभयव्याघातकारि स्यात् । तन्न यथोपवर्णितस्वभावं मनोद्रव्यमपि परेषामुपपद्यते[4] ।

तदेवं परपरिकल्पितो द्रव्यपदार्थो विचार्यमाणो न घटामटाट्यते । नापि गुणपदार्थः; तस्यापि विचार्यमाणस्य यथाभ्युपगतस्वरूपस्य अव्यवस्थितेः ।

ननु गुणपदार्थस्य अस्माभिरभ्युपगतं स्वरूपं द्रव्याश्रितत्वादि, तस्य च प्रमाणतः तथैव प्रतीयमानत्वात् कथमव्यवस्थितिः ? तथा च तल्लक्षणसूत्रम्—

'द्रव्याश्रय्यगुणवान्' इत्यादि-सामान्यलक्षणलक्षिताः रूपादयश्चतुर्विंशतिर्गुणाः' इति वैशेषिकस्य पूर्वपक्षः—

"द्रव्याश्रय्यगुणवान् संयोग-विभागेष्वकारणमनपेक्षः" [वैशे० सू० १।१।१६] इति । द्रव्यम् आश्रयो यस्य असौ द्रव्याश्रयी द्रव्यतन्त्रः, अगुणवान् निर्गुणः, संयोगविभागेष्वकारणमनपेक्षः एतेषु कर्त्तव्येषु सापेक्षं कारणत्वमस्य इत्यर्थः । अनेन[5] च लक्ष-

---

१ "तद्धि तत्कार्यत्वात्तदुपक्रियमाणत्वात्…।" प्रमेयक० पृ० ३६ उ० । २ "तस्य सर्वसाधारणत्वाच्चातो न तन्नियमः…।" प्रमेयक० पृ० ३७ पू० । ३ न तत्संयोगः ब०, ज० । "सिद्धौ वा न संयोगः निरंशयोरेकदेशेन…।" प्रमेयक० पृ० ३६ उ० । ४ "बौद्धाः खलु 'षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः" (अभिध०को० १।१७) इत्यादिना मनसो ज्ञानरूपत्वमेवामनन्ति, परं योगाचारदर्शने तु षड्विज्ञानव्यतिरिक्तोऽप्यस्ति मनोधातुः । ताम्रपर्णीया अपि हृदयवस्तु मनोविज्ञानधातोराश्रयं कल्पयन्ति ।" स्फुटार्थअभि० पृ० ४९ । ५ अनेनैव ल–भां० ।

णेन लक्षिताः 'शुक्लः पटः, मधुरमाम्रम्, सुगन्धिर्मृगमदः, शीतलं जलम्' इत्यादिविशिष्टप्रत्यया (याद्) द्रव्यादर्थान्तरत्वेन प्रसिद्धा रूपादयश्चतुर्विंशतिरेव गुणाः । उक्तञ्च सूत्रकृता—"रूप-रस-गन्ध-स्पर्शाः संख्या परिमाणानि पृथक्त्वं संयोग-विभागौ परत्वा-ऽपरत्वे बुद्धयः सुख-दुःखे इच्छा-द्वेषौ प्रयत्नश्च गुणाः" [वैशे० सू० १।१।६] इति सूत्रसङ्गृहीताः सप्तदश, चशब्दसमुच्चिता गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्म-अधर्म-शब्दाश्च सप्त इति । ५

"तत्र रूपं चक्षुर्ग्राह्यम्, पृथिवी-उदक-ज्वलनवृत्तिः ।" [प्रश० भा० पृ० १०४] "रसो रसनेन्द्रियग्राह्यः, पृथिवी-उदकवृत्तिः ।" [प्रश० भा० पृ० १०५] "गन्धो घ्राणग्राह्यः, पृथिवी-वृत्तिः ।" [प्रश० भा० पृ० १०५] "स्पर्शः त्वगिन्द्रियग्राह्यः, पृथिवी-उदक-ज्वलन-पवनवृत्तिः ।" [प्रश० भा० पृ० १०६] एते च रूपरसगन्धस्पर्शाः पार्थिवपरमाणुष्वनित्याः पावकसंयोगात्तत्र पाकजरूपाद्युत्पत्तेः, अप्तेजोवाय्वणुषु यथासंभवं नित्याः कुतश्चित्तेषां तत्र अन्यप्रकारेण अनुत्पत्तेः, पार्थिवादिकार्यद्रव्येषु अनित्याः । १०

संख्या तु एकादिव्यवहारहेतुः एकत्वादिलक्षणा, एकद्रव्या च अनेकद्रव्या च । तत्र एकसंख्या एकद्रव्या, अनेकद्रव्या तु द्वित्वादिसंख्या । सा च प्रत्यक्षत एव सिद्धा, विशेषबुद्धेश्च निमित्तान्तराऽपेक्षत्वाद् अनुमानतोऽपि । तत्र एकत्वसंख्या नित्यद्रव्येषु नित्या, कार्यद्रव्येषु अनित्या । द्वित्वादिसंख्या तु परार्द्धान्ता अपेक्षाबुद्धिजन्या सर्वत्र अनित्या । १५

---

१ "गुणाश्च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः सप्तदश, चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः ।" प्रश० भा० पृ० १० । २ 'रसनग्राह्यः' प्रश० भा० । ३ "पृथिव्यादिरूपरसगन्धस्पर्शाः द्रव्यानित्यत्वादनित्याश्च ।" "एतेन नित्येषु नित्यत्वमुक्तम् ।" "कारणगुणपूर्वकाः पृथिव्यां पाकजाः ।" वै० सू० ७।१।२,३,६ । "पार्थिवपरमाणुषु रूपादीनां पाकजोत्पत्तिविधानम्—घटादेरामद्रव्यस्य अग्निना सम्बद्धस्य अग्न्यभिघातान्नोदनाद्वा तदारम्भकेष्वणुषु कर्माण्युत्पद्यन्ते, तेभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः, संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति । तस्मिन् विनष्टे स्वतन्त्रेषु परमाणुषु अग्निसंयोगादौष्ण्यापेक्षात् श्यामादीनां विनाशः, पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते । तदनन्तरं भोगिनामदृष्टापेक्षादात्माऽणुसंयोगादुत्पन्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद् द्व्यणुकादिक्रमेण कार्यद्रव्यमुत्पद्यते, तत्र च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः···।" प्रश० भा० पृ० १०६ । ४ "अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् ।" "अनित्येष्वनित्या द्रव्याऽनित्यत्वात् ।" वै० सू० ७।१।४,५ । ५ अन्यत्रकारणानुत्पत्तेः आ० । ६ "एकादिव्यवहारहेतुः संख्या । सा पुनरेकद्रव्या चानेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः । अनेकद्रव्या तु द्वित्वादिका परार्द्धान्ता । तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद् विनाश इति ।" प्रश० भा० पृ० १११ ।

परिमाणव्यवहारकारणं परिमाणम्[1], 'महद्, अणु, दीर्घम्, ह्रस्वम्' इति चतुर्विधम्। तत्र महद् द्विविधम्–नित्यम्, अनित्यञ्च। नित्यम्[2] आकाश-काल-दिग्-आत्मसु परममहत्त्वम्, अनित्यं[3] द्व्यणु (त्र्यणु) कादिद्रव्येषु। अण्वपि नित्याऽनित्यविकल्पाद् द्विभेदम्। परमाणु-मनस्सु पारिमाण्डल्यलक्षणं[4] नित्यम्, अनित्यं द्व्यणुके एव। बदर-आमल-बिल्वादिषु तु
५ महत्त्वपि तत्प्रकर्षाऽभावमपेक्ष्य भाक्तोऽणुव्यवहारः। द्व्यणुके ह्रस्वत्वमनित्यम्, त्र्यणुकादौ दीर्घत्वमनित्यम्। ननु द्व्यणुके अणुत्व-ह्रस्वत्वयोर्वर्त्तमानयोः त्र्यणुकादौ च महत्त्व-दीर्घत्वयोर्नाऽन्योन्यं कश्चिद् विशेषः इति चाऽयुक्तम्; 'महत्सु दीर्घम् आनीयताम्, दीर्घेषु महद् आनीयताम्' इति व्यवहारभेदप्रतीतितो महत्व-दीर्घत्वयोः परस्परतः प्रतिप्राणि भेद-प्रसिद्धेः। अणुत्व-ह्रस्वत्वयोस्तु विशेषो योगिनामेव प्रत्यक्षः। एतच्च महदादिपरिमाणं रूपादि-
१० भ्योऽर्थान्तरम् तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात् सुखादिवत्।

संयुक्तमपि[5] द्रव्यं यद्वशात् 'अत्र इदं पृथग्' इति अपोद्धियते तद् अपोद्धारव्यवहार-कारणं पृथक्त्वम्। तच्च एकत्वसंख्याविशेषितम् एकत्ववत् नित्यम् अनित्यञ्च बोद्धव्यम्। द्विपृथक्त्वादि तु परार्द्धपृथक्त्वान्तं द्वित्वादिवदनित्यमेव।

अप्राप्तिपूर्विका प्राप्तिः संयोगः[6], प्राप्तिपूर्विका च अप्राप्तिर्विभागः[7]। तौ च द्रव्येषु यथाक्रमं
१५ संयुक्त-विभक्तप्रत्ययजनकौ अनित्यावेव। 'इदं परम्[8], इदमपरम्' इति यतोऽभिधान-प्रत्ययौ भवतः तद् यथाक्रमं परत्वम् अपरत्वञ्च, तच्च अनित्यमेव। बुद्ध्यादयश्च प्रयत्नान्ता अनित्या[9] एव। [10]गुरुत्वञ्च पृथिवी-उदकवृत्ति पतनक्रियानिबन्धनम्। तच्च पार्थिव-आप्याऽणुषु नित्यम्, द्व्यणुकादिषु अनित्यम्। [11]द्रवत्वं पृथिवी-उदक-ज्वलनवृत्ति स्यन्दनहेतुः। तच्च पृथिवी-तेजसो-

---

१ "परिमाणं मानव्यवहारकारणम्। तच्चतुर्विधम्···अथ त्र्यणुकादिषु वर्त्तमानयोः महत्त्वदीर्घत्वयोः परस्परतः को विशेषः द्व्यणुकेषु चाणुत्वह्रस्वत्वयोरिति ? तत्रास्ति महत्त्वदीर्घत्वयोः परस्परतो विशेषः महत्सु दीर्घमानीयताम् दीर्घेषु च महदानीयतामिति विशिष्टव्यवहारदर्शनात्। अणुत्वह्रस्वत्वयोस्तु विशेषस्तद्दर्शिनां प्रत्यक्ष इति।" प्रश० भा० पृ० १३०। २ "अनित्येऽनित्यम्।" "नित्ये नित्यम्।" वै० सू० ७।१।१८,१९। ३ "अनित्यं त्र्यणुकादावेव।" प्रश० भा० पृ० १३०। ४ "नित्यं परिमण्डलम्।" वै० सू० ७।१।२०। ५ "पृथक्त्वमपोद्धारव्यवहारकारणम्। तत्पुनरेकद्रव्यमनेकद्रव्यञ्च। तस्य तु नित्यानित्यत्वनिष्पत्तयः संख्यया व्याख्याताः।" प्रश० भा० पृ० १३८। ६ "संयोगः संयुक्तप्रत्ययनि-मित्तम्···अप्राप्तयोः प्राप्तिः संयोगः।" प्रश० भा० पृ० १३९। ७ विभागो विभक्तप्रत्ययनिमित्तम्··· प्राप्तिपूर्विका अप्राप्तिर्विभागः।" प्रश० भा० पृ० १५१। ८ "परत्वमपरत्वं च परापराभिधानप्रत्ययनि-मित्तम्।" प्रश० भा० पृ० १६४। ९ विभुद्रव्यविशेषगुणानामनित्यत्वनियमात्। १० "संयोगाभावे गुरुत्वात् पतनम्।" वै० सू० ५।१।७। "अपां संयोगाभावे गुरुत्वात् पतनम्।" वै० सू० ५।२।३। "गुरुत्वं जलभूम्योः पतनकर्मकारणम्।" प्रश० भा० पृ० २६३। ११ "द्रवत्वात् स्यन्दनम्।" वै० सू० ५।२।४। "द्रवत्वं स्यन्दनकर्मकारणं त्रिद्रव्यवृत्ति।" प्रश० भा० पृ० २६४।

नैमित्तिकमनित्यम्, अपां सांसिद्धिकम्, आप्याऽणुषु नित्यम् आप्यद्व्यणुकादौ तु अनित्यम्। [1]स्नेहोऽम्भस्येव स्निग्धप्रत्ययहेतुः। स च आप्याऽणुषु नित्यः, द्व्यणुकादौ अनित्यः।

संस्कार[2]स्त्रिविधः—वेगः, भावना, स्थितस्थापकश्चेति। तत्र वेगाख्यः पृथिवी-अप्-तेजो-वायु-मनस्सु मूर्त्तद्रव्येषु प्रयत्न-अभिघातविशेषापेक्षात् कर्मणः समुत्पद्यते, नियतदिक्क्रिया-प्रबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविरोधी च। भावनाख्यः पुनः आत्मगुणः ज्ञानजो ज्ञानहेतुश्च, दृष्ट-अनुभूत-श्रुतेष्वर्थेषु स्मृति-प्रत्यभिज्ञानकार्योन्नीयमानसद्भावः। मूर्तिमद्द्रव्यगुणः स्थितस्थापकः 'घनाऽवयवसन्निवेशविशिष्टं स्वमाश्रयं प्रयत्नतोऽन्यथास्थितमपि पूर्ववत् [3]यथा-स्थितं स्थापयति' इति कृत्वा, दृश्यते च तालपत्रादेः प्रभूततरकालसंवेष्टितस्य प्रसार्यमुक्तस्य पुनस्तथैव अवस्थानं संस्कारवशात्, एवं धनुः-शाखा-वस्त्रादौ कार्यमस्य द्रष्टव्यम्। स च त्रिविधोऽप्ययं संस्कारः अनित्य एव। धर्माऽधर्मौ आत्मविशेषगुणौ अनित्यावेव। शब्द[4]स्तु आकाशविशेषगुणः अनित्य एव इति।

षट्पदार्थपरीक्षायां वैशेषिकोक्त-गुणपदार्थस्य तत्संख्यायाश्च प्रतिविधानम्—

अत्र प्रतिविधीयते। यत्तावदुक्तम्[5]—'द्रव्याश्रयी' इत्यादि गुणानां लक्षणम्; तदसमीचीनम्; भवत्कल्पिते द्रव्ये प्रति[6]षिद्धे तेषां तदाश्रितत्वाऽनुपपत्तेः। अस्तु वा तेषां तदाश्रितत्वादिकं लक्षणम्; तथापि 'तल्लक्षणलक्षिता रूपादयश्चतुर्विंशतिरेव गुणाः' इत्यवधारणमनुपपन्नम्; अनेकधा गुणानां श्रवणात्—लोके हि शौर्य-औदार्यादयो अनेकधा गुणाः श्रूयन्ते। वैयाकरणमते[7] तु 'विशेष्यं द्रव्यम्, विशेषण[8]ं गुणः' इति प्रसिद्धम्। *"यस्य गुणस्य हि भावात् द्रव्ये शब्दानि[10]वेशः तदभिधाने त्वतलौ"* [पात० महाभा० ५।१।११९] इत्यभिधानात्।[11]वैद्यकतन्त्रे तु विशद-स्थिर-खर[12]-पिच्छलत्वादीनां गुणत्वप्रसिद्धिः। सांख्या:[13] पुनः सत्त्वरजस्तमसां गुणत्वं प्रतिपन्नाः, इति कथं तेषामियत्ताऽवधारयितुं शक्या? किञ्च, एते रूपादयः एकस्मिन् [14]घटाद्यवयविनि निरंशैकस्वभावा[15] भवताऽभ्युपगम्यन्ते, तथा च

---

१ "स्नेहोऽपां विशेषगुणः सङ्ग्रहमृजादिहेतुः।" प्रश० भा० पृ० २६६। २ "संस्कारस्त्रिविधः···।" प्रश० भा० पृ० २६६-६७। ३ यथावस्थि—ब०, ज०। यथाव्यवस्थि—भां०। ४ "धर्मःपुरुषगुणः··· अधर्मोऽप्यात्मगुणः।···" प्रश० भा० पृ० २७२, २८०। ५ "शब्दोऽम्बरगुणः···।" प्रश० भा० पृ० २८७। ६ पृ० २७२ पं० २१। ७ "द्रव्याणां प्रतिषेधेन सर्व एव तदाश्रिताः। गुणकर्मादयोऽपास्ता भवन्त्येव तथा मताः॥ ६३४॥" तत्त्वसं०। ८—ते पुनः वि—ब०, ज०। ९—णं तु गु—ब०, ज०। १०—विनिवेशः आ०। ११ "गुरुर्लघुः स्निग्धरूक्षौ तीक्ष्णः श्लक्ष्णः स्थिरः सरः। पिच्छिलो विशदः शीत उष्णश्च मृदुकर्कशौ॥ स्थूलः सूक्ष्मो द्रवः शुष्कः आशुर्मन्दः स्मृता गुणाः।" सुश्रुत० सूत्रस्थान अ० ४१। १२ "सरस्तेषां प्रवर्त्तकः।" भावप्रका० ५।२१८। सुश्रुते—खरनामापि गुणः। १३ "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥ १३॥" सांख्यका०। १४ घटावयविनि आ०। १५—भावभवता आ०।

[1]कुञ्चिकाविवरप्रदेशादिना उपलभ्यमाने घटादौ यावद्द्रव्यवर्तिनो रूपादेर्बहिरन्तश्च उपलब्धिः स्यात्, अन्यथा निरंशैकरूपताव्याघातः। न हि तद्रूपस्य प्रतिभासाऽप्रतिभासलक्षणविरुद्धधर्माध्यासो युक्तः विरोधात्। एवं जलसेकादिना[2] पृथिव्यां क्वचिद् अभिव्यज्यमाने गन्धे समग्रभूगोलाऽवयविगतस्य गन्धस्य अभिव्यक्तिः स्यात्, अन्यथा अभिव्यक्तेतरविरुद्धधर्माध्यासाद् अवयविव्यापी न कश्चिद् एको गुणः स्यात्। अग्निसंयोगात् पाकजरूपोत्पत्तौ तु विप्रतिपत्त्यभाव एव अस्माभिरपि अभ्युपगमात्।

'अपेक्षाबुद्धितो द्वित्वादिसंख्या उत्पद्यते' इत्येतत्[3] तु अयुक्तम्; तस्याः पदार्थेषु स्वभावसिद्धत्वात् एकत्ववत्। तद्व्यवहार एव हि अपेक्षाबुद्धिजन्यः न स्वरूपम्, बदरामलकादौ स्थूलादिव्यवहारवत्, यथैव हि स्वकारणकलापात् स्थूलत्वादिधर्मोपेतेषु उत्पन्नेषु बदरादिषु तद्व्यवहारः अपेक्षाबुद्धितो जायते एवमत्रापि। न च 'अपेक्षाबुद्धितोऽर्थानामुत्पत्तिः' इति प्रामाणिको वक्ति; इच्छामात्रादर्थनिष्पत्तौ सर्वस्यैव अभिप्रेतार्थसिद्धिप्रसङ्गात्। किञ्च, एकस्यां बुद्धौ प्रतिभासमाना एकैकगुणाः कथं कदाचिद् द्वित्वमुत्पादयन्ति कदाचिच्च बहुत्वम्? नहि तेषामेकत्वे कश्चिद्विशेषः। न च यौ द्वौ एकैकगुणौ तौ द्वित्वसंख्यामुत्पादयतः, ये च बहवः ते बहुत्वसंख्याम् इत्यभिधातव्यम्; द्वित्वादिसंख्योत्पत्तेः प्राक् तेषु द्वित्वस्य बहुत्वस्य चाऽसंभवात्। गुणत्वञ्चास्या न संभाव्यम्; गुणेष्वँपि सद्भावात्, सुप्रसिद्धो हि 'एकं ज्ञानम्, द्वे ज्ञाने, चतुर्विंशतिर्गुणाः, षट् पदार्थाः' इत्यादिप्रतीतितो गुणेषु संख्यासद्भावः। न च भाक्तोऽयं प्रत्ययः; अस्खलद्गतित्वात्। स्खलद्गतित्वं हि भाक्तप्रत्ययस्य लक्षणम् माणवके अग्निप्रत्ययवत्।

यदपि[4]–'महद्, अणु, दीर्घम्, ह्रस्वम्' इति चतुर्धा परिमाणं प्रतिपादितम्; तदपि अनल्पतमोविलसितम्; वस्तुसंस्थानविशेषव्यतिरेकेण तद्भेदस्यासंभवात् कस्य गुणरूपता उपवर्ण्येत? तद्विशेषस्यापि तद्रूपतोपवर्णने वर्तुल-त्र्यस्र-चतुरस्रादेरपि गुणरूपतोपवर्णनाऽनुषङ्गान्न तच्चतुर्विधत्वोपवर्णनं शोभेत।

---

१ "द्रव्ये महति नीलादिरेक एव यदीष्यते। रन्ध्रालोकेन तद्वयक्तौ व्यक्तिर्दृष्टिश्च नास्य किम् ॥ ६३६ ॥" तत्त्वसं०। सन्मति० टी० पृ० ६७३। स्या० रत्ना० पृ० ९२०। २ "रन्ध्रालोकेन इत्युपलक्षणम्। भुव एकदेशे जलेन गन्धस्य अभिव्यक्तौ प्रदेशान्तरेऽपि अभिव्यक्तयुपलब्ध्योः प्रसङ्गः।" तत्त्वसं० पं० पृ० २११। ३–तन्न युक्तम् ब०, ज०। पृ० २७३ पं० १५। ४ "इच्छारचितसङ्केतमनस्कारान्वयं त्विदम्। घटेष्वेकादिविज्ञानं ज्ञानादाविव वर्त्तते ॥ ६३९ ॥ अद्रव्यत्वान्न संख्यास्ति तेषु काचिद् विभेदिनी। तज्ज्ञानं नैव युक्तं तु भाक्तमस्खलितत्वतः ॥ ६४० ॥" तत्त्वसं०। "यथाहि–एकं ज्ञानं द्वे ज्ञाने इत्यादौ संख्यामन्तरेणापि एकादिबुद्धिर्भवति एवं घटादिष्वपि।" तत्त्वसं० पं० पृ० २१२। प्रमेयक० पृ० १७७ उ०। सन्मति० टी० पृ० ६७४। स्या० रत्ना० पृ० ९२४। ५ पृ० २७४ पं० १। ६ "महद्दीर्घादिभेदेन परिमाणं यदुच्यते। तदप्यर्थं तथारूपभेदादेव न किं मतम् ॥ ६७४ ॥" तत्त्वसं०। प्रमेयक० पृ० १७८ उ०। सन्मति० टी० पृ० ६७५। स्या० रत्ना० पृ० ९२८।

यदप्युक्तम्[1]–'बदरामलकादिषु भाक्तोऽणुव्यवहारः' इत्यादि; तदप्ययुक्तम्; तत्र गौणत्वप्रतिपत्तेः कस्यचिदप्यभावात्, न खलु यथा सिंहमाणवकादिषु मुख्य-गौणविवेकप्रतिपत्तिः सर्वेषामविगानेन अस्ति, तथा 'द्व्यणुके एव अणुत्व-ह्रस्वत्वे मुख्ये अन्यत्र गौणे' इति तद्विवेकप्रतिपत्तिः। प्रक्रियामात्रप्रदर्शनस्य च सर्वशास्त्रेषु सुलभत्वान्नातः प्रतिनियतवस्तुस्वरूपव्यवस्थितिः। आपेक्षिकत्वाच्च परिमाणस्यागुणत्वम्, नहि रूपादेः सुखादेर्वा गुणस्य आपेक्षिकत्वं दृष्टम्। योऽपि नील-नीलतरादेः सुख-सुखतरादेर्वा आपेक्षिको व्यवहारः, सोऽपि तत्प्रकर्षाऽपकर्षनिबन्धनो न पुनर्गुणस्वरूपनिबन्धनः। ५

यदपि–'अपोद्धारव्यवहारकारणं पृथक्त्वम्'[2] इत्याद्युक्तम्[3]; तदपि न युक्तम्; अपोद्धारव्यवहारो हि भेदव्यवहारः, स च सर्वार्थानां स्वगताऽसाधारणभेदकर्मनिबन्धनः इति किं तत्र पृथक्त्वलक्षणगुणान्तरकल्पनया ? अन्यथा अपृथक्त्वमपि अभेदव्यवहारकारणं गुणान्तरं कल्प्यतामविशेषात्। द्विपृथक्त्वादिप्रक्रिया च द्वित्वादिसंख्यादूषणेनैव दूषिता। १०

संयोगोऽपि[4] नैरन्तर्याऽवस्थिताऽर्थव्यतिरेकेण अपरो न प्रतीयते। नैरन्तर्येण परिणता हि पदार्थाः संयुक्तव्यवहारगोचरतां प्रतिपद्यन्ते। नैरन्तर्यरूपसंयोगस्य च गुणत्वे सामीप्य-दूरत्वादेरपि गुणत्वप्रसङ्गाद् गुणसंख्याव्याघातः। विभागोऽपि[5] संयोगाऽभावमात्रम्, न तु विभक्ताऽर्थेषु गुणान्तरोत्पत्तिः, विभागगुणशून्येऽपि च सह्य-विन्ध्यादौ विभक्तप्रत्ययो दृश्यते। १५ नहि तत्र तद्गुणोऽस्ति संयोगविशिष्टाऽर्थेष्वेव तत्संभवात्। *"प्राप्तिपूर्विका अप्राप्तिर्विभागः"* [प्रश० भा० पृ० १५१] इत्यभिधानात्। न चाऽसौ प्रत्ययो भाक्तः; वैलक्षण्याऽभावात्, नहि 'मेषौ विभक्तौ, सह्य-विन्ध्यौ विभक्तौ' इत्यनयोः प्रत्ययय्योर्वैलक्षण्यमवधार्यते द्वयोरस्खलद्गतित्वाऽविशेषात्।

परत्वाऽपरत्वयोरपि[6] संख्यावत् निरासो बोद्धव्यः; अपेक्षाबुद्धिजन्यत्वाऽविशेषात्। सन्निकर्षविप्रकर्षयोरेव हि पराऽपरप्रत्ययहेतुत्वोपपत्तेर्न किञ्चित् परत्वाऽपरत्वाभ्यां प्रयोजनम्। किञ्च, अयं पराऽपरादिव्यवहारः सत्ताद्रव्यत्वादावप्यस्ति, स चेत् सङ्केतवशात् स्वरूपमात्रनिबन्धनः २०

---

१ पृ० २७४ पं० ४। २ "अपोद्धारव्यवहृतिः पृथक्त्वाद्या तु कल्प्यते। कारणात्सा विभिन्नात्मभावनिष्ठा न किं मता ॥ ६५१ ॥ परस्परविभिन्ना हि यथा बुद्धिसुखादयः। पृथग्वाच्याः तदङ्गञ्च विनाऽन्येन तथा परे ॥ ६५२ ॥" तत्त्वसं०। प्रमेयक० पृ० १७८ उ०। सन्मति० टी० पृ० ६७७। ३ पृ० २७४ पं० ११। ४ "प्राप्तावस्थाविशेषे हि नैरन्तर्येण जातितः। ये पश्यत्याहरत्येष वस्तुनी ते तथाविधे ॥६६६॥" तत्त्वसं०। प्रमेयक० पृ० १७९ पू०। सन्मति० टी० पृ० ६७९। स्या० रत्ना० पृ० ९३१। ५ "विभागेऽपि यथायोगं वाच्यमेतत् प्रमाद्वयं। एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकम् ॥ ६७४ ॥" तत्त्वसं०। ६ "यथा नीलादिरूपाणि क्रमभावव्यवस्थितेः। अन्योपाधिविवेकेऽपि तथोच्यन्ते तथाऽपरे ॥ ६७६ ॥" तत्त्वसं०। प्रमेयक० पृ० १७९ उ०। सन्मति० टी० पृ० ६८१। स्या० रत्ना० पृ० ९३५।

अन्यत्राप्येवमस्तु, किं तत्रापि परत्वाऽपरत्वगुणनिबन्धनत्वसाधनप्रयासेन ? किञ्च, एवं सति मध्यत्वमपि गुणः स्यात् कालकृतस्य दिक्कृतस्य च मध्यव्यवहारस्य दर्शनात् पराऽपरव्यवहारवत्।

'गुरुत्वञ्च पतनाऽनुमेयम्' इत्ययुक्तम् ; करतलस्थिते[1] सुवर्णपिण्डादौ पतनं विनाऽपि 'दशपलोऽयम्, पञ्चपलोऽयम्' इति प्रतीतेः। किञ्च, गुरुत्वं नाम द्रव्यस्य पतनशक्तिः, शक्तयश्च प्रतिद्रव्यं स्वस्यां स्वस्यामर्थक्रियायां नानाविधाः, ताः कियत्यः संख्यातुं शक्यन्ते । प्रधानभूता हि षट्कारकशक्तयोऽर्थानां तद्भेदप्रभेदाश्च अनन्ताः, ते चेन्न गण्यन्ते किं गुरुत्वपरिगणनया ? किञ्च, गुरुत्वस्य गुणत्वे लघुत्वमपि गुणः स्याद् अविशेषात्। गुरुत्वाऽभावरूपत्वात् तस्य न गुणत्वमिति चेत् ; गुरुत्वमपि लघुत्वाऽभावः किन्न स्यात् ? ननु गुरुत्वस्य अभावरूपत्वे तारतम्यं न स्यात्, इत्यन्यत्रापि समानम्। न च पतनकर्मकारिण्येव गुरुत्वव्यवहारः; 'मदीयो गुरुः' इति आराध्ये, 'मैत्रिगुरुः'[2] इति वर्णधर्मे च गुरुत्वव्यवहारदर्शनात्। किञ्च, यदि गुरुत्वं गुणः स्यात् तदा 'कारणगतैर्गुणैः[4] कार्ये गुणाः प्रारभ्यन्ते रूपादिवत्' इत्यभ्युपगमात् तन्तुगतेन दशपलपरिमाणेन गुरुत्वेन पटे गुरुत्वमारभ्यमाणं सातिशयं स्यात् परिमाणवत्, तथा च तुलानमनातिशयः स्यात्, न चैवमस्ति।

यदपि[5]—'स्यन्दनकर्मकारणं द्रवत्वम्'; तदपि शक्तिविशेषात् नान्यत्। तत्क्रियोत्पत्तौ विशिष्टा शक्तिरेव हि द्रवत्वम्, 'न च अर्थगताः शक्तयः परिसंख्यातुं शक्यन्ते' इत्युक्तम्। 'तच्च त्रिद्रव्यवृत्ति' इत्यप्ययुक्तम्[6] ; तेजसि अभावात्। सुवर्णादौ च तैजसत्वमसिद्धम्, सिद्धौ वा यत् तत्र द्रवत्वमुपलभ्यते तत् संयुक्तसमवायात् पार्थिवमेव रसादिवत्। न च पृथिव्यामपि सर्वस्यां द्रवत्वं संभवति शुष्ककाष्ठादिष्वभावात्।

एतेन स्नेहगुणोऽपि प्रत्याख्यातः; नहि सोऽपि सामर्थ्यविशेषादन्यः अपां विशेषगुणो वा घटते, घृतं[7] तैलादिषु पार्थिवेषु उपलम्भात् अप्सु चाऽनुपलम्भात्, नहि शुद्धाभिरद्भिः स्नाते पुरुषे स्निग्धप्रत्ययो दृष्टः। संग्रहहेतुत्वं वस्तुसामर्थ्यात् पार्थिवलाक्षादीनामपि दृष्टम्।

योऽपि[8] संस्कारस्त्रिविधः; सोऽप्यनुपपन्नः ; न खलु क्रियाणां[9] सातत्येनोत्पादनसामर्थ्यादन्यः कश्चिद् वेगाख्यो गुणः कुतश्चित्प्रमाणात् प्रतीयते। कथं तर्हि 'वेगेन गच्छति' इति प्रतीतिर्न

---

१ "अन्यथा मध्यत्वस्यापि स्वीकारप्रसङ्गादिति भूषणः।" न्यायलीला० पृ० २५। २ "करतलाद्युपरिस्थिते द्रव्यविशेषे पातानुपलम्भेऽपि···।" प्रमेयक० पृ० १८० पू०। स्या० रत्ना० पृ० ९३८। ३ "मस्त्रिगुरुस्त्रिलघुश्च नकारो···।" छन्दोमं० १।८। मगणः त्रिगुरुः भवति। मन्त्रिणि गुरुः भां०, श्र०। ४ "कारणगुणपूर्वकः कार्यगुणो दृष्टः।" वै० सू० २।१।२४। ५ पृ० २७४ पं० १८। ६ "पृथिव्यनलयोरप्यस्ति द्रवत्वमित्यनुपपन्नम् ; सुवर्णादीनां···।" प्रमेयक० पृ० १८० पू०। ७ "घृतादेरपि लोके वैद्यकशास्त्रे च स्निग्धत्वेन प्रसिद्धत्वात्।···" प्रमेयक० पृ० १८० पू०। स्या० रत्ना० पृ० ९३९। ८ पृ० २७५ पं० ३। ९ "न च क्रियातोऽर्थान्तरं वेगः अस्याः शीघ्रोत्पादमात्रे वेगव्यवहारप्रसिद्धेः।" प्रमेयक० पृ० १८० उ०। सन्मति० टी० पृ० ६८४। स्या० रत्ना० पृ० ९४०।

विरुद्ध्यते ? इति चेत्; शीघ्रक्रियाणां सातत्ये 'वेगेन गच्छति' इति प्रतीतेरविरोधः । अतः प्रतीतेर्वेगाख्यगुणसद्भावे च 'वेगेन शास्त्रं जानाति, वेगेन षष्टिकाः पच्यन्ते' इत्यत्रापि वेगगुणसद्भावः स्यात् । 'सन्तानेन आगच्छति' इति प्रतीतेश्च सन्तानोऽपि गुणः स्यात् । भावनारूपोऽपि संस्कारः आत्मनः स्मरणजननशक्तेर्नान्यः । एतेन स्थितस्थापकोऽपि संस्कारः प्रत्याख्यातः; नहि सोऽपि यथाऽवस्थितवस्तुस्थापनसामर्थ्यादपरः प्रतिभासते । न चासौ नियमेन यथाऽवस्थितं वस्तु स्थापयति आकृष्यमाणे शाखादौ अनियतदिक्त्वेन शाखादेर्गमनस्य स्थानस्य च दर्शनात्। ५

धर्माऽधर्मावपि नात्मगुणौ प्रतिपादयितुं शक्यौ; तत्र विप्रतिपत्तेः । अस्मन्मते हि पौद्गलिकौ तौ, सांख्यमते बुद्धिधर्मौ, मीमांसककृतान्ते द्रव्यादिकं श्रेयःसाधनत्वशक्तिविशिष्टं तच्छब्दवाच्यम्, बौद्धराद्धान्ते ज्ञानस्यैव वासनाख्यं शक्तिरूपं कर्म इति प्रसिद्धम् ।

एतेन शब्दोऽपि आकाशगुणः प्रतिषिद्धः; विप्रतिपत्तीनामविशेषात् । तथाहि–जैनाः पौद्गलिकं[3] तं प्रतिजानन्ति, मीमांसकाः[4] नित्यद्रव्यम्, शिक्षाकाराः[5] मीमांसकविशेषाः वायवीयम्, सौत्रान्तिकाः[6] परमाणुरूपम्, वैयाकरणाः[7] स्फोटात्मकम्, सांख्याः[8] प्रकृतिपरिणामम् इति । तन्न गुणपदार्थोऽपि परपरिकल्पितो विचार्यमाणो घटते । एतेन कर्मपदार्थोऽपि प्रत्याख्यातः । १०

ननु कर्मणो गुणलक्षणाद् विभिन्नलक्षणलक्षितत्वात् कथं तत्प्रत्याख्यानेन अस्य प्रत्याख्यानम् ? तस्य हि लक्षणम्–"*एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षं कारणं कर्म ।*" [वै० सू० १।१।१७] इति । एकद्रव्यम् आश्रयो अस्यास्तीति एकद्रव्यम्, न अस्य गुणाः सन्ति स्वयं च गुणो न भवति इति अगुणम्, संयोगविभागेषु च कर्त्तव्येषु न किञ्चित् कारणमपेक्षते इति अनपेक्षम्[9] । तच्च अनेन लक्षणेन लक्षितं कर्म पञ्चप्रकारं भवति, तथा च सूत्रम्–"*उत्क्षेपणम् अपक्षेपणम् आकुञ्चनं प्रसारणं गमनमिति कर्माणि*" [वै० सू० १।१।७] इति । तच्च 'उत्क्षिप्यते हस्तः, अपक्षिप्यते पादः, आकुञ्च्यते पाणिः, प्रसार्यते अङ्गुलिः' इत्यादिविशिष्टप्रत्ययाद् द्रव्यादर्थान्तरम् । [10]तत्र उत्क्षेपणम्–यद् ऊर्ध्वाऽधःप्रदेशैः संयोग- १५ २०

'उत्क्षेपणादीनि पञ्च कर्माणि' इति वैशेषिकस्य पूर्वपक्षः–

---

१ स्थापनस्य श्र० । २ धर्मविषये तृतीयपृष्ठस्य टिप्पणी (१-७) द्रष्टव्या । ३ तच्च साधितं २४२ पृष्ठे । ४ "वर्णानां तु नित्यानां द्रव्यत्वमेवाङ्गीक्रियते ।" शास्त्रदी० १।१।२३ । ५ "तथा च शिक्षाकारा आहुः–वायुरापद्यते शब्दतामिति; नैतदेवम् ।" शाबरभा० १।१।२२ । ६ "उपात्तादिमहाभूतहेतुत्वाङ्गीकृतेर्ध्वनेः ॥ ६२७ ॥" तत्त्वसं० । ७ "स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः । ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ।" वाक्यप० १।७५। ८ 'तन्मात्रापञ्चकान्तर्गतः शब्दः प्रकृतिपरिणामरूपः' एतदर्थं सांख्यका० २४ द्रष्टव्या । ९ "स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षम् इत्यर्थः, तेन समवायिकारणापेक्षायां पूर्वसंयोगाभावापेक्षायां च नासिद्धत्वम् ।" वै० उप० १।१।१७। १० उत्क्षेपणादीनां पञ्चानामपि लक्षणानि किञ्चिच्छब्दभेदेन प्रशस्तपादभाष्ये (पृ० २९१-९२) द्रष्टव्यानि ।

विभागकारणं कर्म उत्पद्यते, यथा शरीराऽवयवे तत्सम्बद्धे च मुसलादौ ऊर्ध्वदिग्भाविभिः आकाशाद्यर्थैः संयोगकारणम् अधोदिग्भाविभ्यश्च विभागकारणं गुरुत्व-प्रयत्न-संयोगवशात् कर्म उत्पद्यते। उक्तविपरीतसंयोगविभागकारणं तदपक्षेपणम्। ऋजुनो द्रव्यस्य कुटिलत्वकारणं कर्म आकुञ्चनम्, तद्यथा ऋजुनो बाह्वादिद्रव्यस्य अग्राऽवयवानामङ्गुल्यादीनां तद्देशैः स्वसंयोगिभिराकाशाद्यैर्विभागे सति मूलप्रदेशैश्च [२]संयोगे येन कर्मणा अवयवी कुटिलः सम्पद्यते तद् आकुञ्चनम्। तद्विपर्ययेण तु संयोगविभागोत्पत्तौ येन कर्मणा अवयवी ऋजुः सम्पद्यते तत्[३] कर्म प्रसारणम्। अनियतदिग्देशैर्घटादिभिर्यत् संयोगविभागकारणं तद् गमनम्। उत्क्षेपणादिकं चतुःप्रकारमपि नियतदिग्देशैस्तैः तत्कारणम्। अत एव पञ्चैव कर्माणि भवन्ति भ्रमण-स्यन्दन-रेचनादीनां गमनेन[४] एव अन्तर्भावादिति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[५]—'एकद्रव्यम्' इत्यादि कर्मणो लक्षणम्; तदसमीचीनम्; भवत्परिकल्पिते द्रव्ये प्रतिषिद्धे तस्य तल्लक्षणत्वाऽनुपपत्तेः। अस्तु वा तद् द्रव्यम्; तथापि एतद् गन्तृस्वभावम्, अगन्तृस्वभावम्, उभयरूपम्, अनुभयरूपं वा कर्मण आश्रयः स्यात्? गन्तृस्वभावं[६] चेत्; तर्हि तद्व्यतिरिक्तकर्मकल्पनावैयर्थ्यम्, तत्स्वभावस्यापि तत्कल्पने अनवस्थाप्रसङ्गात्। किञ्च, सर्वदा तत् तत्स्वभावम्, कदाचिद्वा? प्रथमपक्षे न कदाचित् तदवतिष्ठेत् सर्वदा गन्तृस्वभावत्वात् वायुवत्। अथ कदाचित्; तदा 'पूर्वम् अगन्तृस्वभावं तत् पश्चाद् गन्तृस्वभावम्' इत्यायातम्। तत्र च पूर्वाऽगन्तृस्वभावपरित्यागेन तद् गन्तृस्वभावतां स्वीकुर्यात्, अपरित्यागेन वा? यदि परित्यागेन; तदा अण्वादिद्रव्यस्य अनित्यतापत्तिः, स्वभावप्रच्युतिलक्षणत्वात् तस्याः। अथ अपरित्यागेन; तन्न; अपरित्यक्ताऽगन्तृस्वभावस्य हिमाचलादिवत् गन्तृस्वभावसमावेशाऽनुपपत्तेः। तन्न गन्तृस्वभावस्य अण्वादिद्रव्यस्य कर्माश्रयत्वं घटते। नापि अगन्तृस्वभावस्य; आकाशादिवत् तथाविधस्य अस्य तदाश्रयत्वविरोधात्, पूर्वमगन्तृस्वभावस्य उत्तरकालं गन्तृस्वभावतायां सत्यां तस्य तदाश्रयत्वे तु[७] उक्तदोषाऽनुषङ्गः।

षट्पदार्थपरीक्षायां तथोक्तकर्मपदार्थनिरसनपुरस्सरं 'देशाद्देशान्तरप्राप्तिहेतुः परिस्पन्दात्मकः परिणामोऽर्थस्य कर्म' इति व्यवस्थापनम्—

---

१ "गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम्।" वै० सू० १।१।२९। २ संयोगेन क–आ०। ३ तत्प्रसा–ब०, ज०। ४ "...भ्रमणाद्यवरोधार्थत्वात्; उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमणपतनस्यन्दनादीनामवरोधार्थं गमनग्रहणं कृतमिति।" प्रश० भा० पृ० २९६। ५ पृ० २७९ पं० १५। ६–वं तदा त–आ०। "यदि गन्त्रादिरूपं तत्प्रकृत्या गमनादयः। सदा स्युः क्षणमप्येवं नावतिष्ठेत निश्चलम् ॥६९९॥ यस्माद्गत्याद्यसत्त्वेऽपि प्राप्नुवन्त्यस्य ते ध्रुवं। अत्यक्तपूर्वरूपत्वाद् गत्याद्युदयकालवत् ॥ ७०० ॥" तत्त्वसं०। प्रमेयक० पृ० १८३ पू०। ७ "अथागन्त्रादिरूपं तत्प्रकृत्याऽगमनादयः। सदा स्युः क्षणमप्येकं नैव प्रस्पन्दवद्भवेत् ॥७०१॥ पश्चाद्गत्यादिभावेऽपि निश्चलात्मकमेव तत्। अत्यक्तपूर्वरूपत्वात् निश्चलात्मककालवत् ॥७०२॥" तत्त्वसं०। ८–त्तायां तस्य ब०, ज०, श्र०। ९ च ब०, ज०।

नाप्युभयस्वभावस्य ; उभयपक्षनिक्षिप्तदोषाऽनुषङ्गात् । किञ्च, अस्य उभयस्वभावता युगपत्, क्रमेण वा स्यात् ? न तावद् युगपत् ; गन्तृत्वाऽगन्तृत्वस्वभावयोर्विभिन्नकालनिबन्धनत्वात्, ययोर्विभिन्नकालनिबन्धनत्वम् न तयोर्युगपद्भावः यथा प्रसारितेतराङ्गुलिस्वभावयोः, तत्कालनिबन्धनत्वञ्च तत्स्वभावयोरिति । युगपत्तद्भावे च अण्वादेः विरुद्धधर्माऽध्यासतो भेदप्रसंगाद् एकस्वरूपताव्याघातः । क्रमेण तद्भावाऽभ्युपगमे अगन्तृरूपत्यागेन अत्यागेन वा गन्तृरूपोत्पादे प्रागुक्ताऽशेषदोषाऽनुषङ्गः । अनुभयरूपता तु विरोधान्न युक्ता ; विधिप्रतिषेधधर्मयोः एकतरप्रतिषेधे अन्यतरविधेरवश्यंभावित्वात् । ततः सर्वथैकस्वभावे वस्तुनि कर्मणोऽनुपपद्यमानत्वान्न परेषां कर्मपदार्थो घटते । ५

अस्तु वाऽसौ; तथापि 'देशाद् देशान्तरप्राप्तिहेतुः परिस्पन्दात्मकः परिणामोऽर्थस्य कर्म' इत्येतावतैव पर्याप्तत्वात् न तत्पञ्चप्रकारतोपवर्णनं युक्तम्, उत्क्षेपणादीनामत्रैवाऽन्तर्भावात् । अत्र अन्तर्भूतानामपि कञ्चिद्विशेषमादाय भेदेनाऽभिधाने भ्रमण-रेचनादीनामपि अतो भेदेनाऽभिधानाऽनुषङ्गात् कथं पञ्चप्रकारतैव अस्य स्यात् । १०

किञ्च, उत्क्षेपणादिकर्मणो भेदः स्वरूपनिबन्धनः, जातिनिबन्धनो वा स्यात् ? स्वरूपनिबन्धनश्चेत्–किं स्वरूपमात्रनिबन्धनः, विशिष्टस्वरूपनिबन्धनो वा ? न तावत् स्वरूपमात्रनिबन्धनः; तन्मात्रस्य सर्वेषामविशिष्टत्वात् । अविशिष्टस्याऽपि भेदकत्वे एकतद्व्यक्तेरपि भेदकत्वप्रसङ्गान्न क्वचिदेकत्वव्यवहारः स्यात् । विशिष्टस्वरूपनिबन्धनश्चेत् ; किंकृतं तद्वैशिष्ट्यम् ? जातिकृतमिति चेत् ; तर्हि 'जातिनिबन्धनस्तद्भेदः' इत्यायातम् । १५

तत्रापि उत्क्षेपणत्वादिजातिः अभिव्यक्ता, अनभिव्यक्ता वा तत्कर्मणो भेदं विदध्यात् ? न तावदनभिव्यक्ता ; सर्वत्र सर्वदा तद्भेदाऽभिव्यञ्जकत्वप्रसङ्गात् । अभिव्यक्ता चेत्; कुतस्तदभिव्यक्तिः–तत्कर्मभेदात्, अन्यतो वा ? न तावदन्यतः ; विजातीयव्यक्तीनामभिव्यञ्जकत्वे कर्कादिभ्यो गोत्वाऽभिव्यक्तिप्रसङ्गात् । तत्कर्मभेदस्य च अभिव्यञ्जकत्वे अन्योऽन्याश्रयः–सिद्धे हि तत्कर्मणो भेदे ततः तज्जातीनामभिव्यक्तिसिद्धिः, तत्सिद्धेश्च तत्कर्मणो भेदसिद्धिरिति । २०

किञ्च, आसां तत्कर्मक्षणो व्यञ्जकः, तत्समुदायो वा ? न तावत् तत्क्षणः ; प्रथमक्षणे समुत्पन्नस्य तत्कर्मक्षणमात्रस्य दुर्लक्ष्यतया उत्क्षेपणत्वादिजात्यभिव्यञ्जकत्वाऽयोगात्, नहि क्षणमात्रभावि कर्म उत्क्षेपणम् अपक्षेपणं वा अस्मदादिभिर्लक्ष्यते, येन अतः तज्जातिभेदोऽभिव्यक्तः स्यात्, तस्य अतिसूक्ष्मत्वेन योगिनामेव प्रत्यक्षत्वात् । नापि तत्समुदायो व्यञ्जकः; कर्मणां क्षणिकत्वेन समुदायस्यैवाऽसंभवात् । बुद्धिपरिकल्पितः सोऽस्तीत्यप्ययुक्तम् ; वस्तु- २५

१ एकरूप–ब०, ज०, श्र० । "यदि तु स्यादगन्ताऽयमेकदा चान्यथा पुनः । परस्परविभिन्नात्मसङ्गतेर्भिन्नता भवेत् ॥७०३॥" तत्त्वसं० । २ "उभयनिमित्तवशादुत्पद्यमानः पर्यायो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया ।" सर्वार्थसि० ५।७ । प्रमेयक० पृ० १८३ पू० । ३ "उत्क्षेपणत्वादिजात्यभिव्यञ्जकः कर्मक्षणः तत्समुदायो वा···" स्या० रत्ना० पृ० ९५० ।

भूतार्थक्रियायां काल्पनिकस्य सामर्थ्याऽसंभवात्। सर्वथा अर्थादर्थान्तरस्य चैं अस्य ग्राहक-प्रमाणाऽभावाद् असत्त्वम्। यद् यतः सर्वथा अर्थान्तरं प्रमाणतो न प्रतीयते न तत् तथाऽभ्युपगन्तव्यम् यथा सामान्यादेः स्वरूपसत्त्वम्, सर्वथाँ अर्थादर्थान्तरं न प्रतीयते च कुतश्चित्प्रमाणात् कर्म इति। ततो यथोक्तस्वरूपमेव कर्म प्रतीतिभूधरशिखरारूढं प्रेक्षादक्षैः प्रतिपत्तव्यम्।

५ ननु 'सालोकाऽवयविद्रव्यसंयोग-विभागव्यतिरेकेण नाऽपरं किञ्चित् कर्म प्रतीयते, ऊर्ध्व-प्रदेशाऽऽलोकाद्यवयविद्रव्यसंयोग-विभागपरम्परा हि उत्क्षेपणम् उच्यते, एवम् अपक्षेपणादावपि वक्तव्यम्' इत्यन्यैः; सोऽपि प्रतीत्यपलापित्वाद् अप्रामाणिकः; नहि संयोग-विभागौ 'चलति' इत्यादिप्रतीतेरालम्बनतां प्रतिपद्येते 'संयुक्तः, वियुक्तः' इति प्रतीतिगोचरचारित्वात्तयोः, यथा-

'संयोग एव कर्म' इति भूषण-मतस्य निराकरणम्—

१० विषयम् अवितथप्रत्ययप्रवृत्तेः, अन्यथा पटप्रत्ययोऽपि घटालम्बनः स्यात्। संयोग-विभागालम्बनत्वे चास्य तिष्ठत्यपि 'चलति' इति प्रत्ययः स्यात्, न चैवम्, न खलु नदीमध्यस्थिते स्थाणौ जलप्रवाहेण श्येनेन वा संयोगविभागेषु प्रवँर्त्तमानेष्वपि 'स्थाणुश्चलति' इति स्वप्नेऽपि कस्यचित् प्रतीतिरस्ति। निरन्तरश्च संयोग-विभागश्रेणिदर्शनात् देवदत्तवद् भूमावपि 'चलति' इति प्रतीतिः स्यात्। नहि संयोग-विभागयोः उभयत्र वृत्त्यविशेषे 'देवदत्ते एव तत्प्रतीतिर्भवति

१५ न भूमौ' इति निर्निबन्धना व्यवस्थितिर्युक्ता; स्वेच्छाचारित्वप्रसङ्गात्। अथ देवदत्तक्रिययैव तौ जन्येते न भूमिक्रियया अतः तत्रैव तत्प्रतीतिमुत्पादयतः न भूमौ; यद्येवम्, क्रियान्वय-व्यतिरेकाऽनुविधायित्वात् तत्प्रतीतेः सिद्धं क्रियालम्बनत्वमेव।

संयोग-विभागाऽग्रहणेऽपि च निरालम्बे विहायसि विहरति विहङ्गमे 'चलति' इति प्रत्ययप्रतीतेश्च। नहि गगनतत्संयोगोऽस्मदादेः प्रत्यक्षः; प्रत्यक्षेतरद्रव्यवृत्तित्वाद् गन्धवह-

२० महीरुहसंयोगवत्। ननु विततोऽऽलोकावयवी आकाशः, तेन च पतत्रिसंयोगः अस्मदादेः प्रत्यक्ष एव; इत्यप्यसुन्दरम्; समन्धकारे 'खद्योतो गच्छति' इति प्रत्ययाभावप्रसङ्गात्। नहि तत्र आलोकाऽवयवी विद्यते, यत्संयोग-विभागग्रहणनिबन्धनोऽयं प्रत्ययः स्यात्। नापि अन्धकारलक्षणं किञ्चिद् भवन्मते वस्त्वस्ति, 'आलोकाभावस्तमः' इँत्यभ्युपगमात्। भूकम्पो-

---

१ सर्वथाऽर्थान्तरस्य ग्रा—ज०। २ चार्थग्रहणस्य भां०, श्र०। ३—थार्थान्त—आ०। ४ भूषणः। "भूषणादिमते च कर्मणो गुणत्वेन···।" न्यायलीला० कण्ठा० पृ० ९४। "संयोगापेक्षया कर्मणोऽतिरिक्तत्वं नास्तीति भूषणकारमतम्।···" मुक्ता० दिनकरी पृ० ४०। "संयोग एव कर्म इति भूषणमतम्।" (प्र० प्र०) न्यायको० पृ० २०६। ५ वर्त्त—आ०। ६ "द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः।" वै० सू० ५।२।१९। कन्दल्यां तु 'भाभावः' इति सूत्रपाठभेदः (पृ० १०)। "तस्माद्रूपविशेषोऽयं अत्यन्तं तेजोऽभावे सति सर्वतः समारोपितः तमः।" प्रश० कन्दली पृ० ९। जैनास्तु—"तमो दृष्टिप्रतिबन्धकारणम् अथ च पौद्गलिकम्।" सर्वार्थसि० ५।२४। 'द्रव्यं तमः' इति भाट्टा वेदान्तिनश्च भणन्ति··· 'आलोकज्ञानाभावः' इति प्राभाकरैकदेशिनः।" सर्वदर्शनसं० औलू० द० पृ० २२९। वैयाकरणास्तु—"अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः। छायातपतमःशब्दभावेन परिणामिनः॥ १११॥" वाक्यप० काण्ड १।

त्पाते च जाते 'चलति वसुमती' इति प्रतीतिर्दृश्यते, न च तत्र उत्पातहेतुना संयोग-विभागौ गृह्येते। तस्मान्न संयोगाद्यालम्बना 'चलति' इति प्रतीतिः, किन्तु क्रियालम्बनैव।

किञ्च, इमौ संयोग-विभागौ अहेतुकौ, सहेतुकौ वा स्याताम् ? अहेतुकत्वे सर्वदा सत्त्वमसत्त्वं वा स्यात्। सहेतुकत्वे कस्तयोर्हेतुः—पदार्थस्वरूपमात्रम्, तद्विशिष्टपरिणामो वा ? प्रथमपक्षे स्थिरेऽप्यर्थे अपराऽपरप्रदेशाऽवयविद्रव्यसंयोग-विभागोत्पादप्रसङ्गः तत्स्वरूपमात्रस्य तत्राप्यविशिष्टत्वात्। विशिष्टपरिणामहेतुकत्वे तु नाममात्रभेदः, कर्मण एव तत्परिणामशब्देन अभिधानात्, तद्व्यतिरेकेण अपराऽपरप्रदेशाऽवयविद्रव्यसंयोग-विभागहेतोः पदार्थानां विशिष्ट-परिणामस्य असंभवात्। अतः कर्म संयोग-विभागाभ्यां देवदत्तादेश्च अर्थान्तरम् विभिन्नप्रत्यय-ग्राह्यत्वात् घट-पटवत्। न चेदमसिद्धम्; संयोग-विभागयोः संविद्द्वयप्रतिष्ठतया संवेदनात्, कर्मणस्तु एकसंविन्निष्ठतया। तथा, देवदत्तः चलत्तिष्ठदवस्थायां देवदत्तप्रत्ययवेद्यः, कर्म पुनः चलदवस्थायामेव 'चलति' इति प्रत्ययवेद्यम्, अतः ततो भिन्नम्; सर्वत्र भेदव्यवस्थायाः संवि-द्भेदनिबन्धनत्वात्।

ननु क्षणमात्रस्थायितया अर्थानां देशाद्देशान्तरप्राप्त्यसंभवात् नैतल्लक्षणमपि कर्म उप-पन्नम्; इत्यपि मनोरथमात्रम्; क्षणिकत्वस्य अर्थानां निराकरिष्यमाणत्वात्। तन्न कर्मपदार्थोऽपि परपरिकल्पितो विचार्यमाणो घटते। नापि सामान्यपदार्थः; तत्स्वरूपस्यापि विचार्यमाणस्य अनुपपद्यमानत्वात्।

'द्रव्यादिभ्योऽर्थान्तरं पराऽपरभेदात् द्विविधं सामान्यम्' इति वैशेषिकस्य पूर्वपक्षः—

ननु द्रव्य-गुण-कर्माऽनिमित्ताऽबाध्यमानाऽनुगतज्ञाननिमित्तं सामान्यम्, तत्स्वरूपस्य चास्य कथं विचार्यमाणस्याऽनुपपत्तिः ? तद्रूपतयाऽस्य प्रत्यक्षा-दिगोचरचारितया समर्थयिष्यमाणत्वात्। तद्रूपोपेतञ्च सामा-न्यं द्विविधम्—परम्, अपरं चेति। तत्र परं महाविषयं सत्ता-ख्यम्, तच्च समस्तेषु द्रव्यगुणकर्मसु अनुवृत्तिप्रत्ययस्यैव हेतुत्वात् सामान्यमेव, न विशेषः। अपरं तु द्रव्यत्व-गुणत्व-कर्मत्वादिलक्षणम्, तच्च स्वाश्रयेष्वनुवृत्ति-प्रत्ययहेतुत्वात् 'सामान्यम्' इत्युच्यते, विजातीयेभ्यः स्वाश्रयस्य व्यावृत्तप्रत्ययहेतुत्वाच्च सामा-न्यमपि सत् 'विशेषः' इत्यभिधीयते। तथाहि—गुणादिषु 'अद्रव्यम्' 'अगुणः' इत्यादिका येयं व्यावृत्तबुद्धिरुत्पद्यते तां प्रति एषामेव द्रव्यगुणत्वादीनां हेतुत्वं प्रतीयते नान्यस्य। न चैकस्य अस्य सामान्यविशेषभावो विरुद्ध्यते इत्यभिधातव्यम्; अपेक्षाभेदात् तत्र तद्भावस्य अविरोधात्। तत्सद्भावे च प्रत्यक्षमेव तावत्प्रमाणम्, विभिन्नगवादिव्यतिरिक्तस्य अनुगतस्यैक-

१ "क्षणक्षयिषु भावेषु कर्मोत्क्षेपाद्यसंभवि। जातदेशे च्युतेरेव तदन्यप्राप्त्यसंभवात् ॥६९२॥" तत्त्व-सं०। २ "सदिति यतो द्रव्यगुणकर्मसु सा सत्ता।" वै० सू० १।२।७। ३—श्रयेष्यनु—आ०। "द्रव्य-त्वं गुणत्वं कर्मत्वं सामान्यानि विशेषाश्च।" वै० सू० १।२।५। "तच्च व्यावृत्तेरपि हेतुत्वाद् सामान्यं सद् विशेषाख्यामपि लभते।" प्रश० भा० पृ० ११, ३१२। ४—वृत्तिप्र—श्र०। ५—वृत्तत्वबु—श्र०।

स्यास्य 'गौः' 'गौः' इत्यादि अनुगतेन्द्रियप्रभवप्रत्यये प्रतिभासमानत्वात्। नहि इदम् अनुगतैकाकारवस्त्वालम्बनमन्तरेण उपपद्यते; निर्हेतुकत्वेन सर्वदा सत्त्वस्य असत्त्वस्य वा प्रसङ्गात्, खण्डादिवत् अन्यत्रापि वा नियामकाऽभावतः प्रवृत्त्यनुषङ्गात्। न च व्यक्त्यालम्बनत्वादयमदोषः इत्यभिधातव्यम्; व्यक्तीनां व्यावृत्तरूपतया अनुगतैकाकारप्रत्ययालम्बनत्वाऽयोगात्। अन्याकारप्रत्ययस्य अन्यालम्बनत्वे सर्वत्राऽनाश्वासान्न क्वचित् प्रतिनियतार्थसिद्धिः स्यात्।

तथा, अनुमानमपि तत्सद्भावावेदकत्वेन प्रवर्त्तते; तथाहि—गो-अश्व-महिष-वराहादिषु गवाद्यभिधान-ज्ञानविशेषाः समय-आकृति-पिण्डादिव्यतिरिक्तस्वरूपानुरूपसंसर्गनिमित्तान्तरनिबन्धनाः गवादिविषयत्वे सति पिण्डादिस्वरूपाभिधान-ज्ञानाद्व्यतिरिक्ताभिधान-ज्ञानविशेषत्वात्, यथा तेष्वेव गवादिषु 'सवत्सा धेनुः, भाराक्रान्तो महिषः, सशल्यो वराहः, साङ्कुशो मातङ्गः' इत्यभिधान-ज्ञानविशेषा निमित्तान्तरसंभवाः, ये च पिण्डादिस्वरूपव्यतिरिक्तनिमित्तान्तरनिमित्ता न भवन्ति न ते तद्व्यतिरिक्ताऽभिधान-ज्ञानविशेषाः यथा पिण्डादिप्रत्यया इति। तथा, 'यद्वस्त्वाकारविलक्षणो यः प्रत्ययः स तद्व्यतिरिक्तनिमित्तान्तरनिबन्धनः यथा वस्त्रादिषु रक्तादिप्रत्ययः, तथा चायं पिण्डादिषु गवादिप्रत्यय इति। गवादिषु अनुवृत्तिप्रत्ययः पिण्डादिव्यतिरिक्तनिमित्तनिबन्धनः, विशिष्टप्रत्ययत्वात्, नीलादिप्रत्ययवत् इति। गोपिण्डादर्थान्तरं गोत्वम्, भिन्नप्रत्ययविषयत्वात् रूप-स्पर्शादिवत्, इति। पिण्डादर्थान्तरं गोत्वम्, 'तस्य' इति व्यपदेशात्, चैत्रस्य तुरङ्गमवत्। 'गौः गौः' इत्यभिन्नाऽभिधान-प्रत्ययौ अनुवृत्तवस्तुनिबन्धनौ, अभावसामान्याभिधानप्रत्ययान्यत्वे सति अनुवृत्ताऽभिधानप्रत्ययत्वात्, चर्म-वस्त्रादिषु नीलीद्रव्यसम्बन्धात् 'नीलम्' 'नीलम्' इत्यभिधानप्रत्ययवत्।' इत्याद्यनुमानेन च द्रव्यादिभ्योऽर्थान्तरं तत् प्रतिभासते।

१—नत्वम—ब०, ज०। २ तत्र भाविविक्तः प्राह—"गवादिशब्दप्रज्ञानविशेषा गोगजादिषु। समयाकृतिपिण्डादिव्यतिरिक्तार्थहेतवः॥ ७१६॥ गवादिविषयत्वे हि सति तच्छब्दबुद्धितः। अन्यत्वात्तद् यथैष्वेव सवत्साऽङ्कुशधीध्वनी॥७१७॥ शशशृङ्गादिविज्ञानैर्व्यभिचाराद्विशेषणम्। तत्स्वरूपाभिधानञ्च वैधर्म्यान्निदर्शनम्॥७१८॥" (पूर्वपक्षरूपेण) तत्त्वसं०। ३—स्वरूपाभिधानज्ञानविशेषत्वात् आ०, ब०, ज०। "गवादिविषयत्वे सति पिण्डादिस्वरूपाभिधानप्रज्ञानव्यतिरिक्ताभिधानज्ञानत्वात्।..." तत्त्वसं० पं० पृ० २३८। ४ "यथा परस्परविशिष्टेषु चर्मवस्त्रकम्बलादिषु नीलीद्रव्याभिसम्बन्धात् नीलं नीलमिति प्रत्ययानुवृत्तिः तथा परस्परविशिष्टद्रव्यगुणकर्मसु सत्सदिति प्रत्ययानुवृत्तिः सा चार्थान्तराद्भवितुमर्हति।..." प्रश० भा० पृ० ३११-१२। "यद्वस्त्वाकारविलक्षणो यः स...।" तत्त्वसं० पं० पृ० २३८। ५ "गवादिष्वनुवृत्तिप्रत्ययो दृष्टः पिण्डव्यतिरिक्तालिङ्गाद्भवतीति विशेषवत्त्वात् नीलादिप्रत्ययवत्।" न्यायवा० २।२।७०। ६ "गोतोऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषयत्वात् रूपस्पर्शप्रत्ययवदिति।" न्यायवा० २।२।७०। ७ "गोतोऽर्थान्तरं गोत्वं व्यपदेशशब्दविषयत्वात् चैत्राश्ववत्।..." न्यायवा० २।२।७०। ८"गोर्गोत्वानुवृत्तिप्रत्यया भिन्ननिमित्ता विशेषवत्त्वाद्रूपादिप्रत्ययवत्।" न्यायवा० २।२।७०। ९—भिधानप्रधान प्र—आ०। १०—त्वाच्च वस्त्रा—श्र०।

अत्र प्रतिविधीयते । यत्तावदुक्तम्[1]–'द्रव्यगुणकर्माऽनिमित्त' इत्यादि; तदसमीचीनम्; भवत्कल्पितद्रव्यादीनामुक्तविधिना निषेधे सति सामान्यस्य तदाश्रितस्य तत्र अनुगतज्ञाननिमित्तत्वाऽनुपपत्तेः । नहि आश्रयमन्तरेण आश्रितानां क्वचिदवस्थितिः कार्यकारित्वं वा दृष्टम् अनाश्रितत्वप्रसङ्गात् । 'अनुगतज्ञाननिमित्तम्' इत्यस्य च भाषितस्य कोऽर्थः–किम् अनुगतस्य ज्ञानस्य निमित्तम् अनुगतज्ञाननिमित्तम्, अनुगतं वा सत् ज्ञाननिमित्तम् इति ? प्रथमपक्षे ज्ञाने अनुगमः किंकृतः–स्वरूपकृतः, सामान्यकृतो वा ? न तावत् स्वरूपकृतः; अर्थानामपि स्वरूपत एव अनुगमप्रसङ्गतः सामान्यकल्पनाऽनर्थक्याऽनुषङ्गात् । अथ सामान्यकृतः, प्रतिभासस्याऽनुसारेण हि ज्ञानस्य अनुवृत्तिः नान्यथा; तर्हि 'अनुगतं सत् ज्ञाननिमित्तम्' इत्ययं पक्षोऽङ्गीकृतः स्यात् । तत्राऽपि अस्य अनुगतत्वम्–ज्ञानाऽर्थयोः साधारणस्वभावाऽऽधारत्वम्, नित्यैकत्वे सति अनेकत्र व्यतिरिक्तया वृत्त्या वर्त्तमानत्वं वा ? आद्यविकल्पे संयोगेन अनेकान्तः, तस्य ज्ञानाऽर्थयोः साधारणस्वभावत्वेन अनुगतस्य सतो ज्ञाननिमित्तत्वेऽपि सामान्यरूपत्वाऽभावात् । नहि तस्य येनैव स्वभावेन स्वज्ञानविषयत्वं तेनैव स्वसम्बन्धिनि वर्त्तमानत्वमसिद्धम्, सामान्यवत् निरंशत्वेन अस्यापि स्वभावभेदाऽभावात् । द्वितीयपक्षस्तु अयुक्तः; सामान्ये नित्यैकत्वस्य समवायवृत्त्या च अनेकत्र वर्त्तमानत्वस्य अद्यार्प्यसिद्धेः ।

षट्पदार्थपरीक्षायां वैशेषिकोक्तनित्यनिरंशैकादिरूपसामान्यस्य प्रतिविधानपुरस्सरं तस्य सदृशपरिणामात्मकत्वप्रसाधनम्—

यदप्युक्तम्[2]–'तत्सद्भावे च प्रत्यक्षमेव' इत्यादि; तत्र प्रत्यक्षं गोत्वादिसामान्यस्य परिच्छेदकं [10]निर्विकल्पकम्, सविकल्पकं वा स्यात् ? न तावन्निर्विकल्पकम्; तस्य परामर्शशून्यत्वेन 'गौः गौः' इत्याद्युल्लेखेन अनुवृत्तवस्तुपरामर्शकत्वाऽयोगात् । तत्त्वे वा न यथोपवर्णितस्वरूपं वर्ण-आकृति-अक्षराकारशून्यं नित्यैकव्यापिस्वभावं तत् तत्र प्रतिभासते विप्रतिपत्त्यभावप्रसङ्गात् । न खलु स्वरूपेण प्रतिभासमानेऽर्थे कश्चिद् विप्रतिपद्यते व्यक्तिवत् । नापि सविकल्पकम्; तस्य निर्विकल्पकपृष्ठभाविततया तत्प्रतिपन्ने एव अर्थे प्रवृत्तेः । 'न च सामान्यं निर्विकल्पकप्रतिपन्नम्' इत्युक्तम्, प्रतिपत्तौ वा गृहीतग्राहितया नितरामस्याऽप्रामाण्यम् ।

कीदृशश्चायमनुगतप्रत्ययः–किं [11]योऽयं गौः सोऽयं गौः, किं वा अयमपि गौः अयमपि गौरिति ? प्रथमपक्षोऽयुक्तः; नहि शाबलेय-बाहुलेययोः प्रतिभासमानयोः 'य एवाऽयं गौः स

१ पृ० २८३ पं० १७ । २ अनुगतनि–आ०, ब०, ज०, भां० । ३ "अनुगतश्चासौ प्रत्ययश्चेति अनुगतप्रत्ययः, किं वा अनुगते वस्तुनि प्रत्यय इति ।···" स्या० रत्ना० पृ० ९५० । "तथाहि किमिदं सामान्यं किमनुवृत्तप्रत्ययकारणमुतानुवृत्तप्रत्ययप्रमाणकमथवा अनुवृत्तत्वमाहोस्विन्नित्यत्वे सत्यनुवृत्तत्वमथवा नित्यमेकमनेकसमवेतत्वम् ।" चित्सुखी पृ० १९० । ४–भासस्या–ब०, ज० । ५ तज्ज्ञाना–ब०, ज० । ६ ज्ञान–ब०, ज०, श्र० । ७–त्यानै–ब०, ज० । ८–प्यप्रसि–ब०, ज०, भां०, श्र० । ९ पृ० २८३ पं० २७ । १० "तत्र किं निर्विकल्पकात् सविकल्पकाद्वा तत्प्रतिपत्तिः स्यात्···।" प्रमेयक० पृ० १४१ उ० । स्या० रत्ना० पृ० ९५८ । ११ "···किं य एवायं गौः स एवायमपि, किं वाऽयमपि गौः अयमपि गौः; किं वा गौर्गौः इति सामान्येनेति ।" स्या० रत्ना० पृ० ९५२ ।

एवाऽयं गौः' इति प्रतिभासः ; तयोरैक्यप्रसङ्गात् । द्वितीयपक्षस्तु युक्तः; 'अयम्' इत्यनेन अन्योन्यविलक्षणशाबलेयादिविशेषं परामृश्य 'गौः' इत्यनेन सदृशपरिणामपरामर्शात्। स्वकारणादेव हि तादृशं रूपमुत्पन्नं यत् तथाविधां बुद्धिमुत्पादयति, नतु व्यक्तिव्यतिरिक्तं नित्यादिस्वभावं सामान्यम् तदग्रहेऽपि तद्ग्रहणप्रसङ्गात् ? यथैव हि घटाद् व्यतिरिक्तः पटः घटाऽग्रहेऽपि गृह्यते तथा सामान्यमपि विशेषाद् व्यतिरिक्तं विशेषाऽग्रहेऽपि गृह्येत[3], न च तदग्रहे तद् गृह्यते तस्मात् न तत् ततो व्यतिरिक्तम् ।

अथ तासां तद्व्यञ्जकत्वान्न तद्व्यतिरेकेण तत्प्रतिभासः, तर्हि प्रदीपादिवत् प्रथमं तासां प्रतिभासः स्यात् ; न चैवम् , 'प्रथमं सामान्यं गृह्यते पश्चाद् व्यक्तिः' इत्यभ्युपगमात्, "नाऽगृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इत्यस्य विरोधाऽनुषङ्गाच्च । विपर्ययश्चायम् अनयोर्व्यङ्ग्यव्यञ्जकभावं निराचष्टे । व्यक्तेश्च व्यञ्जकत्वे विजातीयव्यक्तेरपि तत् स्यात् व्यक्तित्वाऽविशेषात् । न च स्वव्यक्तेरेव व्यञ्जकत्वम् इत्यभिधातव्यम् ; सामान्याऽसिद्धौ स्वव्यक्तेरेव निरूपयितुमशक्यत्वात् । अस्तु वा स्वव्यक्तेरेव तत्, तथाऽपि व्यक्तेतररूपतया कथं तस्य ऐक्यम् ? खण्डादयश्च अस्य व्यञ्जका यदि स्वभावतः तज्जननसमानशक्तियोगात्; तर्हि तावतैव सामान्यप्रयोजनसिद्धेः किं तेन सिद्धोपस्थायिना ?

किञ्च, उपकारं कुर्वती व्यक्तिः सामान्यं व्यनक्ति, अकुर्वती वा ? कुर्वती चेत् ; कोऽनया तस्य उपकारः क्रियते—तज्ज्ञानोत्पादनयोग्यता , तज्ज्ञानं वा ? तद्योग्यता चेत् ; सा ततो भिन्ना, अभिन्ना वा विधीयते ? भिन्ना चेत् ; तत्करणे सामान्यस्य न किञ्चित् कृतम् इति तदवस्था अस्य अनभिव्यक्तिः। अभिन्ना चेत् ; तत्करणे सामान्यमेव कृतं स्यात् , तथा चास्याऽनित्यत्वम् । तज्ज्ञानं चेत् ; कथमतः सामान्यसिद्धिः अनुगतज्ञानस्य व्यक्तिभ्यः एव आविर्भावात् ? तत्सहायस्य अस्यापि अत्र व्यापारः इत्यपि श्रद्धामात्रम्; यतो यदि घटोत्पत्तौ दण्डाद्युपेतकुम्भकारवत् व्यक्त्युपेतं सामान्यमनुगतज्ञानोत्पत्तौ व्याप्रियमाणं प्रतीयेत, स्यादेतत्, तच्च न प्रतीयते तत्कथं तत्सहायस्य अस्य तत्र व्यापारः स्यात् ? न किञ्चित्कुर्वत्याश्च व्यञ्जकत्वे विजातीयव्यक्तेरपि व्यञ्जकत्वप्रसङ्गः ।

ननु व्यक्तीनां यदि अनुगतमेकं सामान्यं नेष्यते[9] तदा कथं तत्र अनुगतप्रत्ययः अभिन्नशब्दनिवेशश्च स्यात् ? नहि घट-पटादीनां विभिन्नस्वभावानामसौ दृष्टः; इत्यप्यसाधीयः; सामान्येषु तदभावेऽपि 'सामान्यम्' 'सामान्यम्' इत्यनुगतप्रत्ययस्य एकशब्दनिवेशस्य च

---

१ ननु आ०, ब०, ज० । २—ग्रहणेऽपि आ० । ३ गृह्यते आ०, भां० । ४ तत्त्वतो ब०, ज० । ५ "विशिष्टबुद्धिरिष्टेह न चाज्ञातविशेषणा ॥ ८८ ॥" मी० श्लो० अपोहवाद । ६ व्यञ्जकभूतायाः व्यक्तेः प्रागेव व्यङ्ग्यभूतस्य सामान्यस्य ग्रहणरूपः । ७—नप्रसिद्धेः आ०, श्र० । ८ "सामान्यस्य व्यक्तिकार्यत्वप्रसङ्गः तदभिन्नस्योपकारस्य करणात् ।···" अष्टसह० पृ० १३९ । प्रमेयक० पृ० १३८ पू० । स्या० रत्ना० पृ० ९५३ । ९—ते कथं आ० ।

उपलम्भात्। न च यद्भावेऽपि यद् भवति तत् तन्निबन्धनम् अतिप्रसङ्गात्। अथ सामान्येषु असौ समवायनिबन्धनः; कुत एतत्? तत्र अपरसामान्याऽप्रतीतेश्चेत्; किं पुनः खण्डादिषु अपरं सामान्यं प्रतीयते? अत एव प्रत्ययात् तत्प्रतीतौ सामान्येष्वपि प्रतीयताम्। समवायस्य अत्र कारणत्वे[1] च खण्डादिष्वपि अनुगतप्रत्यये स एव कारणमस्तु अलं सामान्यकल्पनया। यथैव हि येनैव समवायेन गोत्वं खण्डादिषु समवेतं तेनैव अश्वत्वं कर्कादिषु, अतः एकसमवायवशात् सामान्येषु सामान्यप्रत्ययः, तथा येनैव समवायेन खण्डः स्वावयवेषु वर्तते तेनैव मुण्डादिरपि इति 'गौः' 'गौः' इत्यपि प्रत्ययः समवायनिबन्धन एव स्यात्।

किञ्च, स्वयं समानेषु तत् तत्प्रत्ययहेतुः, असमानेषु वा? प्रथमपक्षे तत एव तदुत्पत्तेः सामान्यं सिद्धोपस्थायि। असमानेषु[2] च तदुत्पत्तौ कर्कादिष्वपि गोत्वाद् गोप्रत्ययोत्पत्तिः स्यात्, सर्वगतत्वेन तस्य समवायस्य च सर्वत्र सद्भावात्। किञ्च, समानानां भावः सामान्यम्, समानत्वञ्च तेषां किं सामान्यसम्बन्धात्, स्वभावाद्वा?. तत्र आद्यविकल्पोऽयुक्तः; नहि अनेन[3] अन्ये समाना भवन्ति, तद्वन्तो हि तथा स्युः। स्वभावात् चेत्; तर्हि तत एव एवम्भूतां बुद्धिं ते करिष्यन्ति इत्यलं सामान्यपरिकल्पनया। तन्निबन्धनत्वे चास्याः प्रथममेकव्यक्तिदर्शनेऽपि सा स्यात्, इन्द्रियसम्बन्धाऽविशेषात् व्यक्तिवत्। अथ द्वितीयादिव्यक्तिग्रहणमपि अस्याः सामग्री ततः प्रथमव्यक्तिप्रतिभासे न प्रतिभासः; कथमेवं सविकल्पप्रत्ययस्यास्य अनुसन्धानात्मनः प्रवृत्तिः अगृहीतेऽर्थे तदप्रवृत्तेः?

किञ्च, इदं सामान्यं व्यक्तिभ्यो भिन्नम्, अभिन्नं वा? यद्यभिन्नम्; तर्हि तद्वदेव अस्य उत्पत्ति-विनाशप्रसङ्गः। भिन्नं चेत्; तद् व्यक्त्युत्पत्तौ[4] उत्पद्यते, न वा? यद्युत्पद्यते; तद्वदेव अनित्यत्वम्। नोत्पद्यते चेत्; तद् उत्पत्तिप्रदेशे विद्यते, न वा? यदि विद्यते; व्यक्त्युत्पत्तेः पूर्वमपि गृह्येत[5]। व्यक्त्याश्रितत्वान्न तदभावे ग्रहणम् इत्यप्यसत्; आश्रयाश्रयिभावस्य उपकार्योपकारकभावे सत्येव कुण्डबदरादिवत्[6] संभवात्। बदराणां हि गुरुत्वाद् अधःपततां तत्प्रतिबन्धलक्षणोपकारकर्तृत्वेन कुण्डम् आधारः, सामान्यस्य तु निष्क्रियत्वेन पतनाऽभावान्न कश्चिद् आधारः संभवति इति अनाश्रितत्वात् प्राक् ऊर्ध्वमपि उपलम्भः स्यात्। आश्रितत्वे वा आश्रयाऽभावे अभावो रूपादिवत्। अथ तदेशे तत् नास्ति, उत्पन्ने तु व्यक्तिविशेषे व्यक्त्यन्तराद् आगच्छति[7]; ननु ततः तद् आगच्छत् पूर्वव्यक्तिं परित्यज्य आगच्छति, न वा? प्रथम-

१–त्वे ख–आ०। २–नेषु तदु–आ०। ३ अन्येन ब०, ज०, श्र०, भां०। ४ व्यक्तेरुत्प–ब०, ज०। "नहि तेन सहोत्पन्नाः नित्यत्वान्नाप्यवस्थिताः। तत्र प्रागविभुत्वेन नचायान्त्यन्यतोऽक्रियाः ॥ ८०७ ॥" तत्त्वसं०। ५ गृह्यते आ०। ६–दिव सं–आ०। –त् सम्बन्धात् भां०। ७ "गमनप्रतिबन्धोऽपि न तस्य बदरादिवत्। विद्यते निष्क्रियत्वेन नाधारोऽतः प्रकल्प्यते ॥ ८०० ॥" तत्त्वसं०। स्या० रत्ना० पृ० ९६३। ८–त्वे आश्र–आ०। ९ "न याति न च तत्रासीदस्ति पश्चान्न चांशवत्। जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥" प्रमाणवा० १।१५५। प्रमेयक० पृ० १३८ उ०। सन्मति० टी० पृ० ६९१। स्या० रत्ना० पृ० ९५५।

पक्षे तस्याः तद्रहितत्वप्रसङ्गः । अथ अपरित्यज्य; तत्रापि किं व्यक्त्या सहैव आगच्छति, किं वा केनचिदंशेन तत्रैव तिष्ठति केनचिदागच्छति ? प्रथमविकल्पे शाबलेयेऽपि 'बाहुलेयोऽयम्' इति प्रतीतिः स्यात् । द्वितीयविकल्पस्त्वयुक्तः ; निरंशत्वेन अस्य अंशवत्तया प्रवृत्त्यसंभवात्, यत्र हि यस्य वृत्तिनिबन्धनं नास्ति स न तत्र वर्त्तते यथा एकपरमाणुः सह्य-विन्ध्ययोः, नास्ति चैं
५ भिन्नदेशव्यक्तिषु युगपद्वृत्तिनिबन्धनं सामान्यस्य अंशा इति । सांशत्वे चास्य व्यक्तिवदनित्यत्वप्रसङ्गः ।

'सर्वगतत्वात्तस्य युगपत् सर्वत्र वृत्तिः' इत्यपि सर्वसंर्वगतत्वम्, स्वव्यक्तिसर्वगतत्वं वा अङ्गीकृत्य उच्येत ? सर्वसर्वगतत्वे खण्डौद्यन्तराले कर्कादौ च गोत्वोपलम्भप्रसङ्गः, दृश्यस्य सतोऽस्य सर्वत्र सद्भावाऽविशेषात् । 'स्वव्यक्तीनां व्यञ्जकत्वात् तत्रैव अस्य उपलम्भः' इत्यपि
१० आसां व्यञ्जकत्वनिषेधात् कृतोत्तरम् । स्वव्यक्तिसर्वगतत्वेऽपि किं प्रतिव्यक्ति सर्वात्मनाँ वर्त्तते, एकदेशेन वा ? सर्वात्मना वृत्तौ सर्वव्यक्तीनामेकत्वम्, तस्य वा व्यक्तिवत् नानात्वं स्यात् । अंशतो वृत्तिश्च प्रागेव कृतोत्तरा । अतो वृत्त्यादिविकल्पैः पिण्डेषु नित्यादिस्वभावसामान्यस्याऽनुपपत्तेरसत्त्वम् । प्रयोगः—यद् यत्र उपलब्धिलक्षणप्राप्तं सत् नोपलभ्यते तत् तत्र नास्ति यथा क्वचिद्देशे घटः, नोपलभ्यते च इन्द्रियसम्बन्धे सत्यपि पिण्डेषु परपरिकल्पितं सामान्यमिति।
१५ तन्न व्यक्तिभ्यः सर्वथा भिन्नंस्वरूपमपि सामान्यं घटते । नाप्युभयरूपम् ; उभयपक्षनिक्षिप्तदोषाऽनुषङ्गात् । तन्न प्रत्यक्षं सामान्यसद्भावाऽऽवेदकम् ।

यदपि—'गवाद्यभिधानज्ञानविशेषाः' इत्याद्यनुमानं तत्सद्भावाऽऽवेदकमुक्तम्[६] ; तत्रापि पिण्डादिव्यतिरिक्तं निमित्तान्तरमात्रं साध्यते, सामान्यं वा ? निमित्तान्तरमात्रे सिद्धसाधनम्, सदृशपरिणामस्य निमित्तान्तरस्य इष्टत्वात् । नित्यँादिस्वभावसामान्यसाधने तु साध्यविक-
२० लता दृष्टान्तस्य, तत्र सामान्यस्य निमित्तान्तरस्यासंभवात् । सामान्याऽभावेऽपि च सत्तासामान्यादौ गतत्वादनैकान्तिकत्वम् । कालात्ययापदिष्टश्च ; पक्षे प्रागुक्तन्यायेन सामान्याऽभावाऽ-

---

१ च विभि—श्र० । २ "सर्वसर्वगता वा स्यात् पिण्डसर्वगतापि वा । सर्वसर्वगतत्वे स्यात् कर्कादावपि गोमतिः ॥" न्यायमं० पृ० २९९ (पूर्वपक्षरूपेण) । "तथा तत्सर्वसर्वगतं स्वव्यक्तिसर्वगतं वा···।" प्रमेयक० पृ० १३८ पू० । स्या० रत्ना० पृ० ९५२ । ३ "नहि सामान्यं तदाधारव्यक्तिगतमेकं संभवति व्यक्तयन्तरालेऽपि तदुपलम्भप्रसङ्गात्···" न्यायवि० टी० पृ० ३४५ पू० । स्या० मं० पृ० १०८ । ४ "अमेयमश्लिष्टममेयमेव, भेदेऽपि तद्वृत्त्यपवृत्तिभावात् । वृत्तिश्च कृत्स्नांशविकल्पतो न मानं च नानन्तसमाश्रयस्य ॥५५॥" युक्त्यनुशा० । सन्मति० टी० पृ० ६८९ । ५—न्नरूपमपि ब०, ज०, श्र० । ६ पृ० २८४ पं० ६ । ७ "तद्व्यतिरिक्तनित्यैकानुगामिसामान्याख्यसंसर्गिनिबन्धनत्वमेषां साध्यते; तदा दृष्टान्तस्य साध्यविकलता ।···"तत्त्वसं० पं० पृ० २४२ । स्या० रत्ना० पृ० ९५६ । ८ "अस्तीति प्रत्ययो यश्च सत्तादिष्वनुवर्त्तते ॥ ७४४ ॥ अन्यधर्मनिमित्तश्चेत्तत्राप्यस्तितामतिः । तदन्यधर्महेतुत्वेऽनिष्टासक्तेरधर्मिता ॥७४५॥ व्यभिचारी ततो हेतुरमीभिरयमिष्यते ।" तत्त्वसं० ।

वगतेः । विरुद्धश्च; दृष्टान्ते सामान्याऽभावेनैव व्याप्तत्वात् । 'यद्वस्त्वाकारविलक्षणो यः प्रत्ययः' इत्याद्यप्यनुमानम् एतद्दूषणैर्दुष्टत्वान्न सामान्यसद्भावप्रसाधकम् । तदेवं परपरिकल्पित-सामान्यस्य कुतश्चित् प्रमाणादप्रसिद्धेः 'तद् द्विविधम्' इत्यादिना तद्भेदोपवर्णनं वन्ध्यासुतसौभाग्यव्यावर्णनतुल्यमित्युपरम्यते ।

अस्तु तर्हि विजातीयव्यावृत्तिरेव अनुवृत्तप्रत्ययनिबन्धनम् , नित्यनिरंशैकरूपसामान्यस्य उक्तप्रकारेण तन्निबन्धनत्वाऽसंभवात् । कथं पुनः सामान्यमन्तरेण कर्कादिपरिहारेण खण्डादिष्वेव गोप्रत्ययप्रादुर्भावः इति चेत् ? 'विजातीयव्यावृत्तेः' इति ब्रूमः, सा हि यत्रास्ति तत्रैव तत्प्रत्ययमुत्पादयति नान्यत्र । ननु बाह्यार्थाऽविषयत्वे कथमतः प्रत्ययात् तत्र प्रवृत्तिः ? इत्यप्यचोद्यम् ; दृश्य-विकल्प्ययोरेकत्वाध्यवसायात् तदुपपत्तेः । एकत्वाध्यवसायश्च दर्शनानन्तरमुपजायमानस्य विकल्पस्य दर्शनेन सह भेदाऽग्रहणम् । ततो भेदाऽग्रहणाद् विकल्पव्यापारतिरस्कारेण 'मया गृहीतमिदम्' इत्यध्यवसायात् प्रवर्त्तते । वस्तुप्राप्तिश्च पारम्पर्येण वस्तुप्रतिबन्धात् । सम्यङ्मिथ्याविवेकोऽपि अत एव; यो हि वस्तुसम्बन्धदर्शनभावी विकल्पः स सत्यः, अन्योऽन्यथा इति ।

सामान्यपदार्थपरीक्षायां 'विजातीयव्यावृत्तिरेव अनुवृत्तप्रत्ययनिबन्धनम्' इति सौगतमतनिरसनपुरस्सरं तस्य वास्तविकसदृशपरिणामनिबन्धनत्व-प्रसाधनम्—

तदप्यविचारितरमणीयम् ; नित्यादिस्वभावसामान्यस्य तन्निबन्धनत्वाऽभावेऽपि सदृशपरिणामलक्षणस्यास्य प्रत्यक्षादिप्रमाणतः प्रसिद्धस्वरूपस्य तन्निबन्धनत्वोपपत्तेः । न खलु समानधर्मयोगित्वस्वरूपः सदृशपरिणामः अर्थेषु प्रत्यक्षतो न प्रतीयते; सर्वतो विलक्षणस्वलक्षणस्य स्वप्नेऽप्यप्रतीतेः । प्रत्ययप्रसादादेव हि सर्वत्र अर्थव्यवस्था, प्रत्ययश्चात्र विलक्षणेष्वपि शाबलेयादिषु 'गौर्गौः' इत्यनुगताकारेण उपलभ्यते । न च अन्याकारेऽपि वस्तुनि अन्याकारेण प्रथनम् इत्यभिधातव्यम् ; नीले पीतप्रतिभासप्रसङ्गतः प्रतिनियतवस्तुव्यवस्थाविलोपः स्यात् । अतोऽनुगतप्रतिभासाद् 'वस्त्वपि अनुगतधर्मोपेतम्' इत्यभ्युपगन्तव्यम् । व्यावृत्तिविषयत्वे चास्य 'गौः' 'गौः' इत्युल्लेखेन विधिप्रधानतया प्रवृत्तिर्न स्यात् , यथा च विजातीयपरावृत्तं वस्तुनः स्वरूपं तथा सजातीयपरावृत्तमपि, तथा च दर्शनानन्तरभाविविकल्पानां विजातीयव्यावृत्त्या-

---

१ विरुद्धत्वच्च श्र० । २ कर्कः श्वेताश्वः । ३ गोत्वप्र–श्र० । ४ "गौरवाशक्तिवैफल्याद्भेदाख्यायाः समा श्रुतिः । कृता वृद्धैरतत्कार्यव्यावृत्तिविनिबन्धना ॥ १३९ ॥ न भावे सर्वभावानां [स्वस्वभावव्यवस्थितेः । यद्रूपं] शाबलेयस्य बाहुलेयस्य नास्ति तत् ॥ १४० ॥ अतत्कार्यपरावृत्तिर्द्वयोरपि च विद्यते । अर्थाभेदेन विना शब्दाभेदो न युज्यते ॥ १४१ ॥ तस्मात्तत्कार्यतापीष्टाऽतत्कार्यादेव च भिन्नता ।" प्रमाणवा० १।१३९-४२ । तत्त्वसं० पृ० २३९, ३१७ । ५ "तत्र दृश्यसजातीयविजातीयव्यावृत्तत्वादुभयेऽपि व्यावृत्तिमेव स्पृशेयुः···सजातीयविजातीयव्यावृत्त्योर्न च भिन्नता । यतोऽन्यतरसंस्पर्शो विकल्पेन प्रकल्पते ॥" न्यायमं० पृ० ३१६ ।

कारोल्लेखित्वे तदभेदात् सजातीयव्यावृत्त्याकारोल्लेखित्वमपि स्यात्। न च सजातीयविजातीयव्यावृत्त्योः स्वलक्षणस्य च भेदः; वस्तुत्वात् निरंशत्वाच्च। नापि प्रतिनियतव्यावृत्तिलक्षणजात्यवभासे प्रतिनियमहेतुरस्ति।

किञ्च, असमानाकारव्यावृत्त्या समानाकारलक्षणं सजातीयत्वं कल्प्यते; तत्र च स्वयमसमानाकारस्य समानत्वं कल्प्येत, समानाकारस्य वा ? तत्र स्वयमसमानाकारस्य कथमन्यतो व्यावृत्तावपि समानाकारता, गवाश्वयोरपि महिष्यादिव्यावृत्त्या समानाकारत्वप्रसङ्गात् ? मूर्त्तोच्च घटाद् यथा व्यावर्त्तते ज्ञानम् तथा पटोऽपि, अतो मूर्त्तत्वं द्वयोः समानो धर्मः स्यात्। अन्योन्याश्रयश्च–अन्यतो व्यावृत्त्या हि समानाकारत्वम्, ततश्च अन्यतो व्यावृत्तिरिति। स्वयं समानाकारस्य तु अन्यतो व्यावृत्त्या[२] समानाकारत्वकल्पनावैफल्यम्।

सजातीयत्वञ्च अर्थानाम्–एकार्थक्रियाकारित्वात्, एकप्रत्यवमर्शजनकत्वात्, एक[३]व्यावृत्त्याधारत्वाद्वा स्यात् ? न तावद् एकार्थक्रियाकारित्वात्; वाह-दोहादिक्रियायाः प्रतिविशेषं भिद्यमानत्वेन एकत्वाऽसंभवात्, तस्याश्च कादाचित्कत्वात् तामकुर्वतः सजातीयत्वाऽभावात्, चक्षुःसम्बद्धेऽपि व्यक्तिविशेषे 'गौः' 'गौः' इत्यनुगतप्रत्ययो न स्यात्। एकार्थक्रियाकारित्वञ्च यदि सर्वस्वलक्षणेषु एकमनुस्यूतमभ्युपगम्यते; तदा सिद्धं तदेव अशेषविशेषनिष्ठं सामान्यम्। विकल्पारोपितं चेत्; न; तस्य निर्विषयत्वेन अर्थाऽगोचरत्वतः तत्र[४] स्वार्थक्रियाकारित्वस्य एकत्वेन आरोपणाऽसामर्थ्यात्। नापि एकप्रत्यवमर्शजनकत्वात्; प्रत्यवमर्शस्य तज्जनकत्वस्य च प्रतिव्यक्ति भेदेन एकत्वाऽनुपपत्तेः, न खलु य एव शाबलेये गोप्रत्यवमर्शः तज्जनकत्वञ्च, स एव बाहुलेयेऽपि तयोः एकव्यक्तिवद् भेदाऽभावप्रसङ्गात्। नापि एकव्यावृत्त्याधारत्वात्; तस्या बहिरन्तर्विकल्पाऽनतिक्रमात्। तत्र व्यावृत्तेर्बाह्यत्वे सकल व्यक्ति व्यापित्वे च सामान्यरूपताप्रसङ्गः। आन्तरत्वे तु तस्या बहिरर्थाधारत्वाऽभावतः कथमतो बाह्यार्थस्य सजातीयत्वसिद्धिः, कथं[५] वा बहीरूपतया अवभासनम् ?

'नान्तर्बहिर्वा'[६] इत्यपि स्वाभिप्रायमात्रम्; तथाभूतं हि व्यावृत्तिस्वरूपं किञ्चित्, न किञ्चिद्वा ? न किञ्चिच्चेत्; कथं सजातीयत्वनिबन्धनम् ? किञ्चिच्चेत्; नूनम् अन्तर्बहिर्वा तेन भवितव्यम्, तत्र च [७]उक्तो दोषः। ननु यया प्रत्यासत्त्या केचन भावाः स्वयं सदृशपरिणामं बिभ्रति तयैव स्वयमतदात्मकाः तथा किन्नाऽवभासेरन् ? इत्यप्यपरीक्षिताभिधानम्; चेतनेतरभेदाऽभावप्रसङ्गात्, 'ययैव हि प्रत्यासत्त्या चेतनेतरस्वभावान् भावाः स्वीकुर्वन्ति तयैव स्वयमतदात्मकाः तथाऽवभासेरन्' इत्यपि वदतो ब्रह्माद्वैतवादिनो न वक्त्रं वक्रीभवेत्।

---

१ अवस्तु–श्र०। २–त्त्या हि समानाकारत्वं लक्षणावैफल्यम् ब०, ज०। ३ एकवृत्त्या–आ०। ४ विद्य–आ०। ५ तत्रस्थार्थ–आ०। ६ कथं बही–आ०। ७ "नान्तर्न बहिरिति तु भणितिभङ्गिमात्रम्; तत्तादृशं किञ्चित् न किञ्चिद्वा···किञ्चिच्चेत् नूनमन्तर्बहिर्वा तेन भवितव्यमेव।·····" न्यायमं० पृ० ३१६। ८ उक्तदोषः ब०, ज०।

नीलसुखादिव्यतिरिक्तस्य अस्य असत्त्वात् कथं तथाऽवभासनम् ? इत्यन्यत्रापि समानम्, नहि सदृशेतरपरिणामरहितं स्वलक्षणमप्यस्ति यत् तथाऽवभासेत । न चैकस्य अनेकात्मकत्वविरोधान्न सदृशेतरात्मकत्वम्; चित्राकारवत् विकल्पेतराकारवच्च एकस्य तदात्मकत्वाऽविरोधात् । ततः सदृशेतरात्मकत्वं वस्तुनो वास्तवमभ्युपगन्तव्यम्, पुरोव्यवस्थितस्य खण्डाद्यर्थस्य तथैव प्रतिभासनात् । न खलु ज्ञानज्ञेययोरपि चेतनेतररूपतया वैलक्षण्यप्रतीतिरेव; नील- ५
सदादिना सादृश्यस्यापि प्रतीतेः, अन्यथा तयोरन्यतरदेव सत् स्यात्, सारूप्यवादश्च हीयेत।

न च अनुवृत्तप्रतीतेर्निर्हेतुकत्वात् किं सदृशपरिणामादिकारणचिन्तया इत्यभिधातव्यम्; निर्हेतुकत्वे तस्या देशादिनियमाऽयोगात् । वासनाहेतुकत्वे च अर्थापेक्षा न स्यात्, नहि अन्यहेतुकोऽर्थः अन्यदपेक्षते धूमादेर्जलापेक्षाप्रसङ्गात् । किञ्च, वासनाऽपि अनुभूतार्थविषयैव उपजायते, न च अत्यन्ताऽसत्त्वेन भवन्मते सामान्यानुभवसंभवः । किञ्च, असौ १०
तथाभूतं प्रत्ययं विषयतया उत्पादयति, कारणमात्रतया वा ? यदि विषयतया; तदा सकलविशेषानुगता वस्तुभूता ग्राह्याकारा नामान्तरेण जातिरेव उक्ता । कारणमात्रतया च तज्जनने विषयो वक्तव्यः, निर्विषयस्य ज्ञानस्यैवाऽसंभवात् । न च सदृशपरिणामव्यतिरेकेण अन्यः तद्विषयो घटते; उक्तदोषाऽनुषङ्गात् । न चास्य वासनाप्रभवत्वे प्रमाणमस्ति, येन हि प्रमाणेन वासनाया विकल्पं प्रति कारणत्वं प्रतीयते तस्यापि विकल्परूपतया बाह्यार्थविषयत्वाऽसंभवतः १५
'वासनाप्रभवोऽयं विकल्पः' इत्यवगन्तुमशक्यत्वात् । ततो निमित्तान्तराऽसंभवात् सदृशपरिणामनिमित्त एव अयमनुगतप्रत्ययोऽभ्युपगन्तव्यः ।

ननु तन्निमित्तत्वे 'सदृशोऽयम्' इति प्रत्ययः स्यात्, न पुनः 'स एवाऽयं गौः' इति । कस्य पुनः 'स एवाऽयं गौः' इति प्रत्ययः ? नहि धवलं दृष्ट्वा शबलं पश्यतः 'स एवाऽयं धवलो गौः' इति प्रत्ययः प्रादुर्भवति, अविपर्यस्तस्य शबले धवलप्रतीतिविरोधात् । किं तर्हि ? २०
'गौः गौः' इति प्रत्ययः, सोऽप्यविरुद्धः कथम् ? इति चेत्; सदृशपरिणामविशेषे गोशब्दसङ्केतात्, सकलसमानधर्मेषु हि सदृशशब्दसङ्केतात् तत्प्रधानतया 'सदृशोऽयम्' इति प्रत्ययः प्रवर्त्तते, तद्विशेषेषु पुनः गवाश्वादिविशेषशब्दसङ्केतात् तत्प्रधानतया 'गौः' 'अश्वः' इत्यादिप्रत्ययाः । कथमन्यथा सामान्येषु 'सामान्यम् सामान्यम्' इति प्रत्ययः षट्पदार्थेषु वा 'पदार्थः पदार्थः' इति ? नहि सामान्येषु अनुगतस्वभावस्वरूपं षट्पदार्थेषु च अत्यन्तविभिन्नलक्षणल- २५
क्षितत्वलक्षणञ्च सदृशपरिणामं विहाय अन्यन्निमित्तान्तरमस्ति । 'प्रवृत्तिश्च दृश्य-विकल्प्ययोरेकत्वाध्यवसायात्'; इत्यपि श्रद्धामात्रम्; तदेकत्वाध्यवसायस्य सविकल्पकसिद्धौ निरस्तत्वात् ।

---

१ इत्यत्रापि आ०, भां० । २–त्मत्वा–आ० । ३–णत्वमस्ति आ०, ब०, ज० । ४ तन्निमित्ते आ० । ५ स किल आ० । ६–भावरूपं ब०, ज० । ७ पृ० २८९ पं० १० । ८ पृ० ४९ ।

तन्न सामान्यपदार्थोऽपि परपरिकल्पितो घटते[1]। नापि विशेषपदार्थः; तत्रापि अनवद्यलक्षणस्य ग्राहकप्रमाणस्य चासंभवात्।

ननु विशेषाणां तावत् लक्षणमनवद्यं विद्यत एव; तथाहि–"*नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः।*" [प्रश० भा० पृ० १३] इति। नहि तुल्यजाति-गुण-क्रियाधाराणां नित्यद्रव्याणामत्यन्तव्यावृत्तबुद्धिहेतुभूतान् विशेषान् विहाय अन्यत् तद्व्यावृत्तिबुद्धेर्निबन्धनं भवितुमर्हति। ते च नित्यद्रव्यवृत्तयः परमाणु-आकाश-काल-दिग्-आत्म-मनःसु वृत्तेः। तथा अन्त्याः; परमाणूनां हि जगद्विनाश-आरम्भकोटिभूतत्वात्, मुक्तात्मनां मुक्तमनसाञ्च संसारपर्यन्तरूपत्वाद् अन्तत्वम्, तेषु भवा 'अन्त्याः' इति, तेषु स्फुटतरमालक्ष्यमाणत्वात्। वृत्तिस्तु एषां सर्वस्मिन्नेव परमाण्वादौ नित्यद्रव्ये विद्यते, अत एव 'नित्यद्रव्यवृत्तयः', 'अन्त्याः' इति उभयपदोपादानम्। ते च परस्परमत्यन्तव्यावृत्तबुद्धिहेतुत्वात् स्वाश्रयमन्यतो विशेषयन्तीति 'विशेषाः' इत्युच्यन्ते। ते च अनन्ताः स्वाश्रयवन्नित्याः योगिनां प्रत्यक्षाः, अस्मदादीनां तु अनुमेयाः; तथाहि–तुल्यजातिगुणक्रियाधाराः परमाणवः व्यावर्त्तकधर्मसम्बन्धिनः व्यावृत्तप्रत्ययविषयत्वात् मुक्ताफलराश्यन्तर्गतकृतचिह्नमुक्ताफलवत्। न चेदमसिद्धम्; तथाहि–परमाणवः व्यावृत्तप्रत्ययविषयाः सत्तासम्बन्धित्वात् बदरामलकवत्। अतो न ग्राहकप्रमाणाऽभावादपि अमीषामभावः सिद्ध्यति; प्रत्यक्षाऽनुमानयोस्तद्ग्राहकयोः प्रतिपादितत्वादिति।

५ 'नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः, ते च तुल्यजातिगुणक्रियाधारेषु नित्यद्रव्येषु अत्यन्तव्यावृत्तिबुद्धिहेतवः' इति वैशेषिकस्य पूर्वपक्षः—

१० १५

अत्र प्रतिविधीयते। यत्तावदुक्तम्[6]–'नित्यद्रव्य' इत्यादि विशेषाणां लक्षणम्; तदसमीचीनम्; यतः तदाश्रयद्रव्याणां सर्वथा नित्यत्वम्, कथञ्चिद् वा अभिप्रेतम्? प्रथमपक्षे लक्षणस्य असंभवदोषदुष्टता; नहि सर्वथा नित्यं किञ्चिद् द्रव्यमस्ति, तस्य द्रव्यपरीक्षाप्रघट्टके[7] प्रतिक्षिप्तत्वात्। अन्त्यत्वमपि एषामसंभवि एव असिद्धत्वात्, न खलु सतो जगतः महाप्रलयस्वभावः सर्वथा विनाशः, सर्वथाऽसतश्च पुनरुत्पत्तिः कुतश्चित् प्रमाणात् प्रसिद्धा, यतः परमाणूनां जगद्विनाशारम्भकोटिभूतत्वाद् अन्तत्वम्, तद्भवत्वेन च विशेषाणामन्त्यत्वं स्यात्। द्वितीयपक्षे तु अतिव्याप्तिर्लक्षणदोषः, तुल्यजा-

२० षट्पदार्थपरीक्षायां तथोक्तविशेषपदार्थप्रतिविधानपुरस्सरं नित्यद्रव्येषु व्यावृत्तप्रत्ययस्य तत्स्वरूपमात्रनिबन्धनत्वप्रसाधनम्—

२५

१ सामान्यपदार्थस्य विविधभङ्गजालेन खण्डनं चित्सुख्यां (पृ० १९०) द्रष्टव्यम्। २ एतत्सर्वं विशेषपदार्थविवरणं प्रश०भाष्ये (पृ० ३११-१२) द्रष्टव्यम्। ३ "समानजातिगुणक्रियाधाराः परमाणवो विशेषसम्बन्धिनो व्यावृत्तिबुद्धिविषयत्वात्।..." प्रश० व्यो० पृ० ५८, ६९३। ४ "परमाणवो व्यावृत्तज्ञानविषयाः द्रव्यत्वात् गवादिवत्।" प्रश० व्यो० पृ० ६९३। ५–रामलकादिवत् श्र०। ६ पृ० २९२ पं० ३। ७ "ये पुनः कल्पिता एते विशेषा अन्त्यभाविनः। नित्यद्रव्यव्यपोहेन तेप्यसंभविताः क्षणाः ॥ ८१३ ॥" तत्त्वसं०। सन्मति० टी० पृ० ६९८। ८ पृ० २१७।

त्याद्याधाराणां मुक्ताफलादीनामत्यन्तव्यावृत्तिबुद्धिहेतौ चिह्नेऽविशेषरूपेऽपि अस्य लक्षणस्य गतत्वात् । नहि तदाश्रयद्रव्यस्य कथञ्चिन्नित्यत्वमसिद्धम् ; सर्वस्य वस्तुनो द्रव्यरूपतया नित्यत्वात् । अस्तु वा सर्वथा नित्यं द्रव्यम् ; तथापि ये तत्र वर्त्तन्ते ते न कदाचनाऽपि नित्यद्रव्यं परित्यजन्ति । तेषां विशेषरूपत्वे आत्मत्वादिसामान्यैः पारिमाण्डल्यादिभिश्च व्यभिचारः ; तान्यपि हि नित्यद्रव्येष्वेव वर्त्तन्ते न च विशेषव्यपदेशं प्रतिपद्यन्ते । व्यावृत्तिबुद्धिहेतुत्वमपि एषां विद्यत एव ; सामान्यविशेषरूपत्वात् । ननु समस्तनित्यद्रव्येष्वेव वर्त्तमानानां विशेषरूपत्वप्रतिज्ञानात्, आत्मत्वादीनाञ्च नियतनित्यद्रव्यवृत्तित्वात् न तैरनेकान्तः ; इत्यप्ययुक्तमेव ; निरतिशयपरिमाणेन अनेकान्तात्, तद्धि समस्तेष्वेव नित्यद्रव्येषु वर्त्तते, विशेषणत्वाच्च स्वाश्रयमन्यस्माद् व्यावर्त्तयति न च विशेषरूपमिति ।

किञ्च, अर्थानां स्वस्वभावादेव अन्योन्यव्यावृत्तबुद्धिजनकत्वोपपत्तेर्न विशेषैः साध्यं किञ्चित् प्रयोजनम् । नित्यद्रव्याणि हि स्वरूपेण व्यावृत्तानि विशेषैर्व्यावर्त्तन्ते, अव्यावृत्तानि वा ? यदि अव्यावृत्तानि ; कथमन्यसम्बन्धादपि व्यावृत्ततामनुभवेयुः ? यद्धि स्वरूपेणाऽव्यावृत्तं तत् नान्यसम्बन्धेऽपि व्यावृत्ततामनुभवति यथा एकव्यक्तिस्वरूपम्, स्वरूपेणाऽव्यावृत्तानि च नित्यद्रव्याणि इति । अथ व्यावृत्तानि; तदा किं विशेषैः साध्यम् ? यत् स्वरूपेण व्यावृत्तं न तत्र व्यावृत्तिहेतवो व्यतिरिक्तविशेषाः सन्ति यथा विशेषस्वरूपे, स्वरूपतो व्यावृत्तानि च नित्यद्रव्याणि इति । स्वरूपेण व्यावृत्तानामपि अमीषां तत्कल्पने विशेषाणामपि स्वरूपतो व्यावृत्तानां विशेषान्तरकल्पनाप्रसङ्गादनवस्था स्यात् । अथ अर्थव्यावृत्त्या विशेषाणां व्यावृत्तिः तद्व्यावृत्त्या च अर्थानाम् ; तदप्यसाम्प्रतम् ; अन्योऽन्याश्रयाऽनुषङ्गात् ।

ननु यथा प्रदीपादीनां स्वत एव भासुररूपता तत्स्वभावत्वात् न घटादिसम्बन्धात्, घटादीनां तु तत्सम्बन्धात्, एवं विशेषेषु स्वत एव व्यावृत्तप्रत्ययहेतुत्वं तत्स्वभावत्वात् न परमाण्वादिसम्बन्धात्, परमाण्वादौ तु तद्योगात् ; इत्यप्यसमीक्षिताऽभिधानम् ; यतः प्रदीपादिसम्बन्धाद् घटादयो भावाः परित्यक्तप्राक्तन-अभासुरस्वभावा अन्ये एव भासुररूपतया उत्पद्यन्ते, इति युक्तं तेषां तत्सम्बन्धाद् भासुररूपत्वम् ; न च परमाण्वादिषु एतत् संभवति तेषां सर्वथा नित्यत्वाऽभ्युपगमतः प्राक्तन-अविविक्तरूपत्यागेन अपरविविक्तरूपतयाऽनुत्पत्तेः । ननु पर-

१–त्तिहे–ब०, ज० । २ आत्मत्वपारिमाण्डल्यादीनाम् । ३–ष्वेव च वर्त्तते आ० । –ष्वेव नित्यद्रव्येष्वेव ज० । –ष्वेव नित्यद्रव्येष्वेव च श्र० । ४ अन्योन्यं ब०, ज० । ५–षैः साध्यः किञ्चित् भां० । –षैः किञ्चित् आ०, ब०, ज० । ६ तथा आ० । ७ प्रदीपानाम् आ०, ब०, ज०, भां० । "इह अतदात्मकेष्वन्यनिमित्तः प्रत्ययो भवति यथा घटादिषु प्रदीपात् न तु प्रदीपे प्रदीपान्तरात्…।" प्रश० भा० पृ० ३२२ । ८ "प्रदीपादिप्रभावाच्च ज्ञानोत्पादस्वरूपताम् । लभन्ते क्षणिका ह्यर्थाः कलशाभरणादयः ॥ ८२१ ॥ न विवादास्पदीभूतविशेषबलभाविनी । वैलक्षण्यमतिस्तेषु क्रमोत्पत्तेः सुखादिवत् ॥८२२॥" तत्त्वसं० । प्रमेयक० पृ० १८२ पू० । सन्मति० टी० पृ० ६९९ । स्या० रत्ना० पृ० ९६४ ।

माण्वादौ अविविक्तरूपस्यैवाऽसंभवात् कस्य परित्यागेन ते विविक्तरूपाः स्युः, नित्यैकरूपाणां तेषां सर्वदा विशेषपदार्थाऽऽलिङ्गितत्वेन सदा विविक्तरूपस्यैव संभवात्? इत्यपि श्रद्धामात्रम्; नित्यैकरूपत्वस्य परमाणुविचाराऽवसरे निराकृतत्वात्।

यदप्यभिहितम्[1]–'ते च योगिनां प्रत्यक्षाः' इत्यादि; तदप्यसाम्प्रतम्; यतोऽण्वादीनां स्वरूपं स्वभावतः परस्पराऽसङ्कीर्णम्, सङ्कीर्णं वा? प्रथमपक्षे कथमतो विशेषसिद्धिः, परस्पराऽसङ्कीर्ण-अण्वादिस्वरूपादेव योगिनां तत्र वैलक्षण्यप्रतीतिप्रसिद्धेः? द्वितीयपक्षे तु तत्प्रत्ययस्य भ्रान्तताप्रसङ्गः; स्वरूपतोऽन्योन्यमव्यावृत्तस्वरूपेषु अण्वादिषु व्यावृत्ताकारतया प्रवर्त्तमानस्य अस्य अतस्मिंस्तद्ग्रहरूपत्वात्, तथा च एतत्प्रत्ययययोगिनस्ते अयोगिन एव स्युः। स्वरूपतोऽव्यावृत्तानामप्येषां विशेषाख्यपदार्थवशात् व्यावृत्तानां ग्रहणात् नायोगित्वं तेषाम्; इत्यप्यनुपपन्नम्; स्वरूपेण व्यावृत्तेषु अव्यावृत्तेषु वा विशेषाणां व्यावर्त्तकत्वप्रतिषेधात्। अनुमानबाधितश्च व्यतिरिक्तविशेषेभ्यः तत्प्रत्ययप्रादुर्भावः; तथाहि–विवादापन्नेषु भावेषु विलक्षणप्रत्ययः तद्व्यतिरिक्तविशेषनिबन्धनो न भवति, विलक्षणप्रत्ययत्वात्, विशेषेषु विलक्षणप्रत्ययवदिति।

यदपि 'तुल्यजातिगुणक्रियाधाराः' इत्याद्यनुमानमुक्तम्[6]; तत्र अणूनां व्यावर्त्तकधर्मसम्बन्धित्वमात्रसाधने सिद्धसाधनम्, व्यतिरिक्तविशेषसम्बन्धित्वसाधने तु प्रागुक्ताऽशेषदोषाऽनुषङ्ग इति। तन्न विशेषपदार्थोऽपि परपरिकल्पितो घटते। नापि समवायपदार्थः; तत्रापि अनवद्यलक्षणस्य ग्राहकप्रमाणस्य चासंभवात्।

ननु च 'अयुतसिद्धानामाधार्याधारभूतानाम् इहेदम्प्रत्ययहेतुर्यः सम्बन्धः स समवायः' इत्यनवद्यतल्लक्षणसद्भावात् तदभावोऽसिद्धः। न च 'इह ग्रामे वृक्षाः' इति इहेदम्प्रत्ययहेतुना अन्तरालाऽभावेन अनेकान्तः; सम्बन्धग्रहणात्। नापि 'इह आकाशे शकुनिः' इति प्रत्ययहेतुना संयोगेन; 'आधाराधेयभूतानाम्' इत्युक्तेः, नहि आकाशस्य व्यापित्वेन अधस्तादेव भावोऽस्ति; शकुनेः उपर्यपि भावात्। नापि 'इह कुण्डे दधि' इति प्रत्ययहेतुना; 'अयुतसिद्धा-

'अयुतसिद्धानाम्' इत्यादिलक्षणलक्षितः सम्बन्धः समवायः, स च एको नित्यश्च' इति वैशेषिकस्य पूर्वपक्षः—

---

१ पृ० २९२ पं० १३। २ "अण्वाकाशदिगादीनामसंकीर्णं यदा स्थितम्। स्वरूपञ्च तदेतस्माद् वैलक्षण्योपलक्षणम् ॥८१४॥ मिश्रीभूतपरात्मानो भवेयुर्यदि ते पुनः। नान्यभावेऽप्यविभ्रान्तं वैलक्षण्योपलक्षणम् ॥ ८१५ ॥ कथं तेषु विशेषेषु वैलक्षण्योपलक्षणम्। स्वत एवेति चेन्नैवमण्वादावपि किं मतम् ॥८१६॥" तत्त्वसं०। प्रमेयक० पृ० १८१ उ०। सन्मति० टी० पृ० ६९८। ३–द्ग्रहणरू–ब०, भां०, श्र०। ४–स्यनु–आ०, ब०, ज०। ५ "····विलक्षणप्रत्ययः तद्व्यतिरिक्तविशेषनिबन्धनो न भवति···" प्रमेयक० पृ० १८२ उ०। सन्मति० टी० पृ० ६९९। स्या० रत्ना० पृ० ९६४। ६ पृ० २९२ पं० १३। ७–द्यतल्लक्ष–ब०, ज०। ८ "इहेदमिति यतः कार्यकारणयोः स समवायः।" वै० सू० ७।२।२६। "अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः।" प्रश० भा० पृ० १३। ९ "इहप्रत्ययहेतुत्वमन्तरालादर्शनस्यापि इति सम्बन्धग्रहणम्; तथाहि–दूराद् ग्रामारामयोः अन्तरालमप-

नाम्' इत्यभिधानात्, दधिकुण्डादयश्च युतसिद्धाः। युतसिद्धिश्च पृथगाश्रयवृत्तित्वं पृथग्गतिमत्त्वञ्च उच्यते। न चासौ तन्तुपटादिषु अस्ति तन्तून् विहाय पटस्य अन्यत्राऽवृत्तेः। न च 'इह आकाशे वाच्ये वाचकः आकाशशब्दः' इति वाच्यवाचकभावेन 'इह आत्मनि ज्ञानम्' इति विषय-विषयिभावेन च व्यभिचारः, अत्र अयुतसिद्धेः आधाराधेयभावस्य च भावादित्यभिधातव्यम्; उभयत्र अवधारणाश्रयणात्, अनयोश्च युतसिद्धेषु अनाधाराधेयभूतेष्वपि च भावात् घट-तच्छब्द-ज्ञानवत्।

नन्वेवम् 'अयुतसिद्धानामेव' इत्यवधारणेऽपि व्यभिचाराऽभावात् 'आधाराधेयभूतानाम्' इत्यभिधानमनर्थकम्, 'आधाराधेयभूतानामेव' इत्यवधारणे 'अयुतसिद्धानाम्' इत्यभिधानवत्; इत्यप्यसुन्दरम्; एकार्थसमवायिनां रूपरसादीनामयुतसिद्धानामपि अन्योन्यं समवायाऽसंभवात् इति एकार्थसमवायसम्बन्धव्यभिचारनिवृत्त्यर्थम् उत्तरावधारणम्, नहि अयं वाच्यवाचकभावादिवद् युतसिद्धानामपि संभवति। तथा उत्तरावधारणे सत्यपि 'आधाराधेयभावेन संयोगविशेषेण सर्वथाऽनाधाराधेयभूतानामसंभवता व्यभिचारो माभूत' इत्येवमर्थं पूर्वाऽवधारणम्। इति सूक्तमिदं तल्लक्षणम्।

अत इदमुच्यते—तन्तुपटादयः सामान्यतद्वदादयो वा 'संयुक्ता न भवन्ति' इति व्यवहर्त्तव्यम्, नियमेन अयुतसिद्धत्वाद् अधाराधेयभूतत्वाच्च, ये तु संयुक्ता न ते तथा यथा कुण्डबदरादयः, तथा चैते, तस्मात् संयोगिनो न भवन्ति इति। यदि वा, तन्तुपटादिसम्बन्धः 'संयोगो न भवति, नियमेन अयुतसिद्धसम्बन्धत्वात्, ज्ञान-आत्मनोर्विषयविषयिभाववदिति। सद्भावे तु समवायस्य प्रत्यक्षमेव प्रमाणम्; प्रत्यक्षतो हि तन्तुसम्बद्ध एव पटः प्रतिभासते रूपादयश्च पटादिसम्बद्धाः।

तथा अनुमानतोऽपि[3] असौ प्रतीयते; तथाहि—'इह तन्तुषु पटः' इत्यादि इहप्रत्ययः सम्बन्धकार्यः, अबाध्यमान-इहप्रत्ययत्वात्, 'इह कुण्डे दधि' इत्यादिप्रत्ययवत्। न तावदयं प्रत्ययो

श्यताम् 'इह ग्रामे वृक्षाः' इति ज्ञानं दृष्टम्···" इत्यादि सर्वं पदकृत्यम् प्रश० व्यो० पृ० १०७-१०८, कन्दली पृ० १४। पूर्वपक्षरूपेण च आप्तपरी० पृ० २६, प्रमेयक० पृ० १८२ उ०। इत्यादिषु द्रष्टव्यम्।

१ "न चासौ संयोगः सम्बन्धिनामयुतसिद्धत्वात् अन्यतरकर्मादिनिमित्तासंभवात्।···" प्रश० भा० पृ० ३२६। २ नैयायिकमते प्रत्यक्षः समवायः; तथाहि—"समवाये च अभावे च विशेषणविशेष्यभावादिति।" न्यायवा० १।१।४। "अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिजातिमन्तौ च मिथः सम्बद्धावनुभूयेते, नान्यथा तन्तुषु पट इति शुक्लः पट इति पटः प्रस्पन्दत इति च पटो द्रव्यमिति च बुद्धिव्यपदेशौ स्याताम्।" न्यायवा० ता० टी० १।१।४। ३ वैशेषिकमते तु अतीन्द्रियः अनुमेयश्च; तथाहि—"अत एवातीन्द्रियः···तस्मादिहबुद्ध्यनुमेयः समवाय इति।" प्रश० भा० पृ० ३२९। ४ "इह तन्तुषु पटः इत्यादि इहप्रत्ययः सम्बन्धकार्यः, अबाध्यमानेहप्रत्ययत्वात्, इह कुण्डे दधीति प्रत्ययवत्।"···प्रश० व्यो० पृ० १०९। प्रश० कन्द० पृ० ३२५।

निर्हेतुकः; कादाचित्कत्वात्। नापि तन्तुहेतुकः पटहेतुको वा; 'तन्तवः, पटः' इति वा प्रत्ययप्रसङ्गात्। नापि वासनाहेतुकः; तस्याः कारणरहितायाः संभवाऽभावात्। पूर्वज्ञानस्य तत्कारणत्वे तदपि कुतः स्यात् ? तत्पूर्ववासनातश्चेत् ; अनवस्था। ज्ञानवासनयोः अनादित्वाद् अयमदोषश्चेत् ; नैवम् ; नीलादि-सन्तानान्तर-स्वसन्तान-संविदद्वैतादिसिद्धेरपि अभावाऽनुषङ्गात्, अनादिवासनावशादेव नीलादिप्रत्ययस्य स्वतोऽवभासस्य च संभवात्। नापि तादात्म्यहेतुकोऽयम्; तादात्म्यं हि एकत्वमुच्यते, तत्र च सम्बन्धाऽभाव एव स्यात् द्विष्ठत्वात्तस्य। नापि संयोगहेतुकः ; युतसिद्धेष्वेव अर्थेषु संयोगस्य संभवात्। नं चात्र समवायपूर्वकत्वं साध्यते येन दृष्टान्तः साध्यविकलः हेतुश्च विरुद्धः स्यात्, नापि संयोगपूर्वकत्वं येन अभ्युपगमविरोधः स्यात्। किं तर्हि ? सम्बन्धमात्रपूर्वकत्वम्, तस्मिंश्च सिद्धे परिशेषात् समवाय एव तज्जनकः सेत्स्यति।

यच्च इदम्–'विवादास्पदम् 'इदमिह' इति ज्ञानं न समवायपूर्वकम् अबाधित-इहज्ञानत्वात् 'इह कुण्डे दधि' इति ज्ञानवत्' इति विशेषविरुद्धानुमानम्, तत् सकलानुमानोच्छेदकत्वाद् अनुमानवादिना न प्रयोक्तव्यम्। यच्चोच्यते–'इदम् इहेति ज्ञानं न समवायालम्बनम्'; तत्सत्यम्; विशिष्टाधारविषयत्वात्तस्य, नहि 'इह तन्तुषु पटः' इत्यादि इहप्रत्ययः केवलं समवायमालम्बते तद्विशिष्टतन्तुपटालम्बनत्वात्, वैशिष्ट्यञ्चानयोः सम्बन्धः।

नं चास्य संयोगवन्नानात्वम्; इहेति प्रत्ययाऽविशेषात् विशेषलिङ्गाऽभावाच्च सत्प्रत्ययाऽविशेषात् तल्लिङ्गाऽभावाच्च सत्तावत्। न च सम्बन्धत्वमेव विशेषलिङ्गम्; अस्य अन्यथासिद्धत्वात्, नहि संयोगस्य सम्बन्धत्वेन नानात्वं साध्यते अपि तु प्रत्यक्षेण भिन्नाश्रयसमवेतस्य क्रमेण उत्पादोपलब्धेः। समवायस्य च अनेकत्वे सति अनुगतप्रत्ययोत्पत्तिर्न स्यात्, संयोगे तु संयोगत्वबलात् नानात्वेऽपि स्यात्। न चैतत् समवाये संभवति, समवायत्वस्य समवाये समवायाऽसंभवात्, अन्यथा अनवस्था स्यात्। संयोगस्य च गुणत्वेन द्रव्येष्वेव संभवात्, संयोगत्वं पुनः संयोगे समवेतम्। न च अनुगतप्रत्ययजनकत्वे सामान्यादस्य अभेदः; भिन्नलक्षणयोगित्वात्।

यच्चान्यत् समवाये बाधकमुच्यते–'निष्पन्नयोः अनिष्पन्नयोर्वा समवायः स्यात् ? नं तावदनिष्पन्नयोः ; सम्बन्धिनोरनुत्पादे सम्बन्धाऽसंभवाँत्। निष्पन्नयोस्तु संयोग एव। तथा स्वसम्बन्धिभ्यामसौ सम्बद्धः, असम्बद्धो वा ? न तावदसम्बद्धः ; 'तयोरयं सम्बन्धः' इति

१ "न चात्र समवायपूर्वकत्वं साध्यते साध्यविकलताप्रसङ्गात्, नापि संयोगपूर्वकत्वम्, किं तर्हि सम्बन्धमात्रकार्यत्वम्।..." प्रश० व्यो० पृ० १०९। २ "न च संयोगवन्नानात्वं भाववत् लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च। तस्माद् भाववत् सर्वत्र एकः समवाय इति।" प्रश० भा० पृ० ३२६। ३ "नानिष्पन्नयोः समवायो घटते सम्बन्ध्यभावे सम्बन्धस्यादर्शनात्। अथ निष्पन्नयोः सम्बन्धः समवायः तर्हि युतसिद्धिः स्यात्।..." प्रश० व्यो० पृ० ६९९। ४–वात् अन्यथा निष्प–श्र०।

व्यपदेशाऽभावप्रसङ्गात्। सम्बद्धश्चेत्; किं स्वतः, परतो वा ? न तावत् स्वतः; संयोगादीनामपि तथा तत्प्रसङ्गात्। नापि परतः; अनवस्थाप्रसङ्गात्। न च गुणादीनामाधेयत्वं युक्तम्; निष्क्रियत्वात्, गतिप्रतिबन्धकश्च आधारः जलादेर्घटादिवदिति। तदप्युक्तिमात्रम्; यतो न निष्पन्नाऽनिष्पन्नयोर्वा समवायः; स्वकारणसत्तासम्बन्धस्यैव निष्पत्तित्वात्, नहि निष्पत्तिरन्या समवायश्चान्यः येन पौर्वापर्य्यं स्यात्। नापि समवायस्य सम्बन्धान्तरेण सम्बन्धः येन अनवस्था स्यात्; सम्बन्धस्य समानलक्षणसम्बन्धेन सम्बद्धस्य क्वचिददृष्टेः। अतः अग्नेरुष्णतावत् स्वत एव अस्य सम्बन्धो युक्तः स्वत एव सम्बन्धरूपत्वात्, न संयोगादीनां तदभावात्। न हि एकस्य स्वभावोऽन्यस्यापि, अन्यथा स्वतोऽग्नेरुष्णत्वदर्शनात् जलादीनामपि स्वत एव तत् स्यात्। प्रयोगः—समवायः सम्बन्धान्तरं नापेक्षते स्वतः सम्बन्धत्वात्, ये तु सम्बन्धान्तरमपेक्षन्ते न ते स्वतःसम्बन्धाः यथा घटादयः, न चाऽयं न स्वतः सम्बन्धः, तस्मात् सम्बन्धान्तरं नापेक्षते इति।

यच्चोक्तम्—'निष्क्रियत्वात् तेषामनाधेयत्वम्' इति; तदसत्; संयोगिद्रव्यविलक्षणत्वाद् गुणादीनाम्, संयोगिनां सक्रियत्वेनैव, तेषां निष्क्रियत्वेऽपि आधाराधेयभावस्याध्यक्षेण प्रतीतेश्च इति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्—'अयुतसिद्धानाम्' इत्यादि; तदसमीचीनम्; समवायिनामसंभवे समवायेऽप्येतल्लक्षणलक्षितत्वाऽनुपपत्तेः, तदसंभवश्च प्रागेव प्रतिपादितः। द्रव्यगुणकर्मसामान्यविशेषरूपा हि पञ्च पदार्थाः समवायित्वेन भवद्भिः परिकल्पिताः, ते च तत्परीक्षावसरे प्रपञ्चतः प्रतिक्षिप्ताः, तत्कथम् अयुतसिद्धत्वादिलक्षणसंभवः यतस्तल्लक्षितः समवायः पदार्थान्तरं सिद्ध्येत्? किञ्च, इदमयुतसिद्धत्वं शास्त्रीयम्, लौकिकं वा? तत्र आद्यपक्षोऽनुपपन्नः; तन्तुपटादीनां शास्त्रीयाऽयुतसिद्धत्वस्यासंभवात्। वैशेषिकशास्त्रे हि प्रसिद्धम्—अपृथगाश्रयवृत्तित्वम् अयुतसिद्धत्वम्, तच्च इह नास्त्येव; तन्तूनां स्वावयवांऽशुषु वृत्तेः पटस्य च तन्तुषु इति पृथगाश्रयवृत्तित्वसिद्धेः अपृथगाश्रयवृत्तित्वमसदेव। एवं गुणकर्मसामान्यानामपि अपृथगाश्रयवृत्तित्वाऽभावः प्रतिपत्तव्यः। लोकप्रसिद्धैकभाजनवृत्तिरूपं तु अयुतसिद्धत्वं युतसिद्धयोर्दुग्धाऽम्भसोरप्यस्ति इति कथं तल्लक्षणम्?

'अयुतसिद्धानाम्' इत्यादिविशेषणप्रतिविधानपुरस्सरं समवायस्य कथञ्चित्तादात्म्यरूपताप्रसाधनम्—

ननु यथा कुण्डदध्यवयवाख्यौ पृथग्भूतौ द्वौ आश्रयौ, द्वौ च दधिकुण्डावयव्याख्यौ आश्र-

---

१ "...अतः समानलक्षणवृत्तिप्रतिषेध एव...।" प्रश० व्यो० पृ० ११९। २ "अविभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति तस्मात् स्वात्मवृत्तिः।" प्रश० भा० पृ० ३२९। ३ पृ० २९४ पं० १८। ४—ये तल्ल—श्र०। ५ "पञ्चानां समवायित्वमनेकत्वञ्च।" प्रश० भा० पृ० १६। ६ "सत्यामयुतसिद्धौ चेन्नेदं साधु विशेषणम्। शास्त्रीयायुतसिद्धत्वविरहात् समवायिनोः॥ ४२॥ द्रव्यं स्वावयवाधारं गुणो द्रव्याश्रयो यतः। लौकिक्ययुतसिद्धिस्तु भवेद् दुग्धाम्भसोरपि॥ ४३॥" आप्तपरी०। प्रमेयक० पृ० १८४ पू०। ७ "युतसिद्धिः पृथगवस्थितिः उभयोरपि सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वं सा ययोर्नास्ति तावयुतसिद्धौ।..." प्रश० कन्दली पृ० १४।

यिणौ न तथा तन्तुपटादिषु, तन्तोरेव स्वावयवापेक्षया आश्रयित्वात् पटापेक्षया च आश्रयत्वात्, अतः 'पृथगाश्रयवृत्तित्वं युतसिद्धिः' इत्यस्य युतसिद्धिलक्षणस्य अभावादयुतसिद्धत्वं तेषाम्; इत्यप्यसत्; दिक्-काल-आकाश-आत्मनां युतसिद्धत्वभावप्रसङ्गात् तेषां पृथगाश्रयाऽऽश्रयित्वाऽभावात्। 'नित्यानां च पृथग्गतिमत्त्वम्' इत्यपि तल्लक्षणं तत्र असम्भाव्यम्; व्याप्तितया अन्यतरपृथग्गतिमत्त्वस्य उभयपृथग्गतिमत्त्वस्य वा तेषामसंभवात्। इतरेतराश्रयश्च–समवायसिद्धौ हि पृथगाश्रयसमवायित्वलक्षणा युतसिद्धिः सिद्ध्येत्, तत्सिद्धौ च तन्निषेधेन अयुतसिद्धानां समवायः सिद्ध्यतीति। ननु लक्षणं विद्यमानस्य अन्यतो भेदेन अवस्थापकम्, न तु सद्भावकारकम्, तेनाऽयमदोषः; तदयुक्तम्; ज्ञापकपक्षे सुतरामितरेतराश्रयप्रसक्तेः। तथाहि–नाऽज्ञातायां युतसिद्धौ तत्प्रतिषेधेन अयुतसिद्धानां समवायो ज्ञातुं शक्यते, अज्ञातश्चासौ न पृथगाश्रयसमवायित्वलक्षणां युतसिद्धिमवस्थापयितुमुत्सहते इति। न च प्रमाणतोऽप्रसिद्धस्य अस्य लक्षणमात्रात् सिद्धिर्युक्ता; यत् प्रमाणतोऽप्रसिद्धम् न तस्य तन्मात्रात् सिद्धिः यथा आत्माऽद्वैतादेः, प्रमाणतोऽप्रसिद्धश्च भवत्कल्पितः समवाय इति। सिद्धे हि कुतश्चित् लक्ष्यसद्भावे तदनुसारि लक्षणं प्रतीयते न पुनर्लक्षणबलादेव तत्सिद्धिः; सर्वस्य स्वेष्टतत्त्वसिद्धिप्रसङ्गात्, तन्मात्रप्रणयनस्य सर्वत्र सुलभत्वात्। अन्योन्याश्रयश्च–सिद्धे हि समवाये तस्य इदं लक्षणं सिद्ध्येत्, तत्सिद्धौ च समवायसिद्धिरिति।

किञ्च, युतसिद्धेरभावः अयुतसिद्धिः, सिद्धिशब्देन चात्र किं ज्ञप्तिः, उत्पत्तिर्वा अभिप्रेता? यदि ज्ञप्तिः; तदा सामान्यतद्वदादीनामपि युतसिद्धिप्रसङ्गः, अनुवृत्तव्यावृत्तादिरूपतया तेषामन्योन्यं पृथगेव स्वरूपसंवेदनसंभवात्। अथ उत्पत्तिः; तदा 'न युतसिद्धिः अयुतसिद्धिः, अपृथगुत्पत्तिः' इत्यायातम्, तदपि जातेर्नित्यत्वाऽभ्युपगमाद् दुर्घटम्। अथ युतसिद्धेरभावमात्रमयुतसिद्धिः, सा च जातावस्ति तेनायमदोषः; न; इत्थम् आकाशादीनामपि अयुतसिद्धिः स्यात्, तथा उत्पन्ने पटे रूपादयः पृथगेव उत्पद्यन्ते, सिद्धेषु च पृथक् तन्तुषु पटः इत्यतोऽत्रापि युतसिद्धत्वं स्यात्।

---

१ "अनित्यानां तु युतेष्वाश्रयेषु समवायो युतसिद्धिरिति।" प्रश० भा० पृ० १५२। २ "सा पुनः द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वम् इयं तु नित्यानाम्।" प्रश० भा० पृ० १५२। प्रश० कन्द० पृ० १४। ३ "....इत्यपि न विभुद्रव्येषु संभवति; तद्धि पृथग्गतिमत्त्वं द्विधा।..." आप्तपरी० का० ४४–४७। प्रमेयक० पृ० १८४ पू०। स्या० रत्ना० पृ० ९६५। ४ "अत्र केचिदसद्दूषणमुद्भावयन्ति–समवायाऽसिद्धौ युतेष्वाश्रयेषु समवायो न युतसिद्धिः...तदेतदसद्दूषणम्; लक्षणस्य विद्यमानव्यवच्छेदकत्वात्। यदि हि अविद्यमानं लक्षणेन उत्पाद्येत भवेदेतद् दूषणम्...न चैतत् लक्षणस्य ज्ञापकत्वात् इति।" प्रश० व्यो० पृ० १०८। ५ "ज्ञापकपक्षे सुतरामितरेतराश्रयत्वम्" प्रमेयक० पृ० १८४ पू०। ६ "सिद्धिशब्देन किं ज्ञप्तिरुत्पत्तिर्वा।" स्या० रत्ना० पृ० ९६५। "तत्पुनरयुतसिद्धत्वमपृथग्देशत्वं वा, अपृथक्कालत्वं वा, अपृथक्स्वभावत्वं वा? सर्वथापि नोपपद्यते।..." ब्रह्मसू० शां० भा० २।२।१७।

किञ्च, इयमयुतसिद्धिः अभिन्नदेशाश्रयत्वेन, अभिन्नकालाश्रयत्वेन, अभिन्नधर्म्याश्रयत्वेन, अभिन्नकारणप्रभवत्वेन, अभिन्नस्वरूपत्वेन वा स्यात्[1] ? न तावद् अभिन्नदेशाश्रयत्वेन[2] ; असिद्धत्वात्, नहि य एव तन्तूनां देशाः त एव पटस्यापि, तन्तवो हि स्वांशुषु स्थिताः पटस्तु तेषु इति । नापि अभिन्नकालत्वेन; अत एव, नहि य एव तन्तूनां कालः स एव पटस्यापि, प्रतीतिविरोधात् । कार्यकारणभावाऽभावप्रसङ्गाच्च; कारणेन हि कार्यस्य समकालत्वमन्यतः सिद्धस्य स्यात्, सिद्धे चास्मिन् किं कुर्वत् तत् कारणं स्यात् ? नापि अभिन्नधर्म्याश्रयत्वेन; अस्य अत्राऽसंभवात्, नहि अवयव-अवयव्यादीनां क्वचिदेकस्मिन् धर्मिणि आश्रितत्वमस्ति, प्रतीतिविरोधाद् अपसिद्धान्तप्रसङ्गाच्च ।

एतेन अभिन्नकारणप्रभवत्वेनापि अयुतसिद्धिः प्रत्याख्याता । अभिन्नस्वरूपत्वे तु अनयोः कस्य किमपेक्षा अयुतसिद्धिः कुत्र वा कस्य समवायः स्यात्? अभिन्नस्वरूपत्वञ्च अन्यस्य अन्यस्वरूपापत्तिः, एकलोलीभावेन आत्मलाभो वा ? प्रथमपक्षे प्रत्यक्षविरोधः, न खलु जात्यादेर्व्यक्त्यादिस्वरूपापत्तिः प्रत्यक्षतः प्रतीयते । द्वितीयपक्षे तु 'तथापरिणतिरेव अर्थानामयुतसिद्धत्वम्' इत्यस्मन्मतसिद्धिः । एकद्रव्याश्रयाणां रूपरसादीनामपि च एवंविधाऽयुतसिद्धिसंभवाद् अन्योन्यं समवायप्रसङ्गः । तेषामाश्रयाश्रयिभावाऽभावात् न तत्प्रसङ्गः ; इत्यप्यचारु ; तथापरिणतिव्यतिरेकेण अन्यस्य आश्रयाश्रयिभावस्य तन्तुपटादावप्यसंभवात्, तदन्यस्य अस्य पृथक्सिद्धेषु कुण्डबदरादिष्वेव संभवात् ।

यदप्युक्तम्[3]–'उभयत्र अवधारणाश्रयणात्' इत्यादि; तदप्ययुक्तम् ; उभयत्र अवधारणाश्रयणेऽपि विपक्षैकदेशवृत्तेर्लक्षणस्य[4] व्यभिचारित्वात्, इष्टश्च विपक्षैकदेशादव्यावृत्तस्य सर्वैरपि अनैकान्तिकत्वम्, शब्दस्य प्रयत्नानन्तरीयकत्वे साध्ये नित्यत्ववत् ।

यच्चोक्तम्[6]–'तन्तुपटादयः संयोगिनो न भवन्ति' इत्यादि; तत्सत्यम्; तत्र तादात्म्योपगमात् ।

यत् पुनरुक्तम्[7]–'प्रत्यक्षत एव समवायः प्रतीयते' इत्यादि; तदपि श्रद्धामात्रम्; तदसाधारणस्वरूपाऽव्यवस्थितेः, स्थिते हि घटादीनामसाधारणे स्वरूपे प्रत्यक्षता सिद्धा, न चास्य तत्सिद्धम्। तद्धि किमयुतसिद्धसम्बन्धत्वम्, सम्बन्धत्वमात्रं[8] वा स्यात्[9] ? न तावदयुतसिद्धसम्बन्धत्वम् ; उक्तप्रकारेण अस्य अव्यवस्थितेः । न च एकस्य सामान्यात्मकं स्वरूपं युक्तम् ; समानानामभावे सामान्यस्याऽसंभवात् गगने गगनत्ववत् । नापि सम्बन्धत्वमात्रं समवायस्य असाधारणं स्वरूपम् ; संयोगादावपि संभवात् ।

---

१ "अभिन्नदेशे वृत्तिः, अभिन्नकालता, अभिन्नधर्मिता, अभिन्नकारणप्रभवत्वम्, अभिन्नस्वरूपत्वं वा ?" स्या० रत्ना० पृ० ९६५ । २–त्वेन अस्या आश्रयत्वेन असि–भां० । ३ पृ० २९५ पं० ५ । ४ अवधारणयापि ज० । ५–स्यास्य व्य– ज० । ६ पृ० २९५ पं० १४ । ७ पृ० २९५ पं० १८ । ८ सम्बन्धमात्रं ब०, ज० । ९ सम्बन्धमात्रं ब०, ज० ।

किञ्च, तद्रूपतया असौ सम्बन्धबुद्धौ प्रतिभासते, 'इहेदम्' इत्यनुभवे, 'समवायः' इति प्रत्यये वा ? तत्र आद्यविकल्पे कोऽयं सम्बन्धो नाम यद्बुद्धौ असौ प्रतिभासेत–किं सम्बन्धत्वजातियुक्तः सम्बन्धः, अनेकोपादानजनितः, अनेकाश्रितः, सम्बन्धबुद्ध्युत्पादकः, तद्बुद्धिविषयो वा ? न तावत् सम्बन्धत्वजातियुक्तः; समवायस्य असम्बन्धत्वप्रसङ्गात्, समवायान्तराऽसत्त्वेन अत्र सम्बन्धत्वजातेरप्रवर्त्तनात्। अथ संयोगवद् अनेकोपादानजनितः; तर्हि समवायस्य असम्बन्धत्वप्रसङ्गः तस्य नित्यत्वाऽभ्युपगमतः तदसंभवात्, पटादेश्च तत्प्रसङ्गः तत्संभवात्। नापि अनेकाश्रितः; गोत्वादेरपि सम्बन्धत्वाऽनुषङ्गात्। नापि सम्बन्धबुद्ध्युत्पादकः; चक्षुरादेरपि तत्त्वप्रसक्तेः। नापि सम्बन्धबुद्धिविषयः; सम्बन्ध-सम्बन्धिनोः एकज्ञानविषयत्वे सम्बन्धिनोऽपि तद्रूपताऽनुषङ्गात्, न च प्रतिविषयं ज्ञानभेदः मेचकज्ञानाऽभावप्रसङ्गात्।

अथ 'इहेदम्' इति अनुभवे समवायः प्रतिभासते; न ; अस्य आधाराधेयभावलक्षणसम्बन्धाकारोल्लेखित्वात्, न च अन्याकारेऽर्थे प्रतीयमाने अन्याकारोऽर्थः कल्पयितुं युक्तः अतिप्रसङ्गात्। अथ कुण्डबदरादौ तत्सम्बन्धः सम्बन्धान्तरपूर्वको दृष्टः, अतः अवयव-अवयव्यादावपि असौ सम्बन्धान्तरपूर्वक एव सिद्ध्यति इति समवायसिद्धिः। नन्वेवम् अनवस्था स्यात्; दधिकुण्डादिसम्बन्धस्य सम्बन्धान्तरात् तत्परतन्त्रतोपलम्भाद् अवयवाऽवयव्यादिसम्बन्धस्यापि तदन्तरात् तत्परतन्त्रताप्रसङ्गात्। अथ समवायबुद्ध्या असौ प्रतीयते ; तन्न ; तद्बुद्धेः कस्यचिदपि असंभवात्, न हि 'एते तन्तवः, अयं पटः, अयं च समवायः' इति त्रितयमन्योन्यविविक्तं कस्यचित् स्वप्नेऽपि प्रतिभासते। तन्न प्रत्यक्षगम्यः समवायः।

नाप्यनुमानगम्यः; तत्सद्भावावेदिनो निरवद्यस्य अस्याप्यसंभवात्। यच्च 'इह तन्तुषु पटः' इत्यादि तत्सद्भावावेदकमनुमानमुक्तम् ; तदप्यसाम्प्रतम् ; अनेकदोषदुष्टत्वात्। तथाहि–तावद् आश्रयाऽसिद्धोऽत्र हेतुः ; तदसिद्धत्वञ्च 'इह तन्तुषु पटः' इत्यादिप्रत्ययस्य धर्मिणोऽसिद्धत्वात्।

---

१ "किं सम्बन्धबुद्ध्याऽध्यवसीयते, अहोस्विदिहबुद्ध्या, समवायबुद्ध्या वा ?" तत्त्वोप० पृ० १०। प्रमेयक० पृ० १८४ उ०। २ किं सम्बन्धजातियुक्तः सम्बन्धः, आहोस्विदनेकोपादानजनितः, अनेकाश्रितो वा, सम्बन्धबुद्धिविशेषो वा, सम्बन्धबुद्ध्युत्पादको वा, सम्बन्धाकारो वा ? तत्त्वोप० पृ० १०। प्रमेयक० पृ० १८४ उ०। ३ "अयं तन्तुः, अयं पटः, अयमनयोः समवाय इति न जातु जानते जनाः।..." तत्त्वोप० पृ० १०। "न धर्मधर्मित्वमतीव भेदे वृत्त्यास्ति चेन्न त्रितयं चकास्ति। इहेदमित्यस्ति मतिश्च वृत्तौ न गौणभेदोऽपि च लोकबाधः ॥ ७॥" स्या० मं०। ४ "नहि तस्य प्रत्यक्षात् प्रतिपत्तिः पटतन्तुव्यतिरेकेण तदनिर्णयात्।" न्यायवि० वि० पृ० २२५ पू०। ५ तद्भावा–आ०। "समवायस्य वृक्षोऽत्र शाखास्वित्यादिसाधनैः। अनन्यसाधनैः सिद्धिरहो लोकोत्तरा स्थितिः ॥ १०४॥" न्यायवि० परि० १, पृ० २२६ पू०। ६ पृ० २९५ पं० २०। ७ "तामेव धर्म्यसिद्धिं समर्थयते...नैव तन्तुपटादीनां नानात्वेनोपलक्षणम्। विद्यते येन तेषु स्युरिदमत्रेति बुद्धयः ॥ ८२९॥" तत्त्वसं०।

अप्रसिद्धविशेषणश्चायम्; 'पटे तन्तवः, वृक्षे शाखाः' इत्यादिरूपतया प्रतीयमानप्रत्ययेन 'इह तन्तुषु पटः' इत्यादिप्रत्ययस्य बाध्यमानत्वात्। स्वरूपाऽसिद्धश्च; तन्तु-पटप्रत्यये इह्प्रत्ययत्वस्य अनुभवाऽभावात् 'पटोऽयम्' इत्यादिरूपतया अस्य अनुभवात्। अनैकान्तिकश्चायम्; 'इह प्रागभावेऽनादित्वम्, इह प्रध्वंसाऽभावे प्रध्वंसाऽभावाऽभावः' इति अबाध्यमान-इहप्रत्ययस्य सम्बन्धपूर्वकत्वाऽभावात्। न च अत्र विशेषणविशेष्यभावः सम्बन्धो वाच्यः; सम्बन्धान्तरमन्तरेण तद्भावस्यैव असंभवात्, अन्यथा सर्वं सर्वस्य विशेषणं विशेष्यञ्च स्यात्।

किञ्च, अतोऽनुमानात् तन्तु-पटादौ सम्बन्धमात्रं प्रसाध्यते, तद्विशेषो वा? प्रथमपक्षे सिद्धसाध्यता, तादात्म्यलक्षणसम्बन्धस्य इष्टत्वात्। ननु तन्तु-पटयोः तादात्म्ये सति अन्यतरदेव स्यात्, तथा च सम्बन्धिनोरेकत्वे कथं सम्बन्धः स्याद् अस्य द्विष्ठत्वात्? इत्यप्ययुक्तम्; यो हि द्विष्ठः सम्बन्धः तस्य इत्थमभावो युक्तः, यस्तु तत्स्वभावतालक्षणः कथं तस्य अभावः? तन्तूनां स्वात्मभूतोऽवस्थाविशेष एव हि पटः नाऽर्थान्तरम्, आतानवितानीभूततन्तुव्यतिरेकेण देशभेदादिना तस्यानुपलभ्यमानत्वात्। अथ सम्बन्धविशेषः साध्यते; किं संयोगः, समवायो वा? संयोगश्चेत्; अभ्युपगमबाधा। अथ समवायः; दृष्टान्तस्य साध्यविकलता, पक्षस्य च अप्रसिद्धविशेषणत्वं समवायस्य क्वचिदप्यप्रसिद्धेः।

अथ न संयोगः समवायो वा साध्यते किन्तु सम्बन्धमात्रम्, तत्सिद्धौ च परिशेषात् समवायः सिद्ध्यति इत्युच्यते; ननु कोऽयं परिशेषो नाम? प्रसक्तप्रतिषेधेऽवशिष्टप्रत्ययहेतुः सः; इति चेत्; स किं प्रमाणम्, अप्रमाणं वा? यदि अप्रमाणम्; कथं प्रकृतप्रतीतिहेतुः अतिप्रसङ्गात्? अथ प्रमाणम्; किं प्रत्यक्षम्, अनुमानं वा? न तावत् प्रत्यक्षम्; तस्य प्रसक्तप्रतिषेधद्वारेण अभिप्रेतसिद्धौ असमर्थत्वात्। अथ केवलव्यतिरेक्यनुमानं परिशेषः; तर्हि प्रकृताऽनुमानस्य आनर्थक्यम्, तस्मिन् सत्यपि परिशेषमन्तरेण अभिप्रेतसिद्धेरभावात्, स तु प्रमाणान्तरमन्तरेणाऽपि तत्सिद्धौ समर्थः इति स एव उच्यताम्, न चाऽसौ उक्तः, तत्कथं समवायः सिद्ध्येत्?

यच्चान्यदुक्तम्[2]–'विशेषविरुद्धाऽनुमानं सकलानुमानोच्छेदकत्वान्न वक्तव्यम्' इत्यादि; तत् किम्[3] अनुमानाभासोच्छेदकत्वान्न वाच्यम्, सम्यगनुमानोच्छेदकत्वाद्वा? तत्र आद्यपक्षोऽनुपपन्नः; नहि कालात्ययापदिष्टहेत्वाद्यनुमानोच्छेदकस्य प्रत्यक्षादेः अनुमानवादिना उपन्यासो न क्रियते अतिप्रसङ्गात्। द्वितीयपक्षोऽप्ययुक्तः; नहि धूमादिसम्यगनुमानस्य विशेषविरुद्धाऽनुमानसहस्रेणाऽपि प्रत्यक्षादिभिरपहृतविषयेण बाधा विधातुं पार्यते। न च विशेषविरुद्धानुमानत्वादेव इदमवाच्यम्; यतो न विशेषविरुद्धानुमानत्वम् असिद्धादिवत् हेत्वाभासनिरूपणप्रघट्टके दोषो निरूपितः, येन अनुमानवादिभिः तद् असिद्धत्वादिवत् न प्रयुज्येत। ततो

१ "वृक्षे शाखा शिलाश्वाग इत्येषा लौकिकी मतिः ॥८३१॥" तत्त्वसं०। २ पृ० २९६ पं० ११।
३ "तत्किमनुमानाभासोच्छेदकत्वान्न···।" प्रमेयक० पृ० १८६ पू०।

यद् दुष्टमनुमानं तदेव विशेषविघाताय न वक्तव्यम्, यथा 'अयं प्रदेशः अत्रत्येन अग्निना अग्निमान्न भवति धूमवत्त्वात् महानसवद्' इत्यादिकम्। यतः तेन यो विशेषो निराक्रियते स प्रत्यक्षेणैव तद्देशोपसर्पणे प्रतीयते, न चैतत् समवाये संभवति प्रत्यक्षाद्यगोचरत्वेन अस्य प्रतिपादितत्वात्। न च अतद्विषयं बाधकम् अतिप्रसङ्गात्।

यत् पुनरुक्तम्[1]–'न चास्य संयोगवत् नानात्वम्' इत्यादि; तदप्यसमीचीनम्, तदेकत्वस्य अनुमानबाधितत्वात्। तथाहि–अनेकः समवायः भिन्नदेशकालाकारार्थेषु[3] सम्बन्धबुद्धिहेतुत्वात्, यो य एवं सः सो नैकः यथा संयोगः, तथा चायम्, तस्मादनेक इति। प्रसिद्धो हि दण्डपुरुषसंयोगात् कट-कुड्यादिसंयोगस्य भेदः। 'निबिडः संयोगः, शिथिलः संयोगः' इति प्रत्ययभेदात् अस्य भेदाभ्युपगमे 'नित्यं समवायः, कदाचित् समवायः' इति प्रत्ययभेदात् समवायस्यापि भेदोऽस्तु अविशेषात्। समवायिनोर्नित्यत्व-कादाचित्कत्वाभ्यां[5] समवाये तत्प्रत्ययोत्पत्तौ संयोगिनोर्निबिडत्व-शिथिलत्वाभ्यां संयोगे तथा प्रत्ययोत्पत्तिः स्यात् न पुनः संयोगस्य निबिडत्वादिस्वभावसंभवात्, इति एकं सन्धित्सोः अन्यत् प्रच्यवते।

तथा 'नाना समवायः अयुतसिद्ध-अवयव-अवयव्याद्याश्रितत्वात् संख्यावत्' इत्यतोऽपि अस्य अनेकत्वसिद्धिः। न चेदमसिद्धम्; तदनाश्रितत्वे हि समवायस्य *"षण्णामाश्रितत्वमन्यत्र नित्यद्रव्येभ्यः।"* [प्रश० भा० पृ० १६] इत्यस्य विरोधः। अथ न परमार्थतः समवायस्य आश्रितत्वं किन्तु उपचारात्, निमित्तं तु उपचारस्य समवार्यिषु[7] सत्सु समवायज्ञानम्, तत्त्वतो हि आश्रितत्वे अस्य आश्रयविनाशे विनाशप्रसङ्गो गुणादिवत्; इत्यप्यसुन्दरम्; आश्रितत्वसामान्यस्य हेतुत्वात्। दिगादीनामप्येवम् आश्रितत्वापत्तेश्च; मूर्त्तद्रव्येषु उपलब्धिलक्षणप्राप्तेषु दिग्लिङ्गस्य 'इदमतः पूर्वेण' इत्यादिप्रत्ययस्य काललिङ्गस्य च परत्वाऽपरत्वादिप्रत्ययस्य सद्भावात्। तथा च *'अन्यत्र नित्यद्रव्येभ्यः'* इत्यस्य विरोधः। सामान्यस्य अनाश्रितत्वप्रसङ्गश्च; आश्रयविनाशेऽपि अविनाशात् समवायवत्। अनुमानविरुद्धश्च परमार्थतोऽस्य अनाश्रितत्वम्; तथाहि–आश्रितः परमार्थतः समवायः सम्बन्धत्वात् संयोगादिवदिति।

तथा च 'इहेतिप्रत्ययाऽविशेषाद् विशेषलिङ्गाऽभावाच्च एकः समवायः' इत्ययुक्तम्; विशेषलिङ्गाऽभावस्य अनन्तरप्रतिपादितलिङ्गसद्भावतः असिद्धत्वात्। इहेति प्रत्ययाऽविशेषोऽपि अ-

---

१ पृ० २९६ पं० १६। २ विभिन्न–भां०, श्र०। ३–कालार्थेषु ब०, ज०। ४ "नहि संयोगः प्रतिविशेष्यं विशिष्टो नाना न भवति दण्डपुरुषसंयोगात् पटधूपसंयोगस्य अभेदाऽप्रतीतेः···तद्वत् समवायोऽनेकः प्रतिपद्यताम्···शिथिलः संयोगो निबिडः संयोगः इति प्रत्ययो यथा संयोगे तथा नित्यं समवायः कदाचित् समवाय इति समवायेऽपि···।" तत्त्वार्थश्लो० पृ० १९-२०। प्रमेयक० पृ० १८६ उ०। सन्मति० टी० पृ० ७०२। ५–कादाचित्काभ्याम् आ०, ब०, ज०, भां०। ६ "समवायिषु सत्स्वेव समवायस्य वेदनात्। आश्रितत्वे दिगादीनां मूर्त्तद्रव्याश्रितिर्न किम् ॥ ६० ॥" आप्तपरी०। प्रमेयक० पृ० १८६ उ०। ७ तथेहेति आ०। ८ पृ० २९६ पं० १६। ९–न्तरंप्र–भां०।

सिद्धः; 'इह आत्मनि ज्ञानम्, इह पटे रूपादिकम्' इति इहेति प्रत्ययस्य विशेषात्, विशेषणाऽनुरागो हि प्रत्ययस्य विशिष्टत्वम्। न च अनुगतप्रत्ययात् समवायस्य एकत्वं सिद्ध्यति; गोत्वादिसामान्येषु षट्पदार्थेषु च अनुगतस्यैकत्वस्याऽभावेऽपि 'सामान्यं सामान्यम्' 'पदार्थः पदार्थः' इति अनुगतप्रत्ययप्रतीतेः। 'सत्तावद्' इति दृष्टान्तोऽपि साध्यसाधनविकलः; सर्वथैकत्वस्य[1] सत्प्रत्ययाऽविशेषस्य च असिद्धत्वात्, तदसिद्धत्वञ्च अग्रे कथञ्चित्[2] तदनेकत्वस्य तद्विशेषस्य च प्रतिपादयिष्यमाणत्वात् सिद्धम्।

यदप्युक्तम्[3]–'स्वकारणसत्तासम्बन्धस्यैव निष्पत्तित्वात्' इत्यादि; तदप्यचर्चिताऽभिधानम्; आत्मलाभस्य स्वकारणसत्तासमवायपर्यायतायां नित्यत्वप्रसङ्गात्। निरस्तञ्च स्वकारणसत्तासमवायलक्षणं कार्यत्वं प्राक्[4] इत्यलं पुनः प्रसङ्गेन।

यच्चोक्तम्[5]–'अग्नेरुष्णतादिवत्' इत्यादि; तदप्युक्तिमात्रम्; यतः प्रत्यक्षसिद्धे[6] वस्तुस्वभावे स्वभावैरुत्तरं वक्तुमुचितम् जलाऽनलवत्। न च 'समवायस्य स्वतः सम्बन्धत्वम्, संयोगादीनां तु परतः' इति प्रत्यक्षसिद्धम्; तत्स्वरूपस्य अध्यक्षाऽगोचरत्वप्रतिपादनात्। 'समवायोऽन्येन सम्बन्ध्यमानो न स्वतः सम्बद्ध्यते सम्बद्ध्यमानत्वात् रूपादिवत्' इत्यनुमानविरोधाच्च।

यदप्यभिहितम्[7]–'समवायः सम्बन्धान्तरं नापेक्षते स्वतः सम्बन्धत्वात्' इत्यादि; तदप्यभिधानमात्रम्[8]; हेतोरसिद्धेः, नहि समवायस्य स्वरूपाऽसिद्धौ स्वतः सम्बन्धत्वं तत्र सिद्ध्यति। संयोगेन अनेकान्ताच्च; स हि स्वतः सम्बन्धः सम्बन्धान्तरञ्च अपेक्षते। न खलु स्वतोऽसम्बन्धस्वभावत्वे संयोगादेः परतः तद् युक्तम्; अतिप्रसङ्गात्। घटादीनाञ्च सम्बन्धित्वात् न परतोऽपि सम्बन्धत्वम्, इत्ययुक्तमुक्तम्[9]–'न ते स्वतः सम्बन्धाः' इति। तन्न अस्य स्वतः सम्बन्धो युक्तः। नापि परतः; यतः परतः किं [10]संयोगात्, समवायान्तरात्, विशेषणभावात्, अदृष्टाद्वा स स्यात्? न तावत् संयोगात्; तस्य गुणत्वेन अद्रव्यस्वभावे समवाये संभवाऽभावात्। नापि समवायान्तरात्; तस्य एकरूपतया अभ्युपगमात्, अन्यथा "*तत्त्वं भावेन*" [वै० सू० ७।२।२८] व्याख्यातम्"[11], इति इदं विरुद्ध्येत।

नापि विशेषणभावात्; सम्बन्धान्तरेण सम्बद्धार्थेष्वेव अस्य[12] प्रवृत्तिप्रतीतेः दण्डविशिष्टः पुरुषः इत्यादिवत्, अन्यथा सर्वं सर्वस्य विशेषणं विशेष्यञ्च स्यात्। न च समवाय-

---

१–कस्य ब०, ज०। "सत्तावदिति दृष्टान्तोऽपि साध्यसाधनविकलः सर्वथैकत्वस्य।..." प्रमेयक० पृ० १८६ उ०। २–च्चिदनेक–भां०। –च्चित्तदनेकस्य ब०, ज०। ३ पृ० २९७ पं० ४। ४ पृ० २९७ पं० ६। ५–क्षप्रसिद्धे श्र०। ६ पृ० २९७ पं० ९। ७ "प्राप्तित्वात् प्राप्त्यन्तराभाव इति चेन्न व्यभिचारात्।" तत्त्वार्थराज० पृ० ५। ८ पृ० २९७ पं० १०। ९ सम्बद्धाः आ०। १० "किं विशेषणविशेष्यभावेन, संयोगेन, समवायेन वा?" अष्टसह० पृ० २१५। तत्त्वार्थश्लो० पृ० २०। प्रमेयक० पृ० १८८ पू०। स्या० रत्ना० पृ० ९६९। ११ "व्याख्यातमितिशेषः।..." वै० सू०, उपस्का० ७।२।२८। १२ –स्य प्रतीतेः ब०, ज०। † पृ० १०१।

समवायिनां सम्बन्धान्तरेसम्बद्धत्वं संभवति अनभ्युपगमात्। किञ्च, विशेषणभावोऽपि एतेभ्यः अत्यन्तं भिन्नः कुतस्तत्रैव नियम्येत ? समवायाच्चेत्; इतरेतराश्रयः–सिद्धे हि समवायनियमे ततो विशेषणभावनियमसिद्धिः, तत्सिद्धौ च समवायनियमसिद्धिरिति। किञ्च, अयं विशेषणभावः षड्पदार्थेभ्यो भिन्नः, अभिन्नो वा ? भिन्नश्चेत्; किं भावरूपः, अभावरूपो वा ? न तावद् भावरूपः; 'षडेव पदार्थाः' इति नियमविघातप्रसक्तेः। नाप्यभावरूपः; अनभ्युपगमात्। अथ अभिन्नः; किं द्रव्यस्वरूपः, गुणादिस्वभावो वा भवेत् ? न तावत् द्रव्यस्वरूपः; गुणाद्याश्रितत्वाऽभावप्रसङ्गात्। अत एव न गुणोऽपि। नापि कर्म; कर्माश्रितत्वाऽभावानुषङ्गात्। "*अकर्म कर्म*" [ ] इत्यभिधानात्। नापि सामान्यम्; सामान्यादौ तदभावप्रसङ्गात् पदार्थत्रयवृत्तित्वात्तस्य। नापि विशेषः; नित्यद्रव्येभ्योऽन्यत्र विशेषणभावस्य अभावप्रसङ्गात्। युगपदनेकसमवायिविशेषणत्वे च अस्यानेकत्वप्राप्तिः, यद् युगपदनेकार्थविशेषणं तदनेकम् यथा दण्डकुण्डलादि, तथा च समवायः, तस्मादनेक इति। न च सत्तादिना अनेकान्तः; तस्यापि अनेकस्वभावत्वप्रसाधनात्। तन्न विशेषणभावेनाप्यसौ सम्बद्धः।

नाप्यदृष्टेन; अस्य सम्बन्धरूपत्वस्यैव असंभवात्। सम्बन्धो हि द्विष्ठो भवताऽभ्युपगतः, अदृष्टश्च आत्मवृत्तितया समवाय-समवायिनोरतिष्ठन् कथं द्विष्ठो भवेत् ? षोढासम्बन्धवादित्वव्याघातश्च। यदि च अदृष्टेन समवायः सम्बद्ध्यते तर्हि गुण-गुण्यादयोऽपि अत एव सम्बद्धा भविष्यन्ति इति अलं तत्रापि समवायादिसम्बन्धकल्पनया। न च अदृष्टोऽप्यसम्बद्धः समवायसम्बन्धहेतुः; अतिप्रसङ्गात्। अथ सम्बद्धः; 'कुतः' इति वक्तव्यम् ? समवायाच्चेत्; अन्योन्याश्रयः। अन्यतश्चेत्; अपसिद्धान्तप्रसङ्गः। तन्न सम्बद्धः समवायः।

नाप्यसम्बद्धः; *'षण्णामाश्रितत्वम्'* इत्यस्य विरोधप्रसङ्गात्। 'इह आत्मनि ज्ञानम्; इत्यादि सम्बन्धबुद्धिः न सम्बन्ध्यसम्बद्धसम्बन्धपूर्विका सम्बन्धबुद्धित्वात् दण्डपुरुषसम्बन्धबुद्धिवत्' इत्यनुमानविरोधानुषङ्गाच्च। किञ्च, अयं समवायः समवायिनोः परिकल्प्येत, असमवायिनोर्वा ? यद्यसमवायिनोः; तर्हि घटपटयोरपि तत्प्रसक्तिः। अथ समवायिनोः; कुतस्तयोः समवायित्वम्–समवायात्, स्वतो वा ? समवायाच्चेत्; अन्योन्याश्रयः–सिद्धे हि समवायित्वे तयोः समवायसिद्धिः, तस्याश्च तत्त्वसिद्धिरिति। स्वत एव तु समवायिनोः किं समवायेन ? न च संयोगेऽप्येतत् सर्वं समानम् इत्यभिधातव्यम्; संश्लिष्टतयोत्पन्नवस्तुव्यतिरिक्तस्य अस्याप्यसंभवात्, भिन्नसंयोगिनोस्तन्नियमे तु समानमेवैतत्।

१–राभिसम्बद्ध–श्र०। २ "कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः।" वै०सू० ७।१।१५। "कर्मभिः कर्माणि न तद्वन्ति गुणैश्च गुणाः न तद्वन्तः।..." उपस्का०। ३ विशेषभाव–आ०। ४–कुण्डलत्वादि ज०। ५–वायादिकल्प–आ०, ब०, ज०, भां०। ६ "अयं समवायः समवायिनोरसमवायिनोर्वा ?"...प्रमेयक० पृ० १८८ उ०।

यच्चान्यदुक्तम्[1]–'संयोगिद्रव्यविलक्षणत्वाद् गुणादीनाम्' इत्यादि ; तदप्यपेशलम् ; यतो निष्क्रियत्वेऽप्येषाम् आधेयत्वम् अल्पपरिमाणत्वात् , तत्कार्यत्वात् , तथाप्रतिभासाद्वा ? तत्र आद्यः पक्षोऽसङ्गतः ; सामान्यस्य महापरिमाणगुणस्य न्न अनाधेयत्वप्रसङ्गात्। द्वितीयपक्षोऽप्यत एव अयुक्तः। तृतीयपक्षोऽप्यनुपपन्नः; तेषामाधेयतया प्रतिभासाभावात्। तदभावश्च रूपादीनां स्वाधारेषु अन्तर्बहिश्च सत्त्वात्। नहि अन्यत्र कुण्डादावधिकरणे बदरादीनामाधेयानां तथा सत्त्वमस्ति । अथ रूपादीनामाधेयत्वे सत्यपि युतसिद्धेरभावात् उपरितनतया प्रतिभासाऽभावः; न; युतसिद्धत्व-अयुतसिद्धत्वयोः उक्तप्रकारेणाऽव्यवस्थितयोः तथाप्रतिभासाऽनिबन्धनत्वात्। न च युतसिद्धत्वस्य उपरितनत्वप्रतीतिहेतुत्वम् ; ऊर्ध्वाधःस्थितवंशादेः क्षीरनीरयोश्च तदभावात्। तस्मान्न सम्बन्धिभ्यः[2] सम्बन्धः सर्वथार्थान्तरभूतो विचार्यमाणो घटते ।

ननु सिद्धे सम्बन्धे तस्य सम्बन्धिभ्योऽर्थान्तरत्वम् अनर्थान्तरत्वं वा कल्पयितुं युक्तम् , न चासौ सिद्धः तत्स्वरूपाऽनवधारणात्; तथाहि–सम्बन्धोऽर्थानां पारतन्त्र्यलक्षणः, रूपसंश्लेषस्वभावः, परापेक्षास्वरूपो वा स्यात् ? प्रथमपक्षे किमसौ सम्बन्धिनोर्निष्पन्नयोः, अनिष्पन्नयोर्वा स्यात् ? न तावदनिष्पन्नयोः स्वरूपस्यैवाऽसत्त्वात् शशविषाणबन्ध्यास्तनन्धयवत्। नापि निष्पन्नयोः तथाविधयोस्तयोः सह्य-विन्ध्यवत् पारतन्त्र्याऽभावतः सम्बन्धानुपपत्तेः । तदुक्तम्—

'न सम्बन्धबुद्धिर्वास्तवी तद्व्यतिरिक्तस्य सम्बन्धस्य असत्त्वात्' इत्यादिना सम्बन्धमात्रं निराकुर्वतो बौद्धस्य पूर्वपक्षः—

"पारतन्त्र्यं[3] हि सम्बन्धः सिद्धे का परतन्त्रता ।
तस्मात् सर्वस्य भावस्य सम्बन्धो नास्ति तत्त्वतः ॥" [ ]

नापि रूपसंश्लेषस्वभावोऽसौ घटते; सम्बन्धिनोर्द्वित्वे तत्संश्लेषविरोधात्। तयोरैक्ये वा सुतरां सम्बन्धाऽभावः , सम्बन्धिनोरभावे सम्बन्धाऽयोगात् द्विष्ठत्वात्तस्य । अथ नैरन्तर्यं तयोः सम्बन्धः; न; अस्य अन्तरालाऽभावत्वेन अतात्त्विकत्वतः सम्बन्धत्वाऽनुपपत्तेः, निरन्तरतायाश्च सम्बन्धत्वे सान्तरताऽपि सम्बन्धः स्यादविशेषात्।

किञ्च, अनयोः रूँपश्लेषः सर्वात्मना, एकदेशेन वा ? सर्वात्मना तत्संश्लेषे पिण्डोऽणुमात्रः स्यात्। एकदेशेन तत्संश्लेषे अणूनां षडंशतापत्तिः। तद्देशाश्च तेभ्योऽभिन्नाः, भिन्ना वा ? यद्यभिन्नाः; तदा तेषामभावात् कथमेकदेशेन तत्संश्लेषः स्यात्। अथ भिन्नाः तदा तैरपि अणूनां सर्वात्मना एकदेशेन वा संश्लेषे स एव पर्यनुयोगोऽनवस्था च स्यात्। उक्तञ्च—

---

१ पृ० २९७ पं० ११ । २ "आश्रयाश्रयिभावान्न स्वातन्त्र्यं समवायिनाम् । इत्ययुक्तः स सम्बन्धो न युक्तः समवायिभिः ॥६४॥" आप्तमी०। "नापि संयोगस्य समवायस्य वा सम्बन्धिव्यतिरेकेण अस्तित्वे किञ्चित् प्रमाणमस्ति ।...."ब्रह्मसू० शां० भा० २।२।१७ । ३ उद्धृतञ्चैतत्–तत्त्वार्थश्लो० पृ० १४६ । अष्टसह० पृ० १११ । प्रमेयक० १४९ पू० । स्या० रत्ना० पृ० ८१२ । ४ रूपसंश्ले–अ० ।

"रूपश्लेषो हि सम्बन्धः द्वित्वे स च कथं भवेत् ।
तस्मात् प्रकृतिभिन्नानां सम्बन्धो नास्ति तत्त्वतः ॥" [ ]

अथ परापेक्षास्वरूपोऽसौ सम्बन्धः; अस्त्वेतत्; तथापि भावः स्वयं सन्, असन् वा परमपेक्षेत ? न तावदसन्; तथाभूतस्य अस्य अश्वविषाणवत् अपेक्षाधर्माश्रयत्वविरोधात्। नापि सन्; सर्वनिराशंसत्वात्, अन्यथा सत्त्वविरोधात्। तथा चोक्तम्—

"परापेक्षा हि सम्बन्धः सोऽसन् कथमपेक्षते ।
संश्च सर्वनिराशंसो भावः कथमपेक्षते ॥" [ ]

किञ्च, सम्बन्धः सम्बन्धिभ्यो भिन्नः; अभिन्नो वा स्यात् ? यद्यभिन्नः; तदा सम्बन्धिनावेव सम्बन्ध एव वा स्यात्। अथ भिन्नः; तदा सम्बन्धिनौ केवलौ कथं सम्बद्धौ स्याताम् ? अस्तु वा ताभ्यामर्थान्तरमसौ; तथापि तेनैकेन सम्बन्धेन सह द्वयोः सम्बन्धिनोः कः सम्बन्धः ? यथा सम्बन्धिनोर्यथोक्तदोषान्न कश्चित् सम्बन्धः तथा अत्रापि, तेन सह अनयोः सम्बन्धान्तराभ्युपगमे च अनवस्था स्यात् तत्रापि सम्बन्धान्तराऽनुषङ्गात्। तन्न सम्बन्धबुद्धिर्वास्तवी तद्व्यतिरिक्तस्य सम्बन्धस्याऽसत्त्वात्। सत्त्वे वा 'द्वौ सम्बन्धिनौ सम्बन्धश्च' इत्यन्योन्यमिश्राः सर्वे भावाः स्वस्वरूपव्यवस्थिताः परमार्थतः स्थिताः, तान् इत्थम्भूतानपि भावान् कल्पना अन्योन्यं मिश्रानिवादर्शयतीति। उक्तञ्च—

"द्वयोरेकाभिसम्बन्धात् सम्बन्धो यदि तद्द्वयोः ।
कः सम्बन्धोऽनवस्था च न सम्बन्धमतिस्तथा ॥
ततः— तौ च भावौ तदन्यश्च सर्वे ते स्वात्मनि स्थिताः ।
इत्यमिश्राः स्वयं भावाः तान् मिश्रयति कल्पना ॥" [ ] इत्यादि ।

अत्र प्रतिविधीयते। यत्तावदुक्तम्—'पारतन्त्र्य' इत्यादि; तदसमीचीनम्; एकत्वपरिणतिलक्षणपारतन्त्र्यस्य अर्थानां प्रत्यक्षादिप्रमाणप्रसिद्धत्वेन निह्नोतुमशक्यत्वात्। यत् प्रत्यक्षादिप्रमाणप्रसिद्धं न तन्निह्नोतुं शक्यम् यथा नीलादि, तत्प्रमाणप्रसिद्धश्च एकत्वपरिणतिलक्षणं पारतन्त्र्यं बाह्याध्यात्मिकार्थानामिति। द्रव्य-क्षेत्र-काल-भावकृता हि प्रत्या-

तत्प्रतिविधानपुरस्सरं सम्बन्धस्य कथञ्चिदेकत्वपरिणतिलक्षणत्व-व्यवस्थापनम्—

---

१ उद्धृतञ्चैतत्–तत्त्वार्थश्लो० पृ० १४८, प्रमेयक० पृ० १४९ पू०। २ अथापरा–श्र०। ३ उद्धृतञ्चैतत्–तत्त्वार्थश्लो० पृ० १४८, प्रमेयक० पृ० १४९ पू०, स्या० रत्ना० पृ० ८१३। ४ सम्बन्धिनो बु–श्र०। ५ उद्धृतञ्चैतत्–तत्त्वार्थश्लो० पृ० १४७, प्रमेयक० पृ० १४९ पू०। स्या० रत्ना० पृ० ८१३। ६ अनयैव प्रक्रियया पूर्वपक्षः (प्रमेयक० पृ० १४९ पू०, स्या० रत्ना० पृ० ८१२) द्रष्टव्यः। ७ पृ० ३०५ पं० १२। ८–तन्त्र्यादि श्र०। ९ "द्रव्यतः क्षेत्रतः कालभावाभ्यां कस्यचित् स्वतः। प्रत्यासन्नकृतः सिद्धःसम्बन्धः केनचित् स्फुटः ॥१२॥" तत्त्वार्थश्लो० पृ० १४६। स्या० रत्ना० पृ० ८२१।

सत्तिः एकत्वपरिणतिस्वभावा पारतन्त्र्य-अपरनामा सम्बन्धोऽर्थानामभिप्रेतो जैनैः, स च आबालं प्रत्यक्षादिप्रमाणे प्रतिभासते, बहिरेकावयविद्रव्यगतानां रूपादीनाम् अन्तश्च एकात्मद्रव्यगतानां ज्ञान-सुखादीनां लोलीभूतानामध्यक्षत एव अवभासनात्। प्रसाधितश्च †अवयविद्रव्यम् आत्मद्रव्यञ्च प्राक् इत्यलमतिप्रसङ्गेन। तथा एकक्षेत्रवर्त्तिनां क्षीर-नीरादीनामेकलोलीभावेन एकत्वपरिणतिलक्षणं क्षेत्रनिबन्धनं पारतन्त्र्यं प्रत्यक्षत एव प्रतीयते। कालनिबन्धनमपि तत् तथाविधम् आम्ररसादीनां बालाद्यवस्थशरीरावयवोपचयादीनां वा प्रत्यक्षत एव प्रतीयते। भावनिबन्धनमपि तत् संयोगिनां द्रव्य-पर्यायादीनाञ्च प्रतीयत एव, घटपटादीनां संयोगात्मना परिणतेः आत्मसुखादीनाञ्च चैतन्यादिस्वभावतया इति। एकैकप्रधानतया च एवंविधा प्रत्यासत्तिः प्रदर्शिता न पुनरन्यव्यवच्छेदेन; द्रव्यादिप्रत्यासत्तौ क्षेत्रादिप्रत्यासत्तेरप्यनिवारणात्।

यदप्युक्तम्[3]–'निष्पन्नयोरनिष्पन्नयोर्वा' इत्यादि; तदसमीक्षिताभिधानम्; कथञ्चिन्निष्पन्नयोः सम्बन्धिनोः पारतन्त्र्याभ्युपगमात्। द्रव्य-पर्यायात्मकत्वे हि वस्तुनो द्रव्यरूपतया निष्पन्नस्य अनिष्पन्नपर्यायपारतन्त्र्यमुपपद्यते तद्रूपतया तस्य परिणमनात्। पटो हि तन्तुद्रव्यरूपतया निष्पन्न एव, अन्वयिनो द्रव्यस्य पटपरिणामोत्पत्तेः प्रागपि सत्त्वात्, स्वरूपेण तु अनिष्पन्नः। तन्तुद्रव्यमपि स्वरूपेण निष्पन्नम् पटपरिणामरूपतया तु अनिष्पन्नम्। तथा अङ्गुल्यादिद्रव्यं स्वरूपेण निष्पन्नम् संयोगपरिणामात्मना त्वनिष्पन्नम्, इति सर्वं वस्तु स्यान्निष्पन्नं स्यादनिष्पन्नं पारतन्त्र्यभाक् भवतीति प्रतिपत्तव्यम्। किञ्च, पारतन्त्र्यस्याभावाद् भावानां सम्बन्धाभावे तेन व्याप्तः क्वचित् सम्बन्धः प्रसिद्धः, न वा? प्रसिद्धश्चेत् कथं सर्वत्र सर्वदा सम्बन्धाभावः विरोधात्? अथ न प्रसिद्धः; कथमव्यापकाऽभावाद् अव्याप्यस्याभावसिद्धिः अतिप्रसङ्गात्?

यच्चान्यदुक्तम्[6]–'*रूपश्लेषो हि*' इत्यादि; तदपि एकान्तवादिनामेव दूषणं नास्माकम्, कथञ्चित् सम्बन्धिनोरेकत्वापत्तिस्वभावस्य रूपश्लेषलक्षणसम्बन्धस्याभ्युपगमात्। अशक्यविवेचनत्वं हि सम्बन्धिनो रूपश्लेषः, असाधारणरूपता च तदश्लेषः, स च अनयोर्न द्वित्वं विरुणद्धि तथाप्रतीतेः चित्राकारैकसंवेदनवत्।

यदप्यभिहितम्[10]–'सर्वात्मना एकदेशेन वा' इत्यादि; तदप्यभिधानमात्रम्; प्रकारान्तरेणैव

---

†पृ० २३२। पृ० २६१। १ "द्रव्यक्षेत्रकालभावप्रत्यासत्तिलक्षणस्य सम्बन्धस्य निराकर्तुमशक्तेः। न हि कस्यचित् केनचित् साक्षात् परम्परया वा सम्बन्धो नास्तीति निरुपाख्यत्वप्रसङ्गात्।..." अष्टस० पृ० १११। तत्र आ०। "क्षेत्रप्रत्यासतिर्यथा...।" तत्त्वार्थश्लो० पृ० १४७। २ आत्मस्थसु–आ०। ३ पृ० ३०५ पं० १३। ४–पर्ययाय–आ०। ५ "पारतन्त्र्यस्याभावाद् भावानां सम्बन्धाभावमभिदधानाः तेन सम्बन्धं व्याप्तं क्वचित् प्रतिपद्यन्ते न वा।..." तत्त्वार्थश्लो० पृ० १४६। प्रमेयक० पृ० १५२ उ०। स्या० रत्ना० पृ० ८२१। ६ पृ० ३०६ पं० १। ७ "ते हि कथञ्चिदेकत्वापत्तिं सम्बन्धिनो रूपश्लेषं सम्बन्धमाचक्षते।..." तत्त्वार्थश्लो० पृ० १४८। प्रमेयक० पृ० १५२ उ०। स्या० रत्ना० पृ० ८२४। ८–स्य स्वरूपश्ले–श्र०। ९–रूपत्वाच्च आ०। १० पृ० ३०५ पं० २३।

अस्याभ्युपगमात्, कात्स्न्यैंकदेशाभ्यां हि तस्यासम्भवात् अपरप्रकारस्य च संभवात्। सम्बन्धबुद्ध्यन्यथाऽनुपपत्तेश्च प्रकारान्तरेणैव असौ स्निग्धरूक्षतानिबन्धनोऽभ्युपगन्तव्यः। यन्मते हि विभिन्नौ सम्बन्धिनौ अप्रच्युताऽनुत्पन्नपूर्वाऽपरस्वरूपौ अन्योन्यं सम्बद्ध्येते तन्मते अयमनन्तरोदितो दोषो भवत्येव, अस्मन्मते तु विश्लिष्टरूपतापरित्यागेन संश्लिष्टरूपतया एकलोलीभावलक्षणया परिणतिः सक्तुतोयादीनां सम्बन्धोऽभिप्रेतः, तत्कथमुक्तदोषाणां लेशतोऽप्यवकाशः स्यात्? तथाविधसम्बन्धाऽनभ्युपगमे च कथं चित्रसंवेदनसिद्धिः स्यात्? नहि चित्रसंविदः तथाभूतपरिणतिव्यतिरेकेण अन्यो नीलाद्यनेकाकारैः सम्बन्धः संभवति, सर्वात्मना एकदेशेन वा तस्यास्तैः सम्बन्धे प्रोक्ताऽशेषदोषाऽनुषङ्गात्। स च एवंविधः सम्बन्धोऽर्थानां क्वचिन्निखिलप्रदेशानामन्योन्यप्रदेशानुप्रवेशतो भवति यथा सक्तुतोयादीनाम्, क्वचित्तु प्रदेशसंश्लिष्टतामात्रेण यथा अङ्गुल्यादीनाम्। न च अन्तर्बहिर्वा सांशवस्तुवादिनः सांशत्वाऽनुषङ्गो दोषाय इष्टत्वात्। न चैवमनवस्था; तद्वतः तत्प्रदेशानामत्यन्तभेदाऽभावात्, तद्भेदे हि तेषामपि तद्वतां प्रदेशान्तरैः सम्बन्धः इत्यनवस्था स्यान्नान्यथा। अनेकान्तात्मवस्तुनो अत्यन्तभेदाऽभेदाभ्यां जात्यन्तरत्वात् चित्रसंवेदनवत्।

नन्वेवं परमाणूनामपि सांशत्वप्रसङ्गः; इत्यप्यचोद्यम्; यतोऽत्र अंशशब्दः स्वभावार्थः, अवयवार्थो वाऽभिप्रेतः? यदि स्वभावार्थः; न कश्चिद् दोषः, तेषां विभिन्नदिग्भागव्यवस्थिताऽनेकाणुभिः सम्बन्धाऽन्यथाऽनुपपत्त्या तावद्धा स्वभावभेदोपपत्तेः। अवयवार्थस्तु तत्रासौ नोपपद्यते; अणूनामभेद्यत्वेन अवयवाऽसंभवात्। ननु स्वभावभेदसंभवेऽणूनां कथमविभागित्वप्रतिज्ञा न विरुद्ध्येत? इत्यप्यनुपपन्नम्; यतोऽविभागित्वं तेषां भेदयितुमशक्यत्वमुच्यते न पुनः निःस्वभावत्वम्।

यत्पुनरुक्तम्–*'परापेक्षा हि'* इत्यादि; तदनभ्युपगमादेव परिहृतम्, नहि जिनपतिमताऽनुसारिभिः परापेक्षालक्षणः सम्बन्धोऽभ्युपगम्यते कथञ्चिदेकत्वपरिणतेः तत्त्वाऽभ्युपगमात्। परापेक्षत्वात् सम्बन्धस्वभावो मिथ्या अर्थानाम्, असम्बन्धस्वभावार्थापेक्षो हि सम्बन्धस्वभावोऽर्थानाम्; इत्यप्यनल्पतमोविलसितम्; यतः क्व तस्य परापेक्षत्वम्–आत्मलाभे, सम्बन्धव्यवहारे वा? न तावद् आत्मलाभे; परानपेक्षात् स्वकारणकलापादेव एकत्वपरिणतिलक्षणसम्बन्धस्य आत्मलाभप्रतीतेः। तद्व्यवहारे परापेक्षत्वं तु न तस्य मिथ्यात्वं प्रसाधयति; परमार्थसत्त्वाऽप्रतिद्वन्दित्वात्, न खलु 'यत्र परापेक्षो व्यवहारः तत्र अपरमार्थसत्त्वम्' इति

१–स्य वा सं–ब०, ज०। २ विशिष्ट–आ०। ३ "अंशशब्दः स्वभावार्थः अवयवार्थो वा?" प्रमेयक० पृ० १५२ उ०। स्या० रत्ना० ८२४। ४–रुद्ध्यते आ०, ब०, ज०, भां०। ५ पृ० ३०६ पं० ६। ६ "न चापेक्षत्वात् सम्बन्धस्वभावस्य मिथ्याप्रतिभासः…।" तत्त्वार्थश्लो० पृ० १४८ प्रमेयक० पृ० १५२ उ०। स्या० रत्ना० पृ० ८२५। ७–पेक्षा आ०।

व्याप्तिरस्ति, इतरथा इतरज्ञानापेक्षया सुगतज्ञाने विशदतरादिव्यवहारतः तस्य अपरमार्थसत्त्वप्रसङ्गतो लाभमिच्छतो मूलोच्छेदः स्यात्। कथञ्चैवंवादिनो असम्बन्धस्वभावोऽप्यर्थानां वास्तवः सिद्ध्येत्, तस्याप्यापेक्षिकत्वाऽविशेषात्? प्रत्यक्षबुद्धौ प्रतिभासमानः सोऽनापेक्षिक एव, तत्पृष्ठभाविना तु विकल्पेन अध्यवसीयमानो यथा आपेक्षिकः तथाऽवास्तवोऽपि; इत्यन्यत्रापि समानम्, न खलु सम्बन्धोऽध्यक्षे न प्रतिभासते यतोऽनापेक्षिकोऽसौ न स्यात्, अन्त- ५
[1]र्बहिश्च एकत्वपरिणतिरहितस्य अर्थस्य स्वप्नेऽप्य[2]प्रतिभासनात्।

यच्चोक्तम्[3]–'*द्वयोरेकाभिसम्बन्धात्*' इत्यादि; तदप्येकान्तवादिनामेव दूषणम्, तैरेव सम्बन्धसम्बन्धिनामेकान्ततो भेदाऽभ्युपगमात् नाऽस्माकम्, एकलोलीभावादन्यस्य सम्बन्ध-सम्बन्धिभावस्यैवानभ्युपगमात्, तथाभूतश्च तद्भावः प्रत्यक्षगोचरचारितया प्ररूपितः। इत्ययुक्तमुक्तम्–'*इत्यमिश्राः स्वयं भावाः तान् मिश्रयति कल्पना*' इति। ततोऽवयवाऽवयव्यादौ उक्तप्र- १०
कारस्यैव सम्बन्धस्य प्रसिद्धेर्न परपरिकल्पितः [4]समवायपदार्थोऽपि घटते। तदेवं वैशेषिकमते कणादप्रणीतषट्पदार्थानां विचार्यमाणानामव्यवस्थितेः न तल्लक्षणे भेदैकान्ते अर्थस्य सिद्धिर्घटते।

माभूत् तत्र तत्सिद्धिः; अक्षपादप्रणीते तु षोडशपदार्थलक्षणे तस्मिन् सा भविष्यति,

नैयायिकाभिमतप्रमाणप्रमेयादिषोडशपदार्थानां विशदरूपेण विवेचनम्—

विभिन्नलक्षणलक्षितत्वेन एषामत्यन्तभेदभिन्नानां प्रमाणत उपपद्यमानत्वात्। तत्र सामान्येन उद्दिष्टानामेषां विशेषलक्षणानि विधा- १५
तुं पार्यन्ते इति उद्देशतः षोडशपदार्थान् सूत्रे निर्दिशति–
"*प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगतिः।*"
[न्यायसू० १।१।१] इति। तत्र अर्थपरिच्छित्तिसाधनं प्रमाणम्। तच्चतुर्विधम्[6]–"*प्रत्यक्षाऽनुमानोपमानशब्दाः प्रमाणानि।*" [न्याय० सू० १।१।३] इत्यभिधानात्। २०

तत्परिच्छेद्यम् आत्मादिद्वादशविधं प्रमेयम्। तथा च सूत्रम्–"*आत्म-शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम्।*" [न्यायसू० १।१।९] इति। तत्र आत्मा सर्वस्य सुख-दुःखसाधनस्य द्रष्टा, सर्वस्याश्च सुखादिसंवित्तेराश्रयत्वेन भोक्ता, तस्य भोगायतनं शरीरम्, भोगसाधनानि इन्द्रियाणि, भोक्तव्या इन्द्रियार्थाः, भोगो बुद्धिः। सर्वार्थो-

१–र्बहिर्वा ब०, ज०। २–प्यप्रत्यक्षबुद्धौ प्रति–श्र०। ३ पृ० ३०६ पं० १६। ४ समवायः पदार्थो घ–आ०। ५–पदान् आ०। ६ "एवं प्रमाणैश्चतुर्भिरुपदिष्टे (प्रत्यक्षानुमानयुक्तिशब्दाख्यैः) ..." चरकसं० सूत्रस्था० पृ० ६९। ७ "तत्र आत्मा सर्वस्य द्रष्टा, सर्वस्य भोक्ता, सर्वज्ञः, सर्वानुभवी। तस्य भोगायतनं शरीरम्, भोगायतनानि इन्द्रियाणि, भोक्तव्या इन्द्रियार्थाः, भोगो बुद्धिः, सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनः, शरीरेन्द्रियार्थबुद्धिसुखवेदनानां निर्वृतिकारणं प्रवृत्तिदोषाश्च।" न्यायभा० १।१।९।

पलब्धौ नेन्द्रियाणि प्रभवन्ति इति सर्वविषयं मनः । शरीर-इन्द्रिय-अर्थ-बुद्धि-सुख-दुःखसंवेदनानां [1]निर्वृतिकारणं प्रवृत्तिः पुण्य-पापरूपा[2]। दोषाः [3]राग-द्वेष-मोहाः। [4]उत्पन्नशरीरेन्द्रियबुद्धिवेदनाभिसम्बन्धस्य पुनः अन्यैः शरीरादिभिः आत्मनः सम्बन्धः प्रेत्यभावः । प्रवृत्तिदोषजनितः सुखदुःखोपभोगः फलं[6]म् । "*बाधनालक्षणं दुःखम् ।*" [न्यायसू० १।१।२१] तस्य च यत्नेन परिहार्यत्वात् फलात् पृथ[7]गुपादानम् । शरीरादिना एकविंशतिभेदभिन्नेन दुःखेन आत्यन्तिको वियोगः अपव[8]र्गः ।

नानार्थविमर्शः संशयः, "*समा[9]नाऽनेकधर्मोपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशयः ।*" [न्यायसू० १।१।२३] इति सूत्रकारवचनात्। स च वार्तिककारमते त्रेधा[11]; तथाहि–समानाऽनेकधर्मोपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो[12] विमर्शः संशयः । समानधर्मस्य स्थाणुपुरुषयोरूर्ध्वतालक्षणस्य उपपत्तेः उपलब्धेः । [13]स च समानो धर्मः उपलभ्यमानो न केवलः संशयहेतुः किन्तु उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षः, उपलब्ध्यनुपलब्ध्य-

---

१ निवृत्ति–आ० । २ "प्रवृत्तिः पुण्यपापात्मिका···।" न्यायमं० पृ० ४२८ । ३ "तत्त्वैराद्यं रागद्वेषमोहार्थान्तरभावात् ।" न्यायसू० ४।१।३ । ४ "पुनरुत्पत्तिः प्रेत्यभावः ।" "उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्त्वा या पुनरुत्पत्तिः स प्रेत्यभावः । उत्पन्नस्य सम्बद्धस्य, सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः । पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः ।" न्यायभा० १।१।१९ । "देहेन्द्रियादिसङ्घातस्य प्राक्तनस्य त्यागेन सङ्घातान्तरग्रहणं प्रेत्यभावः ।" न्यायकलिका पृ० ७ । ५–न्द्रियविषयबुद्धि–ब०, ज० । ६ "प्रवृत्तिदोषजनितोऽर्थः फलम् ।" "सुखदुःखसंवेदनं फलम्···।" न्यायभा० १।१।२० । "प्रवृत्तिदोषजनकं सुखदुःखात्मकं मुख्यं फलम्, तत्साधनं तु गौणम् ।" न्यायकलिका पृ० ७ । ७ "फलग्रहणाक्षिप्तमपि पीडनस्वभावं दुःखम् अदुःखसम्मतस्यापि दुःखत्वभावनार्थमुपदिश्यते । अत एव फलत्वेऽपि सुखमिह न निर्दिष्टम् ।" न्यायकलिका पृ० ७ । ८ "दुःखानि शरीरं षड् इन्द्रियाणि षड्विषयाः षड् बुद्धयः सुखं दुःखं च इत्येकविंशतिः ।" मुक्ता० दिन० पृ० ४२ । ९ "तदत्यन्तविमोक्षोऽपवर्गः ।" न्यायसू० १।१।२२। "आत्यन्तिको दुःखवियोगोऽपवर्गः, सर्वगुणवियुक्तस्यात्मनः स्वरूपावस्थानम् ।" न्यायकलिका पृ० ७। १० "संशयो नाम सन्देहलक्षणानुसन्दिग्धेष्वर्थेषु अनिश्चयः ।" चरकसं० पृ० २६४। "उभयहेतुदर्शनं संशयः ।" सुश्रुतसं० पृ० ७०९ । "समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ।" न्यायसू० १।१।२३ । "अत्र च विमर्शः संशयः इति संशयसामान्यलक्षणम् ।" ता० टी० २४७ । "विरुद्धार्थावमर्शो विमर्शः, स्थाणुर्वा पुरुषो वेतीयता च सजातीयसंशयपञ्चकानुगतं विजातीयेभ्यः प्रमाणादिभ्यो व्यवच्छिन्नं सामान्यलक्षणमुक्तं भवति ।" न्यायमं० पृ० ५५६ । "अन्ये तु (बौद्धाः) साधर्म्यदर्शनाद्विशेषोपलिप्सोर्विमर्शः संशयः ।" न्यायवा० पृ० १०० । ११ "तत्र समानधर्मोपपत्तेः अनेकधर्मोपपत्तेः विप्रतिपत्तेश्च त्रिविध एव संशयः ।" न्यायवा० १।१।२३ । पृ० ८७ । "तत्र उपलब्ध्यनुपलब्ध्योस्तावत् पृथक् संशयकारणत्वं न भवतीति···।" न्यायवा० पृ० ९६ । १२–पेक्षः संशयः आ०, ब०, ज०, भां० । १३ "सोऽयं साधारणो धर्म उपलभ्यमानः संशयहेतुः । किं केवल इति ? न केवलः । किं तर्हि ? उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च । यदि च उपलब्ध्यनुपलब्धी न व्यवस्थिते

व्यवस्थातो विशेषांशे [1]साधक-बाधकप्रमाणाऽभावात् विशेषापेक्षः 'स्थाणुर्वा पुरुषो वा' इति विमर्शः संशयः। तथा, [2]समानजातीयम् असमानजातीयञ्च अनेकम्, अनेकस्माद् व्यावृत्तो धर्मः अनेकधर्मः, तदुपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षः संशयः, यथा शब्दे विभागजत्वदर्शनात् किमयं गुणो द्रव्यं कर्म वा इति ? नहि विभागजत्वं सजातीये क्वचिद् गुणे विजातीये वा द्रव्ये कर्मणि च वर्त्तते, अतः संशयहेतुः—किंभूतस्य अस्य विभागजत्वमिति। तथा, [3]विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षः संशयः, यथा 'अस्ति आत्मा' इत्येके, 'नास्त्यात्मा' इत्यपरे, न च सद्भावाऽसद्भावौ सममेकत्र भवतः तस्मात्तत्त्वाऽनवधारणम् 'अस्ति आत्मा, नास्ति वा' इति संशयः।

भाष्यकारमते तु उपलब्ध्यनुपलब्धी पृथक् संशयकारणम् इति पञ्चधा संशयः; तथाहि—[4]उपलब्ध्युपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षः संशयः, यथा सद् उदकमुपलभ्यते, मरीचिकासु च असत्, इदानीं क्वचिद् उदकोपलब्धौ तत्त्वव्यवस्थापकप्रमाणस्यानुपलब्धेः 'सद्वा उदकम् असद्वा' इति संशयः। तथा, [5]अनुपलब्ध्युपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षः संशयः, यथा सन् मूलकीलकादि नोपलभ्यते, असच्च अनुत्पन्नं निरुद्धं वा, इदानीं 'पिशाचोऽपि सन् नोपलभ्यते असन् वा' इति संशयः। [6]समानोऽनेकश्च धर्मो ज्ञेयस्थः, विप्रतिपत्ति-उपलब्धि-अनुपलब्धयो ज्ञातृस्था इति भेदः।

भवत इति। किमेतावन्मात्रं साधनम् ? नेत्युच्यते। यदि विशेषाकाङ्क्षा भवति समानधर्ममुपलभते, उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इदन्तया वाऽनिदन्तया वा, विशेषाकाङ्क्षायां च सत्यामर्थसन्देहो भवतीति।" न्यायवा० पृ० ८९।

१ साधकप्रमा—श्र०। २ "अथ अनेकधर्मस्य कोऽर्थः ? असाधारणो धर्मः।...समानासमानजातीयविशेषकत्वात् समानजातीयमसमानजातीयञ्चानेकम्, तस्माद् विशेषो विशेषको धर्मः अनेकस्माद्विशेषोऽनेकधर्म इति।...एकोऽनेकप्रत्ययहेतुर्वा धर्मोऽनेकधर्मः...।" न्यायवा० पृ० ९१। ३ "विप्रतिपत्तेः संशय इति। व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थो व्याहतार्थप्रवादविषयत्वमुपलभमानस्य उपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवतीति।" न्यायवा० पृ० ९६। ४ "उपलब्ध्यव्यवस्थातः खल्वपि—सञ्चोदकमुपलभ्यते तडागादिषु, मरीचिषु चाविद्यमानमुदकमिति। अतः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते अथासत् इति संशयो भवति। ..." न्यायभा० १।१।२३। ५ "अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चाऽनुत्पन्नं निरुद्धं वा। ततः क्वचिदुपलभ्यमाने संशयः किं सन्नोपलभ्यते उतासन्निति संशयो भवति...।" न्यायभा० १।१।२३। ६ "समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृगते...।" न्यायभा० १।१।२३। *वार्तिककारस्तु ज्ञेयस्थतया समानाऽनेकधर्मयोः कारणत्वं नानुमन्यते—"समानोऽनेकश्च धर्मो ज्ञेयस्थः इत्येतदपि न बुद्ध्यामहे। किमत्र धर्मः संशयकारणम्, अथ ज्ञानमिति। न धर्मः संशयकारणमित्यनेकधा समर्थितम्। समानानेकधर्मज्ञानं तु संशयकारणम्, तच्च ज्ञातरि वर्त्तते इति नास्ति भेदः।" न्यायवा० पृ० ९६।*

हिताऽहितप्राप्तिपरिहारौ तत्साधनञ्च प्रयोजनम्। "*यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम् ।*" [न्यायसू० १।१।२४] इति वचनात्। यमर्थम् प्राप्तव्यं हातव्यञ्च अध्यवसाय प्रवर्त्तते तत् प्रयोजनम्। तच्च[1] द्विविधं मुख्यं गौणं च । मुख्यं सुखदुःखप्राप्तिपरिहारौ, तत्साधनं तु गौणम्।

प्रतिबन्धावधारणस्थानं दृष्टान्तः। तथा च सूत्रम्–"*लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः[3] ।*" [न्यायसू० १।१।२५] "*नैसर्गिकं वैनयिकं च अतिशयमप्राप्ता लौकिकाः, तद्विपरीताः परीक्षकाः ।*" [न्यायभा० १।१।२५] तेषां साध्यसाधनाधिकरणत्वेन तद्रहितत्वेन वा बुद्धिसाम्यविषयोऽर्थो दृष्टान्तः ।

प्रमाणतोऽभ्युपगम्यमानः सामान्यविशेषवान् अर्थः सिद्धान्तः[4]। "*तन्त्राधिकरणाऽभ्युपगमसंस्थितिः सिद्धान्तः ।*" [न्यायसू० १।१।२६] इति सूत्रकारवचनात्। तन्त्रम्[5]–शास्त्रम् अधिकरणं येषामर्थानां ते तन्त्राधिकरणाः, तेषाम् अभ्युगमसंस्थितिः–इत्थम्भावनियमः सिद्धान्तः। स चतुर्विधः–"*सर्वतन्त्र-प्रतितन्त्र-आधिकरण-अभ्युपगमसंस्थित्यर्थान्तरभावात् ।*" [न्यायसू० १।१।२७] तत्र "*सर्वतन्त्राऽविरुद्धः तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः[6] ।*" [न्यायसू०

---

१ "प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः ।" चरकसं० पृ० २६४। "यमर्थमाप्तव्यं हातव्यं वाऽध्यवसाय तदाप्तिहानोपायमनुतिष्ठति प्रयोजनं तद् वेदितव्यम् ।" न्यायभा० १।१।२४। २ "तच्च गौणमुख्यभेदेन द्विविधम्। मुख्यं सुखप्राप्तिः दुखपरिहारश्च, तत्साधनं गौणम् ।" न्यायमं० पृ० ५६३। न्यायकलिका पृ० ८। ३ "तत्र दृष्टान्तो नाम यत्र मूर्खविदुषां बुद्धिसाम्यम् ।" चरकसं० पृ० २६३। "दृष्टान्तवचनं हि यत्र पृथग्जनानामार्याणाञ्च बुद्धिसाम्यं तदा वक्तव्यम्। दृष्टान्तो द्विविधः–सम्पूर्णदृष्टान्तः आंशिकदृष्टान्तश्च ।" उपायहृदय पृ० ५। ४ "सिद्धान्तो नाम यः परीक्षकैर्बहुविधं परीक्षितं हेतुभिः साधयित्वा स्थाप्यते निर्णयः स सिद्धान्तः ।" चरकसं० पृ० २६३। "इदमित्थम्भूतञ्चेत्यनुज्ञायमानमर्थजातं सिद्धम्, सिद्धस्य संस्थितिः सिद्धान्तः ।" न्यायभा० १।१।२६। "सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति ।" न्यायवा० पृ० १०३। "प्रमाणमूलाभ्युपगमविषयीकृतः सामान्यविशेषवानर्थः सिद्धान्तः ।" न्यायमं० पृ० ५६५। न्यायकलि० पृ० ९। "साध्यस्य हेतुभिः विस्तरेण स्थापनं निर्णयश्च। एतत्सिद्धान्तलक्षणम्। आह–सिद्धान्तधर्माः कियन्तः ? अत्रोच्यते चत्वारः–सर्वसमः, आदौ समः, पश्चाद्भिन्नः, आदौ भिन्नः पश्चात्समश्च ।" उपायहृदय पृ० ६। ५ "तन्त्रम्–इतरेतराभिसम्बद्धस्य अर्थसमूहस्योपदेशः शास्त्रम्'''अभ्युपगमसंस्थितिः अनवधारितार्थपरिग्रहः तद्विशेषपरीक्षणाय अभ्युपगमसिद्धान्तः ।" न्यायभा० १।१।२६। "तन्त्रमधिकरणं येषामर्थानां भवति ते तन्त्राधिकरणाः तेषामभ्युपगमसंस्थितिः इत्थम्भावव्यवस्था धर्मनियमः सिद्धान्तो भवतीति। किमुक्तं भवति ? योऽर्थो न शास्त्रितः तस्याभ्युपगमो न सिद्धान्त इति। न्यायवा० पृ० १०४। ६ "सर्वतन्त्रसिद्धान्तो नाम सन्ति निदानानि सन्ति व्याधयः सन्ति सिद्ध्युपायाः साध्यानामिति ।" चरकसं० पृ० २६३। "सर्वेषां सम्प्रतिपत्तिविषयः सर्वतन्त्रसिद्धान्त इति। यथा प्रमाणानि प्रमेयसाधनानि ।" न्यायवा० पृ० १०४। "यथा घ्राणादीनि इन्द्रियाणि गन्धादयः इन्द्रियार्थाः ।'''" न्यायभा० १।१।२८। "स्वशास्त्रे य उपदिष्टोऽर्थः सर्वशास्त्राविरुद्धश्च स सर्वतन्त्रसिद्धान्तः ।" न्यायमं० पृ० ५६५। न्यायकलि० पृ० ९।

१।१।२८] सर्वेषां सम्प्रतिपत्तिविषयः ; यथा प्रमाणानि प्रमेयसाधनानि, घ्राणादीनि इन्द्रियाणि, गन्धादयस्तदर्थाः इत्यादि । "*समानतन्त्रप्रसिद्धः परतन्त्राऽसिद्धः प्रतितन्त्रसिद्धान्तः ।*"[1][2] [न्यायसू० १।१।२९] यथा भौतिकानि इन्द्रियाणि यौगानाम्, अभौतिकानि सांख्यानाम् । "*यत्सिद्धौ अन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ।*"[3] [न्यायसू० १।१।३०] हेतोर्यस्य सिद्धौ अन्यस्य प्रक्रियमाणस्य प्रतिज्ञार्थस्य सिद्धिः सोऽधिकरणसिद्धान्तः, यथा कार्यत्वादेः क्षित्यादौ बुद्धिमत्कारणसामान्यसिद्धौ अन्यस्य तत्करणसमर्थस्य नित्यज्ञानेच्छाप्रयत्नाऽऽधारस्य तत्कारणस्य सिद्धिरिति । "*अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणम् अभ्युपगमसिद्धान्तः ।*"[4][5] [न्यायसू० १।१।३१] यत्किञ्चिद्वस्तु अपरीक्षितमभ्युपगम्य विशेषः परीक्ष्यते सोऽभ्युपगमसिद्धान्तः । यथा अस्तु द्रव्यं शब्दः, स तु किं नित्योऽनित्यो वा इति शब्दस्य द्रव्यत्वमभ्युपगम्य नित्याऽनित्यत्वविशेषः परीक्ष्यते । ५ १०

परार्थानुमानवाक्यैकदेशभूता अवयवाः[6] । साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परि[7]-

---

१–तन्त्रसिद्धः ब०, ज० । २ "प्रतितन्त्रसिद्धान्तो नाम तस्मिंस्तन्त्रे तत्तत्प्रसिद्धम् ।" चरकसं० पृ० २६३ । "सामान्यविशेषतद्वतां नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इति । यथा भौतिकानीन्द्रियाणीति यौगानामभौतिकानीति सांख्यानाम् ।" न्यायवा० पृ० १०५ । ३ "अधिकरणसिद्धान्तो नाम यस्मिन् यस्मिन्नधिकरणे संस्तूयमाने सिद्धानि अन्यान्यपि अधिकरणानि भवन्ति ।" चरकसं० पृ० २६४ । "वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति ।" न्यायवा० पृ० १०५ । "तेन यस्मिन्नर्थे ज्ञायमाने तदनुषङ्गिणोऽर्थाः तदन्तर्भावेन ज्ञायन्ते सोऽर्थः साक्षादधिक्रियमाणः तदनुषङ्गिणाञ्चाधारः तदाश्रयत्वात्तत्सिद्धेः, स पक्षो वा भवतु हेतुर्वा तेन रूपेण अधिकरणसिद्धान्तः । पक्षस्तावद् विवादाध्यासितमुपलब्धिमत्कारणमुत्पत्तिमत्त्वाद् वस्त्रादिवदिति । अत्र हि पृथिव्यादिगतेन उत्पत्तिमत्त्वेन उपलब्धिमत्पूर्वकं तद्गतं साध्यमानं स्वसिद्ध्यन्तर्गतानुषङ्गिसर्वज्ञत्वाद्युपेतत्वमेव सिद्ध्यति···।" न्यायवा० ता० टी० १।१।३० । ४ प्रतिक्रिय–ब०, ज० । ५ "अभ्युपगमसिद्धान्तो नाम सः–यमर्थमसिद्धमपरीक्षितमनुपदिष्टहेतुकं वा वादकालेऽभ्युपगच्छन्ति भिषजः ।" चरकसं० पृ० २६४ । "यत्र किञ्चिदर्थजातमपरीक्षितमभ्युपगम्यते–अस्तु द्रव्यं शब्दः ; स तु नित्यः अथाऽनित्यः ? इति द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते सोऽभ्युपगमसिद्धान्तः ।" न्यायभा० १।१।३१ । "अपरीक्षितोऽसूत्रित इति । योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्त इति । यथा नैयायिकानां मन इन्द्रियमिति, वैशेषिकाणां नैयायिकानाञ्च श्रोत्रमाकाशमिति ।" न्यायवा० पृ० १०५ । "तस्माद्विशेषपरीक्षणार्थोऽपरीक्षिताभ्युपगमः प्रौढवादिना क्रियमाणोऽभ्युपगमसिद्धान्त इति सूत्रार्थः ।" न्यायमं० पृ० ५६८ । न्यायकलि० पृ० १० । ६ "परार्थानुमानवाक्योपपत्तेस्तदेकदेशा अवयवा युक्ता इति ।" न्यायमं० पृ० ५६९ । न्यायकलि० पृ० ९ । ७ "साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्य अवयवा उच्यन्ते ।" न्यायभा० पृ० ९ ।

समाप्यते तस्यैकदेशाः पञ्च । तथा च सूत्रम्[1]–"*प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः।*" [न्यायसू० १।१।३२] तत्र "*साध्यनिर्देशः प्रतिज्ञा[2]।*" [न्यायसू० १।१।३३] "*ज्ञापनीयेन धर्मेण विशिष्टस्य धर्मिणः परिग्रहवचनं साध्यनिर्देशः, यथा अनित्यः शब्दः इति ।*" [न्यायभा० १।१।३३] "*उदाहरणसाधर्म्यात् साध्यसाधनं हेतु[3]ः।*" [न्यायसू० १।१।३४] उदाहरणेन साधर्म्यात् साध्यधर्मस्य प्रज्ञापनं हेतुः, यथा अनित्यः शब्दः उत्पत्तिधर्मकत्वात् घटवदिति । "*तथा वैधर्म्यात् ।*" [न्यायसू० १।१।३५] उदाहरणवैधर्म्यात् साध्यसाधनं हेतुः, यथा नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गात् लोष्टादिवत् । "*साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्तः उदाहरणम् ।*" [न्यायसू० १।१।३६] साध्येन[4] साधर्म्यम्–समानधर्मता [तस्मात्] तद्धर्मभावी–तस्य साध्यस्य धर्मः, साध्यशब्देन चात्र साध्यधर्मविशिष्टो धर्मी गृह्यते, तस्य भावः साध्यधर्मभावः स यस्मिन् दृष्टान्ते अस्ति स तद्धर्मभावी, यथा अनित्यः शब्दः उत्पत्तिधर्मकत्वात् घटवत् इति साधर्म्योदाहरणम् । "*तद्विपर्ययाद्विपरीतम् ।*" [न्यायसू० १।१।३७] 'उदाहरणम्' इति प्रकृतेन अभिसम्बन्धः । तद्विपर्ययात्–साध्यवैधर्म्यात् अतद्धर्म-

---

१ 'तथा च सूत्रम्' इत्ययं पाठः सर्वासु प्रतिसु 'अवयवाः' इत्यस्याऽनन्तरमुपलभ्यते । परञ्च उपलब्धन्यायसूत्रानुरोधात् अस्माभिः 'पञ्च' इत्यस्यानन्तरं स्थापितः । २ "प्रतिज्ञा नाम साध्यवचनम्, यथा नित्यः पुरुष इति ।" चरकसं० पृ० २६२ । ३ "हेतुर्नाम उपलब्धिकारणम् ।" चरकसं० पृ० २६३ । "लिङ्गवचनं हेतुः ।" न्यायकलि० पृ० १० । ४ "उदाहरणेन सामान्यात् साध्यस्य धर्मस्य साधनम्–प्रज्ञापनं हेतुः । साध्ये प्रतिसन्धाय उदाहरणे च प्रतिसन्धाय तस्य साधनतावचनं हेतुः उत्पत्तिधर्मकत्वादिति, उत्पत्तिधर्मकमनित्यं दृष्टमिति ।" न्यायभा० १।१।३४ । ५ "उदाहरणवैधर्म्याच्च साध्यसाधनं हेतुः । कथम् ? अनित्यः शब्दः उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकं नित्यं यथा आत्मादिद्रव्यमिति ।" न्यायभा० १।१।३५ । "उदाहरणमनित्यः शब्दः···इति भाष्यम्; एतत्तु न समञ्जसमिति पश्यामः, प्रयोगमात्रभेदात्, प्रयोगमात्रं हि भिद्यते नार्थ इति ।···उदाहरणमात्रभेदाच्च, उदाहरणमात्रं केवलं भिद्यते 'आत्मा' 'घटः' इति ।···तस्मान्नेदमुदाहरणं न्याय्यम् । उदाहरणं तु नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादिति ।" न्यायवा० पृ० १२२ । न्यायमं० ५७५ । ६ "साध्येन साधर्म्यं समानधर्मता, साध्यसाधर्म्यात् कारणात् तद्धर्मभावी दृष्टान्त इति । तस्य धर्मः तद्धर्मः, तस्य–साध्यस्य । साध्यं च द्विविधम् धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्, धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति । इह उत्तरं तद्ग्रहणेन गृह्यते···तस्य धर्मः तद्धर्मः तद्धर्मस्य भावः तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावी भवति स चोदाहरणमिष्यते···।" न्यायभा० १।१।३६ । "सम्यग्दृष्टान्ताभिधानमुदाहरणम् ।" न्यायसार पृ० १२ । "दृष्टान्तवचनमुदाहरणम् ।···यत्र प्रयोज्यप्रयोजकभावेन साध्यसाधनधर्मयोरस्तित्वं ख्याप्यते स साधर्म्यदृष्टान्तः । तस्य व्याप्यव्यापकभावगर्भवचनमुदाहरणम् ।" न्यायकलिका पृ० ११ । ७ "दृष्टान्त उदाहरणम् इति प्रकृतम्, साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणम् । अनित्यः शब्दः उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकं नित्यमात्मादि ।" न्यायभा० १।१।३७ ।

भावी दृष्टान्तः उदाहरणम्, यथा अनित्यः शब्दः उत्पत्तिधर्मकत्वात्, यत्तु नित्यं तद् उत्पत्तिधर्मकं न भवति यथा परमाण्वादि इति। *"उदाहरणापेक्षः 'तथा' इत्युपसंहारो 'न तथा' इति वा साध्यस्य उपनयः।"* [न्यायसू० १।१।३८] उदाहरणापेक्षः—उदाहरणाधीनः, साध्यसाधर्म्ययुक्ते उदाहरणे 'तथा च शब्द उत्पत्तिधर्मकः' इति साध्यस्य शब्दस्य उत्पत्तिधर्मकत्वमुपसंह्रियते। साध्यवैधर्म्ययुक्ते तु आकाशादिद्रव्यमनुत्पत्तिधर्मकं नित्यम् 'न च तथा शब्दः' इत्यनुत्पत्तिधर्मकत्वस्य उपसंहारप्रतिषेधेन उत्पत्तिधर्मकत्वमुपसंह्रियते। *"हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्।"* [न्यायसू० १।१।३९] यथोदाहरणं साधर्म्येण वैधर्म्येण वा हेतौ उपसंहृते यत् प्रतिज्ञायाः पुनरभिधानं तत् निगमनम्।

सन्दिग्धेऽर्थे अन्यतरपक्षे अनुकूलकारणदर्शनात् तस्मिन् संभावनाप्रत्ययः तर्कः। तथा च सूत्रम्—*"अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहः तर्कः।"* [न्यायसू० १।१।४०] अविज्ञाततत्त्वे—सन्दिग्धेऽर्थे ऊर्ध्वतालक्षणे कारणोपपत्तितः पुरुषसद्भावे बाह्याली (वाहकेलि) प्रदेशोऽनुकूलं कारणम्, तस्य प्रतीतितः 'पुरुषेण अनेन भवितव्यम्' इत्यूहः तर्कः। किमर्थो-

---

१ "दृष्टान्ते प्रसिद्धाविनाभावस्य साधनस्य दृष्टान्तोपमानेन पक्षे व्याप्तिख्यापकं वचनमुपनयः। न्यायसार पृ० १४। २ "उदाहरणापेक्षः उदाहरणतन्त्रः उदाहरणवशः, वशः सामर्थ्यम्। साध्यधर्मयुक्ते उदाहरणे 'स्थाल्यादिद्रव्यमुत्पत्तिधर्मकमनित्यं दृष्टं तथा शब्द उत्पत्तिधर्मक इति साध्यस्य शब्दस्य उत्पत्तिधर्मकत्वमुपसंह्रियते। साध्यवैधर्म्ययुक्ते पुनरुदाहरणे आत्मादिद्रव्यमनुत्पत्तिधर्मकं नित्यं दृष्टं न च तथा शब्दः इत्यनुत्पत्तिधर्मकत्वस्य उपसंहारप्रतिषेधेन उत्पत्तिधर्मकत्वमुपसंह्रियते। तदिदमुपसंहारद्वैतमुदाहरणद्वैताद् भवति।" न्यायभा० १।१।३८। ३—धर्मकस्य आ०, ब०, ज०। ४ "सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनम्।" न्यायभा० पृ० ९। "प्रतिज्ञाविषयस्यार्थस्य अशेषप्रमाणोपपत्तौ साध्यविपरीतप्रसङ्गप्रतिषेधार्थं यत्पुनरभिधानं तन्निगमनम्।" न्यायवा० पृ० १३७। "उपनयानन्तरं सहेतुकं प्रतिज्ञावचनं निगमनम्। न्यायसार पृ० १५। ५—हरणसा—आ०, भां०, श्र०। "साधर्म्योक्ते वा वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते, तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्दः इति निगमनम्। निगम्यन्ते प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनम्।" न्यायभा० १।१।३९। ६ "अविज्ञाततत्त्वे सामान्यतो ज्ञाते धर्मिणि एकपक्षानुकूलकारणदर्शनात् तस्मिन् संभावनाप्रत्ययो भवितव्यतावभासः तदितरपक्षशैथिल्यापादने तद्ग्राहकप्रमाणमनुगृह्य तान् सुखं प्रवर्त्तयन् तत्त्वज्ञानार्थमूहः तर्कः।" न्यायमं० पृ० ५८६। न्यायकलिका पृ० १३। "जैमिनीयास्तु ब्रुवते युक्तया प्रयोगनिरूपणमूहः।...स च त्रिविधः—मन्त्रसामसंस्कारविषयः।" न्यायमं० पृ० ५८८। ७ "यथा बाह्यकेलिप्रदेशादावूर्ध्वत्वविशिष्टधर्मिदर्शनात् पुरुषेणानेन भवितव्यमिति प्रत्ययः।...." न्यायमं० पृ० ५८६। "यथा वाहकेलिप्रदेशे ऊर्ध्वत्वदर्शनात् पुरुषेणानेन भवितव्यमिति सम्भावनाप्रत्ययः। न चार्यं संशयः। अश्वकेलिप्रदेशे पुरुषवत् स्थाणोरसम्भाव्यमानत्वेन...।" न्यायकलिका पृ० १३।

ऽयम् ? इति चेत्; तत्त्वज्ञानार्थम् अनुमानप्रमाणप्रवृत्त्यर्थम् । तर्कविविक्तं हि विषयं प्रमाणानि परिच्छिन्दन्ति इति प्रमाणाऽनुग्राहकस्तर्कः[1] ।

साधनोपालम्भजन्मा तत्त्वावबोधो निर्णयः[2] । सूत्रञ्च–"*विमृश्य पक्ष-प्रतिपक्षाभ्यामर्थावधारणं निर्णयः* । " [न्यायसू० १।१।४१] विमृश्य–'अनित्यः शब्दो नित्यो वा' इति सन्दिह्य, पक्ष-प्रतिपक्षाश्रितत्वात् साधनोपालम्भौ 'पक्षप्रतिपक्षौ' इत्युक्तौ ताभ्याम्, अर्थस्य साध्यस्य 'अनित्य एवायम् कृतकत्वात्' इत्यवधारणं निर्णयः ।

वीतरागकथावस्तुनिर्णयफलो वादः[3] । तथा च सूत्रम्–"*प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताऽविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः*।" [न्यायसू० १।२।१] इति। वस्तु-

---

१ " तर्को न प्रमाणसंगृहीतो न प्रमाणान्तरं प्रमाणानामनुग्राहकः तत्त्वज्ञानाय कल्पते ।" न्यायभा० पृ० १० । " कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति ? अनवधारणात्–अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या, न त्ववधारयति···एवमेवेदमिति । कथं तत्त्वज्ञानार्थ इति ? तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणादूहात् भावितात् प्रसन्नादनन्तरं प्रमाणसामर्थ्यात् तत्त्वज्ञानमुत्पद्यते इत्येवं तत्त्वज्ञानार्थः ।" न्यायभा० १।१।४० । " कथं पुनरयं तत्त्वज्ञानार्थं भवति ? प्रमाणविषयविवेचनात् । प्रमाणविषयमनेन विविनक्ति, 'अयमर्थो युक्तः' इति, प्रमाणानि पुनः प्रवर्त्तमानानि तर्कविविक्तमर्थं तथाभूतमवगमयन्तीति ।" न्यायवा० पृ० १४१ । २ " पक्षशब्देन पक्षविषयं साधनमुच्यते, प्रतिपक्षशब्देन पक्षविषयस्य साधनस्य उपालम्भः; ताभ्यां साधनोपालम्भाभ्यां यदर्थावधारणं स निर्णय इति ।" न्यायवा० १।१।४१ । " पक्ष-प्रतिपक्षविषयसाधनोपालम्भपरीक्षया तदन्यतरपक्षावधारणं निर्णयः ।" न्यायकलिका पृ० १३ । ३ "तत्र वादो नाम यत् परस्परेण सह शास्त्रपूर्वं विगृह्य कथयति, स वादो द्विविधः संग्रहेण जल्पो वितण्डा च ।" चरकसं० पृ० २६२ । "वादः खलु नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानः वाक्यसमूहः ।" न्यायभा० पृ० ११ । " वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथा । सा द्विविधा–वीतरागकथा, विजिगीषुकथा चेति । यत्र वीतरागो वीतरागेणैव सह तत्त्वनिर्णयार्थं साधनोपालम्भौ करोति सा वीतरागकथा वादसंज्ञयोच्यते ।" न्यायसार पृ० १५ । " वादो नाम वीतरागयोः पक्षप्रतिपक्षपरिग्रहपूर्वकः प्रमाणतर्कपूर्वकसाधनोपालम्भप्रयोगे क्रियमाणे एकपक्षनिर्णयावसानो वाक्यसमूहः । न्यायकलिका पृ० १३ । "अपरे (वासुबान्धवाः) तु स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः ।" न्यायवा० पृ० १५० । ४ " एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावात् अस्त्यात्मा नास्त्यात्मा इति, नानाधिकरणस्थौ विरुद्धौ न पक्षप्रतिपक्षौ यथा नित्य आत्मा अनित्या बुद्धिरिति । " न्यायभा० १।२।१ । " वस्तुधर्मौ एकाधिकरणौ विरुद्धौ एककालौ अनवसितौ । वस्तुधर्मौ इति वस्तुविशेषौ वस्तुनः··· नानाधिकरणौ विचारं न प्रयोजयतः उभयोः प्रमाणोपपत्तेः तद्यथा अनित्या बुद्धिर्नित्य आत्मेति । अविरुद्धावप्येवम्, यौ विरुद्धौ तौ विचारं प्रयोजयतः नाविरुद्धौ, तद्यथा क्रियावद्द्रव्यं गुणवच्चेति । एककालाविति, भिन्नकालयोः न विचारप्रयोजकत्वं प्रमाणोपपत्तेः, यथा क्रियावद्द्रव्यं निष्क्रियञ्च कालभेदे सति । अनवसिताविति, अनिश्चितौ विचारं प्रयोजयतो नावसिताविति, निर्णयोत्तरकालं विचाराभावात् । तावेतौ विरुद्धावे-

धर्मौ एकाधिकरणौ विरुद्धौ एककालौ अनवसितौ पक्षप्रतिपक्षौ। वस्तुधर्मौ वस्तुनो विशेषौ, यथा 'अस्त्यात्मा नास्त्यात्मा' इति वा। अधिकरणम् आश्रयः, एकम् अधिकरणं ययोस्तौ विचारं प्रयोजयतः न नानाधिकरणौ, विरुद्धावपि यथा नित्य आत्मा अनित्या बुद्धिरिति। अविरुद्धावपि विचारं न प्रयोजयतः यथा क्रियावद् द्रव्यं गुणवच्च इति, भिन्नकालावपि न विचाराहौं द्वयोः प्रमाणोपपत्तेः यथा क्रियावद् द्रव्यं निष्क्रियं च कालभेदे सति। तथा अव- ५
सितौ विचारं न प्रयोजयतः निर्णयोत्तरकालं विवादाऽभावात्। तौ एवंविधविशेषणौ धर्मौ पक्ष-प्रतिपक्षौ, तयोः परिग्रहः इत्थम्भावनियमः 'एवंधर्मा अयं धर्मी नैवंधर्मा' इति च।

पक्षप्रतिपक्षपरिग्रहश्च जल्प-वितण्डयोरप्यविशिष्टः, अतः 'प्रमाणतर्कसाधनोपालम्भः' इति तद्विशेषणम्, प्रमाणैः तर्केण च साधनम् उपालम्भश्च यस्मिन् स तथोक्तः। प्रमाणशब्देन प्रमाणमूलाः प्रतिज्ञाद्यवयवा व्यपदिश्यन्ते, ततो वादे प्रमाणबुद्धिपरिगृहीतयोरेव साधनोपाल- १०
म्भयोः प्रयोगः। तर्कशब्देन च भूतपूर्वगतिन्यायेन वीतरागकथात्वज्ञापनाद् उद्भावननियमो लभ्यते। तेन वादे प्रमाणबुद्ध्या परेण छलजातिनिग्रहस्थानानि प्रयुक्तानि न निग्रहबुद्ध्या उद्भाव्यन्ते, किन्तु निवारणबुद्ध्या, तत्त्वज्ञानाय आवयोः प्रवृत्तिः, न च साधनाभासो दूषणाभासो वा तत्त्वज्ञाननिमित्तम्, अतो न तत्प्रयोगो युक्तः। उपालम्भश्रवणात् समस्तनिग्रहस्थानानुषङ्गः इति चेन्न; उत्तरयोः पदयोर्नियमार्थत्वात्। तेन 'सिद्धान्ताविरुद्धः' इत्यनेन अपसिद्धान्तः, १५
'पञ्चावयवोपपन्नः' इत्यनेन च पञ्चग्रहणात् न्यून-अधिके, अवयवग्रहणात् हेत्वाभासपञ्चकञ्च इत्यष्टावेव निग्रहस्थानानि वादे नियम्यन्ते। कस्मादिति चेत्? गुर्वादिना सह वादोप-

---

वंविशेषणौ धर्मौ प्रक्षप्रतिपक्षौ, तयोः परिग्रह इत्थंभावनियमः एवंधर्माऽयं धर्मी नैवंधर्मेति···।" न्यायवा० १।२।१। पृ० १४६। "एकाधिकरणौ धर्मौ तुल्यकालौ विरोधिनौ। पृथक् परिग्रहौ पक्षप्रतिपक्षावुदाहृतौ॥" न्यायमं० पृ० ५९०।

१–णभूताः ज०। "इह तु न प्रमाणशब्देन प्रत्यक्षादेरनुमानम् अपि तु प्रमाणमूला अवयवा उच्यन्ते तैश्च सिद्धयुपालब्धी क्रियेते।" न्यायमं० पृ० ५९३। २ "उपालम्भग्रहणात् समस्तनिग्रहस्थानप्रसक्तौ संज्ञाभेदमात्रम्···न; उत्तरयोः नियमार्थत्वात्।" न्यायवा० पृ० १४९। ३ भाष्यकारमतेन–'सिद्धान्ताविरुद्धः' इति पदेन विरुद्ध एव हेत्वाभासोऽभ्यनुज्ञातः (न्यायभा० १।२।१) वार्तिककारमतेन च 'सिद्धान्ताविरुद्धः' इति पदेन अपसिद्धान्तनिग्रहस्थानस्याभ्यनुज्ञा। तथाहि–"सिद्धान्ताविरुद्ध इति पदेन विरुद्धो हेत्वाभासो लभ्यते; तन्न, अन्यतोऽधिगतेः···पञ्चावयवोपन्नः इति पञ्चग्रहणात् न्यूनाधिके लभ्येते अवयवग्रहणात् तदाभासा लभ्यन्ते इति लभ्यमानार्थस्य पुनरभिधाने पिष्टं पिष्टं स्यात्। अथ किमिदं पदं 'सिद्धान्ताविरुद्ध' इत्यनर्थकमेव? नानर्थकम्; अपसिद्धान्तावरोधात्···।" न्यायवा० पृ० १४९। न्यायमञ्जरीकारमतेन तु–"सर्वमेव तत्र प्रयोगार्हम्। अयं तु विशेषः जल्पे कस्याश्चिदवस्थायां बुद्धिपूर्वकमपि छलादिप्रयोगः क्रियते वादे तु वृथा तेषां प्रयोगः। भ्रान्त्या तु कथञ्चित् प्रयुक्तानां अवश्यमुद्भावनम्···।" न्यायमं० पृ० ५९३। ४ भाष्यकारमतेन त्रीणि, वार्तिककारमतेन अष्टौ। ५ "गुर्वादिना सह वादोपदेशात्, यस्मादयं तत्त्वबुभुत्सुः गुर्वादिभिः सह त्रिविधं फलमाकाङ्क्षन् वादं करोति।" न्यायवा० पृ० १४९।

देशात्; यस्माद् अयं तत्त्वं बुभुत्सुर्गुर्वादिना सह संशयविच्छेद-अज्ञातार्थावबोध-अध्यवसिताभ्यनुज्ञालक्षणं त्रिविधं फलमाकाङ्क्षन् वादं करोति, ततोऽस्य तत्त्वबुभुत्सावतः तावद् अनेन साधनं वक्तव्यं यावदसौ तत्त्वं प्रतिपद्यते अप्रतिद्वन्द्वित्वात्।

विजिगीषुकथा पुरुषशक्तिपरीक्षणफला जल्पः। सूत्रञ्च–"*यथोक्तोपपन्नः छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः।*" [न्यायसू० १।२।२] यथोक्तोपपन्नग्रहणेन प्रमाणतर्कसाधनोपालम्भमात्रमुपलक्ष्यते, न समस्तं वादलक्षणम्, 'सिद्धान्ताऽविरुद्धः पञ्चावयवोपपन्नः' इति उत्तरपदद्वयस्य निग्रहस्थाननियमनिबन्धनस्य अत्र अभिसम्बन्धाऽसंभवात्, जल्पे समस्तनिग्रहस्थानानां संभवात्। ननु 'छलजातिनिग्रहस्थानसाधनोपालम्भः' इत्ययुक्तम्; छलादीनामसदुत्तरत्वेन साधनदूषणत्वाऽनुपपत्तेः; तदयुक्तम्; प्रमाणैः क्रियमाणयोः साधनोपालम्भयोः छलादीनामङ्गभावो रक्षणार्थत्वात् न स्वतन्त्राणां साधनदूषणभावः; नहि तानि स्वयं साधनत्वेन दूषणत्वेन वा प्रयुज्यन्ते, किन्तु सम्यक्साधने प्रयुक्ते परः छलजात्यादिना प्रत्यवतिष्ठमानः 'छलं जातिः निग्रहस्थानं वा त्वया प्रयुक्तम्' इत्येवं तदुद्भावनद्वारेण निरस्यते, निरस्ते तस्मिन् स्वपक्षः परिरक्षितो भवति। परेण वा साधने प्रयुक्ते सहसा दोषमपश्यन् स्वयं जात्यादिना प्रत्यवतिष्ठते। जात्याद्याकुलितश्च प्रतिवादी उत्तरमप्रतिपद्यमानो जीयते, जिते तस्मिन् अप्रतिपक्षा स्वपक्षसिद्धिरिति। हृदयस्थप्रमाणोपपन्नतत्त्वज्ञानसंरक्षणाय क्वचिद् वीतरागस्यापि उपयुज्यन्ते छला-

---

१ "परिपाकस्तु–संशयच्छेदनमविज्ञातार्थबोधः अध्यवसिताभ्यनुज्ञानमिति।" न्यायभा० ४।२।४७। "अनधिगततत्त्वावबोधः संशयनिवृत्तिः अध्यवसिताभ्यनुज्ञानम् इति फलानि त्रीणि।···" न्यायवा० ता० टी० पृ० ३१६। २–व्यवसिताभ्यनुज्ञा– ब०, ज०। –व्यवसिताभ्यनुज्ञान– भां०। ३–नुज्ञानल– श्र०। ४ तस्य भां०, श्र०। "ततोऽस्य तत्त्वबुभुत्सावतः तावत्साधनं वक्तव्यं यावदनेन ज्ञातव्यमप्रतिद्वन्द्वित्वात्।" न्यायवा० पृ० १४९। ५ "तत्र पक्षाश्रितयोर्वचनं जल्पः।···यथा एकस्य पक्षः पुनर्भवोऽस्तीति नास्तीत्यपरस्य, तौ च हेतुभिः स्वस्वपक्षं स्थापयतः परस्परमुद्भावयतः एष जल्पः।" चरकसं० पृ० २६२। "यत्र विजिगीषुः विजिगीषुणा सह लाभपूजाख्यातिकामो जयपराजयार्थं प्रवर्त्तते सा विजिगीषुकथा···विजिगीषुकथा जल्पवितण्डासंज्ञोक्ता।" न्यायसार पृ० १६। न्यायकलिका पृ० १३। ६ न्यायभाष्य (पृ १।२।२) मंजरी (पृ० ५९४) कारयोर्मतेन 'यथोक्तोपपन्न' पदेन समस्तं वादलक्षणमतिदिश्यते। वार्तिककारमतेन तु–"सम्भवतोऽतिदेशात्, यदत्र सम्बद्ध्यते तदतिदिश्यते। किञ्च सम्बद्ध्यते ? 'प्रमाणतर्कसाधनोपालम्भः' इत्येतत्।·····न नियमार्थं पदे नियन्तव्यस्याभावात्। अथवा यथोक्तोपपन्नेन उपपन्नः यथोक्तोपपन्नोपपन्नः इति प्राप्ते गम्यमानत्वादेकस्य उपपन्नशब्दस्य लोपः यथा गोरथ इति। केन पुनरयं गम्यते इति ? उक्तं सामर्थ्येनेति। नहि नियमार्थयोः पदयोः जल्पे संभवः···।" न्यायवा० पृ० १६१। ७ "प्रमाणैः साधनोपालम्भयोः छलजातिनिग्रहस्थानानामङ्गभावः स्वपक्षरक्षणार्थत्वात् न स्वतन्त्राणां साधनभावः।···उपालम्भे तु स्वातन्त्र्यमप्यस्ति।" न्यायभा० १।२।२। ८–मङ्गभावे आ०। ९ "वीतरागो वा परानुग्रहार्थं ज्ञानाङ्कुरसंरक्षणार्थञ्च प्रवर्त्तते।" न्यायसार पृ० १६। "मुमुक्षोरपि क्वचित् प्रसङ्गे तदुपयोगात्···।" न्यायमं० पृ० ५९५।

दीनि, अन्यथा प्राञ्जलमतिर्दुष्टतार्किकपरिकल्पितदूषणाडम्बरेण तत्त्वाध्यवसायात् प्रचाल्येत[1]। तदुक्तम्–"*तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्।*" [न्यायसू० ४।२।५०] इति।

जल्पविशेषो वितण्डा[2]। तथा च सूत्रम्–"*स प्रतिपक्षस्थापनाहीनो वितण्डा[3]।*" [न्यायसू० १।२।३] स यथोक्तो जल्पः प्रतिपक्षस्थापनाहीनतया विशेषितो वितण्डात्वं प्रतिपद्यते। वैतण्डिकस्य[4] च स्वपक्ष एव साधनवादिपक्षापेक्षया प्रतिपक्षः हस्तिप्रतिहस्तिन्यायेन, तस्मिन् प्रतिपक्षे वैतण्डिको न साधनं वक्ति, केवलं परपक्षप्रतिषेधायैव प्रवर्त्तते इति। ५

अहेतवो हेतुवदाभासमाना हेत्वाभासाः[5] पञ्च। "*सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-अतीतकाला हेत्वाभासाः।*" [न्यायसू० १।२।४] इति सूत्रकारवचनात्। तत्र सव्यभिचारस्य[6] लक्षणम्–"*अनैकान्तिकः सव्यभिचारः।*" [न्यायसू० १।२।५] व्यभिचारः अनियमः, तेन सह यो वर्त्तते स सव्यभिचारः, अनैकान्तिकः[7]–एकस्मिन् अन्ते भवः ऐकान्तिकः तद्विपर्ययाद् अनैकान्तिकः, यथा अनित्यः शब्दः प्रमेयत्वात् इति। १०

विरुद्धस्य[8] लक्षणम्–"*सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः[9]।*" [न्यायसू० १।२।६] [10]सिद्धान्तशब्दो धर्मविशिष्टे धर्मिणि प्रसिद्धोऽपि इह साध्यविषयो ग्रहीतव्यः, तेन साध्यधर्ममभ्युपगम्य यस्तं विरुणद्धि-विपर्ययं साधयति स विरुद्धः, यथा नित्यः शब्दः कृतकत्वात् इति। १५

प्रकरणसमस्य लक्षणम्–"*यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः*"[11]"*प्रकरणसमः।*"

---

१ प्रचाल्यते भां, श्र०। २ "वितण्डा नाम परपक्षे दोषवचनमात्रमेव।" चरकसं० पृ० २६२। न्यायकलिका पृ० १३। ३ "यथा प्रतिवादिनः पक्षो वादिपक्षापेक्षया प्रतिपक्षः, एवं वादिपक्षोऽपि प्रतिवादिपक्षापेक्षया प्रतिपक्षः इति उभयपक्षस्थापनाहीना।" न्यायवा० ता० टी० १।२।३। ४ "उत्तरपक्षवादी वैतण्डिकः प्रथमवादिप्रसाध्यमानपक्षापेक्षया हस्तिप्रतिहस्तिन्यायेन प्रतिपक्ष इत्युच्यते।" न्यायमं० पृ० ५९६। ५ "हेतुलक्षणाभावादहेतवो हेतुवदाभासमानाः।" न्यायभा० पृ० ७२। "हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासाः।" न्यायसार पृ० ७। न्यायकलिका पृ० १४। ६ "सव्यभिचारो नाम यद् व्यभिचरणम्।" चरकसं० पृ० २६५। ७ "व्यभिचारः एकत्राऽव्यवस्था···एकस्मिन्नन्ते विद्यते इत्यैकान्तिको विपर्ययादनैकान्तिकः उभयान्तव्यापकत्वादिति।" न्यायभा० १।२।५। "कः पुनरयं व्यभिचारः? साध्यतज्जातीयान्यवृत्तित्वम्।" न्यायवा० पृ० १७०। न्यायमं० पृ० ५९७। ८ "एकस्मिन्नन्ते विद्यते इत्यैकान्तिकः विपर्ययादनैकान्तिकः उभयान्तव्यापकत्वादिति।" न्यायभा० १।२।५। ९ "सपक्षे सत्त्वं यस्य नास्ति विपक्षे च वृत्तिरस्ति स साध्यविपर्ययसाधनाद् विरुद्धो भवति।" न्यायकलिका पृ० १४। १० "सिद्धान्तशब्दो यद्यपि धर्मविशिष्टे धर्मिणि व्याख्यातः···तथापीह तदेकदेशसाध्यधर्मविषयो लक्ष्यते।" न्यायमं० पृ० ६००। ११ "विशेषाऽग्रहणात् प्रकरणे संशयो भवति, नित्यः शब्दोऽनित्यः शब्दो वेति। तदेव विशेषाग्रहणं भ्रान्त्या हेतुत्वेन प्रयोज्यमानं प्रकरणसमो हेत्वाभासो भवति।" न्यायकलिका पृ० १५।

[न्यायसू० १।२।७] [1]'विचार्यमाणौ पक्षप्रतिपक्षौ प्रकरणम्, तस्य चिन्ता संशयात् प्रभृति आनिर्णयात् यद्यपि भवति, तथापि इह विमर्शात्मिकैव गृह्यते, सा च विशेषाऽनुपलम्भादेव भवति, स एव च विशेषाऽनुपलम्भो यदा निर्णयार्थमपदिश्यते तदा तत् प्रकरणमनतिवर्त्तमानत्वात् प्रकरणसमो भवति। यथा 'नित्यः शब्दः अनित्यधर्माऽनुपलब्धेः आकाशवत्' इति एकेन उक्ते द्वितीयः प्राह–अनित्यः शब्दः नित्यधर्मानुपलब्धेः घटवत्, न च द्वयात्मकानि वस्तूनि युज्यन्ते। प्रमातारस्तु स्वरूपमेषां नियतमनवधारयन्तो भ्राम्यन्तीछं[4] (न्तीति)।

साध्यसमस्य लक्षणम्–"*साध्याऽविशिष्टः साध्यत्वात् साध्यसमः।*" [न्यायसू० १।२।८] प्रतिवादिनं प्रति साधयितुं यद् उपादीयते तत् साध्यम्, तदविशिष्टो हेतुः साध्यसमः। कथं हेतोः साध्येन तुल्यता इति चेत्? साध्यत्वात्, यथा मीमांसकं प्रति 'अनित्यः शब्दः कृतकत्वात् घटवत्' इति।

कालात्ययापदिष्टस्य लक्षणम्–"*कालात्ययापदिष्टः कालातीतः।*" [न्यायसू० १।२।९] हेतोः[6] प्रयोगकालः प्रत्यक्षागमाऽबाधितपक्षपरिग्रहाद् अनन्तरः, तम् अतीत्य यो हेतुरपदिश्यते स कालात्ययापदिष्टः। यथा अनुष्णः तेजोऽवयवी कृतकत्वात् घटवत्, ब्राह्मणेन सुरा पातव्या द्रवद्रव्यत्वात् क्षीरवत् इति।

---

१ "विमर्शाधिष्ठानौ पक्षप्रतिपक्षौ उभौ प्रकरणम्, तस्य चिन्ता विमर्शात् प्रभृति प्राङ् निर्णयात् यत् समीक्षणम् सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्तः उभयपक्षसाम्यात् प्रकरणमनतिवर्त्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते।..." न्यायभा० १।२।७। न्यायमं० पृ० ६०२। २ "तथापीह विमर्शात्मिकैव गृह्यते। स यस्माद् भवति। कस्माच्च सा भवति? विशेषानुपलम्भात्। स एव विशेषानुपलम्भो यदि निर्णयार्थमुपदिश्यते तत् प्रकरणमनतिवर्त्तमानत्वात् प्रकरणसमो भवति।" न्यायमं० पृ० ६०२। ३–नुपपत्तेः आ०। ४–मेतेषां भां०, श्र०। ५–तीत्थं ब०, ज०, भां०। "प्रमातारस्तु रूपमेषां नियतमवधारयितुमशक्नुवन्त एव भ्राम्यन्तीति।" न्यायमं० ६०२। ६ "साध्येनावशिष्टः साधनीयत्वात् साध्यसमः। अयमप्यसिद्धत्वात् साध्यवत् प्रज्ञापयितव्यः।" न्यायभा०, न्यायवा०, १।२।८। "अन्यतरवादिप्रसिद्धमन्यतरं प्रति यत्साधयितुमुपादीयते तत्साध्यम्...तदविशिष्टो हेतुः साध्यसमः, कथं साध्येन तुल्यता? इति चेदाह–साध्यत्वादिति।" न्यायमं० पृ० ६०६। ७ "अतीतकालं नाम यत् पूर्वं वाच्यं तत् पश्चादुच्यते तत् कालातीतत्वादग्राह्यं भवति।" चरकसं० पृ० २६७। ८ "हेतोरपदेशस्य हि साध्यसन्देहविशिष्टः कालः,...यत्र च प्रत्यक्षानुमानागमविरोधः...स सर्वः प्रमाणतो विपरीतनिर्णयेन सन्देहविशिष्टं कालमतिपतति, सोऽयं कालस्यात्ययेन अपदिश्यमानः कालातीत इति।" ता० टी० पृ० ३४७। हेतोः प्रयोगकालः प्रत्यक्षागमानुपहतपक्षपरिग्रहसमय एव...उष्णो न तेजोऽवयवी कृतकत्वात् घटादिवत्। ब्राह्मणेन सुरा पेया द्रवत्वात् क्षीरनीरवत्॥" न्यायमं० पृ० ६१२। "प्रत्यक्षागमविरुद्धः कालात्ययापदिष्टः। न्यायकलिका पृ० १५। ९ "दृढतरप्रमाणबाधितो हि हेतुः कालात्ययापदिष्टो भवति, यथा ब्राह्मणेन सुरा पेया द्रवद्रव्यत्वात् क्षीरवदिति।..." न्यायवा० ता० टी० पृ० ३४०। न्यायसार पृ० ११।

अर्थविकल्पैर्वचनविघातः छलम्[1]। तथा च सूत्रम्–"*वचनविघातोऽर्थविकल्पोपपत्त्या छलम्।*" [न्यायसू० १।२।१०] वचनविघातः[2] न मुखपिधानेन अपि तु अर्थविकल्पोपपत्त्या, वक्तुरनभिप्रेतमर्थं तदुक्ते वचसि समारोप्य छलवादी तन्निषेधं करोति कल्प्यमानघटनया इति सामान्यलक्षणम्। "*तत् त्रिविधं वाक्छलं सामान्यछलमुपचारछलञ्च।*" [न्यायसू० १।२।११] तत् सामान्यलक्षणलक्षितं छलं वाक्छलादिभेदेन[3] त्रिविधं भवति। ५

तत्र "*अविशेषाऽभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्।*" [न्यायसू० १।२।१२] अविशेषाभिहिते–अविशेषेण शब्दे प्रयुक्ते सति वक्तुरभिप्रेतमर्थमपह्नुत्य परिकल्प्य[4] तन्निषेधवचनं प्रति निमित्तभूतायां छलं वाक्छलम्। यथा 'नवकम्बलो देवदत्तः' इत्युक्ते 'नवः कम्बलोऽस्य, नव कम्बला अस्य' इति च समासपदम् अर्थद्वयेऽप्यविशिष्टम्, तत्र अभिनवकम्बलयोगं वक्तुरभिप्रेतं प्रमाणोपपन्नञ्च अपह्नुत्य नवसंख्यासम्बन्धमध्यारोप्य तत्प्रतिषेधेन परः प्रत्यवतिष्ठते–'कुतोऽस्य नव कम्बलाः ?' इति। १०

---

१ "छलं नाम परिशठमर्थाभासमपार्थकं वाग्वस्तुमात्रमेव।" चरकसं० पृ० २६६। "परस्य वदतो वचनविघातः अभिधाननिरोधः छलम्।" न्यायमं० पृ० ६१३। न्यायकलिका पृ० १६। २ "किम् आस्यपिधानादिना ? नेत्याह अर्थविकल्पोपपत्त्येति। वक्तुरनभिप्रेतमर्थात्तदुक्ते वचसि समारोप्य तन्निषेधं छलवादी करोति···विकल्प्यमानार्थघटनया।" न्यायमं० पृ० ६१३। ३ "तद् द्विविधं वाक्छलं सामान्यछलञ्च।" चरकसं० पृ० २६६। ४–कल्प आ०, ब०, ज०। ५ "वाक्छलं नाम यथा कश्चिद् ब्रूयात्–'नवतन्त्रोऽयं भिषग्' इति। भिषग् ब्रूयात् नाऽहं नवतन्त्रः एकतन्त्रोऽहमिति। परो ब्रूयात् नाहं ब्रवीमि नवतन्त्राणि तवेति अपि तु नवाभ्यस्तं हि ते तन्त्रमिति। भिषग् ब्रूयात् न मया नवाभ्यस्तं तन्त्रम्, अनेकधा अभ्यस्तं मया तन्त्रमिति। एतद्वाक्छलम्।" चरकसं० पृ० २६६। "सामान्यच्छलं नाम यथा व्याधिप्रशमनायौषधमित्युक्ते परो ब्रूयात् सत् सत्प्रशमनायेति भवानाह, सन् हि रोगः सदौषधम्, यदि च सत् सत्प्रशमनाय भवति सन् हि कासः सन् क्षयः, सत्सामान्यात् कासस्ते क्षयप्रशमनाय भविष्यति इति।" चरकसं० पृ० २६६। "यथा कश्चिदाह–यो मया परिहितः स नवकम्बलः अत्र दूषणं (वदेत्) यद्भवता परिहितं तदेकमेव वस्त्रं कथं नवेति। अत्र प्रतिवदेत् मया नव इत्युक्तं तथा च नवः कम्बलः न तु नवेति। अत्र दूषयेत् कथं नव ? नवलोमैर्निर्मितत्वान्नव इत्युक्ते प्रतिवादी वदेत् तत्त्वतोऽपरिमितानि लोमानि कथं नवलोमानीत्युच्यते ? अत्राह–नव इति मया पूर्वमुक्तं न तु नवसंख्या। अत्र दूषणं तद्वस्त्रं युष्माकमेवेति ज्ञातं कस्मादेतन्न वः कथ्यते। अत्रोत्तरम्-मया नव इत्युक्तं किन्तु न व इति नोक्तम्। अत्र दूषणम्–भवतः कायं कम्बलो वस्त इति प्रत्यक्षमेतत्, कथमुच्यते न वः कम्बलः। अयं हेत्वाभास इत्युच्यते वाक्छलञ्च। अपरञ्च वाक्छलम्, यथा गिरिर्दह्यते इत्युक्ते दूषणम्–तत्त्वतः तृणतरवो दह्यन्ते कथं गिरिर्दह्यत इत्युक्तम्। एतद्वाक्छलमित्युच्यते।" उपायहृदय पृ० १५। "नवकम्बलोऽयं माणवक इति प्रयोगः।···" न्यायभा०, न्याय वा० १।२।१२। न्यायसार पृ० १६। न्यायमं० पृ० ६१४। न्यायकलिका पृ० १६।

"संभवतोऽर्थस्य अतिसामान्ययोगाद् असद्भूतार्थकल्पना सामान्यछलम्।" [न्यायसू० १।२।१३] अति–व्यापकं सामान्यम् अतिसामान्यम्, तद्योगात् क्वचिद् व्यक्तौ अर्थस्य कस्यचित् [2]संभवतो व्यक्तयन्तरे संभाव्यमाननिष्पत्तेः वक्त्राऽभिहितस्य सतो यद् असद्भूतार्थकल्पनया प्रत्यवस्थानम् तत् सामान्यनिमित्तत्वात् सामान्यछलम्। [3]यथा 'संभवति ब्राह्मणे विद्याचरणसम्पत्' इत्युक्ते छलवाद्याह–न; व्रात्येन अनेकान्तात्; तदयुक्तम्; हेतुत्वेन अनुपन्यासात्, न हि ब्राह्मणत्वं विद्याचरणसम्पत्तौ हेतुत्वेन उपन्यस्तम्। किं तर्हि? प्रशंसावादोऽयम् इति।

"धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेधः [4]उपचारच्छलम्।" [न्यायसू० १।२।१४] धर्मः क्रोशनादिः, तस्य विकल्पः उपचारः, तेन निर्देशे 'मञ्चाः क्रोशन्ति गायन्ति' इत्यादिप्रयोगे [5]कृते योऽर्थसद्भावप्रतिषेधः मुख्यार्थप्रतिषेधः–कथम् अचेतना मञ्चाः क्रोशान्ति[6]? किं तर्हि? पुरुषास्तत्रस्थाः क्रोशन्ति न मञ्चाः, इति उपचारनिमित्तं छलम् उपचारच्छलम्। तच्चायुक्तम्; यथावक्त्राभिप्रायमप्रतिषेधात्, अभिधानप्रयोगो हि लोके गौणो मुख्यश्च प्रसिद्ध इति।

हेतुप्रतिबिम्बनप्रायं प्रत्यवस्थानं जातिः। तथा च सूत्रम्–*"साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः।"* [न्यायसू० १।२।१८] सकलजातीनां सामान्यलक्षणमिदम्। प्रतिकूलम् अव-

---

१ व्यक्तौ च तत्त्वस्य कस्यचित् सम्बन्धे व्यक्तयन्तरे भां०। "अति व्यापकं सामान्यमतिसामान्यम्, तद्योगात् तत्संभवात् क्वचिद् व्यक्तार्थस्य कस्यचित् संभवतः संभाव्यमाननिष्पत्तेः वक्त्राऽभिहितस्य सतो याऽसद्भूतार्थकल्पना तया च प्रत्यवस्थानं तत् सामान्यनिमित्तं छलं सामान्यछलमिति।" न्यायमं० पृ० ६१५। न्यायकलि० पृ० १६। २ संभवेऽतो ब०, ज०। ३ "अहो नु खल्वसौ ब्राह्मणः विद्याचरणसम्पन्नः···यदि ब्राह्मणे विद्याचरणसम्पत् संभवति व्रात्येऽपि संभवेत्···अस्य प्रत्यवस्थानम्–अविवक्षितहेतुकस्य विषयानुवादः प्रशंसार्थत्वात्···सम्पद्विषयो ब्राह्मणत्वं न सम्पद्धेतुः···।" न्यायभा०, न्यायवा० १।२।१३। "अपि च छलं द्विविधं पूर्ववत् सामान्यञ्चेति। यथा संस्कृता धर्माः शून्या आकाशवदित्युक्ते दूषणम्–उभयोरपि शून्यत्वमभावश्च तदा निःस्वभावा धर्माः आकाशतुल्या इति सामान्यछलम्।" उपायहृदय पृ० १५। ४ "उपचारप्रयोगे मुख्यार्थकल्पनया प्रतिषेध उपचारच्छलम्।" न्यायसार पृ० १७। न्यायकलिका पृ० १६। ५ कृतेऽर्थ–आ०। ६–न्ति पुरु–आ०, ब०, ज०, भां०। ७ "अत्र समाधिः–प्रसिद्धे प्रयोगे वक्तुर्यथाभिप्रायं शब्दार्थयोरनुज्ञा प्रतिषेधो वा न छन्दतः, प्रधानभूतस्य शब्दस्य भाक्तस्य च गुणभूतस्य प्रयोग उभयोर्लोकसिद्धः, सिद्धप्रयोगे यथा वक्तुरभिप्रायः तथा शब्दार्थावनुज्ञेयौ प्रतिषेध्यौ वा न छन्दतः। यदि वक्ता प्रधानशब्दं प्रयुङ्क्ते तथाभूतस्याभ्यनुज्ञा प्रतिषेधो वा न छन्दतः। अथ गुणभूतं तदा गुणभूतस्य, यत्र तु वक्ता गुणभूतं शब्दं प्रयुङ्क्ते प्रधानभूतमभिप्रेत्य परः प्रतिषेधति, स्वमनीषया प्रतिषेधोऽसौ भवति न परोपालम्भ इति।" न्यायभा० १।२।१४। ८ "प्रतीपमवस्थानं प्रत्यवस्थानम्।" न्यायवा० १।२।१८। "तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिरोधासमर्थो हेतुः।" न्यायवा० ५।१।१। "यदेवं प्रकारं प्रत्यवस्थानं हेतुप्रतिबिम्बवर्त्मना क्रियते सा जातिः।" न्यायमं० पृ० ६१९। न्यायकलिका पृ० १७। "प्रयुक्ते हेतौ समीकरणाभिप्रायेण प्रसङ्गो जातिः।" न्यायसार पृ० १७।

स्थानम् प्रत्यवस्थानम्, साधर्म्येण वैधर्म्येण वा यत् प्रत्यवस्थानं हेतुप्रतिबिम्बनप्रायं सा जातिः इति । तासां चतुर्विंशतिप्रकारो विभागः–"*साधर्म्य-वैधर्म्य-उत्कर्ष-अपकर्ष-वर्ण्य-अवर्ण्य-विकल्प*[2]*-साध्य-प्राप्ति-अप्राप्ति-प्रसङ्ग-प्रतिदृष्टान्त-अनुपपत्ति-संशय-प्रकरण-अहेतु-अर्थापत्ति-अविशेष-उपपत्ति-उपलब्धि-अनुपलब्धि-नित्य-अनित्य-कार्यसमाः*[3]*।*" [*न्यायसू०* ५।१।१] इतिसूत्रकारवचनात् । ५

तत्र साधर्म्य-वैधर्म्यसमयोर्लक्षणम्–"*साधर्म्य-वैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्य-वैधर्म्यसमौ ।* [*न्यायसू०* ५।१।२] साधर्म्येण वैधर्म्येण वा साधनमभिधाय सिसाधयिषितपक्षोपसंहरे साधनवादिना कृते साध्यधर्मविपर्ययोपपादनाय साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः[4] प्रतिषेधः । यथा अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात्, यत् प्रयत्नानन्तरीयकं

---

१ "विपरीतखण्डनम्, असत्खण्डनम्, विरुद्धखण्डनं चेति । यदि खण्डनमेतत् त्रिविधदोषोपेतं तदा निग्रहस्थानम्···विपरीतखण्डनं दशविधम्–साधर्म्यखण्डनम्, वैधर्म्यखण्डनम्, विकल्पखण्डनम्, अविशेषखण्डनम्, प्राप्त्यप्राप्तिखण्डनम्, अहेतुखण्डनम्, उपलब्धिखण्डनम्, संशयखण्डनम्, अनुक्तिखण्डनम्, कार्यभेदखण्डनम्···।" (पृ० १२) "असत्खण्डनं त्रिविधम्–अवर्ण्य (व्यञ्जक) खण्डनम्, अर्थापत्ति (व्यञ्जक) खण्डनम्, प्रतिदृष्टार्थ (व्यञ्जक) खण्डनञ्च ।" (पृ० २४) विरुद्धखण्डनं त्रिविधम्–अनुत्पत्तिखण्डनम्, नित्यताखण्डनम्, स्वार्थविरुद्धखण्डनञ्च···।" (पृ० २८) सम्यक्खण्डनं पञ्चविधम्–इष्टार्थदूषणम्, अनिष्टार्थव्यक्तिः, प्रसङ्गव्यक्तिः, विषमार्थव्यक्तिः, सर्वन्यायसिद्धिलाभव्यक्तिः । (पृ० ३०)" तर्कशास्त्र । "एषां विंशतिविधानां सारो द्विविधः साधर्म्यं वैधर्म्यञ्च···एवं दूषणं विंशतिविधम् यथा–उत्कर्षसमम्, अपकर्षसमम्, भेदाभेदसमम्, प्रश्नबाहुल्यमुत्तरालपता, प्रश्नाल्पतोत्तरबाहुल्यम्, हेतुसमम्, कार्यसमम्, व्याप्तिसमम्, अव्याप्तिसमम्, कालसमम्, प्राप्तिसमम्, अप्राप्तिसमम्, विरुद्धम्, अविरुद्धम्, संशयसमम्, असंशयसमम्, प्रतिदृष्टान्तसमम्, श्रुतिसमम्, श्रुतिभिन्नम्, अनुपपत्तिसमञ्चेति प्रश्नोत्तरधर्मा विंशतिधा ।" उपायहृदय पृ० २७ । २–*ल्यसा*–श्र० । ३ "समीकरणार्थं प्रयोगः समः, साधर्म्यमेव समं वैधर्म्यमेव सममिति समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः ।··· विशेषहेत्वभावो वा समार्थः न भवता विशेषहेतुः कश्चिद् अपदिश्यत इति ।···न च वादिप्रतिवादिनोस्तुल्यता समार्थः ; जातेरसदुत्तरत्वात् । नियमेनैव जातिवादी असद्वादी भवति, वादिनां तु सदसद्वादित्वेऽनियम इति ।" न्यायवा० ५।१।१ । "आभिमानिकं साम्यं न वास्तवमित्यर्थः ।" ता० टी० ५।१।१ । ४ "साधर्म्येणोपसंहारे साध्यधर्मविपर्ययोपपत्तेः साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः प्रतिषेधः ।···अथ साधर्म्यसमः–क्रियावान् लोष्टः क्रियाहेतुगुणयुक्तो दृष्टः तथा चात्मा तस्मात् क्रियावान् इति, न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यात् निष्क्रियो न पुनः क्रियावत्साधर्म्यात् क्रियावानिति विशेषहेत्वभावात् साधर्म्यसमः ।" न्यायभा०, वा० ५।१।२ । न्यायमं० पृ० ६२२ । न्यायसार पृ० १८ । न्यायकलि० पृ० १७ । "वस्तुसाधर्म्यप्रत्यवस्थानं साधर्म्यखण्डनमित्युच्यते ।" तर्कशा० पृ० १२ ।

तदनित्यम् यथा घटः' इति साधर्म्येण हेतौ प्रयुक्ते[1] जातिवादी साधर्म्येणैव प्रत्यवतिष्ठते–'नित्यः शब्दः निरवयवत्वात्, यन्निरवयवं तत् नित्यं दृष्टम् यथा आकाशम्' इति, न चात्र विशेषहेतुरस्ति घटसाधर्म्यात् प्रयत्नानन्तरीयकत्वाद् अनित्यः शब्दः न च आकाशसाधर्म्यात् निरवयवत्वात् नित्य इति। वैधर्म्येण वा प्रत्यवतिष्ठते–नित्यःशब्दो निरवयवत्वात्, यत् पुनरनित्यं तत् सावयवं दृष्टम् यथा घटः, न चास्ति विशेषहेतुः घटसाधर्म्यात् प्रयत्नानन्तरीयकत्वात् अनित्यः शब्दः न पुनः घटवैधर्म्यात् निरवयवत्वात् नित्य इति।

वैधर्म्यहेतावपि साधनवादिना प्रयुक्ते 'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् यत् पुनरनित्यं न भवति तत् प्रयत्नानन्तरीयकमपि न भवति यथा आकाशम्' इत्यत्रापि एतेनैव पूर्वोक्तप्रयोगद्वयेन प्रत्यवस्थानं वैधर्म्यसमं[2] इति।

उत्कर्षसमादीनां लक्षणम्–"*साध्यदृष्टान्तयोः धर्मविकल्पाद् उभयसाध्यत्वाच्च उत्कर्षापकर्ष-वर्ण्य-अवर्ण्य-विकल्प-साध्यसमाः।*" [न्यायसू० ५।१।४] यत्र दृष्टान्तधर्मं साध्यधर्मिणि असन्तमपि आरोपयत्तु[3] (पयन्) उत्कर्षेण प्रत्यवस्थानं करोति सा उत्कर्षसमा जातिः। यथा 'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवत्' इत्युक्ते परः प्राह–'यदि प्रयत्नानन्तरीयकत्वात् घटवद् अनित्यः शब्दः तर्हि तद्वदेव मूर्त्तोऽप्यस्तु, अथ न मूर्त्तः तर्हि अनित्योऽपि माभूत् अविशेषात्' इति।

[4]दृष्टान्तधर्मविकल्पनेनैव साध्यधर्मिणि सिद्धस्यापि धर्मस्य अपकर्षेण प्रत्यवस्थानम् अपकर्षसमा जातिः। यथा अस्मिन्नेव प्रयोगे घटः प्रयत्नानन्तरीयकः अश्रावणो दृष्टः शब्दोऽपि तथास्तु, अन्यथा अनित्यो न स्याद् अविशेषात् इति।

ख्यापनीयो वर्ण्यः साध्यधर्मिधर्मः, तद्विपर्ययादवर्ण्यो दृष्टान्तधर्मः, तौ वर्ण्याऽवर्ण्यौ विपर्यस्यन् इतरम् इतरेण समीकुर्वन् प्रत्यवस्थानं करोति–'यदि शब्दोऽनित्यत्वेन वर्ण्यते–साध्यते

१–क्ते स जाति–अ०। २ "वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः।" न्यायवा०, भा०, ५।१।२। न्यायसार पृ० १८। न्यायमं० पृ० ६२२। न्यायकलिका पृ० १७। "वस्तुवैधर्म्यप्रत्यवस्थानं वैधर्म्यखण्डनमित्युच्यते।" तर्कशा० पृ० १४। ३ आरोपतुत्कर्षे–आ०। "...असन्तमध्यारोपयन्नुत्कर्षेण प्रत्यवस्थानं यत्करोति स उत्कर्षसमः प्रतिषेधः।" न्यायमं० पृ० ६२३। ४ "दृष्टान्तधर्मं साध्ये समासजत उत्कर्षसमः।" न्यायभा० ५।१।४। "अविद्यमानधर्माध्यारोप उत्कर्षः।" न्यायवा० पृ० ५३२। न्यायसार पृ० १८। न्यायकलि० पृ० १७। उपायहृदय पृ० २७। ५ "साध्ये धर्माभावं दृष्टान्तात् प्रसजतोऽपकर्षसमः।" न्यायभा० ५।१।४। "विद्यमानधर्मापचयोऽपकर्षः।" न्यायवा० ५।१।४। न्यायमं० पृ० ६२३। न्यायकलि० पृ० १७। उपायहृदय पृ० २७।

तदा घटोऽपि वर्ण्यताम्-साध्यताम्' इति वर्ण्यसमा। 'घटश्चेन्न वर्ण्यते–न साध्यते तर्हि शब्दोऽपि न वर्ण्यताम्' इति अवर्ण्यसमा।

धर्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमा। यथा अत्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते–प्रयत्नानन्तरीयकं किञ्चिन् मृदु दृश्यते प्रवेण्यादि, किञ्चित् कठिनं कर्परादि, एवं प्रयत्नानन्तरीयकं घटादि अनित्यं भविष्यति शब्दादि तु नित्यमिति। ५

उभयोरपि साध्यदृष्टान्तयोः साध्यत्वापादनेन प्रत्यवस्थानं साध्यसमा। यथा अत्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते–यदि यथा घटः तथा शब्दः तर्हि यथा शब्दः तथा घटोऽस्तु, शब्दश्च अनित्यतया साध्यः इति घटोऽपि साध्य एव स्यात्, कथमन्यथा तेन तुल्यता?

प्राप्त्यप्राप्तिविकल्पनपूर्वकम् उभयत्रापि दोषापादनं प्राप्ति-अप्राप्तिसमौ[६]। हेतौ साधनवादिना प्रयुक्ते प्रतिवादी आह–अयं हेतुः प्राप्य साध्यं साधयेत्, अप्राप्य वा? यदि प्राप्य; तर्हि १० द्वयोर्लब्धस्वरूपयोर्युगपत् संभवात् कथमेकस्य साध्यता अन्यस्य हेतुता विशेषाऽभावात्? इति प्राप्तिसमः प्रतिषेधः। अथ अप्राप्य हेतुः साध्यं साधयेत्; तर्हि सर्वं साध्यं किन्न असौ साधयेद् अविशेषात्? नहि अप्राप्य प्रदीपः प्रकाश्यं प्रकाशयति इति अप्राप्तिसमः।

"दृष्टान्तस्य कारणाऽनपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्ग-प्रतिदृष्टान्तसमौ।" [न्यायसू० ५।१।६] यथा प्राक्तने एव साधने घटादेर्दृष्टान्तस्य अनित्यतायां किं कारणम्? १५

---

१ "ख्यापनीयो वर्ण्यः विपर्ययादवर्ण्यः, तावेतौ साध्यदृष्टान्तधर्मौ विपर्यस्यतो वर्ण्याऽवर्ण्यसमौ भवतः।" न्यायभा० ५।१।४। "वर्ण्यः साध्यः" न्यायवा० ५।१।४। न्यायमं० पृ० ६२३। न्यायसार पृ० १८। न्यायकलिका पृ० १८। "वर्ण्यसमो नामाहेतुः यो हेतुर्वर्ण्याविशिष्टः। यथा परो ब्रूयात् बुद्धिरनित्या शब्दवदिति। अत्र वर्ण्यः शब्दो बुद्धिरपि वर्ण्या तदुभयवर्ण्याविशिष्टत्वाद्वर्ण्यसमोप्यहेतुः।" चरकसं० पृ० २६७। २ "अवर्ण्यः असाध्यः।" न्यायवा० ५।१।४। "प्रत्यक्षविषये यद्धेत्वन्वेषणं तदवर्ण्यखण्डनमुच्यते।" तर्कशा० पृ० २४। ३ "साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसजतो विकल्पसमः।" न्यायभा० ५।१।४। "धर्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमः।" न्यायमं० पृ० ६२३। न्यायकलि० पृ० १८। ४ "हेत्वाद्यवयवयोगी धर्मः साध्यः, तं दृष्टान्ते प्रसजतः साध्यसमः।" न्यायभा० ५।१।४। "उभयोरपि साध्यदृष्टान्तयोः साध्यत्वापादनेन साध्यसमः।" न्यायमं० पृ० ६२४। न्यायसार पृ० १९। न्यायकलि० पृ० १८। ५ साध्यते भा०, श्र०। ६ "प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ।" न्यायसू० ५।१।७। "प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः, अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः।" न्यायभा० ५।१।७। न्यायसार पृ० १९। "प्राप्त्यप्राप्तिविकल्पनपूर्वकमुभयत्रापि दोषापादनं प्राप्त्यप्राप्तिसमौ।" न्यायमं० पृ० ६२४। न्यायकलि० पृ० १८। "हेतुः साध्यं प्राप्नोति, न वा? यदि साध्यं प्राप्नोति तदाऽसाधकः, अथ हेतुःसाध्यं न प्राप्नोति तदाप्यसाधकः। एतत्प्राप्त्यप्राप्तिखण्डनमुच्यते।" तर्कशा० पृ० १७। उपायहृदय पृ० २९।

न च तदन्तरेण साध्यसिद्धिः अतिप्रसङ्गात् हेत्वन्तरान्वेषणे चानवस्था इति प्रसङ्गसमः[1] प्रतिषेधः ।

प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः[2] । यथा प्रयत्नानन्तरीयको घटादिः अनित्यो दृष्टः, तथा आकाशं प्रयत्नानन्तरीयकं नित्यं दृश्यते, तद्वत् शब्दोऽपि नित्यः स्यात् । कः पुनः आकाशस्य प्रयत्नानन्तरीयकत्वं वदेत् ? कूपखननादिना आकाशस्य[3] कार्यतां मन्वानः कश्चिद् एवं ब्रूयात् । न चैवं व्यभिचारोद्भावनमेतत् सम्यगुत्तरं न असदुत्तरप्रकारो जातिप्रयोगः इत्यभिधातव्यम् ; यतो न हेतोरनैकान्तिकत्वम् उद्भावयन्नसौ साधुरिव जातिवादी प्रत्यवतिष्ठते, अपि तु दृष्टान्तबलेन नित्यत्वमेव साधयन् उत्थित[4] इति ।

"प्रागुत्पत्तेः कारणाऽभावाद् अनुत्पत्तिसमः ।"[5] [न्यायसू० ५।१।१२] यथा अत्रैव प्रयोगे जातिवादी आह–पूर्वमनुत्पन्ने शब्दाख्ये धर्मिणि प्रयत्नानन्तरीयकत्वं धर्मः क्व वर्त्तताम्, अलब्धपक्षवृत्तिश्च कथमनित्यत्वं साधयेत् ? असिद्धे च अनित्यत्वे शब्दस्य बलात् नित्यत्वमेव सिद्ध्येत्। कारणाऽभावात्–अनित्यत्वसिद्धिकारणस्य प्रयत्नानन्तरीयकत्वस्य अभावात् । अथवा शब्दोत्पादककारणाभावाद् अनुत्पन्ने शब्दे निराश्रयो हेतुरिति ।

"सामान्य-दृष्टान्तयोः ऐन्द्रियकत्वे समाने नित्याऽनित्यसाधर्म्यात्[6] *संशयसमः ।"* [न्यायसू० ५।१।१४] यथा अत्रैव प्रयोगे परः प्रत्यवतिष्ठते–घटेन अनित्येन प्रयत्नानन्तरीयकत्वं शब्दस्य साधर्म्यम्, सामान्येन च नित्येन ऐन्द्रियकत्वम्, ततः किं प्रयत्नानन्तरीयकत्वाद् अनित्यः शब्दः स्यात् किम्वा ऐन्द्रियकत्वात् नित्यः इति ?

---

१ "साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गेन प्रत्यवस्थानं प्रसङ्गसमः ।" न्यायभा० ५।१।९। न्यायमं० पृ० ६२५। न्यायकलि० पृ० १८ । २ "प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः ।" न्यायभा० ५।१।९। "प्रतिदृष्टान्तबलात् साधनम् , एतदुच्यते प्रतिदृष्टान्त (व्यञ्जक) खण्डनम् ।" तर्कशा० पृ० २६। उपायहृदय पृ० ३० । ३–काशकार्य–आ०, ब०, ज०, भां० । ४ उत्तिष्ठते ब०, ज० । "···साधुरिव जातिवादी प्रत्यवतिष्ठते अपि तु दृष्टान्तबलेन नित्यत्वमेष साधयन्नुत्थित इति ।" न्यायमं० पृ० ६२५ । ५ "अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमा ।" न्यायभा० ५।१।१२ । न्यायसार पृ० २० । न्यायमं० पृ० ६२६ । न्यायकलि० पृ० १८। "प्रागुत्पत्तेः प्रयत्ननिरपेक्षत्वान्नित्य इत्यनुत्पत्तिखण्डनम् ।" तर्कशा० पृ० २८ । उपायहृदय पृ० ३० । ६ "साधर्म्यवैधर्म्यसमा जातिर्या पूर्वमुदाहृता सैव संशयेनोपक्रियमाणा संशयसमा ।" न्यायकलि० पृ० १९ । "संशयसमो नामाऽहेतुर्य एव संशयहेतुः स एव संशयच्छेदहेतुः यथा अयमायुर्वेदैकदेशमाह किन्त्वयं चिकित्सकः स्यान्नवेति संशये परो ब्रूयात्–यस्मादयमायुर्वेदैकदेशमाह तस्माच्चिकित्सकोऽयमिति । न च संशयहेतुं विशेषयति, एष चाऽहेतुः ।" चरकसं० पृ० २६६ । "संशयखण्डनम् विपक्षसाधर्म्यात् संशयवादेन खण्डनम् ।" तर्कशा० पृ० २१ । उपायहृदय पृ० २९ ।

"*उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ।*" [न्यायसू० ५।१।१६] यथा अस्मिन्नेव प्रयोगे अनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वात् कश्चिदनित्यतां साधयति, अपरः पुनः नित्याकाशसाधर्म्यात् निरवयवत्वात् नित्यताम् इति, अतः पक्षे विपक्षे च प्रक्रिया समाना सिद्धा इति ।

"*त्रैकाल्याऽनुपपत्तेः हेतोः अहेतुसमः ।*" [न्यायसू० ५।१।१८] यथा सम्यक् साधने प्रयुक्ते दूषणमपश्यन् जातिवादी आह–'साध्यात् पूर्वं वा साधनम्, उत्तरं वा, सहभावि वा स्यात् ? न तावत् पूर्वम्; असत्यर्थे तस्य साधनत्वाऽनुपपत्तेः । नाप्युत्तरम्; असति साधने पूर्वं साध्यस्य साध्यस्वरूपत्वाऽसंभवात् । नापि सहभावि; स्वतन्त्रतया प्रसिद्धयोः साध्य-साधनभावाऽसंभवात् सह्यविन्ध्यवत् इति अहेतुसमत्वेन प्रत्यवस्थानम् अहेतुसमः प्रतिषेधः ।

"*अर्थापत्तितः प्रतिपक्षसिद्धेः अर्थापत्तिसमः ।*" [न्यायसू० ५।१।२१] यथा प्राक्तन एव साधने प्रयुक्ते जातिवादी आह–यदि घटसाधर्म्यात् प्रयत्नानन्तरीयकत्वाद् अनित्यः शब्दः तदा अर्थादापद्यते–' निरवयत्वात् आकाशसाधर्म्यात् नित्यः ' इति ।

"*एकधर्मोपपत्तेरविशेषे सर्वाऽविशेषप्रसङ्गात् सङ्भावोपपत्तेः अविशेषसमः ।*" [न्यायसू० ५।१।२३] यथा अत्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते–यदि शब्द-घटयोः एको धर्मः प्रयत्नानन्तरीयकत्वमस्ति इति तयोः अनित्यत्वाऽविशेषोऽभिधीयते, तर्हि सर्वार्थेषु सत्त्वधर्मस्य उपपत्तेः अनित्यत्वाऽविशेषः स्यात् इति ।

---

१ –याप्रसि–ब०, ज० । २ "उभयेन नित्येन चानित्येन साधर्म्यात् पक्षप्रतिपक्षयोः प्रवृत्तिः प्रक्रिया···प्रकरणानतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः ।" न्यायभा० ५।१।१६ । "द्वितीयपक्षोत्थापनबुद्धया प्रयुज्यमाना सैव साधर्म्यसमा वैधर्म्यसमा जातिः प्रकरणसमा भवति ।" न्यायकलि० पृ० १९ । "तत्र प्रकरणसमो नामाऽहेतुः यथा अन्यः शरीरादात्मा नित्य इति पक्षे ब्रूयात्–यस्मादन्यः शरीरादात्मा तस्मान्नित्यः, शरीरं ह्यनित्यमतो विधर्मिणा चात्मना भवितव्यमित्येष चाऽहेतुः, न हि य एव पक्षः स एव हेतुः ।" चरकसं० पृ० २६६ । ३–मानात्सिद्धा ब०, ज० । ४ "हेतुः साधनं पूर्वं पश्चात् सह वा भवेत्···इति हेतुरहेतुना न विशिष्यते, अहेतुना साधर्म्यात् प्रत्यवस्थानमहेतुसमः ।" न्यायभा० ५।१।१८ । न्यायमं० पृ० ६२८ । न्यायसार पृ० २० । न्यायकलि० पृ० १९ । "त्रैकाल्ये हेतोरसम्भव इत्यहेतुखण्डनमुच्यते । प्रतिवादी प्राह–किं हेतुः साध्यात्पूर्वं पश्चाद् युगपद्वा ?···" तर्कशा० पृ० १८ । ५–र्वं सा–ब०, ज० । ६ अस्य श्र० । ७–भवत्वात् भां०, श्र० । ८–भवाभावात् श्र० । ९–विन्ध्यादिवत् श्र० । १० "अर्थादापद्यते प्रतिपक्षसिद्धिरित्येवं क्रियमाणः प्रतिषेधः अर्थापत्तिसमो भवति ।" न्यायमं० पृ० ६२९ । विपक्षेऽर्थापत्तिरेतदर्थापत्तिखण्डनम् ।" तर्कशा० पृ २५ । ११ "अविशेषोपपादनेन प्रत्यवस्थानमविशेषसमः ।" न्यायमं० पृ० ६२९ । न्यायकलि० पृ० १९ । न्यायसार पृ० २१ । "एकधर्मख्यापनात् सर्वस्याविशेषेण प्रत्यवस्थानमविशेषखण्डनमुच्यते ।" तर्कशा० पृ० १५ ।

"*उभयकारणोपपत्तेः उपपत्तिसमः ।*" [न्यायसू० ५।१।२५] यथा अस्मिन्नेव साधने प्रयुक्ते जातिवादी प्रत्यवतिष्ठते–यदि अनित्ये कारणं प्रयत्नानन्तरीयकत्वमस्ति इति अनित्योऽसौ तदा नित्यत्वेऽपि अस्य कारणं निरवयवत्वम् अस्ति इति नित्योऽस्तु इति ।

"*निर्दिष्टकारणाभावेऽप्युपलम्भात् उपलब्धिसमः ।*" [न्यायसू० ५।१।२७] निर्दिष्टस्य साध्यधर्मसिद्धिकारणस्य अभावेऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थानम् उपलब्धिसमः प्रतिषेधः। यथा अत्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते–शाखादिभङ्गजे शब्दे विद्युदादौ च प्रयत्नानन्तरीयकत्वाभावेऽपि अनित्यत्वमस्ति इति ।

"*तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेः अनुपलब्धिसमः ।*" [न्यायसू० ५।१।२६] यथा 'प्रागुच्चारणाद् अविद्यमानः शब्दः असत्यावरणेऽनुपलब्धेः, आवरणाऽसत्त्वञ्च अनुपलब्धेः सिद्धम्, यस्य तु दर्शनात् प्राग् विद्यमानस्य अनुपलब्धिः न तस्य आवरणाऽनुपलब्धिः यथा पटाद्यावृतस्य घटादेः, आवरणाऽनुपलब्धिश्च श्रवणात् प्राक् शब्दस्य' इत्युक्ते जातिवादी आह–तदनुपलब्धेः शब्दावरणाऽनुपलब्धेरप्यनुपलम्भाद् अभावसिद्धिः 'आवरणाऽनुपलब्धिर्नास्ति अनुपलब्धेः' इति, तद्विपरीतोपपत्तेः शब्दस्य अभावविपरीतत्वेन भावस्योपपत्तेः अनुपलब्धिसमः प्रतिषेधः ।

"*साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वाऽनित्यत्वप्रसङ्गाद् अनित्यसमः ।*" [न्यायसू० ५।१।३२] यथा अस्मिन्नेव प्रयोगे परः प्रत्यवतिष्ठते–यदि शब्दस्य अनित्येन घटेन साधर्म्यं प्रयत्नानन्तरीयकत्वमस्ति इति अनित्यत्वं स्यात्, तदा सर्वभावानां सत्त्वादिना घटेन साधर्म्यमस्ति इति अनित्यत्वं स्यादिति ।

---

१ "उभयस्य अनित्यत्वस्य नित्यत्वस्य च कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः ।" न्यायभा० ५।१।२५ । न्यायकलि० पृ० १९ । "ननु सैवेयं साधर्म्यादिसमा प्रकरणसमा वा जातिर्न भेदान्तरम्; मैवम्; उद्भावनप्रकारेण भेदात्। परपक्षोपमर्दबुद्ध्या साधर्म्यादिसमा जातिः प्रयुज्यते, पक्षान्तरोत्थापनास्थया प्रकरणसमा, अप्रतिपत्तिपर्यवसायित्वाशयेनेयमुपपत्तिसमेति ।" न्यायमं० पृ० ६३० । २ उपलम्भस–भां० । "सर्वसाध्यारोपेण अव्यापकत्वं साधनस्येत्युपलब्धिसमार्थः। न्यायवा० ५।२।२७। न्यायसार पृ० २१ । न्यायमं० पृ० ६३१ । "विशिष्टहेतुना नित्यतावर्णनादोषोऽहेतुरिति उपलब्धिखण्डनमुच्यते ।" तर्कशा० पृ० १९ । ३ "अनुपलब्ध्या प्रत्यवस्थानमनुपलब्धिसमा ।" न्यायकलि० पृ० २० । न्यायमं० पृ० ६३१ । न्यायसार पृ० २१ । ४ "सर्वभावानित्यत्वप्रसङ्गेन प्रत्यवस्थानमनित्यसमः ।··· अविशेषसमैवेयं जातिरिति चेत्; तत्र हि सत्तायोगात् सर्वभावनामविशेष आपादितः इह तु घटसाधर्म्यादेष अनित्यत्वमापादितमिति उद्भावनभङ्गिभेदाच्च जातिनानात्वमिति ।" न्यायमं० पृ० ६३२ । न्यायकलि० पृ० २० । "अविशेषसमातोऽनित्यसमा न भिद्यते तत्रापि सर्वाविशेष इहापीति । भिद्यते, तत्र सर्वाविशेष इह सर्वानित्यत्वमिति ।" न्यायवा० ५।१।३२ । ५ अनित्यत्वेन ज० ।

"नित्यमनित्यभावाद् अनित्ये नित्यत्वोपपत्तेः नित्यसमः।" [न्यायसू० ५।१।३५] यथा 'अनित्यः शब्दः' इत्युक्ते जातिवादी अनित्यत्वाख्यसाध्यधर्मस्वरूपविकल्पनेन शब्दस्य नित्यत्वमापादयति; तथाहि–किमिदम् अनित्यत्वं शब्दस्य नित्यम्, अनित्यं वा ? यदि नित्यम्; तर्हि धर्मस्य नित्यत्वात् तदाश्रयस्यापि शब्दस्य नित्यमनित्यभावाद् अनित्यधर्माधारतयाऽसत्त्वात् नित्यत्वम्। अथ अनित्यम्; तत्रापि अनित्यत्वे अनित्ये सिद्धं नित्यत्वं शब्दस्य इति।

"प्रयत्नकार्याऽनेकत्वात् कार्यसमः।" [न्यायसू० ५।१।३७] यथा 'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात्' इत्युक्ते परः प्रयत्नकार्याऽनेकत्वोपन्यासेन प्रत्यवतिष्ठते–प्रयत्नस्य कार्यवैविध्यमुपलभ्यते, किञ्चिद् असदेव प्रयत्नेन अभिनिर्वर्त्यते यथा घटादि, किञ्चित् सदेव आवरणापनयनद्वारेण अभिव्यज्यते यथा काण्डपटाद्यावृतं घटादि, इति कथमतः शब्दस्य अनित्यता इति ?

सत्यवस्त्वप्रतिभासो विपरीतप्रतिभासश्च निग्रहस्थानम्। तथा च सूत्रम्–*"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्।"* [न्यायसू० १।२।१९] विरुद्धा कुत्सिता वा प्रतिपत्तिः विप्रतिपत्तिः, तत्त्वप्रतिपत्तेरभावोऽप्रतिपत्तिः इति सकलनिग्रहस्थानानां सामान्यलक्षणमिदम्। तानि

---

१ अनित्यत्वसाध्यधर्मस्वरूपविकल्पनेन शब्दनित्यत्वापादनं नित्यसमः प्रतिषेधः।" न्यायमं० पृ० ६३३। न्यायकलि० पृ० २०। न्यायसार पृ० २२। २ "प्रयत्नकार्यनानात्वोपन्यासेन प्रत्यवस्थानं कार्यसमः।...न चेयं संशयसमा जातिः; हेत्वर्थविकल्पनेन इह प्रत्यवस्थानात्। तथाहि–निरवयवत्वादाकाशसाधर्म्योपन्यासेन संशय आपादितः, इह तु साधनवाद्युक्तप्रयत्नानन्तरीयकत्वहेत्वर्थनिरूपणेनेति।" न्यायमं० पृ० ६३४। न्यायकलि० पृ० २१। उपायहृदय पृ० २८। "कार्यभेदात् घटवच्छब्द इति न वक्तव्यम्, एतत् कार्यभेदखण्डनमुच्यते।" तर्कशा० पृ० २३। ३–र्यद्वै वि–श्र०। ४ "विपरीता कुत्सिता वा प्रतिपत्तिः विप्रतिपत्तिः...अप्रतिपत्तिस्तु आरम्भविषयेऽप्यप्रारम्भः–परेण स्थापितं वा न प्रतिषेधति प्रतिषेधं वा नोद्धरति...।" न्यायभा० १।२।१९। "निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानि प्रायेण प्रतिज्ञाद्यवयवाश्रयाणि तत्त्ववादिनमतत्त्ववादिनञ्चाभिसम्प्लवन्ते।" न्यायभा० ५।२।१। निग्रहः पराजयः, तस्य स्थानमाश्रयः कारणमित्यर्थः। न्यायकलिका पृ० २१। "असाधनाङ्गवचनमदोषोद्भावनं द्वयोः। निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते॥" वादन्याय पृ० २। "प्रकृताशेषतत्त्वार्थप्रकाशपटुवादिनः। विब्रुवाणो ब्रवाणो वा विपरीतो निगृह्यते॥ तस्मादेकस्य प्रकृतसिद्धेरेव परस्य निग्रहो न प्रकारान्तरेण।" न्यायवि० वि० पृ० ५२७ उ०। "आस्तां तावदलाभादिरयमेव हि निग्रहः। न्यायेन विजिगीषूणां स्वाभिप्रायनिवर्त्तनम्॥" न्यायवि० वि० पृ० ५३२ पू०। "तत्रेह तात्त्विके वादेऽकलङ्कैः कथितो जयः। स्वपक्षसिद्धिरेकस्य निग्रहोऽन्यस्य वादिनः॥४६॥" तत्त्वार्थश्लो० पृ० २८१।

च द्वाविंशतिप्रकाराणि भवन्ति–"*प्रतिज्ञाहानिः, प्रतिज्ञान्तरम्, प्रतिज्ञाविरोधः, प्रतिज्ञासन्न्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थम्, अपार्थकम्, अप्राप्तकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्य्यनुयोज्योपेक्षणम्, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासाश्च निग्रहस्थानानि ।*" [न्यायसू० ५।२।१] इति सूत्रकारवचनात्[1]। तत्र[2] 'अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, पर्यनुयोज्योपेक्षणम्' इति अप्रतिपत्त्या सङ्गृहीतानि, शेषाणि विप्रतिपत्त्या।

तत्र प्रतिज्ञाहानेर्लक्षणम्–"*प्रतिदृष्टान्तधर्माऽनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः*[3] ।" [न्यायसू० ५।२।२] प्रतिज्ञासिद्धये वादिना साधने अभिहिते प्रतिवादिना च तत्र दूषणे, तृतीये वचसि वर्त्तमानो वादी यदि प्रतिदृष्टान्तधर्मं स्वदृष्टान्ते अनुजानाति तदा अस्य प्रतिज्ञा हीयते इति प्रतिज्ञाहानिः। यथा 'अनित्यः शब्दः ऐन्द्रियकत्वात् घटवत्' इत्युक्ते परः प्रत्यवतिष्ठते–'सामान्यम् ऐन्द्रियकं नित्यं दृष्टम् इत्यनैकान्तिकोऽयं हेतुः' इत्युक्ते साधनवादी आह–'यदि सामान्यम् ऐन्द्रियकं नित्यम्, कामं घटोऽपि तथास्तु' इति।

"*प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम्*[4] ।" [न्यायसू० ५।२।३]

---

१ "द्वाविंशतिविधा निग्रहस्थानापत्तिः–प्रतिज्ञाहानिः···।" तर्कशा० पृ० ३३। "निग्रहस्थानं नाम त्रिभिरभिहितस्य वाक्यस्यापरिज्ञानं परिषदि विज्ञानवत्याम्, यद्वा अननुयोज्यस्य अनुयोगः अनुयोज्यस्य चाननुयोगः। प्रतिज्ञाहानिरभ्यनुज्ञा कालातीतवचनमहेतवो न्यूनमतिरिक्तम् व्यर्थमपार्थकं पुनरुक्तं विरुद्धं हेत्वन्तरमर्थान्तरं निग्रहस्थानम्।" चरकसं० पृ० २६७। २ न्यायभाष्यकारेण मतानुज्ञाऽपि (१।२।२०) अप्रतिपत्त्या सङ्गृहीता। मञ्जरीकृता तु 'अननुभाषणमज्ञानमप्रतिभा विक्षेपः पर्यनुयोज्योपेक्षणम्' इति पञ्चैव अप्रतिपत्तिरूपेण गणितानि (न्यायमं पृ० ६३९, न्यायकलि० पृ० २२) प्रकृते तु मञ्जरीकृतामेव मतं समादृतम्। ३ "साध्यधर्मप्रत्यनीकेन धर्मेण प्रत्यवस्थिते प्रतिदृष्टान्तधर्मं स्वदृष्टान्ते अभ्यनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः।" न्यायभा० ५।२।२। भाष्यकारीयव्याख्याने वार्तिककारस्यं मतभेदः; तथाहि–"एतत्तु न बुद्ध्यामहे कथमत्र प्रतिज्ञा हीयते इति? हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोदिते तस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते। नित्यताप्रतिपत्तेश्चासिद्धता दृष्टान्तदोषो भवति, सोऽयं दृष्टान्तदोषेण साधनदोषेण वा निग्रहो न प्रतिज्ञाहानिः।···कथं तर्हि इदं सूत्रम्–'प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिरिति? दृष्टश्चासौ अन्ते व्यवस्थितश्च इति दृष्टान्तः, स्वश्चासौ दृष्टान्तश्चेति, स्वदृष्टान्तशब्देन पक्ष एव अभिधीयते। प्रतिदृष्टान्तशब्देन च प्रतिपक्षः, प्रतिपक्षश्चासौ दृष्टान्तश्चेति। एतदुक्तं भवति–परपक्षस्य यो धर्मस्तं स्वपक्ष एवानुजानाति···एषा प्रतिज्ञाहानिः।" न्यायवा० ५।२।२। "प्रतिज्ञासिद्धये वादिना साधनेऽभिहिते···।" न्यायमं० पृ० ६४०। न्यायसार पृ० २३। "प्रतिज्ञाहानिर्नाम सा पूर्वप्रतिगृहीतां प्रतिज्ञां पर्यनुयुक्तः परित्यजति।" चरकसं० पृ० २६६। "स्वप्रतिज्ञायां प्रतिपक्षाभ्यनुज्ञेति प्रतिज्ञाहानिः।" तर्कशा० पृ० ३३। ४ "····अनित्यः शब्दः इति पूर्वा प्रतिज्ञा, असर्वगतः इति द्वितीया प्रतिज्ञा प्रतिज्ञान्तरम्। तत्कथं निग्रहस्थानमिति? न प्रतिज्ञायाः साधनं प्रतिज्ञान्तरं

प्रतिज्ञातार्थस्य 'अनित्यः शब्दः' इत्यादेः ऐन्द्रिकत्वस्य हेतोर्व्यभिचारप्रदर्शनेन प्रतिषेधे कृते तं दोषमनुद्धरन् धर्मविकल्पं करोति–किमयम् असर्वगतः शब्दः घटवत्, किं वा सर्वगतः सामान्यवत्? यदि असर्वगतः घटवत्; तर्हि तद्वद्वेव अनित्योऽस्तु, इति सोऽयम् 'अनित्यः शब्दः' *इति पूर्वप्रतिज्ञातः* 'असर्वगतः शब्दः' इति प्रतिज्ञान्तरं कुर्वन् निगृह्यते साधनसामर्थ्याऽपरिज्ञानात् इति। ५

"*प्रतिज्ञा-हेत्वोर्विरोधः प्रतिज्ञाविरोधः।*" [न्यायसू० ५।२।४] यत्र[1] प्रतिज्ञा हेतुना विरुद्ध्यते हेतुर्वा प्रतिज्ञया स प्रतिज्ञाविरोधः। यथा गुणव्यतिरिक्तं द्रव्यम् रूपादिभ्यो भेदेनानुपलब्धेः इति।

"*पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः।*"[3] [न्यायसू० ५।२।५] यथा 'अनित्यः शब्दः ऐन्द्रियकत्वात् घटवत्' इत्युक्ते पूर्ववत् सामान्येन अनैकान्तिकत्वे हेतोरुद्भाविते १० प्रतिज्ञासन्न्यासं करोति–'क एवम् आह अनित्यः शब्दः' इति।

"*अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्।*"[4] [न्यायसू० ५।२।६] यथा एकप्रकृति इदं व्यक्तम् परिमाणात् घटादिवत्। परिमितत्वं हि घटादेः एकमृत्पूर्वकस्य दृष्टम्, तत् महदादिविकारजातेः प्रतीयमानम् एकप्रकृतिपूर्वकत्वं[6] साधयति, इत्यस्य हेतोः व्यभिचारेण प्रत्यवस्थानम्–एकप्रकृतीनां नानाप्रकृतीनाञ्च दृष्टं परिमाणम् इत्यस्य हेतोरहेतुत्वे निश्चितेऽ- १५ पि 'एकप्रकृतिसमन्वये सति विकाराणां परिमाणात्' इति तत्परिजिहीर्षया विशेषणमाह।

किन्तु हेतुदृष्टान्तौ साधनं प्रतिज्ञायाः, तदेतदसाधनोपादानमनर्थकमिति आनर्थक्यान्निग्रहस्थानमिति।" न्यायभा० ५।२।३। "तत्कथं निग्रहस्थानम्? साधनसामर्थ्यापरिज्ञानात्।" न्यायवा० ५।२।३। "प्रतिज्ञातार्थप्रतिषेधे परेण कृते धर्मान्तरविकल्पादर्थनिर्देशः प्रतिज्ञान्तरमुच्यते।" तर्कशा० पृ० ३४।

१ "यत्र प्रतिज्ञा हेतुना विरुद्ध्यते हेतुश्च प्रतिज्ञया स प्रतिज्ञाविरोधो नाम निग्रहस्थानम्।...एतेनैव प्रतिज्ञाविरोधोऽप्युक्तः, यत्र प्रतिज्ञा स्ववचनेन विरुद्ध्यते यथा श्रमणा गर्भिणी। हेतुविरोधोऽपि... एतेन प्रतिज्ञया दृष्टान्तविरोधोऽपि वक्तव्यः।" न्यायवा० ५।२।४। न्यायमं० पृ० ६४३। "हेतुप्रतिज्ञयोर्विरोधः प्रतिज्ञाविरोध इत्युच्यते।" तर्कशा० पृ० ३५। २ तत्र भां०। ३ "यः प्रतिज्ञातमर्थं प्रतिषेधे कृते परित्यजति स प्रतिज्ञासन्न्यासो वेदितव्यः।...एतत्साधनसामर्थ्यापरिच्छेदात् विप्रतिपत्तितो निग्रहस्थानम्।" न्यायवा० ५।२।५। न्यायसार पृ० २४। न्यायमं० पृ० ६४४। न्यायकलि० पृ० २३। "परेण स्वप्रतिज्ञाप्रतिषेधे कृते सन्न्यासोऽसमर्थनेति प्रतिज्ञासन्न्यासः।" तर्कशा० पृ० ३५। ४ "साधनान्तरोपादाने पूर्वस्यासामर्थ्यख्यापनान्निग्रहस्थानमिति। सामर्थ्ये वा हेत्वन्तरं व्यर्थमिति।" न्यायवा० ५।२।६। "हेत्वन्तरं नाम प्रकृतिहेतौ वाच्ये विकृतिहेतुमाह।" चरकसं० पृ० २६७। "अविशेषहेतौ स्थापिते पश्चाद्धेत्वन्तरोक्तिरिति हेत्वन्तरम्।" तर्कशा० पृ० ३६। ५ महादि–आ०। ६–त्वं प्रसा–ब०, ज०, भां०, श्र०।

"प्रकृतादर्थाद् अप्रतिसम्बद्धार्थम् अर्थान्तरम् ।" [न्यायसू० ५।२।७] यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुना साध्यसिद्धौ प्रकृतायां 'प्रकृतं हेतुं प्रमाणसामर्थ्येन अहमसमर्थः समर्थयितुम्' इत्यवस्थन्नपि कथामपरित्यजन् अर्थान्तरं ब्रवीति—'नित्यः शब्दः अस्पर्शवत्त्वात् इति, हेतुश्च हिनोतेर्धातोः तुप्रत्यये कृदन्तं पदम्, पदञ्च नाम-आख्यात-उपसर्ग-निपाताः इति प्रकृत्य नामादीनि व्याचष्टे' इति ।

"वर्णक्रमनिर्देशवत् निरर्थकम् ।" [न्यायसू० ५।२।८] अभिधेयरहितकेवलवर्णानुपूर्वीमात्रं निरर्थकं नाम निग्रहस्थानम् । यथा अनित्यः शब्दः जबगडदत्वात् घटधवत् इति ।

"परिषत्प्रतिवादिभ्यां त्रिरभिहितमपि अविज्ञातम् अविज्ञातार्थम् ।" [न्यायसू० ५।२।९] यत् साधनवाक्यं दूषणवाक्यं वा त्रिरभिहितमपि परिषदा प्रतिवादिना च न ज्ञायते 'अप्रसिद्धप्रयोगम् अतिद्रुतोच्चारितम्' इत्येवं प्रकारम् असामर्थ्यसंवरणाय धूर्तैराश्रीयते तद् अविज्ञातं नाम निग्रहस्थानम् ।

"पौर्वापर्याऽयोगात् अप्रतिसम्बद्धार्थम् अपार्थकम् ।" [न्यायसू० ५।२।१०] पूर्वाप-

---

१ "यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयात् नित्यः शब्दः अस्पर्शत्वादिति हेतुः, हेतुर्नाम हिनोतेर्धातोः तुनि प्रत्यये कृदन्तपदम्…।" न्यायभा० ५।२।७ । "अभ्युपगतार्थासङ्गतत्वान्निग्रहस्थानं यदभ्युपगतं तत्सम्बद्धमन्यदसम्बद्धमुच्यते ।" न्यायवा० ५।२।७ । "प्रकृतादर्थादर्थान्तरं तदनौपयिकमभिदधतोऽर्थान्तरं नाम निग्रहस्थानं भवति ।" न्यायमं० पृ० ६४५ । न्यायकलि० २३ । "अर्थान्तरं नाम यथा ज्वरलक्षणे वाच्ये प्रमेहलक्षणमाह ।" चरकसं० पृ० २६७ । "प्रकृतार्थाप्रतिसम्बद्धार्थाभिधानमर्थान्तरम् ।" तर्कशा० पृ० ३६ । २ **समाख्यात**—ब०, ज० । ३ "अभिधेयरहितवर्णानुपूर्वीप्रयोगमात्रं निरर्थकम् ।" न्यायमं० ६४६ । न्यायकलि० पृ० २४ । न्यायसार पृ० २५ । "साधनमनुपादानादज्ञानमेवं ब्रुवन् न साध्यं जानीत इति न साध्यं न साधनञ्चोपादत्ते इति निगृह्यते ।" न्यायवा० ५।२।८ । "अनर्थकं नाम यद्वचनमक्षरग्राममात्रमेव स्यात् पञ्चवर्गवत्, न चार्थतो गृह्यते ।" चरकसं० पृ० २६५ । "यदा वाद इष्टः तदा मन्त्रभाषणमिति निरर्थकम् ।" तर्कशा० पृ० ३६ । ४—**दशत्वात्** ब०, ज० । ५ **सधधवत्** ब०, ज० । **झभघढधषवत्** भां०, श्र० । ६ "यद्वाक्यं परिषदा प्रतिवादिना च त्रिभिरभिहितमपि न विज्ञायते श्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्येवमादिना कारणेन तदविज्ञातार्थम् । अविज्ञातार्थमसामर्थ्यसंवरणाय प्रयुक्तमिति निग्रहस्थानम् ।" न्यायभा० ५।२।९ । "निरर्थके सर्वेण सर्वमर्थशून्यता, इह तु भवन्नप्यर्थो नावगम्यते द्रुततोच्चारणादिव्यतिकरवशादिति ।" न्यायमं० पृ० ६४८ । "परिषत्प्रतिवादिभ्यां त्रिभिरभिहितमप्यविज्ञातमित्यविज्ञातार्थम् ।" तर्कशा० पृ० ३७ । ७ "यत्रानेकस्य पदस्य वाक्यस्य वा पौर्वापर्येण अन्वययोगो नास्ति इत्यसम्बद्धार्थत्वं गृह्यते, तत्समुदायार्थस्यापायादपार्थकम् ।" न्यायभा० ५।२।१० । "निरर्थकादपार्थकं न भिद्यते तत्राप्यर्थो न गम्यत इहापीति; भिद्यते इति ब्रूमः, तत्र हि वर्णमात्रम्, इह तु पदान्यसम्बद्धानि ।" न्यायवा० ५।२।१० ।" "अपार्थकं नाम यदर्थवच्च परस्परेण चायुज्यमानार्थकम् ।" चरकसं० पृ० २६६ । "पौर्वापर्यासम्बद्धोऽपार्थकम् ।" तर्कशा० पृ० ३७ ।

राऽसङ्गतपदकदम्बोच्चारणाद् अप्रतिष्ठितवाक्यार्थम् अपार्थकं नाम निग्रहस्थानम्। यथा दश दाडिमानि, षड् अपूपाः, कुण्डम्, अजाऽजिनम्, पललपिण्डः इत्यादि।

"अवयवविपर्यासवचनम् अप्राप्तकालम्।" [न्यायसू० ५।२।११] अवयवानां प्रतिज्ञादीनां विपर्यासेन यथाक्रमोल्लङ्घनेन प्रयुज्यमानम् अनुमानवाक्यम् अप्राप्तकालं नाम निग्रहस्थानं भवति। ५

"हीनमन्यतमेनापि अवयवेन न्यूनम्।" [न्यायसू० ५।२।१२] पञ्चावयवे वाक्ये प्रयोक्तव्ये तदन्यतमेनापि अवयवेन हीनं प्रयुञ्जानस्य न्यूनं नाम निग्रहस्थानं भवति।

"हेतूदाहरणाधिकम् अधिकम्।" [न्यायसू० ५।२।१३] एकेनैव हेतुना दृष्टान्तेन वा प्रतिपादितेऽर्थे हेत्वन्तरं दृष्टान्तान्तरं वा प्रयुञ्जानस्य अधिकं नाम निग्रहस्थानं भवति।

"शब्दार्थयोः पुनर्वचनं पुनरुक्तम् अन्यत्राऽनुवादात्।" [न्यायसू० ५।२।१४] शब्दस्य १०
अर्थस्य च अभिहितस्य पुनरभिधानं पुनरुक्तं नाम निग्रहस्थानम् अनुवादं वर्जयित्वा। तत्र शब्दपुनरुक्तम्–'अनित्यः शब्दः, अनित्य शब्दः' इति। अर्थपुनरुक्तम्–'अनित्यः शब्दः, निरोधधर्मको ध्वनिः' इति। अनुवादे पौनरुक्त्यं न दोषाय, यथा हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति। "अर्थादापन्नस्य स्वशब्देन पुनर्वचनम्।" [न्यायसू० ५।२।१५] पुनरुक्तम्–यथा 'उत्पत्तिधर्मकम् अनित्यम्' इत्यभिधाय अर्थादापन्नस्य अर्थस्य योऽभिधायकः १५
शब्दः तेन स्वशब्देन ब्रूयात् 'नित्यम् अनुत्पत्तिधर्मकम्' इति।

"विज्ञातस्य परिषदा त्रिरभिहितस्यापि अप्रत्युच्चारणम् अननुभाषणम्।" [न्याय-

---

१–कदम्बको–ब०, ज०। २ "यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनम् पललपिण्डः अधोरुकमेतत् कुमार्याः स्फयैकृतस्य पिता अप्रतिशीनः इति।" पात० महाभा० १।२।४५। न्यायभा० ५।२।१०। न्यायप्रवेशवृ० पृ०···। ३ "प्रतिज्ञायां दुष्टायां पश्चाद्धेतुस्थापनमप्राप्तकालम्।" तर्कशा० पृ० ३७। ४ "प्रतिज्ञाहेतूदाहरणोपनयनिगमनानामन्यतमेनापि न्यूनं न्यूनं भवति।" चरकसं० पृ० २६५। "पञ्चावयवा अन्यतमेन हीना न्यूनम्।" तर्कशा० पृ० ३७। "तत्कथं निग्रहस्थानम्? न साधनाभावे साध्यसिद्धिरिति।" न्यायवा० ५।२।१२। ५ "अधिकं नाम यदायुर्वेदे भाषमाणे बार्हस्पत्यमौशनसमन्यद्वाऽप्रतिसम्बद्धार्थमुच्यते।" चरकसं० पृ० २६५।" बहुहेतूदाहरणोक्तिरधिकम्।" तर्कशा० पृ० ३८। ६ "यद्वा पुनः प्रतिसम्बद्धार्थमपि द्विरभिधीयते तत्पुनरुक्तदोषादधिकम्। तच्च पुनरुक्तं द्विविधम्–अर्थपुनरुक्तं शब्दपुनरुक्तं च।" चरकसं० पृ० २६५। "पुनरुक्तं त्रिविधम्–शब्दपुनरुक्तम्, अर्थपुनरुक्तम्, अर्थापत्तिपुनरुक्तं च।" तर्कशा० पृ० ३८। ७ वा ब०, ज०। ८–स्य च शब्दस्य स्व–भां०, श्र०। ९ तेन शब्देन ब्रू–ब०, ज०। तेन ब्रू–आ०। "तेन स्वशेब्देन ब्रूयात्" न्यायभा० ५।२।१४। १० "परिषदा विज्ञातायाः प्रतिज्ञायाः त्रिरभिहिताया अपि यदि कश्चित्प्रत्युच्चारणासमर्थः तदाऽननुभाषणम्।" तर्कशा० पृ० ३९।

सू० ५।२।१६] परिषदा विदितस्य वादिना त्रिरुच्चरितस्यापि यद् अप्रत्युच्चारणं तद् अननुभाषणं नाम निग्रहस्थानं भवति, अप्रत्युच्चारयन् किमाश्रयं दूषणमभिदध्यात् इति ?

"अविज्ञातञ्च अज्ञानम् ।" [न्यायसू० ५।२।१७] परिषदा विज्ञातस्यापि वादिवाक्यस्य प्रतिवादिना यद् अविज्ञानं तद् अज्ञानं नाम निग्रहस्थानम्। अजानन् कस्य प्रतिषेधं कुर्यात् इति ?

"उत्तरस्याऽप्रतिपत्तिः अप्रतिभा ।" [न्यायसू० ५।२।१८] परपक्षप्रतिषेधः उत्तरम्, तद् यदा न प्रतिपद्यते तदा निगृहीतो वेदितव्यः ।

"कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ।" [न्यायसू० ५।२।१९] वादमुपक्रम्य सिसाधयिषितस्यार्थस्य अशक्यसाध्यतामवसाय कालयापनार्थं यत्र कर्त्तव्यं व्यासज्य कथां विच्छिनत्ति—'इदं मे करणीयं परिहीयते तस्मिन्नवसिते पश्चात् कथयामि' इति, स विक्षेपो नाम निग्रहस्थानम् ।

"स्वपक्षे दोषाऽभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ।" [न्यायसू० ५।२।२०] यः परेण आपादितं दोषमनुद्धृत्य अभ्युपगम्य च ब्रवीति—'भवत्पक्षेऽप्ययं दोषः समानः' इति सः परमतानुज्ञानात् मतानुज्ञा नाम निग्रहस्थानम् आपद्यते । यथा 'चौरो भवान् पुरुषत्वात् प्रसिद्धचौरवत्' इत्युक्ते स आह—'भवानपि चौरः पुरुषत्वाऽविशेषात्' इति ।

"निग्रहप्राप्तस्य अनिग्रहः पर्य्यनुयोज्योपेक्षणम् ।" [न्यायसू० ५।२।२१] पर्य्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयः—'इदं ते निग्रहस्थानम् आयातम् अतो निगृहीतोऽसि' इति

---

१ "परिषदा विज्ञाताया अपि प्रतिज्ञाया केनचिदविज्ञानमज्ञानमुच्यते ।" तर्कशा० पृ० ३९ । "अप्रतिपत्तितो निग्रहस्थानम् ।" न्यायवा० ५।२।१८ । २ "यदि परस्य प्रतिज्ञां न्याय्यवदीक्षते दूषणे चासमर्थस्तदाऽप्रतिभा ।" तर्कशा० पृ० ३९ । "उत्तरविषयाऽप्रतिपत्तिरज्ञानम्, प्रतिपत्तावपि तदप्रत्युच्चारणमननुभाषणम्, अनुभाषितेऽपि उत्तराप्रतिपत्तिरप्रतिभा ।" न्यायमं० पृ० ६५३ । ३ "स्वप्रतिज्ञाया दोषं ज्ञात्वा व्याजैः परिहारः कार्यान्तरकथनम् ।" तर्कशा० पृ० ३९ । ४ "यः परेण चोदितं दोषमनुद्धृत्य भवतोऽप्ययं दोष इति ब्रवीति सा मतानुज्ञा, परमतं स्वमतेऽनुजानाति । उदाहरणं भवांश्चौरः पुरुषत्वादिति । स तं प्रति ब्रूयात्—भवानपीति, सोऽभ्युपगम्य दोषं परपक्षेऽभ्यनुजानातीति निगृहीतो वेदितव्यः ।" न्यायवा० ५।२।२१। न्यायमं० पृ० ६५५ । "परदूषणे स्वपक्षदोषाभ्युपगम इति मतानुज्ञा ।" तर्कशा० पृ० ३९ । ५ "पर्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयः···।" न्यायभा० ५।२।२१ । न्यायमं० पृ० ६५६ । "यदि कश्चिन्निग्रहस्थानं प्राप्नुयात्, तस्य निग्रहापत्त्यनुद्भावनं तद्दूषणेच्छया तु दूषणस्थापनम् । तदर्थं च हीने किं प्रयोजनं दूषणेन ? असिद्धमेतत् दूषणम् । एतदुच्यते पर्यनुयोज्योपेक्षणम् ।" तर्कशा० पृ० ४० ।

वचनीयः, तं यः उपेक्षते नाऽनुयुङ्क्ते, स पर्य्यनुयोज्योपेक्षणात् निगृह्यते। एतच्च 'कस्य पराजयः' इति अनुयुक्तया परिषदा वचनीयम्, न खलु निग्रहप्राप्तः स्वं कौपीनं विवृणुयादिति।

"*अनिग्रहस्थाने निग्रहस्थानानुयोगो निरनुयोज्यानुयोगः।*" [न्यायसू० ५।२।२२] उपपन्नवादिनम् अनिग्रहार्हमपि 'निगृहीतोऽसि' इति यो ब्रूयात् स अभूतदोषोद्भावनात् निगृह्यत इति।

"*सिद्धान्तमभ्युपेत्य अनियमात् कथाप्रसङ्गः अपसिद्धान्तः।*" [न्यायसू० ५।२।२३] यः पूर्वं कञ्चन सिद्धान्तमभ्युपगम्य कथायां प्रवृत्तः सिसाधयिषितार्थसमर्थनरभसेन दूषणोद्धरणरभसेन वा स्वसिद्धान्तविरुद्धमभिधत्ते स अपसिद्धान्तेन निगृह्यते। यथा नित्यान् प्रतिज्ञाय शब्दादीन् पुनः अनित्यान् ब्रूते इति।

"*हेत्वाभासाश्च यथोक्ताः।*" [न्यायसू० ५।२।२४] यथोक्ताः पूर्वोक्तलक्षणैर्लक्षिताः हेत्वाभासाः पञ्च, असिद्ध-विरुद्ध-अनैकान्तिक-कालात्ययापदिष्ट-प्रकरणसमाः निग्रहस्थानं भवन्तीति।

अत्र प्रतिविधीयते। यत्तावदुक्तम्—'प्रमाण' इत्यादि; तदविचारितरमणीयम्; भवत्परिकल्पितानां प्रमाणादिषोडशपदार्थानां स्वरूपतः प्रमाणेन विचार्यमाणानामघटमानत्वेन तत्तत्त्वज्ञानात् निःश्रेयसप्राप्त्यनुपपत्तेः। यत् स्वरूपतः प्रमाणेन विचार्यमाणं नोपपद्यते न तत्तत्त्वज्ञानात् निःश्रेयसप्राप्तिः यथा तथाविधाद् इन्दुद्वयस्वरूपज्ञानात्, नोपपद्यन्ते च स्वरूपेण प्रमाणतो विचार्यमाणा भवत्परिकल्पिताः षोडशपदार्था इति। न च स्वरूपतः प्रमाणेन विचार्यमाणानां तेषामघटमानत्वमसिद्धम्; तथाहि—यत्तावद् भवद्भिः सकलपदार्थानां गरिष्ठत्वात् प्रथमतः प्रमाणपदार्थः प्रतिपादितः; स यथा स्वरूपतः प्रमाणेन विचार्यमाणो नोपपद्यते तथा प्रत्यक्षप्रमाणस्वरूपनिरूपणावसरे प्रपञ्चितम्, अनुमानादिप्रमाणस्वरूपनिरूपणप्रघट्टके प्रपञ्चयिष्यते च।

षोडशपदार्थानां विशदतया प्रतिविधानम्, धर्माऽधर्मद्रव्ययोः गतिस्थितिसाधारणहेतुतया पृथक् द्रव्यत्वसिद्धिश्च—

---

१ "एतच्च कस्य पराजय इत्यनुयुक्तया परिषदा वचनीयम्, न खलु निग्रहं प्राप्तः स्वं कौपीनं विवृणुयादिति।" न्यायभा० ५।२।२१। २ "कस्यचिदनिग्राह्यत्वेऽपि निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः।" तर्कशा० पृ० ४०। "भूतदोषाऽप्रतिपत्तिरप्रतिभा, अभूतदोषप्रतिपत्तिरननुयोज्यानुयोगः।" न्यायमं० पृ० ६५७। ३ "पूर्वं चतुर्विधे सिद्धान्ते स्वयमङ्गीकृतेऽपि पश्चाच्चेदयथासिद्धान्तं न ब्रूयादयमपसिद्धान्तः।" तर्कशा० पृ० ४०। ४ "यथा पूर्वमुक्ताः त्रिविधाः असिद्धोऽनैकान्तिको विरुद्धश्चेति हेत्वाभासाः।" तर्कशा० पृ० ४०। ५ एतेषां निग्रहस्थानानां विशेषविवरणं तत्तन्न्यायसूत्रीयभाष्यवार्तिक-तात्पर्यटीकासु, न्यायसारे (पृ० २३-२८), न्यायमञ्जर्यां (पृ० ६३८-६५९) न्यायकलिकायाञ्च (पृ० २२-२७) द्रष्टव्यम्। प्रकृते च न्यायमञ्जर्य्येव विशेषतो ग्रन्थकृता अनुसृता। ६—वतीति श्र०। ७ पृ० ३०९ पं० १७। ८ यद्भव—ब०, ज०। पृ० ३०९ पं० १९। "यत्तावद् भवद्भिः सकलपदार्थानां गरिष्ठत्वात् प्रथमतः···।" स्या०रत्ना०पृ० ९७५-७६। ९ पृ० ७७।

अतो भवत्परिकल्पितप्रमाणपदार्थस्य अव्यवस्थितेः कथं तत्परिच्छेद्यत्वेन आत्मादिप्रमेयतत्त्वं व्यवतिष्ठते? यथा च आत्मा नित्यव्यापित्वादिरूपो भवत्परिकल्पितो न व्यवतिष्ठते तथा[1] षट्पदार्थपरीक्षाप्रघट्टके प्रतिपादितम्[2]। शरीरञ्च स्वारम्भकाऽवयवेभ्योऽर्थान्तरम् अवयविनिराकरणादेव निराकृतम्। 'भौतिकानि प्राप्यकारीणि इन्द्रियाणि, बुद्ध्यन्तरवेद्या बुद्धिः, अणु मनश्च' इति त्रितयमपि प्रागेवँ अपास्तम्। आत्मगुणत्वेन भवत्परिकल्पितयोर्धर्माऽधर्मयोरप्यव्यवस्थितेः तद्रूपा प्रवृत्तिरपि अव्यवस्थितैव। तद्गुणत्वेन अनयोरव्यवस्थितिश्च आत्मद्रव्यविचारावसरे प्रतिपादितौं[4]। प्रेत्यभावश्च आत्मनो व्यापिनः स्वदेहप्रमितौ प्रेत्याख्यातः। दोषफल-दुःखानाम् आत्मगुणानां गुणपदार्थविचारावसरें[6] निराकृतिः कृता। अपवर्गश्च भवत्कल्पितो मोक्षस्वरूपनिरूपणप्रघट्टके प्रतिषेत्स्यते। तन्न द्वादशविधं प्रमेयमवतिष्ठते।

किञ्च, अस्यँ द्वादशविधत्वावधारणं तावत्येव प्रमाणव्यापारपरिसमाप्तेः, प्रयोजनपरिसमाप्तेर्वा स्यात्? तत्र आद्यः पक्षोऽनुपपन्नः; दिक्-काल-आकाश-पृथिव्यादिप्रपञ्चेऽपि प्रमाणव्यापारप्रतीतेः। न च तत्प्रपञ्चस्य अत्रैव अन्तर्भावः इत्यभिधातव्यम्; ततोऽस्य अत्यन्तविलक्षणत्वात्। यद् यतोऽत्यन्तविलक्षणम् न तत तत्र अन्तर्भवति यथा जलेऽनलः, अत्यन्तविलक्षणाश्च आकाशादयो भावा भवत्परिकल्पितद्वादशविधप्रमेयपदार्थात् इति। तथाविधानामप्येषामत्रान्तर्भावे आत्मन्येव अशेषपदार्थानामन्तर्भावात् ब्रह्माऽद्वैतप्रसङ्गतो गता षोडशपदार्थपरिकल्पना। द्वितीयपक्षेऽपि कस्य प्रयोजनस्य अत्रैव परिसमाप्तिः—लौकिकस्य, अपवर्गलक्षणस्य, प्रयोजनमात्रस्य वा? न तावल्लौकिस्य; तत्प्रयोजनप्रसाधकानां घट-पट-मुकुट-शकट-अन्नपानादीनामत्राऽसङ्ग्रहात्। नापि अपवर्गलक्षणस्य; तत्प्रयोजनोत्पादकानां दीक्षा-तपोध्यानादीनाम्[10] अत्राऽसङ्ग्रहात्। नापि प्रयोजनमात्रस्य; लौकिकेतरप्रयोजनातिरिक्तस्य प्रयोजनमात्रस्यैवासंभवात्। ततोऽयुक्तमेतत्—

"ज्ञानं (तं) सम्यगसम्यग्वा यन्मोक्षाय भवाय वा।
तत्प्रमेयमिहाऽभीष्टं न प्रमाणार्थमात्रकम्॥" [न्यायमं० पृ० ४२७]

स्यात्येतरज्ञानपरिच्छेद्यस्य अखिलस्य प्रमेयराशेः द्वादशविधे प्रमेये सङ्गृहीतुमशक्यत्वात्।

पदार्थसंख्यायां संशयपरिगणने च[11] विपर्यय-अनध्यवसाययोरपि[12] परिगणनप्रसङ्गः। न्याय-प्रवृत्त्यङ्गत्वात् तस्यैव परिगणने अनुग्रहेच्छा-पराभिभवाभिलाष-लाभ-पूजा-ख्यात्यादेरपि परिग-

---

१—था प्रत्यक्षप्रमाणप—ब०,ज०। २ पृ० २६१। ३ पृ० ७७। पृ० १८३। पृ० २६९। ४ पृ० २६३। ५ पृ० २६८। ६ पृ० २७५। ७ "अपि चास्य द्वादशविधत्वावधारणं तावत्येव प्रमाणव्यापारपरिसमाप्तेः प्रयोजनपरिसमाप्तेर्वा स्यात्…।" स्या० रत्ना० पृ० ९७६। ८—र्थकल्पना ब०, ज०। ९ तत्प्रसाधकानाम् ब०, ज०, भां०, श्र०। १० अत्र सङ्ग्रहाभावात् ब०, ज०, भां०। ११ "विपर्ययानध्यवसाययोश्च प्रमाणादिषोडशपदार्थेभ्योऽर्थान्तरभूतयोः प्रतीतेः।" प्रमेयक० पृ० १८९ पू०। स्या० रत्ना० पृ० ९७६। १२—पि गण—आ०।

णनप्रसङ्गः तत्प्रवृत्त्यङ्गत्वाऽविशेषात्। किञ्च, जरन्नैयायिकैः प्रतिज्ञाद्यवयवपञ्चकवत् 'जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनम्, संशयव्युदासः' इत्यन्येऽपि अवयवाः पञ्च प्रतिज्ञाताः। तेषाञ्च मध्ये भवता किमिति संशय-प्रयोजने एव गृह्येते ?

दृष्टान्तोऽपि न उदाहरणादन्यः। ततश्चास्य पृथगभिधाने सर्वेषामपि अवयवानां पृथगभिधानप्रसङ्गः अविशेषात्। ५

सिद्धान्तोऽपि प्रतिज्ञातो नाऽर्थान्तरम्। अतोऽस्य पृथग् लक्षणाभिधानमनर्थकम्। सर्वैरेव हि शास्त्रकारैः अपसिद्धान्तं ब्रुवाणो निगृह्यते, न च सिद्धान्तलक्षणं प्रतिज्ञातः पृथक् तैः क्रियते, तस्या एव सिद्धान्तत्वेन सर्वेषां सुप्रसिद्धत्वात्।

अवयवानाञ्च पदार्थसंख्यायां परिगणने अनुमानस्यापि पृथक् परिगणनप्रसङ्गः। तस्य प्रमाणान्तर्गतत्वात् पृथगपरिगणने अवयवानामपि अनुमानात्मकत्वान्न पृथक् परिगणनं स्यात्। १० 'प्रधानभूतञ्च अनुमानं प्रमाणान्तर्गतत्वान्न पृथगुपादीयते तदन्तर्भूतास्तु अवयवाः पृथगुपादीयन्ते' इति महती प्रेक्षापूर्वकारिता ! उपादानेऽप्येषाम् इयत्ताऽवधारणमयुक्तम्; यावद्भिर्विवक्षितार्थप्रतिपत्तिर्भवति तावतामेव उपादानार्हत्वात्, सा च क्वचित् कियद्भिर्भवतीति।

तर्कस्य[3] च प्रमाणविषयपरिशोधकत्वम्–तत्तिरोधायकाद्यपनेतृत्वम्, संशयादिव्यवच्छेदेन तन्निश्चायकत्वम्, तद्ग्रहणे प्रवृत्तस्य प्रमाणस्य अग्रेसरतया तत्स्वरूपविवेचनमात्रं वा ? प्रथ- १५ मपक्षे प्रतीतिविरोधः; घटादितिरोधायकस्य अन्धकारादेः तर्काद् अपनयनाऽप्रतीतेः। द्वितीयतृतीयपक्षेऽपि अप्रमाणात्मकोऽसौ तथा तन्निश्चयं तद्विवेचनमात्रञ्च कुर्यात्, प्रमाणात्मको वा ? न तावद् अप्रमाणात्मकः; प्रमाणविषयस्य अप्रमाणात्मना तेन परिशोधनाऽनुपपत्तेः। यद् अप्रमाणं न तत् प्रमाणविषयपरिशोधकम् यथा मिथ्याज्ञानम् प्रमेयो वाऽर्थः, अप्रमाणञ्च भवद्भिः परिकल्पितः तर्क इति। तत्परिशोधकत्वे वा अस्य प्रमाणत्वप्रसङ्गः; यत् प्रमाण- २० विषयपरिशोधकम् तत् प्रमाणम् यथा अनुमानादि, प्रमाणविषयपरिशोधकश्च भवद्भिः परिकल्पितः तर्क इति। अस्तु तर्हि प्रमाणात्मक एवासौ इति चेत्; न; 'चत्वारि एव प्रमाणानि' इति संख्याव्याघातप्रसक्तेः।

निर्णयश्च प्रमाणफलम्, तच्च सति प्रमाणे अवश्यं भवति इति न किञ्चित् तस्य पृथगुपादाने प्रयोजनम्, अन्यथा हान-उपादानादेरपि पृथगुपादानप्रसङ्गः प्रमाणफलत्वाऽविशेषात्। २५

---

१ "दशावयवानेके नैयायिका वाक्ये सञ्चक्षते–जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनम्, संशयव्युदास इति।..." न्यायभा० १।१।३२। न्यायमं० पृ० ५७०। जिज्ञासाप्रयोजनसंशयार्थप्राप्तीनां वादमार्गज्ञानाधिगम्यपदार्थरूपतया उल्लेखः चरकसंहितायामपि (पृ० २६२) दृश्यते। २ इयत्त्वा–ज०। ३ "तच्च प्रमाणविषयतिरोधायकापनेतृत्वम्, संशयादिव्यवच्छेदेन तन्निश्चायकत्वम्, तद्ग्रहणे प्रवृत्तस्य प्रमाणस्य अग्रेसरतया तत्स्वरूपविवेचनमात्रं वा ?" स्या० रत्ना० पृ० ९७७।

यदपि 'वीतरागकथा' इत्यादि वादस्य लक्षणम्; तदप्यनुपपन्नम्; तस्य वीतरागविषयत्वाऽसंभवात्; तथाहि–वादो नै अविजिगीषुविषयः निग्रहस्थानवत्त्वात् जल्प-वितण्डावत्। न चास्य निग्रहस्थानवत्त्वमसिद्धम्; न्यून-अधिक-अपसिद्धान्त-हेत्वाभासपञ्चकलक्षणाऽष्टनिग्रहस्थानानां तत्र सद्भावात्। सतामप्येषां निग्रहबुद्ध्या उद्भावनाऽभावात् न वादे विजिगीषुविषयता; इत्यप्यसाम्प्रतम्; जल्प-वितण्डयोरपि तथोद्भावनाऽभावप्रसङ्गतोऽविजिगीषुविषयताप्रसक्तेः। तत्र छलादिप्रयोगसंभवात् न तथोद्भावनाभावः इति चेत्; ननु वादे कुतस्तत्प्रयोगाऽभावः? तत्त्वाध्यवसायसंरक्षणार्थत्वरहितत्वाच्चेत्, जल्पवितण्डे हि तत्त्वाध्यवसायसंरक्षणार्थे अतः तयोरेव तत्प्रयोगो न वादे इति; तदप्यनल्पतमोविलसितम्; छलादीनामसदुत्तरतया तत्त्वाध्यवसायसंरक्षणहेतुत्वाऽनुपपत्तेः। परस्य तूष्णींभावनिमित्तत्वात् तेषां तद्धेतुत्वमुपपन्नम्; इत्यप्यसत्; तथा परस्य तूष्णींभावाऽसंभवात्, असदुत्तराणामानन्त्यात्। तत्त्वाध्यवसायसंरक्षणार्थत्वरहितत्वञ्च वादेऽसिद्धम्; तस्यैव तत्संरक्षणार्थत्वोपपत्तेः। तथाहि–वादं एव तत्त्वाध्यवसायसंरक्षणार्थः, प्रमाणतर्कसाधनोपालम्भत्वे सिद्धान्ताऽविरुद्धत्वे पञ्चावयवोपपन्नत्वे च सति पक्षप्रतिपक्षपरिग्रहवत्त्वात्, यस्तु न तथा स न तथा यथा आक्रोशादिः, यथोक्तविशेषणश्च वादः, तस्मात् तत्त्वाध्यवसायसंरक्षणार्थ इति।

न चायमसिद्धो हेतुः; "*प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताऽविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।*" [न्यायसू० १।२।१] इत्यभिधानात्। 'पक्षप्रतिपक्षपरिग्रहवत्त्वात्' इत्युच्यमाने जल्पस्यापि तथात्वप्रसङ्गाद् अवधारणविरोधः स्यात्, तत्परिहारार्थं प्रमाणतर्कसाधनोपालम्भत्वविशेषणम्। नहि जल्पे तत्संभवति–"*यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भः जल्पः।*" [न्यायसू० १।२।२] इति वचनात्। नापि वितण्डा तथाऽनुष्ज्यते; जल्पस्यैव वितण्डारूपत्वात्, "*स प्रतिपक्षस्थापनाहीनो वितण्डा।*" [न्यायसू० १।२।३] इत्यभिधानात्। ततः प्रमाणतर्कसाधनोपालम्भत्वविशेषणस्य पक्षप्रतिपक्षपरिग्रहस्य जल्प-वितण्डयोरभावात् सिद्धं वादस्यैव तत्त्वाध्यवसायसंरक्षणार्थत्वम्। तत्त्वस्य अध्यवसायो हि निश्चयः, तस्य संरक्षणम्–न्यायबलात् निखिलबाधकनिराकरणम्, न पुनः तत्र बाधकमुद्भावयतो यथाकथञ्चित् निर्मुखीकरणम् लकुटचपेटादिभिस्तन्न्यक्कारस्यापि तत्त्वाध्यवसायसंरक्षणार्थत्वाऽ-

---

१ "वादो जिगीषितोरेव तत्त्वाध्यवसायसंरक्षणार्थत्वात् अन्यथा तदनुपपत्तेः···निग्रहस्थानवत्त्वाच्च।" तत्त्वार्थश्लो० पृ० २७९। प्रमेयक० पृ० १९४ उ०। २–णार्थरहि–ब०, ज०। ३ तदध्य–भां, श्र०। ४ "वाद एव तत्त्वाध्यवसायसंरक्षणार्थः···।" तत्त्वार्थश्लो० पृ० २७८। प्रमेयक० पृ० १९५ पू०। ५ तथा आक्रो–आ०। ६ अवसायः ज०, श्र०। "तत्त्वरक्षणार्थं सद्भिरुपहर्त्तव्यमेव छलादि विजिगीषुभिरिति चेत्; नखचपेटशस्त्रप्रहारादीपनादिभिरपीति वक्तव्यम्, तस्मान्न ज्यायानयं तत्त्वरक्षणोपायः।" वादन्याय पृ० ७१। ७ तन्न्यकरण–ब०, ज०, भां०, श्र०।

नुषङ्गात्। न च जल्पवितण्डाभ्यां निखिलबाधकनिराकरणं[1] कर्तुं शक्यम् छलाद्युपक्रमपरतया ताभ्यां संशयस्य विपर्ययस्य वा जननात्। तत्त्वाध्यवसाये सत्यपि हि परनिर्मुखीकरण[2]प्रवृत्तौ प्राश्निकाः तत्र संशेरते विपर्यस्यन्ति वा—'किमस्य तत्त्वाध्यवसायोऽस्ति किंवा नास्ति' इति,'नास्त्येव' इति वा। पर[3]निर्मुखीकरणमात्रे तत्त्वाध्यवसायरहितस्यापि प्रवृत्त्युपलम्भात्[4] तत्त्वोपप्लववादिवत्। ततो वाद एव एकः कथाविशेषः तत्त्वाध्यवसायसंरक्षणफलः लाभपूजाख्यातिहेतुः निःश्रेयस- ५ शास्त्रे अभ्युपगन्तव्यः न पुनर्जल्पवितण्डे तद्विपर्ययात्। एतच्च प्रमेयकमलमार्त्तण्डे सं[5]प्रपञ्चं प्रपञ्चितम् इह द्रष्टव्यम्।

हेत्वाभासाश्च अस्माकमभिमता एव,किन्तु तैः मोक्षशास्त्रे निर्दिष्टैः न किञ्चित् प्रयोजनम्, अन्यथा प्रत्यक्षाद्याभासानामपि निर्देशप्रसङ्गात् षोडशपदार्थसंख्याक्षतिप्रसङ्गः। प्रत्यक्षादिप्र- माणनिर्देशसामर्थ्यादेव तदाभासानां लब्धत्वादनिर्देशे अवयवनिर्देशसामर्थ्यादेव हेत्वाभासा- १० नामपि लब्धत्वादनिर्देशोऽस्तु अविशेषात्।

छ[6]लानि तु बालक्रीडाप्रायाणि न प्रामाणिकानां निःश्रेयसार्थिनामवलम्बयितुमुचितानि।

जातयस्तु दूषणाभासा हेत्वाभासैरेव सङ्गृहीताः किमिति अतः पृथगुच्यन्ते, न च एतासामियत्ता कर्तुं पार्यते, युष्माभिरपि आसामानन्त्येन[7] अभ्युपगमात्। यदाह [8]भाष्यकारः— "*सत्यपि आनन्त्ये जातीनामसंकीर्णोदाहरणविवक्षया चतुर्विंशतिप्रकारा उच्यन्ते न संख्या-* १५ *नियमः क्रियते।*" [न्यायमं० पृ० ६२२] इति। परस्परविवेकेन उपलक्षणार्थं तर्हि तासामुपादानम्; इत्यप्ययुक्तम्; उपात्तानां परस्परविवेकेन उपलक्षणेऽपि अनुपात्तानामुपलक्षणाऽसंभवात्। कतिपयतत्प्रकाराणां तद्विवेकेन उपलक्षणार्थं तल्लक्षणप्रणयने च "[9]*मिथ्योत्तरं जातिः*" [न्यायविनि० २।२०२] [10]इत्येतावल्लक्षणं प्रणेतव्यम् सकलतद्व्यक्तिव्यापकत्वात्।

एवं निग्रहस्थानानामपि अनन्तत्वात् न इयत्ता कर्तुं शक्या। तदानन्त्यं च भवद्भिरेव अभि- २० प्रेतम्—"*विप्रतिपत्त्यप्रतिपत्तिप्रकारस्य बहुत्वेऽपि द्वाविंशतिर्निग्रहस्थानानि प्रदर्श्यन्ते*" [ ]

१—णं शक्यं—आ०। २—करणे प्रवृ—श्र०। ३ "परनिर्मुखीकरणमात्रे तथाव्यवसायरहितस्यापि प्रवृत्तिदर्शनात् तत्त्वोपप्लववादिवत्।..." तत्त्वार्थश्लो० पृ० २७९। ४—लम्भात् ततो—आ०। ५ पृ० १९४। तत्त्वार्थश्लोकवार्त्तिकेऽपि (पृ० २७८)। ६ सप्रपञ्चमिह उह्यन्ते भां०। सप्रपञ्चितम् इ—आ०, ब०, ज०। ७ छलादीनि ब०, ज०, भां०। ८—च्यते आ०, ब०, ज०। —ह्यन्ते श्र०। ९ "मिथ्योत्तराणामानन्त्यात् शास्त्रे वा विस्तरोक्तितः। साधर्म्यादिसमत्वेन जातिर्नेह प्रतन्यते ॥२०६॥" न्यायवि० द्वि० परि०, पृ० ५२७ उ०। १० "तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम्।" न्यायसू० १।२।२०। ११ भाष्ये नोपलब्धमिदं वाक्यम्। न्यायमञ्जर्यां तु (पृ० ६२२) 'सत्यप्यानन्त्ये जातीनामसंकीर्णोदाहरणविवक्षया चतुर्विंशतिप्रकारत्वमुपवर्णितं न तु तत्संख्यानियमः कृतः' इत्यस्ति। १२ "तत्र मिथ्योत्तरं जातिः यथानेकान्तविद्विषाम्। दध्युष्ट्रादेरभेदत्वप्रसङ्गादेकचोदनम्॥" न्यायवि० पृ० ५२६ उ०। प्रमाणसं० परि० ६। १३ इत्येतावदेव तल्लक्ष—श्र०।

इति भाष्यकारवचनात्[1]। यच्च छलजातिनिग्रहस्थानानां प्रत्येकं दूषणं तत् प्रमेयकमलमार्त्तण्डे सप्रपञ्चं प्रपञ्चितम् इह द्रष्टव्यम्। तदेवं षोडशपदार्थानां विचार्यमाणानामव्यवस्थितेर्न यौगानां षट्पदार्थनियमवत् षोडशपदार्थनियमोऽपि उपपन्नः।

धर्माऽधर्मद्रव्ययोः तदर्थान्तरभूतयोः सद्भावाच्च। कुतः प्रमाणात् तत्सिद्धिरितिचेत् ? 'अनुमानात्' इति ब्रूमः। तथाहि–विवादापन्नाः सकलजीवपुद्गलाश्रयाः सकृद्गतयः साधारणबाह्यनिमित्तापेक्षाः युगपद्भाविगतित्वात् एकसरस्सलिलादिना अनेकमत्स्यादिगतिवत्[2]। तथा, सकलजीवपुद्गलस्थितयः साधारणबाह्यनिमित्तापेक्षाः युगपद्भाविस्थितित्वात् एककुण्डाश्रयानेकबदरादिस्थितिवत्। यत् तत्साधारणं निमित्तम् स धर्मः अधर्मश्च, ताभ्यां विना तद्गतिस्थितिकार्याऽनुत्पत्तेः[3]।

गतिस्थितिपरिणामिन एव अर्थाः परस्परं तद्धेतवश्चेत्[4]; न; अन्योन्याश्रयाऽनुषङ्गात्–सिद्धायां हि तिष्ठत्पदार्थेभ्यो गच्छत्पदार्थानां गतौ तेभ्यः तिष्ठत्पदार्थानां स्थितिसिद्धिः, तत्सिद्धौ च गच्छत्पदार्थानां गतिसिद्धिरिति। साधारणनिमित्तरहिता एव अखिलार्थगतिस्थितयः प्रतिनियतस्वकारणपूर्वकत्वात् इति चेत्; कथमिदानीम् ईश्वर अङ्कुरादिकार्योत्पत्तौ, नर्त्तकीक्षणो वा निखिलप्रेक्षकजनानां नानातद्वेदनोत्पत्तौ साधारणं निमित्तं स्यात्? तल्लक्षणसाधारणनिमित्तमन्तरेण तदुपपत्त्यनुपपत्तेः इति चेत्; तदेतद् अन्यत्रापि समानम्, नहि सकलार्थगतिस्थितयोऽपि सकृद्भाविन्यो धर्माऽधर्मलक्षणसाधारणनिमित्तमन्तरेण उपपद्यन्ते, सकृद्भावि-कार्यत्वात्, यत् सकृद्भावि कार्यम् तन्न साधारणनिमित्तमन्तरेण उपपद्यते यथा अङ्कुरादि, तथाभूताश्चैताः सकलार्थगतिस्थितय इति। ईश्वर एव आसां साधारणनिमित्तमस्तु, इत्यप्य-

---

१ भाष्ये नोपलब्धं वाक्यमिदम्। "सामान्यमधिकृत्य निग्रहस्थाने द्वे। भेदविस्तरविवक्षायां तु द्वाविंशतिधा भेदः। उदाहरणमात्रत्वाच्च भेदस्य आनन्त्यमिति।" न्यायवा० ५।२।१। "असंकीर्णोदाहरणविवक्षया च द्वाविंशतिभेदसंकीर्त्तनम् अवान्तरभेदैस्तु जातिवदानन्त्यमेव तेषामिति।" न्यायमं० पृ० ६३९। २ पृ० १९५–२०४। तत्त्वार्थश्लो० पृ० २८१–३११। निग्रहस्थानानां खण्डनं तु वादन्यायेऽपि (पृ० ७४–१४२) द्रष्टव्यम्। एतदर्थं सिद्धिविनिश्चयटीकायाः जल्पसिद्धिनामकं प्रकरणमपि समवलोकनीयम्। ३ "गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः।" तत्त्वार्थसू० ५।१७। "उदयं जह मच्छाणं गमणाणुग्गहयरं हवदि लोए। तह जीवपुग्गलाणं धम्मं दव्वं वियाणेहि ॥८५॥" पञ्चास्ति०। "धम्मत्थिकाए णं जीवाणं आगमणगमणभासुम्मेसमणजोगा वइजोगा कायजोगा जे यावन्ने तहप्पगारा चला भावा सव्वे ते धम्मत्थिकाए पवत्तंति। गइलक्खणेणं धम्मत्थिकाए।" व्या० प्रज्ञ० १३।४।४८१। ४ "जह हवदि धम्मदव्वं तह तं जाणेह दव्वमधमक्खं। ठिदिकिरियाजुत्ताणं कारणभूदं दु पुढवीव ॥ ८६ ॥" पञ्चास्ति०। "अहमत्थिकाएणं किं पवत्तति? गोयमा। अहमत्थिकाएणं जीवाणं ठाणनिसीयणतुयट्टणमणस्सय एगत्तीभावकरणता जे यावन्ने तहप्पगारा थिरा भावा सव्वे ते अहमत्थिकाए पवत्तंति। ठाणलक्खणेणं अहमत्थिकाए।" व्या० प्रज्ञ० १३।४।४८१। ५–नुपपत्तेः ज०, श०। ६ तद्धेतुश्चेत् आ०।

युक्तम्; तत्र गतिस्थितीनामसंभवात्, भूम्यादौ तदर्शनात्। तर्हि स एव तासां तन्निमित्तमस्तु इत्यप्यनुपपन्नम्; गगनवर्तिपदार्थगतिस्थितीनां तदसंभवात्। तर्हि नभः साधारणं निमित्तमासामस्तु सर्वत्र तत्संभवात्; इत्यप्यपेशलम्; तस्य अवगाहनिमित्तत्वप्रतिपादनात्। तस्य एकस्यैव अनेककार्यनिमित्ततायाम् अनेकसर्वगतपदार्थपरिकल्पनाऽनर्थक्यप्रसङ्गः; काल-आत्म-दिक्-सामान्य-समवायकार्यस्यापि यौगपद्यादिप्रत्ययस्य, बुद्ध्यादेः, 'इदमतः पूर्वेण' इत्यादि प्रत्ययस्य, अन्वयज्ञानस्य, 'इहेदम्' इति प्रत्ययस्य च नभोनिमित्तत्वोपपत्तेः तस्य सर्वत्र सर्वदा सद्भावात्। कार्यविशेषात् कालादिनिमित्तभेदव्यवस्थायां तत एव धर्माऽधर्मादिनिमित्तभेदव्यवस्थाऽप्यस्तु सर्वथा विशेषाऽभावात्। ५

एतेन अदृष्टनिमित्तत्वमपि आसां प्रत्याख्यातम्; पुद्गलानामदृष्टाऽसंभवाच्च। ये यदात्मोपभोग्याः पुद्गलाः तद्गतिस्थितयः तदात्माऽदृष्टनिमित्ताश्चेत्; तर्हि असाधारणं निमित्तमदृष्टं तासाम्, प्रतिनियतात्माऽदृष्टस्य प्रतिनियतद्रव्यगतिस्थितिहेतुत्वप्रसिद्धेः। न च तदनिष्टम्; भूम्यादिवत् तदसाधारणकारणस्य अदृष्टस्यापि इष्टत्वात्, साधारणं तु कारणं तासां धर्माऽधर्मौ, इति सिद्धः कार्यविशेषात् तयोः सद्भावः। १०

ततो यौगोपकल्पितपदार्थानां स्वरूपतः इयत्तावधारणतश्च प्रमाणतो विचार्यमाणानामनुपपत्तेर्न तत्परिकल्पितभेदैकान्तेऽर्थस्य सिद्धिर्घटते। नापि चार्वाकपरिकल्पितभेदैकान्ते तत्परिकल्पिततत्त्वानामपि स्वरूपतः संख्यातश्च विचार्यमाणानामनुपपद्यमानत्वाऽविशेषात्। १५

ननु चार्वाकमते पृथिवी-अप्-तेजो-वायुरूपाणि चत्वार्येव तत्त्वानि अन्योन्याऽसंभविलक्षणलक्षितानि शरीर-इन्द्रिय-विषयलक्षणार्थक्रियासम्पादनसमर्थानि प्रत्यक्षप्रमाणाधिगतस्वरूपाणि उपपद्यन्त एव, "*पृथिव्यप्तेजोवायुरिति तत्त्वानि तत्समुदाये शरीरेन्द्रियविषयसंज्ञाः।*" [ ] इत्यभिधानात्। न ततोऽधिकानि तत्सद्भावे प्रमाणाऽभावात्। न खलु प्रत्यक्षम् आकाशादिसद्भावे प्रवर्त्तते तस्य रूपादौ तद्वति चार्थे प्रवृत्तिप्रतीतेः, न च आकाशादौ एतत् संभवति अरूपिद्रव्यतयाऽस्याभ्युपगमात्। अनुमानस्य चाप्रमाणत्वात् नातोऽपि अस्य सद्भावसिद्धिः। २०

'पृथिव्यप्तेजोवायुरिति तत्त्वानि तेभ्यश्चैतन्यम्' इत्यादिना नास्ति कायाकारपरिणतभूतव्यतिरिक्त आत्मा यः परलोकी स्यात्' इति चार्वाकस्य पूर्वपक्षः—

---

१ "भूमिजलादीन्येव तत्प्रयोजनसमर्थानि नार्थो धर्माधर्माभ्यामिति चेन्न; साधारणाश्रय इति विशिष्य उक्तत्वात्।" सर्वार्थसि० ५।१७। २ "धर्माधर्मयोः य उपकारः स आकाशस्य युक्तः सर्वगतत्वात् इति चेत्तदयुक्तम्; तस्य अन्योपकारसद्भावात्।" सर्वार्थसि० ५।१७। ३ "अदृष्टहेतुके गतिस्थिती इति चेन्न; पुद्गलेष्वभावात्।" तत्त्वार्थराज० ५।१७। पृ० २१५। ४ उद्धृतञ्चैतत्–तत्त्वोपप्लव पृ० १। शां० भा० भामती ३।३।५४। तत्त्वसं० पं० पृ० ५२०। तत्त्वार्थश्लो० पृ० २८। युक्त्यनुशा० टी० पृ० ७३। प्रमेयक० पृ० ३० पू०। न्यायवि० वि० पृ० ४५४ पू०। स्या० रत्ना० पृ० १८६।

ननु ग्राहकस्य आत्मनोऽभावे कथं चतुर्णामपि तत्त्वानां सद्भावसिद्धिः प्रमात्रधीनत्वात् प्रमेयव्यवस्थायाः इत्याशङ्क्य आह–"*तेभ्यश्चैतन्यम्*[1]।" [ ] अत्र केचित् 'अभिव्यज्यते' इति क्रियाभिसम्बन्धं प्रतिपद्यन्ते, अन्ये तु 'प्रादुर्भवति' इति। अतः 'परपरिकल्पितो जीवः अनादिज्ञानसन्तानो वा तत्प्रमाता' इति प्रत्याख्यातम्; तत्सद्भावे प्रमाणाऽभावात्। तत्प्रमेयत्वस्य च प्रमातृमात्रेण अविनाभावप्रसिद्धेः चैतन्यमेव प्रमातृ भविष्यति।

ननु विभिन्नेभ्यः पृथिव्यादिभ्यः कथमभिन्नं चैतन्यम् अभिव्यक्तिमाविर्भावं वा बिभ्रद्विरुद्धम्? इत्याह–"*मदशक्तिवद् विज्ञानम्*[2]।" [ ] यथैव हि मद्याङ्गानां किण्वादीनां देश-काल-अवस्थाविशेषे मदशक्तिलक्षणावस्थाविशेषः प्रादुर्भवति एवं पृथिव्यादीनां तद्विशेषे[3] विशिष्टं प्रतिनियतघटादिग्राहकं ज्ञानमिति।

न च प्रतिनियतसुख-दुःखादिकार्यवैचित्र्यस्य नियामकमन्तरेण अनुपपत्तेः तन्नियामकस्य पूर्वभवोपार्जितस्य अदृष्टस्य प्रसिद्धेः तत्कर्त्तुरात्मनः पूर्वभवेऽप्यस्तित्वसिद्धिः; यतः "*जलबुद्बुदवत् जीवाः*।" [ ] यथैव हि समुद्रादौ नियामकाऽदृष्टरहिताः[4] पदार्थसामर्थ्यवशाद् वैचित्र्यभाजो बुद्बुदाः प्रादुर्भवन्ति तथा सुखदुःखवैचित्र्यभाजो जीवाः, न पुनः कायाकारपरिणतभूतव्यतिरिक्ता नित्यादिस्वभावाः तत्सद्भावे प्रमाणाऽभावात्। तत्र हि प्रमाणं प्रत्यक्षम्, अनुमानं वा प्रवर्तते? न तावत् तद्व्यतिरिक्तात्मसद्भावे प्रत्यक्षं प्रवर्त्तते; तस्य प्रतिनियतेन्द्रियसम्बद्धरूपादिगोचरचारितया तद्विलक्षणे जीवे प्रवृत्त्यनुपपत्तेः। न च 'घटमहं वेद्मि' इत्यहंप्रत्यये ज्ञानकर्तृतया आत्मा तथाविधः प्रतिभाति इत्यभिधातव्यम्; तस्यापि 'स्थूलोऽहं कृशोऽहम्' इत्यादिवत् शरीरविषयत्वस्यैव उपपत्तेः। न खलु तत्प्रत्ययस्य आत्मालम्बनत्वमस्ति तत्र स्थौल्यादिधर्माऽसंभवात्। तथा 'घटमहं वेद्मि' इत्यादि प्रत्ययस्यापि, नहि तस्यापि शरीरादन्यो भवत्परिकल्पितः कश्चिद् आत्मा आलम्बनत्वेन स्वप्नेऽपि प्रतीयते। अप्रतीतस्यापि कल्पने कल्पनागौरवं प्रतिनियतवस्तुव्यवस्थाऽभावश्च स्यात्। न च अप्रतीतसद्भावस्य कर्तृत्वं युक्तम्; खपुष्पादेरपि तत्प्रसङ्गात्। ततः प्रमाणप्रसिद्धस्वरूपत्वात् शरीरस्यैव चैतन्यं प्रति कर्तृत्वमुपपन्नम्। तदन्वयव्यतिरेकानुविधायित्वाच्च; यत् खलु यस्य अन्वय-व्यतिरेकौ अनुकरोति तत् तस्य कार्यम् यथा घटो मृत्पिण्डस्य, शरीरस्य अन्वयव्यतिरेकौ अनुकरोति च चैतन्यम्

---

१ "तेभ्य एव तथा ज्ञानं जायते व्यज्यतेऽथवा॥ १८५९॥" तत्त्वसं०। "तेभ्यश्चैतन्यमिति, तत्र केचिद् वृत्तिकारा व्याचक्षते–उत्पद्यते तेभ्यश्चैतन्यम्, अन्ये अभिव्यज्यते इति।" तत्त्वसं० पं० पृ० ५२०। ब्रह्मसू० शां० भा० ३।३।५३। प्रमेयक० पृ० ३०। सर्वदर्शनसं० चार्वाकद०। २ ब्रह्मसू० शां० भां० ३।३।५३। न्यायमं० पृ० ४३७। "मदशक्तिवच्चैतन्यमिति।" प्रकरणपं० पृ० १४६। ३ तद्विशेषेऽपि ब०। ४ नियामकारहिताः ब०, ज०। ५ "देह एव चेतनश्च आत्मा चेति प्रतिजानते हेतुञ्चाचक्षते शरीरे भावादिति। यद्धि यस्मिन् सति भवति असति च न भवति तत्तद्धर्मत्वेन अध्यवसीयते।" ब्रह्मसू० शां० भा० ३।३।५३।

इति । अन्वयव्यतिरेकसमधिगम्यो हि सर्वत्र कार्यकारणभावः, तौ चात्र विद्येते–सति शरीरे चैतन्यस्योपलब्धिः तदभावे चानुपलब्धिः । तन्न प्रत्यक्षेण आत्मनः सिद्धिः ।

नाप्यनुमानेन; अस्य अप्रमाणत्वात् । प्रमाणत्वे वा हेतोः प्रत्यक्षबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वेन कालात्ययापदिष्टत्वात्; शरीरव्यतिरिक्त-आत्मपक्षो हि प्रत्यक्षेणैव बाध्यते । न चात्र किञ्चिल्लिङ्गं स्वसाध्येन अविनाभावो वा क्वचित् तस्य प्रसिद्धः, सुखाद्युपलब्धेश्च भूतकार्यतया तेष्वेव अविनाभावसंभवात् । ततश्च आत्मनः सद्भावे प्रमाणाऽसंभवे तन्नित्यत्वादिकं खपुष्पसौरभप्रख्यं कः सुधीः श्रद्दधीत ? अतो गर्भादिमरणपर्यन्तभूतकार्यमेव चैतन्यं प्रतिपत्तव्यम् तदभिव्यङ्ग्यं वा । 'ननु क्षित्यादेश्चैतन्याभिव्यक्तौ शरीरवत् घटादिष्वपि तदभिव्यक्तिः स्यात्' इत्याशङ्क्य आह–"*चैतन्याऽनभिव्यक्तिर्घटादिषु कारणान्तराभावात् पांस्वादिषु अनभिव्यक्तमदशक्तिवत्* ।" [ ] चैतन्याऽभिव्यक्तेर्हि कारणं क्षित्यादेः कायाकारपरिणतत्वम् मदशक्तौ पिष्टोदकगुणधातक्यादिपरिणतत्ववत्, तच्च घटादौ नास्ति इति तत्र तदभिव्यक्त्यभावः पांस्वादौ पिष्टादिपरिणामाऽभावात् मदशक्त्यभाववत् । न चैवं मृतशरीरेऽपि चैतन्योपलम्भप्रसङ्गः तत्परिणामाऽविशेषात् इत्यभिधातव्यम्; कारणवैकल्यात् तत्र तदनुपलम्भोपपत्तेः । कारणं हि चैतन्यावस्थितेः त्वगस्थिपिशितशोणितादिपरिणामविशेषः, तस्य शस्त्रप्रहार-रोगादिना वैकल्ये चैतन्यस्य अनवस्थानादनुपलम्भः शरीराकारविशेषवत् । एवञ्च आकारविशेषवत् चैतन्यस्य शरीरधर्मत्वसिद्धेः सिद्धः–"*परलोकिनोऽभावात् परलोकाऽभावः* ।" [ ] यस्य हि शास्त्रार्थावगम-अनुष्ठान-फलोपभोगैः सम्बन्धः स परलोकी, तस्य च उक्तप्रकारेणाप्रसिद्धेः अप्रयत्नप्रसिद्ध एव परलोकप्रतिषेधः ।

अत्र प्रतिविधीयते । यत्तावदुक्तम्–'पृथिव्यप्तेजोवायुः' इत्यादि; तदसमीचीनम्; यतः 'चत्वार्येव तत्त्वानि' इत्यवधारणं तत्त्वान्तराऽभावे सिद्धे सिद्ध्येत् । तदभावश्च असिद्धः; जीवलक्षणतत्त्वान्तरस्य स्वसंवेदनप्रत्यक्षतः गगनादेश्च आगमानुमानाभ्यां सद्भावप्रसिद्धेः । प्रामाण्यञ्चानयोः 'प्रत्यक्षमेव एकं प्रमाणम्' इत्यस्य प्रतिषेधा-

तत्प्रतिविधानपुरस्सरं शरीराद्यतिरिक्तस्य ज्ञानाद्यसाधारणलक्षणलक्षितस्य आत्मनः सिद्धिः—

१–रेकेण स–भां० । २–लब्धेः श्र० । ३–लब्धेः श्र० । ४–शक्त्यभिव्यक्त्यभाव–श्र० । ५ उद्धृतञ्चैतत्–तत्त्वोपप्लव पृ० ५८ । तत्त्वसं० पं० पृ० ५२३ । प्रमेयक० पृ० ३० पू० । सन्मति० टी० पृ० ७१ । ६–कारेणासिद्धेः श्र० । ७ पृ० ३४१ पं० १६ । ८ "स्वसंवेद्यः स भवति नासावन्येन शक्यते द्रष्टुं नासावन्येन शक्यते द्रष्टुं कथमसौ निर्दिश्येत···असौ पुरुषः स्वयमात्मानमुपलभते न चान्यस्मै शक्नोति दर्शयितुम्···" शावरभा० १।१।५ । "अहंप्रत्ययविज्ञेयः स्वयमात्मोपपद्यते ॥ १०७ ॥" मीमांसाश्लो० आत्मवाद । "स्वसंवेदनतः सिद्धः सदात्मा बाधवर्जितात् । तस्य क्ष्मादिविवर्त्तात्मन्यात्मन्यनुपपत्तितः ॥ ९६ ॥" तत्त्वार्थश्लो० पृ० २६ । शास्त्रवा० समु० श्लो० ७९ ।

ऽवसरे प्ररूपितम्। ननु जीवस्य तत्त्वान्तरत्वमसिद्धम्, चेतनालक्षणस्यास्य भूतकार्यतया घटादिवत् तत्रैवान्तर्भावात्; इत्यसमीक्षिताऽभिधानम्; भूत-चैतन्ययोः कार्यकारणभावोऽनुपपत्तेः। तथाहि–न भूतकार्यं चैतन्यम् तेषु सत्स्वपि अभावात् सर्वदाऽनुपलब्धिवत्। यथैव हि पृथिव्यादिभूतेषु सत्स्वपि सर्वदाऽनुपलब्धेरभावात् नाऽसौ तत्कार्या तथा चैतन्यमपि अविशेषात्। न खलु भूतेषु मृत्काय-घटाद्यनेकावस्थाविशिष्टेषु सदा सत्स्वपि चैतन्यं सदा उपलभ्यते। तन्तुपटादिवत् पूर्वापरीभावाऽभावाच्च अत्र कार्यकारणभावाऽभावः, नहि चैतन्यरहितस्तत्परिणामः कायः प्रथमतः प्रतीयते, पश्चात् चैतन्यम् इति, अतः सहसिद्धत्वेन अनयोरुपलम्भात् जलाऽनलवत् न कार्यकारणभावः।

अस्तु वाऽसौ; तथापि भूतानां चैतन्यं प्रति उपादानभावेन कारणत्वं स्यात्, सहकारिभावेन वा? न तावद् उपादानभावेन; तेषु विक्रियमाणेष्वपि अस्य अविक्रियमाणत्वात्। यस्मिन् विक्रियमाणेऽपि यन्न विक्रियते न तत् तस्योपादानम् यथा गोः अश्वः, विक्रियमाणेष्वपि कायाकारपरिणतभूतेषु न विक्रियते च चैतन्यमिति। न चेदमसिद्धम्; अन्यत्रगतचित्तानां वासीचन्दनकल्पानां शस्त्रसम्पातादिना शरीरविकारेऽपि चैतन्यस्याविकारप्रसिद्धेः। तदविकारेऽपि विक्रियमाणत्वाच्च तद्वदेव। न चेदमप्यसिद्धम्; शरीरगतप्राच्य-अप्रसन्नताद्याकाराऽविनाशेऽपि कमनीयकामिनीसन्निधाने चैतन्ये हर्षादिविकारोपलम्भात्। तन्न उपादानभावेन तेषां तज्जनकत्वं घटते। सहकारिभावेन तु तेषां तज्जनकत्वे ततोऽन्यत् तस्य उपादानमस्ति, न वा? यदि नास्ति; कथमनुपादानस्यास्य उत्पत्तिः स्यात्? यद् अनुपादानं न तस्योत्पत्तिः यथा खरविषाणस्य, अनुपादानं भवद्भिः परिकल्प्यते च चैतन्यमिति। अथ

---

१ "व्यतिरेकः तद्भावाऽभावित्वान्न तूपलब्धिवत्।" ब्रह्मसू० ३।३।५४। तत्त्वसं० पं० पृ० ५२५। तत्त्वार्थश्लो० पृ० ३०। २ सत्सु अभा–आ०। ३ अविशेषात् तत्रैवान्तर्भावात् ब०, ज०। ४ सर्वदा भां०। ५ सद्वा आ०। ६ तन्तुघटादि–भां०। "किमुपादानकारणमहोस्वित् सहकारिकारणम्?" तत्त्वसं० पं० पृ० ५२६। ७ "भूतानि किमुपादानकारणं चैतन्यस्य सहकारिकारणं वा?" युक्त्यनुशा० टी० पृ० ७८। प्रमेयक० पृ० ३० उ०। ८ "न च यस्य विकारेऽपि यन्न विक्रियते तत्तत्कार्यं युक्तमतिप्रसङ्गात्।" तत्त्वसं० पं० ५२७। "प्रमितेऽप्यप्रमेयत्वात् विकृतेरविकारिणी। निर्हासातिशयाभावात् निर्हासातिशये धियः।" "बलीयस्यबलीयस्त्वात् विपरीते विपर्ययात्। काये तस्मान्न ते तस्य परिणामाः सुखादयः॥ न्यायविनि० २।७३-७४। पृ० ४५९ उ०। ९ गौरश्वस्य श्र०। १० "यदविकारेऽपि यस्य विकारापादनं संभवति न तत्तदुपादानम्।..." तत्त्वसं० पं० पृ० ५२८। ११ "नापि ते कारका वित्तेर्भवन्ति सहकारिणः। स्वोपादानविहीनायास्तस्यास्तेभ्योऽप्रसूतितः॥२०७॥" तत्त्वार्थश्लो० पृ० २८। १२ अनुपादानं च भवद्भिः परिकल्पितं चै–श्र०। अनुपादानं च स्वसंविदितस्वभावस्य चैतन्यस्य इष्टं भवद्भिः परिकल्प्यते चैतन्यमिति ब०, ज०।

अस्ति; तत्किं[1] चैतन्येन विजातीयम्, सजातीयं वा ? तत्र आद्यपक्षोऽयुक्तः; विजातीयाद् विजातीयस्योत्पत्तौ जलादेरपि अनलाद्युत्पत्तिप्रसङ्गतः तत्त्वचतुष्टयाभावाऽनुषङ्गात्। अथ सजातीयम्; युक्तमेतत्, सर्वत्र सजातीयस्यैव उपादानत्वोपपत्तेः। तथाहि–यद् यस्य उपादानं तत् तेन सजातीयम् यथा रूपादिमतो घटस्य तथाविधो मृत्पिण्डः, उपादानञ्च स्वसंवित्स्वभावस्य चैतन्यस्य इष्टं भवद्भिः किञ्चित्तत्त्वम्, अतः पृथिव्यादिभ्योऽर्थान्तरं तत्स्वभावमेव तद् युक्तम् इत्यात्मतत्त्वसिद्धिः।

किञ्च, भूतानि[2] निर्विशिष्टानि चैतन्यं प्रति कारणभावं प्रतिपद्यन्ते, विशिष्टानि वा ? यदि निर्विशिष्टानि; सर्वत्र सर्वदा तज्जनकत्वप्रसङ्गः। अथ विशिष्टानि; कुतस्तेषां वैशिष्ट्यम्–समुदायात्, कायाकारपरिणतेः, अवस्थाविशेषात्, सहकार्यन्तराद्वा ? यदि समुदायात्; अधिश्रयणादेः ओदनपाकवत् चैतन्योत्पत्तिप्रसङ्गः, तत्र तत्समुदायाऽविशेषात्। अथ कायाकारपरिणतेः; ननु कुतस्तेषां सैव सम्पन्ना–किं निर्हेतुका, स्वरूपमात्रप्रभवा, अदृष्टनिमित्ता वा स्यात् ? निर्हेतुकत्वे सदा सत्त्वमसत्त्वं वा स्यात्। स्वरूपमात्रप्रभवत्वे सर्वत्र सर्वदा तेषां तत्परिणतिप्रसङ्गः स्वरूपमात्रस्य सर्वत्र सर्वदाऽविशिष्टत्वात्। अथ अदृष्टकृता; तत्तु अदृष्टं तद्भवप्रभवम्, भवान्तरप्रभवं वा तद्धेतुः स्यात् ? तत्र आद्यविकल्पे चक्रकप्रसङ्गः–शरीरस्योत्पत्तौ हि सत्यां चैतन्यस्योत्पत्तिः, तदुत्पत्तौ च हिताऽहितविवेकपूर्वकमदृष्टसाधनानुष्ठानाद् अदृष्टस्य उत्पत्तिः, ततश्च शरीरस्योत्पत्तिः इति। भावान्तरप्रभवत्वे च परलोकिनः प्रसिद्धेः[3] "*परलोकिनोऽभावात् परलोकाऽभावः*" [ ] इतीदमसङ्गतं स्यात्।

अस्तु वा कायाकारपरिणतिः यथाकथञ्चित् तेषाम्; तथापि अस्याश्चैतन्यहेतुत्वे[4] मृतशरीरेऽपि चैतन्योत्पत्तिप्रसङ्गो विशेषाऽभावात्। अथ अवस्थाविशेषोऽपि तद्धेतुः तदभावान्न तत्र तत्प्रसङ्गः, तदाकारपरिणतानि हि भूतानि अवस्थाविशेषविशिष्टानि तद्धेतुत्वं प्रतिपद्यन्ते इति। ननु किमिदं तेषां तथाविधानामवस्थाविशेषविशिष्टत्वं नाम–चैतन्योपेतत्वम्, विशिष्टाऽदृष्टाश्लिष्टत्वम्, धातुविशेषोपचितत्वम्, वयोविशेषान्वितत्वं वा ? न तावत् चैतन्योपेतत्वम्; आद्यचैतन्योत्पत्तौ तेषां हेतुत्वाऽभावप्रसङ्गात्, तदा तेषां तदुपेतत्वाऽभावात्। अथ तदापि तेषां तदुपेतत्वमिष्यते; तत्किं तेनैव चैतन्येन, ततः पूर्वेण वा स्यात् ? तेनैव चेद् अन्योन्याश्रयः–सिद्धे हि आद्यचैतन्ये[5] तेषां तद्विशिष्टत्वसिद्धिः, तत्सिद्धौ च आद्यचैतन्यसिद्धिरिति। अथ ततः पूर्वेण; कथं परलोकिनोऽपह्नवः गर्भचैतन्यात् पूर्वमपि चैतन्यप्रबन्धप्रसक्तेः ? अथ विशिष्टाऽदृष्टाऽऽश्लिष्टत्वं तेषां तद्विशिष्टत्वमुच्यते; तदपि मृत्काये कस्मात् नास्ति–चैतन्याऽभावात्, तत्साधकाऽ-

१ "सूक्ष्मभूतविशेषः चैतन्येन विजातीयः सजातीयो वा ?" तत्त्वार्थश्लो० पृ० २९। प्रमेयक० पृ० ३० पू०। २ नन्वत्राप्यविशिष्टानि विशिष्टानि वाऽथवा।···" स्या० रत्ना० पृ० १०८२। ३ "मृते चाऽसंभवात्···।" प्रश० भा० पृ० ६९। शास्त्रवा० समु० श्लो० ६५। न्यायविनि० वि० पृ० ४५४ उ०। ४ आद्ये चै–अ०। ५–प्रसिद्धेः अ०।

नुष्ठानाऽभावात्, तावत्स्थितिकत्वेन उपार्जितत्वाद्वा ? प्रथमपक्षे न विशिष्टाऽदृष्टाऽऽश्लिष्टत्वस्य चैतन्यसाधकत्वम् चैतन्यस्यैव तत्साधकत्वप्रसङ्गात्। एतेन द्वितीय-तृतीयपक्षावपि प्रत्याख्यातौ; अदृष्टविशेषसाधकाऽनुष्ठानस्य तावत्स्थितिकत्वेन उपार्जितत्वस्य च चैतन्यविशेषाऽऽधीनत्वात्। नापि धातुविशेषोपचितत्वम् अवस्थाविशेषविशिष्टत्वं तेषां युक्तम्; सुषुप्तावस्थायां तदुपचितेऽपि शरीरे चैतन्योत्पत्त्यप्रतीतेः। 'वयोविशेषान्वितत्वं तद्विशिष्टत्वम्' इत्यपि एतेन प्रतिव्यूढम्; सुषुप्तावस्थाशरीरस्य मृतशरीरस्य च बालादिवयोविशेषान्वितत्वेऽपि चैतन्याऽनुत्पादकत्वात्। नापि सहकार्यन्तराद् भूतानां वैशिष्ट्यम्; तत्त्वचतुष्टयव्यतिरेकेण अपरस्य सहकार्यन्तरस्यानभ्युगमात्। अभ्युपगमे वा 'चत्वार्येव तत्त्वानि' इत्यवधारणविरोधः, आत्मसिद्धिश्च स्यात्, तस्यैव आत्मत्वात्।

किञ्च, सर्वं कार्यं साश्रयं भवति, अतः चैतन्यस्य कार्यत्वे कश्चिद् आश्रयो वक्तव्यः। स च शरीरम्, भूतानि, इन्द्रियाणि, मनः, विषयो वा स्यात् ? न तावत् शरीरम्; भौतिकत्वाद् बाह्येन्द्रियप्रत्यक्षत्वात् मूर्त्तत्वाच्च घटादिवत्। एतेन भूतानामपि चैतन्याश्रयत्वं प्रत्याख्यातम्; सर्वत्र सर्वदा तत्सद्भावाऽनुषङ्गाच्च तदाश्रयभूतानां तेषां सर्वत्र सर्वदा अविकलानां सद्भावाऽविशेषात्। अस्तु तर्हि इन्द्रियाणां तदाश्रयत्वम्, अन्वयव्यतिरेकाभ्यां तस्य तत्पूर्वकत्वप्रसक्तेः; इत्यपि नोत्सृष्टमनेन; भौतिकत्वाद्यनुमानविरोधस्य अत्राप्यविशेषात्। किञ्च, व्यस्तानाम्, समस्तानां वा तेषां तदाश्रयत्वं स्यात् ? यदि व्यस्तानाम्; तदा एकस्मिन् शरीरे अनेकचेतनसन्तानप्रसङ्गात् एकसन्तानेऽपि अनेकसन्तानवद् अनुसन्धानाऽभावः स्यात्। कथञ्च अन्धादेः इन्द्रियाऽपाये रूपादिस्मरणम्, स्वप्राद्यवस्थायां रूप-रसादिज्ञानम्, प्रसुप्तिकादिरोगेण च इन्द्रियोपघाते सुखदुःखादिज्ञानं स्यात् ? न च यस्य विकारे यन्न विक्रियते तत् तस्य कार्यम्;

---

१ "न शरीरेन्द्रियमनसामज्ञत्वात्, न शरीरस्य चैतन्यं घटादिवद् भूतकार्यत्वात् मृते चाऽसंभवात्।..." प्रश० भा० पृ० ६९। "सति शरीरे निवर्तमानत्वात्।" प्रश० व्यो० पृ० ३९४। प्रमेयक० पृ० २९ उ०। "न शरीरगुणश्चेतना; कस्मात् ? यावच्छरीरभावित्वाद् रूपादीनाम्।" "शरीरव्यापित्वात्।" "शरीरगुणवैधर्म्यात्।" न्यायसू० ३।२।४९,५२, ५५। "न शरीरस्य ज्ञानादियोगः परिणामित्वात्, रूपादिमत्त्वात् अनेकसमूहस्वभावत्वात् सन्निवेशविशिष्टत्वात्।..." न्यायमं० पृ० ४३९। "देहधर्मवैलक्षण्यात्...।" ब्रह्मसू० शां० भा० ३।३।५४। २ "नेन्द्रियाणां करणत्वात् उपहतेषु विषयाऽसान्निध्ये चाऽनुस्मृतिदर्शनात्।" प्रश० भा० पृ० ६९। "नेन्द्रियार्थयोः तद्विनाशेऽपि ज्ञानाऽवस्थानात्।" न्यायसू० ३।२।१८। ३–प्रसिद्धेः श्र०। ४ "कृतं भूतेन्द्रियाणां च चैतन्यप्रतिषेधनम्। समस्तव्यस्तसंघातविवेकपरिणामिनाम्॥ १११॥" मीमांसाश्लो० आत्मवाद। "ते च परमाणवः प्रत्येकं वा हेतवः स्युः, समुदिता वा ?" तत्त्वसं० पं० पृ० ५२७। ५ "नासिकाद्येकाङ्गवैकल्येऽपि मनसामनुत्पादापत्तेः...प्रसुप्तिकादिरोगादिना कायेन्द्रियाणामुपघातेऽपि मनोधीरविकृता एकामविकलां सत्तामनुभवति...।" तत्त्वसं० पं० पृ० ५२७।

अतिप्रसङ्गात्। सामस्त्यपक्षोऽपि एतेनैव समुत्सारितः, नहि एकस्यापि इन्द्रियस्यापाये सामस्त्यं घटते, तथा च अन्धादेः ज्ञानलेशोऽपि नोत्पद्येत। नहि क्षित्यादेः अन्यतमस्याप्यपाये सामस्त्यम् अङ्कुरोत्पत्तिर्वा दृष्टा।

मनस्तर्हि तदाश्रयोऽस्तु उपरतेष्वपि इन्द्रियेषु अन्तःसङ्कल्परूपस्य ज्ञानस्य अवभासनात् इति चेत्; ननु तत् नित्यम्, अनित्यं वा स्यात्? न तावन्नित्यम्; तत्त्वसंख्याव्याघातानुषङ्गात् ५ परमतप्रवेशप्रसङ्गाच्च। अथ अनित्यम्; तत् किं भूतहेतुकम्, अन्यहेतुकं वा? न तावदन्यहेतुकम्; अनभ्युपगमात्। भूतहेतुकत्वे प्रागुक्तभौतिकत्वाद्यनुमानेभ्यः चेतनाश्रयत्वाऽनुपपत्तिः।

किञ्च, तन्मनः चेतनं सत् किं कारणान्तरनिरपेक्षम् अर्थप्रतिभासं जनयति, तत्सापेक्षं वा? यदि निरपेक्षम्; सकृदेव अखिलार्थप्रतिभासप्रसङ्गात् सर्वः सर्वदर्शी स्यात्। अथ कारणान्तरसापेक्षम्; तत् किं कारणान्तरम्–मनः, अन्यद्वा? मनश्चेत्; तत् चेतनम्, अचेतनं १० वा? न तावद् अचेतनम्; तस्य चेतनाश्रयतया चेतनत्वप्रतिज्ञानात्, अन्यथा प्रथमस्यापि अचेतनत्वापत्तिः स्यात्। अथ चेतनम्; तर्हि इदमपि कारणान्तरापेक्षमर्थप्रतिभासं जनयति इत्यनवस्था स्यात्। नाप्यन्यत्; उपरतेन्द्रियस्य अन्येन्द्रियव्यापाराऽभावात्। नापि विषयः तदाश्रयः; शरीरेन्द्रियाश्रयपक्षोपक्षिप्तदोषोपनिपातप्रसङ्गात्। ततो देहाद् व्यतिरिक्तो ज्ञानस्य आत्मैव आश्रयोऽभ्युपगन्तव्यः इति सिद्धोऽसौ तत्त्वान्तरम्। १

कथमन्यथा तदहर्जातबालकस्य स्तनादौ प्रवृत्तेर्निबन्धनमभिलाषादिकं सिद्ध्येत्? न च अस्याः तन्निबन्धनत्वमसिद्धम्; तथाहि–तदहर्जातबालकस्य स्तनादौ प्रवृत्तिः अभिलाषपूर्विका तत्त्वात् मध्यदशाप्रवृत्तिवत्। अभिलाषोऽपि स्मरणपूर्वकः, स्मरणमपि अनुभवपूर्वकम्, तत्त्वात् तद्वदेव। न च गर्भादौ तदनुभवादिकमस्ति इति पूर्वभवाऽनुभवसिद्धिः। स हि क्षुत्पीडितः स्तनादिकं तत्प्रतिपक्षभूतं सुखसाधनत्वेन स्मृत्वा अभिलाषात् तत्र प्रवर्त्तते, तच्च अलभमानो २ रोदनमारभते, प्राप्य च अपगतरुदितः तत्पानादिकं करोति, प्रपातादिदुःखानुस्मरणभीतश्च वान-

---

१ "नापि मनसः कारणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात् स्वयं करणभावाच्च। ..." प्रश० भा० पृ० ६९। प्रमेयक० पृ० ३० पू०। "अस्तु तर्हि मनोगुणो ज्ञानम्; "युगपज्ज्ञेयानुपलब्धेश्च न मनसः।" न्यायसू० ३।२।१९। २ करणा–श्र०। ३ करणा–श्र०। ४ करणा–श्र०। ५ "अत एव विषयस्यापि न चैतन्यम्।" प्रश० कन्द० पृ० ७२। ६ "पूर्वानुभूतस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः।" न्यायभा० ३।१।१९। न्यायमं० पृ० ४७०। "जातिस्मराणां संवादात् अपि संस्कारसंस्थितेः। अन्यथा कल्पयंल्लोकमतिक्रामति केवलम्॥ नाऽस्मृतेऽभिलाषोऽस्ति न विना सापि दर्शनात्। तद्धि जन्मान्तराज्ञायं जातमात्रेऽपि लक्ष्यते॥" न्यायवि० २।७९, ८०। पृ० ४६३ पू०। ७ "येन सुखसाधनं स्तनादिकमन्विच्छति, तच्चालभमानो रोदनमारभते प्राप्य च व्यपगतरुदितः···सद्योजातोऽपि वानरादिशिशुः अवपातपतनप्रभवदुःखान्मरणभीतो मातुरुतीव क्रोडमाश्रिलष्यति प्रपातादिस्थानं च परिहरतीति। तत्त्वसं० पं० ५३२।

रादिशिशुः मातुरतीव क्रोडमाश्लिष्यति प्रपातस्थानञ्च परिहरति, नहि अननुभूत-इष्टाऽनिष्ट-साधनफलाः तानि नियमेन उपादित्सन्ते जिहासन्ति च अतिप्रसङ्गात् । यस्य च पूर्वभवाऽनुभवसिद्धिः सोऽत्र आत्मा तत्त्वान्तरभूतः । तस्य अपूर्वैर्देहेन्द्रियादिभिः अभिसम्बन्धो जन्म, न पुनः असतः प्रादुर्भावः, तन्निरोधश्च मरणम् न तु सर्वथा विनाश इति ।

यच्च–'*मदशक्तिवद् विज्ञानम्*' इत्युक्तम्[2]; तदप्ययुक्तम्; मद्याङ्गपरिणामाद् अन्यत्रापि धत्तूरककोद्रवादौ मदशक्तेः प्रतीतितो भूतपरिणामविशेषात् तस्याः प्रादुर्भावाऽविरोधात्। चिच्छक्तेस्तु भूतपरिणामविशेषे घटादौ स्वप्नेऽपि अप्रतीतिः तद्विरोधात् ।

यच्चान्यत् '*जलबुद्बुदवत् जीवाः*' इत्युक्तम्[3]; तदप्यसाम्प्रतम्; दृष्टान्त-दार्ष्टान्तिकयोः साम्याऽसंभवात्, जलबुद्बुदानां जलादत्यन्तवैलक्षण्याऽभावतस्तद्धेतुकत्वोपपत्तेः ततः तद्वैचित्र्यमुपपन्नम्, भूतचैतन्ययोः पुनः अत्यन्तवैलक्षण्यतः कार्यकारणभावस्यैवासंभवात् न अदृष्टमन्तरेण सुखदुःखादिवैचित्र्यं शरीरादिवैचित्र्यं वा उपपन्नम्, कथमन्यथा सेवा-कृष्यादौ सममोहमानानां सममधीयानानां वा केषाञ्चिदेव फलयोगः अन्येषाञ्च नैष्फल्यं स्यात् ? ततो दृष्टकारणव्यभिचारात् अदृष्टकारणप्रसिद्धेः सिद्धम्–अँदृष्टवैचित्र्यात् सुखादिवैचित्र्यम् । तन्न कार्यकारणभावमङ्गीकृत्य परलोकिनोऽपह्नवः कर्तुं शक्यः ।

नापि व्यङ्ग्य-व्यञ्जकभावम्, तद्भावस्य परलोकसिद्ध्यनुकूलत्वात् । तथाहि–सँतः चैतन्यस्य व्यक्तिः, असतः, सदसद्रूपस्य वा स्यात् ? प्रथमपक्षे परँलोकसिद्धिः अविवादात्, कायाकारपरिणतभूतेभ्यः प्रागपि चैतन्यस्य सत्त्वप्रसक्तेः । प्रागसतो व्यक्तिस्तु प्रतीतिविरुद्धा; सतो हि घटादेः दीपादिना प्रकटीकरणमात्रम् अभिव्यक्तिः प्रसिद्धा न पुनः असतः । अथ सदसद्रूपस्य; किं सर्वथा, कथञ्चिद्वा ? न तावत् सर्वथा; विरोधात् । अथ कथञ्चित्; जैनमतसिद्धिः, द्रव्यतः सतः पर्यायतश्च असतः चैतन्यस्य कायाकारपरिणतपृथिव्यादिपुद्गलेभ्योँऽभिव्यक्तेः जैनैरभीष्टत्वात्, इति सिद्धोऽनाद्यनन्तोऽयम् आत्मा ।

यदप्यभिहितम्[8]–'तत्सद्भावे प्रमाणाऽभावात्' इत्यादि; तदप्यभिधानमात्रम्; प्रत्यक्षस्यैव आत्मसद्भावे प्रमाणस्य सद्भावात्; तथाहि–'सुखमहमनुभवामि' इत्यन्योन्यविविक्तज्ञेय-ज्ञातृ-ज्ञानोल्लेखी प्रतिप्राणि स्वसंवेद्यः प्रत्ययो जायमानः संवेद्यते । नँचायं मिथ्या; बाधकाऽभावात् ।

---

१ "मद्याङ्गवद् भूतसमागमे ज्ञः शक्त्यन्तरव्यक्तिरदैवसृष्टिः । इत्यात्मशिश्नोदरपुष्टितुष्टैः निर्हीभयैः हा मृदवः प्रलब्धाः ॥ ३५ ॥" युक्त्यनुशा० । २ पृ० ३४२ पं० ७ । ३ पृ० ३४२ पं० ११ । ४ "शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ।" "एतेन नियमः प्रत्युक्तः ।" न्यायसू०, भा० ३।२।६८, ६९ । ५ "चैतन्यशक्तिं सतीमेव, प्रागसतीमेव वा अभिव्यञ्जयेयुः, सदसतीं वा ?" युक्त्यनु० टी० पृ० ७५ । प्रमेयक० पृ० ३० पू० । ६–लोकिसि–श्र० । ७–भ्यो व्यक्तेः ब०, भां० । ८ पृ० ३४२ पं० १४ । ९ "तथा च सुख्यहं दुख्यहमिच्छावानहमिति प्रत्ययो दृष्टः···नापि विपर्ययज्ञानमेतत् अबाध्यमानत्वात् । नापि संशयज्ञानं तद्रूपस्याऽसंवेदनात् ।" प्रश० व्यो० पृ० ३९१ ।

नापि सन्दिग्धः; उभयकोटिसंस्पर्शाभावात्। न च इत्थम्भूतस्य अस्य अनालम्बनत्वं युक्तम्; रूपादिप्रत्ययस्यापि अनालम्बनत्वप्रसङ्गात्। नापि शरीरालम्बनत्वम्; बहिःकरणनिरपेक्ष-अन्तःकरणव्यापारेण उत्पत्तेः, न खलु शरीरम् इत्थंभूत-अहम्प्रत्ययवेद्यम् बहिःकरणविषयत्वात्। अतः शरीरातिरिक्तः कश्चिद् एतस्य आलम्बनभूतो ज्ञानवान् अर्थोऽभ्युपगन्तव्यः तस्यैव ज्ञातृत्वोपपत्तेः, न तु शरीरस्य भूतारब्धत्वात् घटादिवत्, नहि भूतारब्धस्य घटादेः तद् दृष्टम्। न च ५ भूतारब्धत्वाऽविशेषेऽपि शरीरस्य अहम्प्रत्ययग्राह्यता भविष्यति इत्यभिधातव्यम्; मृतशरीरेण व्यभिचारात्। याऽपि 'स्थूलोऽहम्' इत्यादि प्रतीतिः साऽपि आत्मोपकारकत्वेन शरीरे जायमाना औपचारिकी अत्यन्तोपकारके भृत्ये 'अहमेव अयम्' इति प्रतीतिवत्।

तथा अनुमानेनाप्यात्मा प्रतीयते—रूपादिज्ञानं क्वचिदाश्रितम् गुणत्वात् रूपादिवत्। ज्ञानसुखादि उपादानकारणपूर्वकं कार्यत्वात् घटादिवत्। न च शरीरे तदाश्रितत्वस्य तदुपादानत्वस्य १० च इष्टत्वात् सिद्धसाधनम् इत्यभिधातव्यम्; तत्र तदाश्रितत्व-तदुपादानत्वयोः प्राक् प्रबन्धेन प्रतिव्यूढत्वात्। तथा जीवच्छरीरं प्रयत्नवताऽधिष्ठितम् इच्छाऽनुविधायिक्रियाश्रयत्वात् रथवत्। श्रोत्रादीनि उपलब्धिसाधनानि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति। प्रामाण्यञ्चाऽस्य प्रागेव प्रसाधितम्। तदेवम् आत्मद्रव्यस्य पृथिव्यादिभ्यः तत्त्वान्तरस्य प्रसिद्धेः कथं 'चत्वार्येव तत्त्वानि' इत्यवधारणमुपपद्यते? अन्योन्यं तत्त्वान्तरभावस्य च एषां पृथिव्यादिचतुर्विध- १५ द्रव्यप्रतिषेधाऽवसरे प्रतिषिद्धत्वात् नितरां तदवधारणाऽनुपपत्तिः।

---

१ "न शरीरालम्बनम् अन्तःकरणव्यापारेण उत्पत्तेः; तथाहि—न शरीरमन्तःकरणपरिच्छेद्यम् बहिर्विषयत्वात्..." प्रश० व्यो० पृ० ३९१। "अहं सुखीति संवित्तौ सुखयोगो न विग्रहे। बहिःकरणवेद्यत्वप्रसङ्गान्नेन्द्रियेष्वपि ॥ १३७ ॥" तत्त्वार्थश्लो० पृ० ३२। २ "भृत्यवदेव शरीरेऽप्यहमिति ज्ञानस्य औपचारिकत्वमेव युक्तम्। उपचारस्तु निमित्तं विना न प्रवर्त्तते इत्यात्मोपकारकत्वं निमित्तं कल्प्यते...।" प्रश० व्यो० पृ० ३९१। प्रमेयक० पृ० २९ उ०। सन्मति० टी० पृ० ८६। ३ "प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्च आत्मनो लिङ्गानि।" वै० सू० ३।२।४। "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति।" न्यायसू० १।१।१०। ४ "शब्दादिज्ञानं क्वचिदाश्रितं गुणत्वात्...।" प्रश० व्यो० पृ० ३९३। प्रमेयक० पृ० २९ उ०। ५ उपादानपूर्व—ब०, ज०। "समवायिकारणपूर्वकत्वं कार्यत्वाद्रूपादिवदेव।" प्रश० व्यो० पृ० ३९३। ६ "यथा यन्त्रप्रतिमाचेष्टितं प्रयोक्तुरस्तित्वं गमयति तथा प्राणापानादिकर्मापि कियावन्तमात्मानं साधयति।" सर्वार्थसि० ५।१९। "रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठातानुमीयते प्राणादिभिश्चेति...।" प्रश० भा० पृ० ६९। "जीवच्छरीरं प्रयत्नवदधिष्ठितम् इच्छानुविधायिक्रियाश्रयत्वात् रथवत्।" प्रश० व्यो० पृ० ४०२। ७ "करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात् शब्दादिषु प्रसिद्धया च प्रसाधकोऽनुमीयते...।" प्रश० भा० पृ० ६९। ८ —पपद्येत ब०, ज०, भा०, श्र०। आत्मद्रव्यस्य सिद्धिः टिप्पणीनिर्दिष्टतत्तद्ग्रन्थेषु अष्टसह० पृ० ६३, सिद्धिवि० टी० परि० ४, इत्यादिषु च विस्तरतो द्रष्टव्या।

ततो यौग-चार्वाकोपकल्पितभेदैकान्तस्य विचार्यमाणस्य आकाशकुशेशयस्य इव अनुपपत्तेः न तत्र अर्थक्रियासिद्धिवार्त्ताऽपि सङ्गच्छते। बौद्धोपकल्पिते भेदैकान्ते यथा तत्सिद्धिर्नोपपद्यते तथा अनन्तरकारिकायां प्रतिपादयिष्यते। तन्न भेदैकान्ते अर्थक्रियासिद्धिर्घटते। नाप्यभेदैकान्ते; सर्वथा अभेदरूपस्य ब्रह्माद्वैतैकान्तस्य प्रागेव प्रतिक्षिप्तत्वात्।

ननु माभूत् ब्रह्माद्वैतैकान्तरूपतया परिकल्पिते सर्वथा विचाराऽसहे अभेदैकान्ते अर्थक्रियासिद्धिः, प्रकृतिरूपे तु भविष्यति तस्य विचारसहत्वात्।

'प्रकृतेर्महान्' इत्यादिना पंचविंशतितत्त्वं वर्णयतः सांख्यस्य पूर्वपक्षः—

सांख्या हि 'निस्तरङ्गमहोदधिप्रख्यं प्रधानं जगत्प्रपञ्चरचनायां कारणम्' इत्याचक्षते। प्रधीयन्तेऽस्मिन् विकाराः इति प्रधानम्। तच्च सङ्क्षेपतः त्रिविधम्—

"शक्तिः करणं कार्यम् इति त्रेधा जगत्स्थितम्।
कार्यं भूतानि करणं खानि शक्तिः गुणत्रयम्॥" [ ] इत्यभिधानात्। नहि कार्य-करण-शक्तिव्यतिरिक्तो जगत्प्रपञ्चोऽस्ति। तत्र कार्यं दशविधम्—तन्मात्र-महाभूतसंज्ञकम्। करणं त्रयोदशविधम्—बुद्धीन्द्रिय-कर्मेन्द्रिय-अन्तःकरण-बुद्धि-अहङ्कारभेदात्। शक्तिश्च अननुभूयमानस्वभावा प्रकृतिः एकैव मूलोपादानभूता। तत्सद्भावावेदकं तु—

"भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य॥" [सांख्यकारि० १५] इति हेतुपञ्चकम्। परिमितत्वं हि एककारणपूर्वकस्यैव प्रतिपन्नम्, यथा घट-शराव-उदञ्चनादेः एकद्रव्यपूर्वकस्य, परिमितञ्च इदं व्यक्तम्—एका बुद्धिः, एकोऽहङ्कारः, पञ्च तन्मात्राणि, एकादश इन्द्रियाणि, पञ्च भूतानि। अतो यत् तदेकं कारणं तत् प्रधानमेव इति तदस्तित्वसिद्धिः। समन्वयाच्च; यज्जातिसमन्वितं हि यत् तत् तदात्मककारणकार्यम् यथा घटादयो विशेषाः मृज्जातिसमन्विता मृदात्मककारणकार्याः, सत्त्व-रजः-तमोजातिसमन्वितञ्च इदं महदादिव्यक्तम्। सत्त्वस्य हि प्रसाद-लाघव-उद्धर्ष-प्रीत्यादि कार्यम्, रजसः ताप-शोष-उपष्टम्भ-उद्वेगादि,

---

१—लिपते तु भेदै—श्र०। २ प्रतिधीयन्ते श्र०। ३ कारणं ज०। ४ यानि ब०, ज०। ५ शक्तेः श्र०। ६ कारणं ब०, ज०। ७ "करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्। कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च॥ आहारकम् इन्द्रियलक्षणम्, धारकमभिमानलक्षणम्, प्रकाशकं बुद्धिलक्षणम्।" सांख्यका० माठरवृ० ३२। ८—णभूतस्यैव ब०, ज०। ९ एकमृद्द्रव्य—श्र०। १० "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥१३॥" सांख्यका०। "उपष्टम्भकं प्रेरकम् उन्नाडिः इत्यर्थः, यथा मत्तवृषो वृषं दृष्ट्वा उद्धतो भवति तद्वत्···यदा गुरूणि अंगानि भवन्ति इन्द्रियाणि अलसानि स्वविषयग्रहणासमर्थानि भवन्ति तदानीं मन्तव्यं एतत्तमः उत्कटत्वेन वर्त्तते···।" माठरवृ०। "तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्। सुखसंगेन बध्नाति ज्ञानसंगेन चानघ॥ ६॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसंगेन देहिनम्॥ ७॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिः तन्निबध्नाति भारत॥८॥" भगवद्गीता अ० १४। "सत्त्वस्य हि प्रसादलाघव···।" तत्त्वार्थराजवा० पृ० १२। तत्त्वसं० पं० पृ० २१। ११—अवष्टम्भ—ब०, ज०, भां०, श्र०।

तमसः विषाद-दैन्य-बीभत्स-गौरव-आवरणादि । महदादौ चास्ति प्रसाद-ताप-विषादादि-कार्योपलम्भः अतः प्रधानान्वितत्वसिद्धिः । शक्तितः प्रवृत्तेश्च; यो हि यस्मिन्नर्थे प्रवर्त्तते स तत्र समर्थः यथा तन्तुवायः पटकरणे, प्रवर्त्तते च प्रधानं व्यक्तकरणे, अतोऽस्ति तस्य शक्तिः यया व्यक्तमुत्पादयति, सा च निराधारा न संभवति इति तदस्तित्वसिद्धिः । कारण-कार्यविभागाच्च; न हि कारणमन्तरेण महदादिकार्यविभागो घटते मृत्पिण्डमन्तरेण घटादिवत् , अस्ति चाऽयम् , अतः कार्यदर्शनात् कारणास्तित्वसिद्धिः । अविभागाच्च वैश्वरूप्यस्य; वैश्वरूप्यं हि महदादिप्रपञ्चोऽभिधीयते, तच्च प्रलयकाले क्वचिद् अविभागं गच्छति, भूतानि हि तन्मात्रेषु लीयन्ते, तन्मात्राणि इन्द्रियाणि च अहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिः प्रकृतौ इति । एवं प्रमाणतः प्रसिद्धसत्ताका प्रकृतिः अनेन क्रमेण तत्त्वसृष्टौ प्रवर्त्तते—

"प्रकृतेर्महान् ततोऽहङ्कारः तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥" [सांख्यका० २२] इति ।

प्रथमं[2] हि प्रकृतेर्महान् एको व्यापकः विषयाध्यवसायरूपः आसर्गप्रलयस्थायी प्रभवति, स च अस्मादृशामसंवेद्यस्वभावः, ततस्तु याः प्रतिप्राणि विभिन्ना बुद्धिवृत्तयो निःसरन्ति ताः संवेद्यस्वभावाः । ततश्च अहङ्कारस्तथाविधो जलनिधिरिव प्रतिप्राणि विभिन्नैः तैस्तैः 'स्थूलोऽहम् सुरूपोऽहम्' इत्याद्यहङ्कारतरङ्गविशेषैः प्रसरति, स च अहङ्कारः[3] 'वैकारिकः, भूतादिश्च' इति प्रथमतो द्विप्रकारः प्रसरति । तत्र वैकारिकात् सत्त्वप्रधानात् प्रकाशरूप एकादशविध इन्द्रिय-

---

१ "त्रैलोक्यं पञ्चसु महाभूतेष्वविभागं गच्छति पञ्चमहाभूतानि तन्मात्रेषु ।···" माठरवृ० पृ० २७।

२ "प्रकृतिः प्रधानमधिकुरुते । ब्रह्म अव्यक्तं बहुधात्मकं माया इति पर्यायाः । तस्याः प्रकृतेर्महान् एकः उत्पद्यते–महान् बुद्धिः मतिः प्रज्ञा संवित्तिः ख्यातिः चितिः स्मृतिरासुरी हरिः हरः हिरण्यगर्भ इति पर्यायाः । ततोऽहङ्कारः···तस्य इमे पर्यायाः वैकृतः तैजसो भूतादिः अभिमानोऽस्मिता इति । चतुःषष्टिवर्णैः स्वरादिवैखरीपर्यन्तैः यत्किमप्यभिधीयते बुद्धया समर्थ्य तत्सकलम् आद्यन्ताकारहकारवर्णद्वयग्रहणेन उपरिस्थितपिण्डीकृतानुकारिणा बिन्दुना भूषितः प्रत्याहारन्यायेन अहङ्कार इत्यभिधीयते ।" माठरवृ० पृ० । ३ "अत्राह त्रिविधोऽहङ्कारः तं व्याख्यास्यामः । तत्र कतरस्मादहङ्कारात् इन्द्रियाणि उत्पद्यन्ते कतरस्माद्वा तन्मात्राणीति ? अत्रोच्यते–सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् । भूतादेः तन्मात्रः स तामसः तैजसादुभयम् ॥ २५ ॥ यदा सत्त्वमुत्कटं भवति अहङ्कारे, तेन च सत्त्वेन रजस्तमसी अभिभूते स्यातां तदा सात्त्विकोऽहङ्कार उच्यते । तस्य सात्त्विकस्य वैकृतिक इति पूर्वाचार्यैः संज्ञा कृता । स वैकृतिको भूत्वा अहङ्कार एकादशेन्द्रियाणि उत्पादयति···भूतादेः तमोबाहुल्यात् गौणीभूतसत्त्वरजसः भूतादिनाम्नः पूर्वाचार्यैर्निरूपितादहङ्कारात् तन्मात्रः शब्दादिपञ्चको गणो जायते । अभिभूतसत्त्वतमसो राजसात् तैजसाभिधानादहङ्कारात् प्रवृत्तिकर्मेण उभयं प्रकाशात्मकम् एकादशेन्द्रियकं मोहात्मकं तन्मात्रिकं चासीदिति सम्बन्धः । तैजसे एव राजसेऽहङ्कारे क्रियाशक्तिरस्ति । सत्त्वं निष्क्रियमेकाकि न शक्नोति उत्पादयितुम् । तमश्च मूढत्वादक्रियम् असमर्थं विना रजः सृष्टिमुत्पादयितुम् । अत उभे सत्त्वतमसी सृष्टिविषये रजसाऽनुगृहीते ऐन्द्रियकं तन्मात्रिकं च गणद्वयं जनयतः इति तात्पर्यार्थः ।" सांख्यका०२५, माठरवृत्ति ।

गणः–पञ्च बुद्धीन्द्रियाणि श्रोत्र-त्वक्-चक्षुः-जिह्वा-घ्राणलक्षणानि 'बुद्धये बुद्धिमभिव्यक्तुम् इन्द्रियाणि' इति, पञ्च कर्मेन्द्रियाणि–वाक्-पाणि-पाद-पायु-उपस्थसंज्ञानि 'कर्मणे कर्म अभिव्यक्तुम् इन्द्रियाणि' इति, मनः[3] सङ्कल्परूपम्–'ग्रामेऽहं प्रस्थितः, सुवर्णस्य प्राप्तिर्भविष्यति द्रव्यस्य वा' इत्यादि सङ्कल्पवृत्तिर्मनः। भूतादेस्तु पञ्चतन्मात्राणि नित्यादिस्वभावानि, ततोऽपि महाभूतानि तथाविधानि[4] इति।

एवं तत्त्वसृष्टिं विधाय भूतसृष्टौ यदा प्रकृतिः प्रवर्त्तते तदा प्रथमतो ब्रह्मणः[5] प्रादुर्भावः, तस्य च महत्तत्त्वात् योजनशतपरिमाणा बुद्धिर्निःसरति, अहङ्कारतत्त्वाच्च अहङ्कारः एकादश इन्द्रियाणि, तन्मात्रेभ्यः सूक्ष्मदेहारम्भकाणि भूतानि, तदुपरि प्रभूतेभ्यो भूतेभ्यः प्रतिप्राकारस्थानीयः स्थूलो देहः सांसिद्धिकः कललादिक्रममन्तरेण झटिति उत्पद्यते, एवं मन्वादीनामपि। अन्येषां तु सूक्ष्मभूतारब्धं शरीरम् आसर्गप्रलयस्थायि, प्रतिप्राकारस्थानीयं तु मनुष्यादीनां मातापितृजम्[7], देव-नारक-क्षुद्रजन्तूनां च [8]औपपादकम् इति। अयञ्च महदादिप्रपञ्चः प्रकृतौ सन्नेव कुतश्चिद् आविर्भावं प्रतिपद्यते–

"असदकरणादुपादानग्रहणात् सर्वसंभवाऽभावात्।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥" [सांख्यका० ९] इति हेतुपञ्चकादवसीयते। [10]"यदि हि कारणे कार्यमसत् स्यात् तदा नीरूपत्वात् खपुष्पवत्" तत् कर्त्तुं न [12]शक्येत। यदि च असदेव कार्यम् तर्हि नियतोपादानं न स्यात्, यथैव हि तन्तुषु घटस्य असत्त्वं तथा मृत्पिण्डेऽपि अतो मृत्पिण्डवत् तन्तवोऽपि घटार्थिना उपादीयेरन्, पूर्वः कार्यापे-

---

१ "बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षूरसननासिकाख्यानि। वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥२६॥" सांख्यका०। "इन् इति विषयाणां नाम, तान् इनः विषयान् प्रति द्रवन्तीति इन्द्रियाणि। शब्दस्पर्शरूपरसगन्धान् बुध्यन्त इति बुद्धीन्द्रियाणि···कर्म कुर्वन्ति कारयन्ति च कर्मेन्द्रियाणि।···"माठरवृ०। २–व्यक्तये भां०। ३ "उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्। गुणपरिणामविशेषाच्चानात्वं ग्राह्यभेदाच्च ॥ २७ ॥" सांख्यका०। उभयात्मकमत्र मनः–कर्मेन्द्रियेषु कर्मेन्द्रियम्, बुद्धीन्द्रियेषु बुद्धीन्द्रियम्। माठरवृ०। ४ तथाभूतानीति श्र०। ५ "मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्। संभवः सर्वभूतानां ततो भवति भारत ॥ १४ ॥" भगवद्गी० अ० ३। "मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिः योनिः सर्वभूतानां सर्वकार्येभ्यो महत्त्वात् भरणाच्च स्वविकाराणां महद् ब्रह्म इति योनिरेव विशिष्यते। तस्मिन् महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं दधामि निक्षिपामि···।" भगवद्गी० शां० भा०। ६–रिभू–ब०, ज०। ७ मनुष्याणां आ०। "सूक्ष्माः मातापितृजाः सहप्रभूतैः त्रिधा विशेषाः स्युः। सूक्ष्मास्तेषां नियता मातापितृजाः निवर्त्तन्ते ॥ ३९ ॥" सांख्यका०। "सूक्ष्मास्तावत् पंच तन्मात्रकाः तैरेव आदिसर्गे सूक्ष्मशरीराणि त्रयाणां लोकानां प्रारब्धानि। तत् सूक्ष्मशरीरम् ऋतुकाले मातुरुदरं प्रविशति···तैरारब्धं सूक्ष्मशरीरमस्मिन् स्थूलशरीरे पतति।" माठरवृ०। सांख्यसू० ३।७। ८–नां तु औ–ब०, ज०, श्र०। ९ औपपादुकम् ब०, आ०। औपपादिकम् श्र०। १० यदि का–आ०। ११–वत् क–आ०। १२ शक्यते भां०, श्र०।

क्षया दोषः अयं तु कारणापेक्षया। यदि च असत् कार्यम् सर्वं सर्वस्मात् जायेत असत्त्वाऽविशेषात्, ततश्च मृत्पिण्डादपि घट-पटोत्पत्तिः तन्तुभ्यश्च स्यात् इति, अयं कारणापेक्षयैव अतिप्रसङ्गो दोषः। शक्तस्य च शक्यकरणं न्याय्यम्, न च असतः कार्यस्य आकाशकुशेशयवत् शक्यक्रियत्वम्, नापि तत्र कारणस्य सामर्थ्यम्, अयश्च कार्यकारणयोर्धर्मापेक्षया दोषः। कारणभावाच्च सत्कार्यम्; कारणभावो हि कारणत्वम्, तच्च नित्यसम्बन्धित्वात् कार्यसम्बन्धमपेक्षते, न च असता गगनाम्भोजप्रख्येण कारणस्य कश्चित् सम्बन्धः, अतः कारणे कार्यं तादात्म्येन वर्त्तते[2]। कथमेवं तयोर्भेदः? इति चेत्;

"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥" [सांख्यका० १०] इति

लक्षणभेदात्। व्यक्तमेव हेतुमत्–हेतुः कारणम् अस्याऽस्तीति, प्रधानेन हि हेतुमती बुद्धिः, बुद्ध्या अहङ्कारः, अहङ्कारेण षोडशको गणः[3], पञ्चतन्मात्रैः पञ्चमहाभूतानि, न तु प्रधानं तत्कारणाऽसत्त्वात्। चिद्रूपश्च पुरुषो न जडस्य कारणम् अत्यन्तविलक्षणत्वात्, जडानां सा सूक्ष्मतरावस्था, न अतो अवस्थान्तरं सूक्ष्मतममस्ति तेन जडस्य अजडस्य वा प्रधानं प्रति कारणत्वाऽभावात् सिद्धमस्याहेतुमत्त्वम्। अत एव तत् नित्यम्, तद्विपर्ययात् महदाद्यनित्यम्। कारणाच्च कार्येण अल्पपरिमाणेन भवितव्यम् इति कारणापेक्षया महदादेः अव्यापकत्वम्, विपर्ययात् प्रधानस्य व्यापकत्वम्। क्रिया च परिस्पन्दात्मिका मूर्त्तस्यैव महदादेर्भवति इति सक्रियं तत्, एतद्विपर्ययात् निँष्क्रियं[4] प्रधानम्, परिणामात्मिका तु क्रिया द्वयोरप्यस्ति। बहूनाम् ईश्वराणां परस्परमतभेदेन कार्यारम्भे यथा काचपच्यात् कार्याऽनिष्पत्तिः तथा बहूनां प्रधानानामपि इति एकं तत्, व्यक्तं तु महदादिभेदाद् अनेकम्। आश्रितश्च व्यक्तम्, यद् यस्मादुत्पद्यते तस्य तदाश्रितत्वात्, न तु एवमव्यक्तम् तस्य अकार्यत्वात्। लिङ्गञ्च; 'लीनं सूक्ष्मं स्वकारणं गमयति, लयं गच्छति' इति वा। घनीभूताऽवयवयोगात् सत्त्वादि-अङ्गाऽङ्गिभूताऽवयवयोगाच्च सावयवं व्यक्तम्, तद्विपर्ययात् निरवयवमव्यक्तम्। हेतुमत्त्व-आश्रितत्वाभ्यां परतन्त्रं व्यक्तम्, न त्वेवमव्यक्तम्। न चैवमनयोः आत्यन्तिको भेद एव;

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥" [सांख्यका० ११] इति

लक्षणाऽभेदात् तदभेदस्यापि उपपत्तेः। सत्त्वरजस्तमोमयत्वाद् द्वयोरपि त्रिगुणत्वं तुल्यम्। 'इमे सत्त्वादयो गुणाः, इदं व्यक्ताऽव्यक्तम्' इति प्रथक्कर्त्तुमशक्यत्वात् अविवेकि। तथा द्वयमपि विषयः भोग्यस्वभावत्वात्, 'विषिणोति भोग्यतया बध्नाति इन्द्रियाणि' इति विषयः।

---

१ तत्का–आ०, ब०। २ प्रवर्त्तते आ०। ३ धर्मः ब०, ज०,। एकादशेन्द्रियाणि पंचतन्मात्राश्च। ४ निष्क्रियत्वं आ०।

सामान्यञ्च सर्वपुरुषोपभोग्यत्वात् देशकुटीवत्। विषयत्वादेव च अचेतनं तत्, चेतनस्य एवंरूपत्वाऽनुपपत्तेः। प्रसवधर्मि च द्वयमपि 'प्रसवः कार्यजननं धर्मोऽस्य' इति; तथाहि–प्रधानं बुद्धिं जनयति, बुद्धिरपि अहङ्कारम्, अहङ्कारोऽपि तन्मात्राणि इन्द्रियाणि च एकादश, तन्मात्राणि महाभूतानि जनयन्तीति। पुरुषस्तु सामान्यधर्मेण सरूपः अन्यैस्तु धर्मैः विरूपः, यथा हि प्रधानं भोग्यत्वेन सर्वभोक्तृसाधारणम् तथा पुरुषोऽपि भोक्तृत्वेन सर्वभोग्यसाधारण इति[1]।

अत्र प्रतिविधीयते। यत्तावदुक्तम्[2]–प्रकृतिसद्भावाऽऽवेदकं '*भेदानां परिमाणात्*' इत्यादिहेतुपञ्चकम्; तद् आश्रयाऽसिद्धिदोषदुष्टत्वाद् अयुक्तम्; प्रकृतेः असंवेद्यस्वभावतया स्वरूपेण असिद्धत्वात्। व्यधिकरणाऽसिद्धत्वाच्च,'परिमितत्वादिकं[3] हि साधनं भेदेषु वर्त्तते अस्तित्वं तु साध्यं प्रकृतौ' इति। अथ महदादिभेदानामेव अत्र एककारणपूर्वकत्वं प्रसाध्यते तेन उक्तदोषद्वयाऽभावः; तन्न; प्रधानं[4]-पुरुषैरनेकान्तात्, तत्र एकत्व-अनेकत्वसंख्यया महापरिमाणेन च परिमितत्वेऽपि एककारणपूर्वकत्वाऽसंभवात्। किञ्च, परिमितं च स्यात् एककारणपूर्वकञ्च न स्यात् किं विरुद्धयेत्? एककारणपूर्वकत्वे च ईश्वरः कालादिर्वा एकं कारणं भविष्यति इति विरुद्धत्वम्। दृष्टान्तस्य[5] साध्यविकलता; घटादेरेककारणपूर्वकत्वासंभवात्। न हि एकं किञ्चित् जनकं प्रतीयते, सहकारि-इतरकारणप्रभवत्वात् कार्याणाम्। मृत्पिण्डस्यापि[6] अनेकावयवसमुदायात्मकत्वात् न सर्वथैकत्वम्, मृद्द्रव्यस्यापि प्रतिपर्यायं भेदात्। अतः परिमितत्वमनेककारणपूर्वकत्वेनैव व्याप्तत्वात् विरुद्धम्।

सत्कार्यवादप्रतिविधानपुरस्सरं सांख्याभिमततत्त्वसृष्टि-भूतसृष्टिप्रक्रिययोः विस्तरतः खण्डनम्—

'समन्वयात्' इत्यपि अनैकान्तिकम्; प्रकृति-पुरुषाणामेककारणपूर्वकत्वाऽभावेऽपि नित्यव्यापित्वादिधर्मैः समन्वयसंभवात्, पुरुषाणाञ्च भोक्तृत्वादिधर्मैः इति। भिन्नजातीनां च जलाऽनलादीनामेकोपादानप्रभवत्वं दुरुपपादम्, पदार्थजातिभेदस्य कारणैकत्वविरोधित्वात्। असिद्धञ्चेदम्; नहि समग्रभूतग्रामस्य सुखदुःखमोहमयत्वेन प्रधानान्वितत्वसिद्धिरस्ति[7] 'सुखादीनामन्तःसंविद्रूपतया प्रतिभासतो बाह्यार्थानां तन्मयत्वाऽनुपपत्तेः, न हि कश्चित् बाह्यं स्रक्चन्दनादिकं 'सुखम्' इति प्रतिपद्यते, सुखजनकत्वेन आबालं तत्प्रसिद्धेः। न च कार्यकारणयोः एकत्वम् अनौपचारिकं प्रामाणिकैः आद्रियते। प्रधानसत्त्वस्य च अद्याप्यप्रसिद्धेः तस्यैव

---

१ पूर्वपक्षे निर्दिष्टानां सांख्यकारिकाणां विशेषव्याख्यानं माठरवृत्तौ तत्त्वकौमुद्यां च द्रष्टव्यम्। २ पृ० ३५० पं० १५। ३–कं साधनं आ०। ४ "प्रधानपुरुषैरनेकान्तात्।..." स्या० रत्ना० पृ० ९८६। ५–स्य च सा–श्र०। ६ "मृद्विकारादयो भेदाः नैकजात्यन्विितास्तथा। सिद्धा नैकनिमित्ताश्च मृत्पिण्डादेर्विभेदतः॥ ४३॥ चैतन्याद्यन्वितत्वेऽपि नैकपूर्वत्वमिष्यते। पुरुषाणाममुख्यं चेत्तदिहापि समं न किम्॥ ४४॥" तत्त्वसं०। सन्मति० टी० पृ० ३०६। स्या० रत्ना० पृ० ९८६। ७–वयवस्य समुदा–श्र०। ८ दुःखादीना–भां०। "नहि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते। सुखादीनां चान्तरत्वप्रतीतेः, शब्दादीनां चातद्रूपत्वप्रतीतेः...।" ब्रह्मसू० शां० भा० २।२।१।

शक्तितः प्रवृत्तेः तदस्तीति किं केन संङ्गतम्, अन्यथा 'खपुष्पमस्ति तस्यैव शक्तितः प्रवृत्तेः' इत्यपि स्यात्। शक्तेश्चैं व्यतिरेक-अव्यतिरेकैकान्ते अनुपपत्तेः कथं ततः कस्यचित् प्रवृत्तिः? कारणकार्यविभागाच्च तत्सत्त्वसिद्धिः खरविषाणसत्त्वसिद्धिमन्वाकर्षति, न खलु खरविषाणवत् प्रधानस्य सत्त्वं कुतश्चित् प्रसिद्धम्। प्रलयकालस्य चाप्रसिद्धेः अविभागोऽपि वैश्वरूप्यस्य उक्तप्रकारोऽप्रसिद्ध एव। तन्न उक्तहेतुभ्यः प्रैंकृतिसिद्धिः। ५

अस्तु वा ततस्तत्सिद्धिः, तथापि प्रकृतिः तत्त्वसृष्टौ भूतसृष्टौ च प्रवर्त्तमाना स्वँभावतः प्रवर्त्तते, किञ्चिन्निमित्तमाश्रित्य वा? स्वभावतः प्रवृत्तौ नैयत्येन प्रवृत्तिः प्रवृत्तिविरामश्च न स्यात्, चैतन्यशून्यस्य 'एतावत्येव तत्त्वसृष्टिः,इदमस्यैव च उपकारकं भवतु' इत्यनुसन्धानविकलस्य तदसंभवात्। निमित्तंञ्च किं पुरुषप्रेरणम्, पुरुषार्थकर्त्तव्यता वा स्यात्? न तावत् पुरुषप्रेरणम्; निरभिलाषस्य उदासीनतया इष्टस्य 'इदमस्माद् भँवति' इति अनुसन्धानाऽभावतः प्रतिनियतायां प्रसवक्रियायां तत्प्रेरणाऽसंभवात्। नापि पुरुषार्थकर्त्तव्यता; पुरुषस्य निरभिलाषतया अर्थस्यैव असंभवात्। प्रकृतेश्च जडतया 'पुरुषप्रयोजनमहं सम्पादयामि' इत्यनुसन्धानाऽनुपपत्तेः। नहि पुरुषेण अनभिलषितः पुरुषार्थो नाम, लोके हि 'अस्य इदमभिलषितम्' इति तद्वचनादन्यतो वा कुतश्चिन्निश्चित्य 'अस्य अभिलषितमहं सम्पादयामि येनायं मम तुष्यति' इति अनुसन्धाय च प्रवृत्तिः प्रतीयते। अथ अस्याः स्वभावस्तादृशः येन केनचिदप्रयुक्ताऽपि 'अस्याभिलाषं पूरयामि' इत्यनुसन्धानशून्याऽपि एवंविधं विश्वप्रपञ्चमाँरचयतीति; नन्वयं स्वभाववादः प्रमाणप्रतिपन्ने वस्तुनि उपपन्नः यथा अग्न्याकाशयोर्दहनेतरस्वभावतायाम्, तदप्रतिपन्नेऽपि तदभ्युपगमे वन्ध्यासुतादेरपि जगद्वैचित्र्यविधाने स्वभावाऽभ्युपगमः किन्न स्यात्? ततः प्रधानस्य परिणामप्रसराऽनुपपत्तेः अयुक्तम्–*'प्रकृतेर्महान्'* इत्यादि तत्प्रसरक्रमनिरूपणम्। १० १५ २०

किञ्च, अयं महदादिप्रपञ्चः प्रकृतेर्भिन्नः, अभिन्नो वा? अँभेदे द्वयोरप्यविशेषतः कार्यत्वं कारणत्वं वा स्यात्, तथा च 'प्रकृतेः कारणत्वमेव, भूतेन्द्रियलक्षणषोडशकगणस्य कार्यत्वमेव, बुद्धि-अहङ्कार-तन्मात्राणां पूर्वोत्तरापेक्षया कार्यत्वं कारणत्वञ्च' इति प्रतिज्ञातं विरुद्धयेत। तथा चेदमसङ्गतम्—

---

१ संगृह्यताम् ब०, ज०। २ "शक्तितः प्रवृत्तेः इत्यनेन यद्यव्यतिरिक्तशक्तियोगिकारणमात्रं साध्यते तदा सिद्धसाध्यता। अथ व्यतिरिक्तविचित्रशक्तियुक्तमेकं नित्यं कारणं तदाऽनैकान्तिकता हेतोः…।" तत्त्वसं० पं० ३९। प्रमेयक० पृ० ८४ पू०। सन्मति० टी० पृ० ३०६। ३ प्रकृतसि–ज०। ४ "तच्च केवलं प्रधानं…किमपेक्ष्य प्रवर्तते निरपेक्ष्य वा?" प्रमेयरत्नमा० ४।१। ५–त्तं किं आ०। ६ भवतु आ०। ७–माचरतीति ब०, ज०, आ०। ८ "नहि यद् यस्मादव्यतिरिक्तं तत्तस्य कारणं कार्यं वा युक्तं भिन्नलक्षणत्वात् कार्यकारणयोः।…ततश्च यद्भवद्भिः मूलप्रकृतेः कारणत्वमेव…।" तत्त्वसं० पं० पृ० २२। प्रमेयक० पृ० ८१ उ०। सन्मति० टी० पृ० २९६। ९ रूपान्तरापेक्षया ब०, ज०।

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥" [सांख्यकारि० ३] इति ।

यच्च प्रकृतौ महदादिप्रपञ्चस्य सत्त्वसाधने *'असदकरणात्'* इत्यादि साधनमुपन्यस्तम्[1]; तत्र को धर्मी, किञ्च साध्यम् ? यदि कार्यं धर्मी, 'प्रागुत्पत्तेः सत्' इति साध्यम् ; तदा व्यधिकरणाऽसिद्धो हेतुः, सत्त्वं हि साध्यं महदादिकार्ये वर्त्तते असदकरणं तु साधनं खपुष्पादौ अकार्ये इति । अथ असदकरणम् 'सतः करणात्' इत्यत्र पर्यवस्यति; तदा साध्याऽविशिष्टत्वम् । अथ क्रियमाणत्वं हेतुः, प्रागुत्पत्तेः कार्यमस्ति क्रियमाणत्वात्, 'असदकरणात्' इति तु व्यतिरेककथनम्–'यदसत् तन्न क्रियते यथा गगनकुसुमम्' इति; तदप्यविचारितरमणीयम् ; सतः करणविरोधात्, यद्धि निष्पन्नं स्वात्मसत्तां प्रति अन्यनिरपेक्षं तत् 'सत्' इत्युच्यते, तस्य च कथं करणम् ? प्रयोगः–यत्[2] सर्वात्मना सत् तन्न केनचित्कर्तुं शक्यम् यथा प्रकृतिः पुरुषो वा, सच्च सर्वात्मना परमते कार्यमिति । अतः अनिष्पन्नस्यैव करणमुपपन्नम्, निष्पन्नत्व-अनिष्पन्नत्वयोश्च विरुद्धधर्मयोः एकत्र धर्मिणि एकान्तवादिनः समावेशाऽसंभवात् अतो विरुद्धोऽयं हेतुः, क्रियमाणत्वस्य असत्त्वे सत्येव संभवात् ।

असत्कार्यवादाऽनभ्युपगमे च कथं कारणेऽसन्तो हेतुमत्त्वादयो धर्माः कार्ये भवितुमर्हन्ति ? न खलु ते व्यक्तवद् अव्यक्ते सन्ति । कालात्ययापदिष्टश्च; पक्षस्य प्रत्यक्षबाधनात्, न खलु उत्पत्तेः प्राक् कार्यं स्वतन्त्रं कारणात्मकं वा प्रत्यक्षतः प्रतीयते, सतो हि क्षीरादौ विशिष्टाकारसंस्थानरसाद्युपेतस्य दध्यादेः प्रत्यक्षेण अवश्यं भाव्यम्, दध्यार्थिनः[3] क्षीरादौ प्रवृत्त्या च । अथ न साक्षाद् व्यक्तीभूता दध्याद्यवस्था तत्र साध्यते, किन्तु शक्त्यात्मना तत्र व्यवस्थितं दध्यादि व्यक्तीभवति इति ; ननु केयं शक्त्यात्मकता नाम–दध्यादेः सूक्ष्मेण रूपेण अवस्थानम्, क्षीरादेस्तज्जननसामर्थ्यं[4] वा ? तत्र आद्यः पक्षोऽयुक्तः; नहि पदार्थस्य द्वे रूपे स्तः स्थूलं सूक्ष्मं च, निष्पन्नता हि पदार्थस्य स्वरूपप्राप्तिः, सा चेदस्ति किं स्थूल-सूक्ष्मभेदेन ? द्वितीयपक्षे तु न सत्कार्यवादः समर्थितः, नहि सामर्थ्यमेव कार्यं युक्तम् ।

किञ्च इदं कार्यं नाम–किमसतः प्रादुर्भावः, अङ्गाङ्गिभावगमनम्, धर्मिणः पूर्वधर्मत्यागेन धर्मान्तरस्वीकारो वा ? प्रथमपक्षे स्वमतविरोधः । द्वितीयपक्षे तु कः अङ्गाङ्गिभावार्थः ? गुणप्रधानभावश्चेत्; तथाहि–यत्र सत्त्वम् अङ्गि रजस्तमसी अङ्गे तत्र सात्त्विकः परिणामः सुखात्मा स्रक्चन्दनादिः, यत्र रजः अङ्गि सत्त्वतमसी अङ्गे तत्र राजसो दुःखात्मा अहिकण्ट-

---

१ पृ० ३५२ पं० १३ । २ "यत् सर्वाकारेण सन्न तत् केनचिज्जन्यम् यथा प्रकृतिः चैतन्यं वा ?" तत्त्वसं० पं० पृ० २५ । सन्मति० टी० पृ० २९८ । ३ दध्यर्थिनः आ०, ब०, ज०, श्र० । "यदि दध्यादयः सन्ति दुग्धाद्यात्मसु सर्वथा । तेषां सतां किमुत्पाद्यं हेत्वादिसदृशात्मनाम् ॥ १७ ॥" तत्त्वसं० । ४ तज्जनकत्वसाम– श्र० ।

कादिः, यत्र तमः अङ्गि सत्त्वरजसी अङ्गे तत्र तामसः अन्धकारादिः इति; तदसत्यम्; स्रक्चन्दनादेः सुखाद्यात्मकत्वस्य प्राक् प्रतिषेधात्। अङ्गाङ्गिता च सत्त्वादेः पूर्वरूपवैलक्षण्ये, अवैलक्षण्ये वा स्यात्? अवैलक्षण्ये अङ्गिता वा अङ्गतैव वा स्यात्? वैलक्षण्ये तु धर्मिणः पूर्वधर्मत्यागेन धर्मान्तरस्वीकार एव स्वीकृतः स्यात् सत्त्वादेः सूक्ष्मरूपत्यागेन स्थूलरूपतोपादानात्। पूर्वधर्मस्य च त्यागे नाशः तिरोभावः, नाशाभ्युपगमे स्वमतक्षतिः। तिरोभावश्च ५ अतिरोभावविनाशमन्तरेण नोपपद्यते, तदभ्युपगमे च पूर्वधर्मविनाश एव अभ्युपगम्यताम् किमनेन अन्तर्गडुना? तथा च परमतप्रवेशः।

धर्मान्तरस्वीकारोऽपि तदुत्पादः, अभिव्यक्तिर्वा? न तावत् तदुत्पादः; सत्कार्यवादक्षतिप्रसङ्गात्। अभिव्यक्तिरपि ज्ञानधर्मः, अर्थधर्मो वा स्यात्? यदि ज्ञानधर्मः; अर्थस्य किमायातं येन सोऽप्यभिव्यक्तः स्यात्? यज्ज्ञानधर्मश्चासौ तज्ज्ञानमपि तत्कालोत्पन्नम्, पूर्व- १० कालस्थितं वा? पूर्वकालस्थितत्वे पूर्वमपि उपलम्भः स्यात्। तत्कालोत्पत्तौ च सत्कार्यवादक्षतिरेव। अर्थधर्मत्वेऽपि अर्थस्य सदा सत्त्वेन अस्याः सदा सत्त्वाऽनुषङ्गात् सदैव अभिव्यक्तोऽर्थः स्यात्, तदाऽसत्त्वे वा अस्य असत्कार्यवादप्रसङ्गात् स एव परमतप्रवेशाऽनुषङ्गः। अभिव्यक्तेश्च पूर्वं यथा अन्यस्यां दाहादिक्रियायां वस्तु असमर्थम् तथा अभिव्यक्तावपि, तत्कथं तत्संभवः? कथञ्च अप्रत्यक्षस्वभावस्य प्रधानस्य प्रत्यक्षस्वभावो भावप्रपञ्चः स्यात्, नीरूप- १५ स्वभावस्य च रूपवान्? नीरूपादपि अतो रूपवद्भावप्रपञ्चसंभवे [२]चेतनादात्मनो अचेतनो जगत्प्रपञ्चः किन्न स्यात् यतो ब्रह्माद्वैतसिद्धिर्न स्यात्?

न च सत्कार्यवादे[३] कारकाणां साफल्यम्, प्रागसत्किञ्चिदपि अकुर्वतां कारकव्यपदेशस्यापि असंभाव्यमानत्वात्; प्रयोगः—यद् अविद्यमानसाध्यं न तत् कारकम् यथा चैतन्यम्, अविद्यमानसाध्यश्च परमते कारकत्वेनाभिमतः पदार्थ इति। न च अभिव्यक्तौ तेषां व्यापारः; २० तत्रापि सत्त्वाऽसत्त्वपक्षयोः करणाऽसंभवात्, न खलु सापि विद्यमाना कर्तुं युक्ता करणाऽनुपरमप्रसङ्गात्। अविद्यमानायाश्च करणे सत्कार्यवादहानिः स्यात्। कारकाणि च उपादानसहकारिभेदेन विभिन्नानि, तत्र क कुंटादिकार्यस्य सूक्ष्मेण रूपेण अनभिव्यक्तस्य अवस्थानम्? उपादाने मृत्पिण्डादौ चेत्; दण्डादीनामकारकत्वम्।

एतेन *'उपादानग्रहणात्'* इत्यपि प्रत्युक्तम्; व्यधिकरणाऽसिद्धत्वादेर्दोषस्य अत्राप्यविशे- २५

---

१ अभिव्यक्तायामपि आ०। २ चेतनात्मनो श्र०। ३ "यदि सत् सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति। परिणामप्रक्लृप्तिश्च नित्यत्वैकान्तबाधिनी॥ ३९॥" आप्तमी०, अष्टसह० पृ० १८१। ४ "साप्यभिव्यक्तिः प्राक् प्रवृत्तेः सती आहोऽसती इति पूर्ववत् प्रसङ्गः।" न्यायवा० पृ० ४४४। तत्त्वसं० पं० पृ० २६। न्यायमं० पृ० ४९३। प्रश० कन्द० पृ० १४४। प्रश० व्यो० पृ० ५४५। प्रमेयक० पृ० ८२ उ०। सन्मति० टी० पृ० २९८। ५ घटादि—ब०, ज०, भां०, श्र०। ६ प्रत्याख्यातम् भां०, श्र०। "उत्पत्तौ खलु सिद्धायामुपादानं विचार्यते। सतस्तु सैव नास्तीति किमुपादानचिन्तया॥" न्यायमं० पृ० ४९५। तत्त्वसं० पं० पृ० २६। सन्मति० टी० पृ० ३०२।

षात्। किञ्च, अन्वयव्यतिरेकसमधिगम्यः कार्यकारणभावः, यच्च यस्माद् अन्वयव्यतिरेकाभ्यामुपजायमानं दृष्टं तदर्थिभिः तद् उपादीयते न सर्वम्, तथा च प्राक् कार्यसद्भावाङ्गीकारोऽव्यर्थः। तदङ्गीकारे मूलत एव उपादानग्रहणाऽभावप्रसङ्गात्, नहि विद्यमानवस्तुसिद्ध्यर्थं कश्चिदुपादानं गृह्णाति, प्रधान-पुरुषयोरपि सिद्ध्यर्थमुपादानग्रहणानुषङ्गात्।

५ सर्वसंभवाऽभावोपि एतेन चिन्तितः; सर्वसंभवाऽभावो हि नियतस्य नियतात् जन्म उच्यते, तच्च सत्कार्यवादे दुर्घटम्। नैयत्यञ्च अन्वयव्यतिरेकाभ्यामेव अवगम्यते, यद्धि यस्मादुपजायमानं प्रमाणतः परिच्छिन्नं तत् कथमन्यतोऽपि स्यात् ? *'शक्तस्य शक्यकरणात्, कारणभावाच्च'* इत्यपि एतेन कृतोत्तरम्।

किमर्थञ्च [2]शिष्यान् प्रति भवतः शास्त्रप्रणयनं हेतूपन्यासश्च ? संशयोच्छित्ति-निश्चयोत्पत्त्यर्थमिति चेत्; तौ यदि संशय-निश्चयौ शिष्यबुद्धिस्थौ स्वरूपेण आसाते कथं तदुच्छित्त्यादिकम् ? अथ संशयस्य तिरोभावमात्रं तेन क्रियते न अत्यन्तमुच्छेदः *"नाऽभावो विद्यते सतः।"* [भगवद्गी० २।१६] इत्यभ्युपगमात्, निश्चयस्यापि अभिव्यक्तिमात्रम्; इत्यपि मनोरथमात्रम्; पुनः संशयाऽऽविर्भावप्रसङ्गात्, तथा च सम्प्रज्ञा[3]तयोगाय दत्तो जलाञ्जलिः, अत्यन्तसंशयोच्छेदस्य [4]कस्यचिदपि असंभवात्। अभिव्यक्तिश्च 'सती, असती वा न संभवति' इत्युक्तम्। अथ शास्त्र-साधनप्रयोगसाफल्यार्थम् असत उत्पत्तिः सतो विनाशश्च अङ्गीक्रियते; तर्हि तेनैव *'असदकरणात्'* इत्यादेर्व्यभिचार इति। तदेवं प्रधानसद्भावस्य तत्र महदादिसद्भावस्य च कुतश्चिद्धेतोरप्रसिद्धितः प्रकृतेः तत्त्वसृष्टिप्रक्रिया भूतसृष्टिप्रक्रियावत् खपुष्पसौरभव्यावर्णनप्रख्या इत्यु[5]पेक्षते। ततः स्थितमेतत्–**'भेदाऽभेदैकान्तयोरनुपलब्धेः अर्थस्य सिद्धिः अनेकान्तात्'** इति।

२० कुतः एतत् ? इत्यत्राह–**'नाऽन्तर्बहिर्वा'** इत्यादि। **स्वलक्षणं** सौगतकल्पितम् **सामान्यलक्षणं** ब्रह्माद्यद्वैतवादि-सांख्यपरिकल्पितम् **प्रमेयम्, 'न'** इति सम्बन्धः। क ? **अन्तर्बहिर्वा**। तर्हि यौगकल्पितं तत् प्रमेयं स्यादित्यत्राह–**परस्पराऽनात्मकम्**। अन्योन्यमत्यन्तभिन्नम् स्वलक्षणं सामान्यलक्षणं वा **'न प्रमेयम्'** इति सम्बन्धः। कथं न प्रमेयम् ? इत्याह–**'यथा'** इत्यादि। **यथा** येन प्रकारेण **मन्यते परैः** इति। तर्हि भेदाऽभेदैकान्तव्यतिरेकेण

१–णप्रसङ्गात् श०। २ "न सन्देहविपर्यासौ निवर्त्स्यौ सर्वदा स्थितेः। नापि निश्चयजन्माऽस्ति तत एव वृथाऽखिलम् ॥ २४ ॥" तत्त्वसं०। प्रमेयक० पृ० ८२ उ०। स्या० रत्ना० पृ० ९७९। ३ "वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः।" योगसू० १।१७। ४ क्वचिदपि ब०, ज०। ५–पेक्ष्यते आ०। "चिदर्थशून्या च जडा च बुद्धिः शब्दादितन्मात्रजमम्बरादि। न बन्धमोक्षौ पुरुषस्य चेति कियज्जडैर्न ग्रथितं विरोधि ॥१३॥" स्याद्वादमं०।

अन्यस्य असंभवान्न किञ्चित् प्रमेयं स्यादित्यत्राह–'द्रव्य' इत्यादि। द्रव्यपर्यायौ उक्तलक्षणौ आत्मा स्वभावः यस्य अर्थस्य तस्य बुद्धौ प्रत्यक्षादिप्रतीतौ प्रतिभासनात् स एव अस्याः प्रमेयः सिद्धः।

'द्रव्यपर्यायौ अत्यन्तं भिन्नौ भिन्नप्रतिभासत्वात्' इत्यादिना सर्वथा भेदमुपवर्ण्ययतो यौगस्य पूर्वपक्षः—

ननु द्रव्यपर्याययोः भिन्नप्रतिभासत्वादिना अन्योन्यमत्यन्तं भिन्नत्वात् कथं तदात्माप्यर्थः प्रमेयः स्यात्? तथाहि–द्रव्यपर्यायौ अत्यन्तं भिन्नौ भिन्नप्रतिभासत्वात् घटपटादिवत्। घटपटादौ हि भिन्नप्रतिभासत्वमत्यन्तभेदे सत्येव उपलब्धम्, तद् द्रव्यपर्याययोरुपलभ्यमानं कथन्नात्यन्तभेदं प्रसाधयेत्? अन्यत्राप्यस्य तदप्रसाधकत्वप्रसङ्गात्। न चानयोर्भिन्नप्रतिभासत्वमसिद्धम्; तन्त्वादिद्रव्यप्रतिभासस्य पटादिपर्यायप्रतिभासवैलक्षण्येन अखिलप्राणिनां सुप्रसिद्धत्वात्। तथा विरुद्धधर्माध्यासतोऽपि अनयोः जलाऽनलवद् भेदः। नचानयोः तदध्यासोऽसिद्धः; पटो हि पटत्वजातिसम्बन्धी विलक्षणार्थक्रियासम्पादकः अतिशयेन महत्त्वयुक्तोऽनुभूयते, तन्तवस्तु तन्तुत्वजातिसम्बन्धिनोऽल्पपरिमाणादिधर्मोपेताश्च, इति कथन्न भिद्यन्ते? तादात्म्यञ्च एकत्वमुच्यते, तस्मिंश्च सति प्रतिभासभेदो विरुद्धधर्माध्यासश्च न प्राप्नोति विभिन्नविषयत्वात्तयोः। तथा तन्तुपटादीनां तादात्म्ये 'पटः तन्तवः' इति संज्ञाभेदः, वचनभेदः, 'पटस्य भावः पटत्वम्' इति षष्ठी, तद्धितोत्पत्तिश्च न प्राप्नोति। तथा तत्तादात्म्ये तत्पुरुष-बहुव्रीहि-द्वन्दसमासा अपि न प्राप्नुवन्ति, सति[3] हि भेदे तत्पुरुषो दृष्टः यथा राज्ञः पुरुषः एवं 'तन्तूनां पटः' इति, बहुव्रीहिश्च यथा चित्रगुः एवं 'तन्तुकारणकः पटः' इति, द्वन्दश्च यथा प्लक्ष-न्यग्रोधौ एवं 'तन्तुपटौ' इति।

किञ्च 'तादात्म्यम्' इत्यत्र किं 'स पटः आत्मा येषां तन्तूनाम् तेषां भावः तादात्म्यम्' इति विग्रहः, ते वा तन्तवः आत्मा यस्य पटस्य, 'स च ते च आत्मा यस्य' इति वा? तत्र आद्यविकल्पे पटस्य एकत्वात् तन्तूनामपि एकत्वप्रसङ्गः, अन्यथा तत्तादात्म्याऽनुपपत्तिः। द्वितीयविकल्पे तु तन्तूनामनेकत्वात् पटस्यापि अनेकत्वाऽनुषङ्गः, अन्यथा तत्तादात्म्यं न स्यात्। तृतीयविकल्पस्तु अविचारितरमणीयः; तद्व्यतिरिक्तस्य वस्तुनोऽसंभवात्, नहि तन्तु-पटव्यतिरिक्तं किञ्चिद् वस्त्वन्तरमस्ति यस्य तन्तुपटात्मता उच्यते। तन्न द्रव्यपर्याययोस्तादात्म्यं घटते।

एतेन गुणगुणिनोः क्रियातद्वतोः सामान्यविशेषयोः भावाऽभावयोश्च तादात्म्यं प्रत्याख्यातम्; भिन्नप्रतिभासत्वस्य विरुद्धधर्माध्यासादेश्च तद्बाधकस्य अत्राप्यविशेषात्। गुणगुण्यादीनाञ्च आकारनानात्वेऽपि अन्योन्यमनानात्वे बहिरन्तर्वा नानात्ववार्त्तोच्छेदः स्यात्। किञ्च, एकं नित्यं निरवयवं व्यापि च सामान्यस्वरूपम् तद्विपरीतस्वभावाश्च विशेषाः, तत्र यदि वस्तुनः सामान्यस्वभावता उररीक्रियते कथं तत्र विशेषरूपता स्यात् विरोधात्? अथ

१–न्तभि–भां०। २ घटादि–भां०। ३ सति भेदे तत्पुरुषो यथा भां०।

विशेषरूपता अस्य अङ्गीक्रियते; तदा सामान्यस्वभावता तत्र न स्यात् तत एव। भावाऽभावात्मकत्वश्च अर्थानां छायातपवद् विरोधाद् अतीव दुर्घटम्। किञ्च, भावोपमर्दनात्मकत्वमभावस्य स्वरूपम्, तेन च यदि भावरूपता ग्रासीकृता तदा अभावरूपतैव तत्र स्यात् इति भावरूपताया नामाऽपि न श्रूयेत। उत्तरपदार्थे च निश्चिते सर्वत्र नञः प्रयोगः अब्राह्मणादिवत्, एकान्तश्च यदि क्वचित् निश्चितः कथं सर्वमनेकान्तात्मकं स्यात्?

तदात्मकत्वे च अर्थानां संशयादिदोषोपनिपातः; तथाहि–'केन स्वरूपेण तन्तु-पटादीनां भेदः, केन च अभेदः' इति संशयः। तथा 'यत्र अभेदः तत्र भेदस्य विरोधः, यत्र च भेदः तत्र अभेदस्य शीतोष्णस्पर्शवत्' इति विरोधः। तथा 'अभेदस्य एकत्वस्वभावस्य अन्यदधिकरणम् भेदस्यानेकत्वस्वभावस्य अन्यत्' इति वैयधिकरण्यम्। तथा 'एकान्तेन एकात्मकत्वे यो दोषः अनेकस्वभावत्वाऽभावलक्षणः, अनेकान्तात्मकत्वे च एकस्वभावत्वाऽभावलक्षणः सोऽत्राप्यनुषज्यते' इत्युभयदोषः। तथा 'येन स्वभावेन अर्थस्य एकस्वभावता तेन अनेकस्वभावत्वस्यापि प्रसङ्गः येन च अनेकस्वभावता तेन एकस्वभावत्वस्यापि' इति सङ्करप्रसङ्गः। *"सर्वेषां युगपत्प्राप्तिः सङ्करः।"* [ ] इत्यभिधानात्। तथा 'येन स्वभावेन अनेकत्वं तेन एकत्वं प्राप्नोति येन च एकत्वं तेन अनेकत्वम्' इति व्यतिकरः। *"परस्परविषयगमनं व्यतिकरः।"* [ ] इति वचनात्। तथा 'येन रूपेण भेदः तेन कथञ्चिद्भेदः येन च अभेदः तेनाऽपि कथञ्चिदभेदः' इत्यनवस्था। अतः अप्रतिपत्तितोऽभावः तत्त्वस्य अनुषज्येत अनेकान्तवादिनाम्। एवं सत्त्वाद्यभ्युपगमेऽपि एते दोषा द्रष्ट-

---

१ "नैकस्मिन्नसंभवात्।" "न ह्येकस्मिन् धर्मिणि युगपत्सदसत्त्वादिविरुद्धधर्मसमावेशः संभवति शीतोष्णवत्। य एते सप्त पदार्था निर्धारिता एतावन्त एवंरूपाश्चेति ते तथैव वा स्युः नैव वा तथा स्युः, इतरथा हि तथा वा स्युः इतरथा वा इत्यनिर्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्···अवक्तव्याश्च उच्येरन्, उच्यन्ते च अवक्तव्याश्चेति विप्रतिषिद्धम्···उच्यमानाश्च तथैवावधार्यन्ते नावधार्यन्ते इति च। तथा तदवधारणफलं सम्यग्दर्शनमस्ति वा नास्ति वा···एवं जीवादिषु पदार्थेषु एकस्मिन् धर्मिणि सत्त्वासत्त्वयोः विरुद्धयोर्धर्मयोरसंभवात्, सत्त्वे चैकस्मिन् धर्मे असत्त्वस्य धर्मान्तरस्यासंभवात् असत्त्वे चैवं सत्त्वस्याऽसंभवादसंगतमिदमार्हतं मतम्।" ब्रह्मसू० शां० भां० २।२।३३। "अथ पुनः द्रव्यपर्याययोः सम्मूर्च्छितत्वात् नरसिंहवदेकं शबलरूपत्वात् द्विरूपमुच्यते; तदयुक्तम्; नरसिंहस्य शबलरूपत्वाऽसिद्धेः···आह च–द्रव्यपर्यायरूपत्वात् द्वैरूप्यं वस्तुनः किल। तयोरेकात्मकत्वेऽपि भेदः संज्ञादिभेदतः ॥१॥·····धर्मित्वं तस्य चैवं स्यात् तत्तन्त्रत्वात्तदन्ययोः। न चैवं गम्यते तेन वादोऽयं जाल्मकल्पितः ॥४४॥" हेतुबि० टी० पृ० १५१-५७। तत्त्वोपप्लव पृ० ९५-९६। "परस्परस्वभावत्वे स्यात् सामान्यविशेषयोः। साङ्कर्यं तत्त्वतो नेदं द्वैरूप्यमुपपद्यते ॥१७२२॥ परस्परास्वभावत्वेप्यनयोरनुषज्यते। नानात्वमेवं भावेऽपि द्वैरूप्यं नोपपद्यते ॥ १७२३ ॥ तद्भावश्चाप्यतद्भावः परस्परविरोधतः। एकवस्तुनि नैवायं कथञ्चिदवकल्प्यते ॥१७२९॥ विधानप्रतिषेधौ हि परस्परविरोधिनौ। शक्यावेकत्र नो कर्त्तुं केनचित्स्वस्थचेतसा ॥१७३०॥" तत्त्वसं०।

व्याः। तथा अनेकान्ते मुक्तोऽपि अमुक्त एव स्यात्, अमुक्तोऽपि च मुक्त एव वा, अन्यथा अनेकान्तक्षतिः स्यादिति।

तत्प्रतिविधानपुरस्सरं द्रव्यपर्याययोः कथञ्चिद् भेदाऽभेदात्मकत्वप्रसाधनम्, अनेकान्ते संशयादिदोषपरिहारश्च—

अत्र प्रतिविधीयते। यत्तावदुक्तम्[3]—'द्रव्यपर्यायौ अत्यन्तं भिन्नौ भिन्नप्रतिभासत्वात्' इत्यादि; तत्र भिन्नप्रतिभासत्वं भिन्नप्रमाणग्राह्यत्वमभिप्रेतम्, भिन्नाकाराऽवभासित्वं वा? प्रथमपक्षे आत्मादिना अनेकान्तः, प्रत्यक्षादिभिन्नप्रमाणग्राह्येऽपि अस्मिन् भेदाऽसंभवात्। द्वितीयपक्षेऽपि कथञ्चित् तयोर्भिन्नाकारावभासित्वं विवक्षितम्, सर्वथा वा? यदि कथञ्चित्; तदा कथञ्चिदेव अतः तयोर्भेदः सिद्ध्येत् तेनैव अस्य अविनाभावसंभवात्, न पुनः सर्वथा तद्विपर्ययात्, तथा च हेतोर्विरुद्धत्वम् साध्यविपर्ययसाधनात्। सिद्धसाधनञ्च, अस्माकं कथञ्चिद्भेदस्य इष्टत्वात्। सर्वथा तद्भेदसाधने तु कालात्ययापदिष्टत्वम्; प्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वात् 'अनुष्णोऽग्निः द्रव्यत्वात्' इत्यादिवत्। 'यद् यद्रूपतया प्रमाणतो न प्रतीयते न तत् तद्रूपतया अभ्युपगन्तव्यम् यथा घटः पटरूपतया, प्रमाणतो न प्रतीयन्ते च अत्यन्तभेदरूपतया द्रव्यपर्यायादयः' इत्यनुमानबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वाद्वा।

दूरपादपादिना अनैकान्तिकत्वञ्च; नहि दूर-आसन्नदेशवर्त्तिप्रतिपत्तॄणामस्पष्टेतरप्रत्ययग्राह्यतया भिन्नप्रतिभासत्वेऽपि तस्य भेदः संभवति। ननु च अत्र तत्प्रत्ययभेदात् विषयभेदोऽस्त्येव; तथाहि—प्रथमं दूरदेशवर्त्तिनो [7]विज्ञानम् अत्र ऊर्ध्वतासामान्यविषयम्, उत्तरकालं तु तद्देशोपसर्पणे शाखादिविशेषविषयमिति; तदप्यविचारितरमणीयम्; एवं विषयभेदाऽभ्युपगमे 'यमहमद्राक्षं दूरस्थितः पादपम् एतर्हि तमेव पश्यामि' इति एकत्वाध्यवसायाऽभावप्रसङ्गात्, स्पष्टेतरप्रतिभासानां सामान्य-विशेषविषयत्वेन घट-पटादिप्रतिभासवद् भिन्नविषयत्वात्। अथ पादपापेक्षया तेषामेकविषयत्वमिष्यते सामान्यविशेषापेक्षया तु विषयभेदः; कथमेवम् एकान्ताभ्युपगमो न विशीर्येत, द्रव्यपर्यायादावपि तद्वत् कथञ्चिद्भेदाऽभेदप्रसिद्धेः? अथ सर्वथा तयोर्भिन्नाकारावभासित्वं विवक्षितम्; तदसिद्धम्; कथञ्चित् तादात्म्यापन्नयोरेव द्रव्यपर्याययोः अबाधाऽध्यक्षेऽवभासमानत्वात्। यद् यथा अबाधाध्यक्षेऽवभासते तत् तथैव

---

१ "तथाहि नित्यानित्ययोः विधिप्रतिषेधरूपत्वात् अभिन्ने धर्मिणि अभावः एवं सदसत्त्वादेरपि···। तथा मुक्तावप्यनेकान्तो न व्यावर्त्तते इति मुक्तो न मुक्तश्चेति स्यात्। एवं च सति स एव मुक्तः संसारी चेति प्रसक्तेः। एवमनेकान्तेप्यनेकान्ताभ्युपगमे दूषणम्।···" प्रश० व्यो० पृ० २० (च)। २ एवान्य– ब०, ज०। ३ पृ० ३५९ पं० ५। ४ इति तत्र ब०, ज०। ५ "किं भिन्नप्रमाणग्राह्यत्वात् भिन्नाकारावभासित्वाद्वा?" स्या० रत्ना० पृ० ७३८। ६–श्चित्तद्भेद–श्र०। ७ विज्ञानमात्रात् ऊ–ब०, ज०। ८–स्थितं पा–ब०, ज०, आ०। ९–कत्वमि–आ०। –कविषयत्वं विशिष्यते ब०, ज०।

अभ्युपगन्तव्यम् यथा नीलं नीलतया, अबाधाध्यक्षेऽवभासेते च कथञ्चित्तादात्म्येन द्रव्य-पर्यायाविति ।

न च तथा तदवभासिनोऽध्यक्षस्य अबाधत्वमसिद्धम् ; तद्बाधकस्य कस्यचिदपि प्रमाण-स्यासंभवात् । नहि प्रत्यक्षं तद्बाधकम्; अत्यन्ततद्भेदस्य अत्राप्रतिभासमानत्वात् । अनुमानमपि एतदेव, अन्यद्वा तद्बाधकं स्यात् ? न तावद् एतदेव; अस्य अध्यक्षबाधितविषयतया उत्थान-स्यैवासंभवात् । भ्रान्तत्वान्न तद्विषयस्यानेन बाधा ; इति चेत् ; कुतस्तद्भ्रान्तत्वम् ? अनेन बाधनाच्चेत् चक्रकप्रसङ्गः ; तथाहि–अबाधितविषयतया अस्योत्थानेऽध्यक्षस्यानेन बाधा, तस्याश्च सत्यां तस्य भ्रान्तत्वम् , तस्मिन् सति अबाधितविषयतया अस्योत्थानमिति । कथञ्चैवम् 'अनु-ष्णोऽग्निः सत्त्वात् जलवत्' इत्यस्यापि अबाधितविषयतया प्रवृत्तिर्न स्यात् भिन्नप्रतिभासत्वस्येव अत्रापि प्रतिबन्धस्य सपक्षे प्रत्यक्षतः प्रतीतेरविशेषात्? पक्षस्य प्रत्यक्षबाधनाद् अस्यागमकत्व-मन्यत्रापि अविशिष्टम् । तन्नानेनानुमानेन अस्य बाधनम् ।

अनुमानान्तरेण तद्बाधने अस्य वैयर्थ्यम् , साध्यस्यापि अत एव प्रसिद्धेः । न च तद्बा-धकं तदन्तरमस्ति; तत्खलु भिन्नार्थक्रियाकारित्वात्, भिन्नकारणप्रभवत्वात् , भिन्नकालत्वात् , विरुद्धधर्माध्यासाद्वा लिङ्गादाविर्भूतं तद्बाधकं स्यात् ? तत्र आद्यपक्षोऽयुक्तः; नर्त्तक्यादिनाऽ-नेकान्तात् , एकाऽपि[2] हि नर्त्तकी करण-अङ्गहार-भ्रूभङ्ग-अक्षिविक्षेपादिलक्षणां प्रेक्षकजनानां हर्ष-विषादादिलक्षणां वा अनेकामन्योन्यविलक्षणामर्थक्रियां करोति इति । भिन्नकारणप्रभवत्वमपि अङ्कुरादिनाऽनैकान्तिकम् , तस्य एकस्यापि क्षित्याद्यनेककारणकलापादुत्पत्तिप्रतीतेः । अथ भिन्नो-पादानकारणप्रभवत्वं भेदकम् न भिन्नकारणप्रभवत्वमात्रम्, तच्च इह नास्ति तेन अयमदोषः ; कथमेवं गुणगुण्यादीनामपि भेदः स्यात् भिन्नोपादानकारणप्रभवत्वस्य तत्राप्यसंभवात् ?

भिन्नकालत्वादपि अप्राप्तपटावस्थेभ्यः प्राक्तनाऽवस्थाविशिष्टेभ्यः[3] तन्तुभ्यः पटस्य भेदः साध्येत, प्राप्तपटावस्थेभ्यो वा ? प्रथमपक्षे सिद्धसाध्यता; पूर्वोत्तरावस्थयोः सकलभावानां भेदाऽ-भ्युपगमात् , न खलु यैव अर्थस्य पूर्वावस्था सैव उत्तरावस्था भवितुमर्हति पूर्वाकारपरित्यागेनैव उत्तराकारोत्पादप्रतीतेः । द्वितीयपक्षे तु असिद्धो हेतुः ; पटावस्थतन्तूनां पटाद् भिन्नकाल-त्वस्यासंभवात् ।

विरुद्धधर्माध्यासोऽपि धूपदहनादिना अनैकान्तिकः, न खलु हस्तलग्नेतरप्रदेशे शीतो-ष्णस्पर्शलक्षणविरुद्धधर्माध्यासेऽपि धूपदहनादेर्भेदः प्रतीयते । न च हस्तलग्नेतरप्रदेशयोरेव शीतोष्णस्पर्शाधारता न धूपदहनाद्यवयविनः इत्यभिधातव्यम् ; प्रत्यक्षविरोधात् । अतोऽत्य-न्तभेदस्यैव तादात्म्यविरोधितया विरुद्धधर्माध्यासान्निवृत्तिः न तु कथञ्चिद्भेदस्य, यथा 'रज्जोः

१ अत्यन्तं त–ब०, ज० । "न खलु प्रत्यक्षं तद्बाधकं अत्यन्ततद्भेदस्यात्राऽप्रतिभासमानत्वात् ।" स्या० रत्ना० पृ० ७३९ । २–पि नर्त्तकी आ० । ३–भ्यः पटस्य आ० ।

ग्रन्थयः, हस्तस्य सङ्कोचप्रसारणे, सर्पस्य कुण्डलीभावः' इत्यत्र। भेदो हि पदार्थानां प्रतीतितोऽभ्युपगम्यते, सा चेद् अवस्थातद्वतोः कथञ्चिद्भेदेऽपि अस्ति तदा असावपि किमिति नाऽभ्युपगम्यते ? न चेयं राजाज्ञा यद् 'एकस्य नानावस्थात्मकत्वं नास्ति' इति। यदि एकोऽपि क्रमभाविनीनामवस्थानाम् उक्तविधिना तादात्म्येन अनुस्यूतो वर्तेत तदा कथं तत्र कथञ्चिदेकत्वविरोधः ? प्रमाणं हि यथाविधं वस्तुस्वरूपं प्रकाशयति तथाविधमेव तद् अभ्युपगन्तव्यम्, यत्र अत्यन्तभेदं तत् प्रकाशयति तत्र अत्यन्तभेदः यथा घट-पटादौ, यत्र तु कथञ्चिद्भेदं तत्र कथञ्चिद्भेदः यथा रज्जुग्रन्थ्यादौ। तदेवम् अनेकदोषदुष्टत्वात् भिन्नप्रतिभासत्वादिसाधनं न द्रव्यादीनामत्यन्तभेदप्रसाधकं घटते।

दृष्टान्तोऽपि साध्यविकलः; घटपटादीनामपि अत्यन्तभेदाऽसंभवात्, तदसंभवश्च सत्त्वादिना अन्योन्यं तेषामभेदात् सुप्रसिद्धः। साधनविकलश्चायम्; विस्फारिताक्षस्य एकस्मिन्नपि अध्यक्षे[2] घटादीनां प्रतिभाससंभवात्। न च प्रतिविषयं विज्ञानभेदोऽभ्युपगन्तव्यः; अवयविसिद्ध्यभावप्रसङ्गात्, ऊर्ध्व-अधो-मध्यभागेषु तद्भेदस्य अत्रापि कल्पयितुं [3]सुशकत्वात्, प्रतीतिबाधा अन्यत्रापि न काकैर्भक्षिता। यदि च दृष्टान्ते अत्यन्तभेदेन अस्य व्याप्त्युपलम्भात् द्रव्य-पर्यायादीनामपि अत्यन्तभेदे साध्ये गमकत्वमिष्यते; तदा 'अश्रावणः शब्दः सत्त्वात् घटादिवत्' इत्यादेरपि गमकत्वमिष्यताम्, सपक्षे घटादौ सत्त्वादेः अश्रावणत्वादिना प्रतिबन्धप्रतिपत्तेः अत्राप्यविशेषात्। पक्षस्य प्रत्यक्षबाधनाद् अस्यागमकत्वमन्यत्राप्यविशिष्टम्।

यदप्युक्तम्[4]–'तन्तवः पटः इति संज्ञाभेदः' इत्यादि; तदप्युक्तिमात्रम्; अवस्थाभेदनिबन्धनत्वात्तस्य, अतः तमेव असौ प्रसाधयति न पुनः तदत्यन्तभेदम्। अनैकान्तिकश्चायम्; 'गगनम्' 'आकाशम्' इत्यादौ अत्यन्तभेदाऽभावेऽपि संज्ञाभेदस्य, 'जलम्' 'आपः' इत्यादौ तु संज्ञाभेदस्य वचनभेदस्य च संभवात्। अनन्वयवस्तुविषयो हि संज्ञादिभेदो वस्तुनोऽत्यन्तभेदप्रसाधकः नान्यः; अतिप्रसङ्गात्। प्रयोगः–यः अपरित्यक्तान्वये वस्तुनि संज्ञादिभेदः नाऽसौ अत्यन्तभेदप्रसाधकः यथा 'जलम्' 'आपः' इत्यादिसंज्ञादिभेदः, तथाभूते वस्तुनि [5]संज्ञादिभेदश्चायम् 'तन्तवः' 'पटः' इत्यादिरिति। नन्वेवं गगनाकाशादिवत् तन्तुपटादावपि पर्यायशब्दताप्रसक्तिः इति चेत्; एवमेतत्, तच्छब्दानामवस्थाविशेषवाचित्वात्। योषिदादिकरव्यापारोत्पन्ना हि तन्तवः कुविन्दादिव्यापारात् पूर्वं शीतापनोदाद्यर्थाऽसमर्थाः तन्तुव्यपदेशं लभन्ते, तद्व्यापारात्तु उत्तरकालं विशिष्टावस्थाप्राप्ताः तत्समर्थाः पटव्यपदेशम्।

यच्चान्यदुक्तम्[6]–'पटस्य भावः' इत्यादि; तदप्ययुक्तम्; 'षण्णां पदार्थानामस्तित्वम्' 'षण्णां पदार्थानां वर्गः' इत्यादौ भेदाऽभावेऽपि षष्ठ्याद्युत्पत्तिप्रतीतेः, न खलु भवता षट्पदार्थातिरि-

---

१–मभावात् आ०, ब०, ज०, भां०। २ अक्षे आ०। ३ सुशक्यत्वात् ब०, ज०। ४ पृ० ३५९ पं० १४। ५ संज्ञाभेद– आ०। ६ पृ० ३५९ पं० १५।

क्तम् अस्तित्वादि इष्यते । ननु सत्[1] (सतः) ज्ञापकप्रमाणविषयस्य भावः सत्त्वम् सदुपलम्भकप्रमाणविषयत्वं नाम धर्मान्तरं षण्णामस्तित्वमिष्यते, अतो नाऽनेन अनेकान्तः ; इत्यप्यनुपपन्नम्[3] ; षट्पदार्थसंख्याव्याघातप्रसङ्गात् तत्सत्त्वधर्मस्य तेभ्योऽर्थान्तरत्वात् । ननु धर्मिरूपा एव ये भावाः ते षट्पदार्थाः प्रोक्ताः धर्मरूपास्तु तद्व्यतिरिक्ता इष्टा एव, तथा च पदार्थप्रवेशकग्रन्थः–"*एवं धर्मैर्विना धर्मिणामेव निर्देशः कृतः ।*" [प्रश० भा० पृ० १५] इति । अस्त्वेवम्, तथापि अस्तित्वादेर्धर्मस्य षट्पदार्थैः साकं कः सम्बन्धः येन तत् तेषां धर्मः स्यात्–संयोगः, समवायो वा ? न तावत् संयोगः ; अस्य गुणत्वेन द्रव्याश्रयत्वात् । नापि समवायः; तस्य एकत्वेन इष्टेः । समवायेन चास्य समवायसम्बन्धे तस्यानेकत्वप्रसक्तेः तँदिष्टिव्याघातः । सम्बन्धमन्तरेण च धर्मधर्मिभावाऽभ्युपगमे अतिप्रसङ्गः ।

किञ्च, अस्तित्वादेः अपराऽस्तित्वाऽभावात् कथं तत्र व्यतिरेकनिबन्धना विभक्तिर्भवेत् ? अथ तत्रापि अपरमस्तित्वमङ्गीक्रियते; तदा अनवस्था स्यात् । अपरापरधर्मसमावेशेन च सत्त्वादेर्धर्मिरूपत्वाऽनुषङ्गात् "*षडेव धर्मिणः*" [ ] इत्यस्य व्याघातः । ये धर्मिरूपाः त एव षट्त्वेनावधारिताः ; इत्यप्यसारम्; गुण-कर्म-सामान्य-विशेष-समवायानामनिर्देशाऽनुषङ्गात् । नहि एषां धर्मिरूपत्वमेव; द्रव्याश्रितत्वेन धर्मरूपत्वस्यापि संभवात् । तथा 'खस्य भावः खत्वम्' इत्यादौ भेदाऽभावेऽपि तद्धितोत्पत्तेरुपलम्भान्न साऽपि भेदपक्षमेवावलम्बते ।

यदप्यभिहितम्[6]–'तत्पुरुष' इत्यादि; तदप्यभिधानमात्रम्; यतः 'सेनागजः, काननवृँक्षाः' इत्यादौ भेदाऽभावेऽपि तत्पुरुषो दृश्यते, 'मत्तगजा वीरपुरुषा सेना' इत्यादौ बहुव्रीहिश्च ।

यदप्युक्तम्[7]–'तादात्म्यम् इत्यत्र किं स पटः आत्मा' इत्यादि ; तत्र इत्थं विग्रहो द्रष्टव्यः–तँस्य वस्तुनः आत्मानौ द्रव्यपर्यायौ सत्त्वाऽसत्त्वधर्मौ वा तदात्मानौ, तच्छब्देन[8] वस्तुनः परामर्शात्, तयोर्भावः तादात्म्यम्–भेदाऽभेदाद्यात्मकत्वम्[9] । वस्तुनो हि भेदः पर्यायरूपतैव, अभेदस्तु द्रव्यरूपत्वमेव, भेदाऽभेदौ तु द्रव्यपर्यायस्वभावौ एव । न खलु द्रव्यमात्रं पर्यायमात्रं वा वस्तु; उभयात्मनः समुदायस्य वस्तुत्वात्, द्रव्यपर्याययोस्तु न वस्तुत्वम् नापि अवस्तुता, किन्तु वस्त्वेकदेशता, यथा समुद्रांशो न समुद्रः नाप्यसमुद्रः किन्तु समुद्रैकदेशः । तदुक्तम्–

"*नाऽयं वस्तु न चाऽवस्तु वस्त्वंशः कँथ्यते[10] बुधैः ।*
नाऽसमुद्रः समुद्रो वा समुद्रांशो यथैव हि ॥" [तत्त्वार्थश्लो० पृ० ११८] इति ।

---

१ सज्ज्ञापक–ब०, ज० । षड्ज्ञापक–श्र० । "ननु सतः ज्ञापकप्रमाणविषयस्य भावः सत्त्वम् ।" प्रमेयक० पृ० १५७ उ० । २–पलम्भप्र–ब०, ज० । ३ इत्यनु–ब०, ज० । ४ उद्धृतञ्चैतत्–तत्त्वसं० पं० पृ० १९२ । प्रमेयक० पृ० १५७ उ० । सन्मति० टी० पृ० ६६१ । स्या० रत्ना० पृ० ८७८ । ५ तदिष्टव्या–ज० । ६ पृ० ३५९ पं० १६ । ७–वृक्षः श्र० । ८ पृ० ३५९ पं १९ । ९ "तस्य वस्तुनः आत्मानौ तदात्मानौ तयोः भावः तादात्म्यं भेदाभेदस्वभावत्वम् ।" आप्तपरीक्षा पृ० २२ । प्रमेयक० पृ० १५८ पू० । १० "कथ्यते यतः···यथोच्यते ।" इति पाठभेदः, तत्त्वार्थश्लो० ।

'स पट आत्मा येषाम्' इत्यपि विग्रहे न दोषः, अवस्थाविशेषापेक्षया तन्तूनामेकत्वस्य इष्टत्वात्। तर्हि 'ते तन्तव आत्मा यस्य' इति विग्रहे तन्तूनामनेकत्वे पटस्यापि अनेकत्वं स्यादिति चेत्; ननु किमिदं तस्य अनेकत्वं नाम–किम् अनेकाऽवयवात्मकत्वम्, प्रतितन्तु तत्प्रसङ्गो वा ? प्रथमपक्षे सिध्यसाध्यता; आतानवितानीभूत-अनेकतन्त्वाद्यवयवात्मकत्वात्तस्य। द्वितीयपक्षस्तु अयुक्तः; प्रत्येकं तेषां तत्परिणामाऽसंभवात्। आतानवितानीभावलक्षणो हि तेषां परिणामविशेषः पटः, स च समुदितानामेव अमीषां प्रतीयते नान्यथा, तथाभूताश्च ते 'पटस्य आत्मा' इति उच्यन्ते। द्विविधो हि वस्तुनः परिणामः–प्रत्येकावस्थायाम् समुदायावस्थायाञ्च, क्षीरादिवत् दध्यादिवच्च। एवं द्रव्यपर्यायवत् गुणगुण्यादीनामपि कथञ्चित् तादात्म्यं प्रतिपत्तव्यम्, प्रतिभासभेदस्य विरुद्धधर्माध्यासस्य च सर्वथा भेदाऽप्रसाधकत्वप्रतिपादनात्।

यच्चान्यदुक्तम्–'गुणगुण्यादीनाञ्च आकारनानात्वेऽपि' इत्यादि; तदप्यचारु; कथञ्चिद्भेदाऽभेदात्मना गुणगुण्यादिवत् निखिलार्थानां ग्रहणाऽसंभवतो अन्यतोऽन्यस्य अन्यत्वोपपत्तेः। तादात्म्याकारवैलक्षण्ये हि तेषां भेदाऽभेदौ, तथावभासनमेव च उभयात्मना ग्रहणम्, तच्च अन्यत्र नास्ति इति कथं बहिरन्तर्वा नानात्ववार्त्तोच्छेदः स्यात् ?

यदप्युक्तम्[2]–'एकं नित्यम्' इत्यादि; तदपि श्रद्धामात्रम्; सामान्यस्य अनेक-अनित्य-सावयव-अव्यापिस्वरूपत्वप्रतिपादनात्। अतो विशेषपरिणामवत् सादृश्यलक्षणसामान्यपरिणामोऽपि अर्थानां प्रतिव्यक्ति विभिन्न एव। तथाविधसदृशेतरधर्माधारतया च अमीषां प्रत्यक्षतः प्रतीतेः कथं सामान्यस्वभावतोरीकारे विशेषरूपताऽङ्गीकारो विरुद्ध्येत ? धर्मधर्मिणोश्च न सर्वथा भेदे अभेदे वा तद्भावो घटते सह्यविन्ध्यवत् तदन्यतरस्वरूपवच्च, किन्तु कथञ्चिद्भेदे। भेदो हि धर्म-धर्मिणौ एव, अभेदस्तु तयोः द्रव्यान्तरं नेतुमशक्यत्वलक्षणम् अशक्यविवेचनत्वम्। न खलु घटपटादीनामिव अनयोः तल्लक्षणम् अशक्यविवेचनत्वं न संभवति; घटादिधर्मिणो मिथश्च भिन्नानामपि सदृशेतरपरिणामाद्यशेषधर्माणां मृदादिद्रव्येण एकेनैव अनुवेधात्।

धर्मिणो धर्माणामेकान्ततो भेदाऽभ्युपगमे च निःस्वभावतापत्तिः, स्वभावस्यापि धर्मतया ततो भेदात्, तथा च अस्यासत्त्वम्। यन्निःस्वभावम् तदसत् यथा गगनेन्दीवरम्, निःस्वभावश्च भवद्भिरभिप्रेतो धर्मी इति। एवञ्च धर्माणामप्यभावः निराश्रयाणां तेषां सद्भावाऽसंभवात्, अतः सकलशून्यतापत्तिः परस्य पूत्कुर्वतोऽपि आयाता। न च निःस्वभावस्याप्यस्य

१ पृ० ३५९ पं० २६। २ पृ० ३५९ पं० २८। ३ "एवं धर्मिणो द्रव्यस्य रसादिधर्मान्तररूपेण रूपादिभ्यो भेदः द्रव्यरूपेण चाऽभेदः। तथा अवयविनः स्वरूपेण अवयवैरभेदः अवयवान्तरेण तु अवयवान्तरैः भेद इत्यूहनीयम्। तत्र यथा दीर्घह्रस्वादीनां विरुद्धस्वभावानामप्यपेक्षाभेदात् एकत्राप्यविरुद्धत्वं प्रतीतिबलादङ्गीक्रियते तथा भेदाभेदयोरपि द्रष्टव्यं प्रतीत्यविशेषात्।" शास्त्रदीपि० १।१।५'। ४ "आत्मनः सुखाद्याकाराः शश्वदात्मान्तरं नेतुमशक्यत्वादशक्यविवेचनाः।" आप्तप० पृ० ४४। ५ उभयोः ब०। ६ घटपटादि–ब०, ज०। ७ मिथः भि–ब०। ८ अनुवेदात्वं भां०, श्र०।

तदाश्रयत्वं युक्तम् ; खरविषाणादेरपि तत्प्रसङ्गात् । भिन्नस्यापि स्वभावस्य धर्मिणि समवायान्न निःस्वभावता इत्यप्यसुन्दरम् ; समवायस्य प्रागेव असत्त्वप्रतिपादनात् ।

तथा एकान्ततो धर्म-धर्मिणोरभेदेऽपि अन्यतरस्वभावप्रसङ्गतोऽसत्त्वापत्तिः । सर्वथा अभेदे हि तयोः धर्ममात्रं धर्मिमात्रं वा स्यात् इति अन्यतरस्वभावाऽभावः । कल्पितत्वात् तद्भावस्य न तदभावो दोषाय; इत्यप्यसमीक्षिताभिधानम् ; निर्बीजायाः कल्पनाया एव अनुपपत्तेः । न चास्या निर्बीजत्वमसिद्धम् ; बहिरन्तर्वा वस्तुनः एकान्तैकस्वभावत्वे तत्कारणत्वाऽनुपपत्तेः । नहि एकान्तैकस्वभावमनेककल्पनाबीजं युक्तम् ; विभिन्नशक्तिशून्यस्य विभिन्नकार्यहेतुत्वाऽनुपपत्तेः, यद् विभिन्नशक्तिशून्यम् तन्न विभिन्नकार्यहेतुः यथा नित्याभिमतं वस्तु, विभिन्नशक्तिशून्यं च स्वलक्षणाभिमतं वस्तु । अतः कथमेतत् धर्मधर्मिकल्पनालक्षणकार्यद्वयहेतुः स्यात् ? विभिन्नस्वभावव्यावृत्तिवशात् विभिन्नशक्तिशून्यादपि स्वलक्षणाद् विभिन्नकार्योत्पत्तिरविरुद्धा; इत्यप्यचर्चिताऽभिधानम् ; तस्यास्ततो भिन्नायाः संभवाऽभावात् , अवस्तुरूपतया खरविषाणवत् [२]विभिन्नस्वभावत्वाऽनुपपत्तेश्च । तदुपपत्तौ वा न अवस्तुत्वमस्याः स्यात् इति अपोहविचारावसरे वक्ष्यते । [३]तद्भेदे च वस्तुन्येव भेदोऽस्तु तत्र तस्याऽविरोधात्, 'अवस्तु भिद्यते वस्तु न भिद्यते' इति किमपि महाद्भुतम् ! व्यावृत्तिभेदाभ्युपगमे च सिद्धो धर्मभेदः व्यावृत्तीनामपि धर्मत्वात् ।

यदप्युक्तम्[४]–'भावाऽभावात्मकम्' इत्यादि ; तदप्यसाम्प्रतम् ; तदात्मकत्वस्य अर्थेषु उपलभ्यमानत्वेन विरोधाऽसिद्धेः । विरोधो हि अनुपलम्भसाध्यः यथा वन्ध्यायां स्तनन्धयस्य, न च स्वरूपादिना वस्तुनः सत्त्वे पररूपादिना असत्त्वस्य अनुपलम्भोऽस्ति । न खलु वस्तुनः सर्वथा भाव एव स्वरूपम् ; स्वात्मना इव परात्मनाऽपि भावप्रसङ्गात् सर्वस्य सर्वात्मकत्वाऽनुषङ्गतः सत्ताद्वैतं स्यात्, तच्च प्रागेव कृतोत्तरम् । नाप्यभाव एव; पररूपेण इव स्वरूपेणाऽपि अभावप्रसङ्गतः खपुष्पप्रख्यत्वानुषङ्गात् सकलशून्यतानुषङ्गतो निखिलव्यवहारोच्छेदः स्यात्, क्वचिदपि प्रवृत्त्याद्यभावात् । प्रतिविहिता च तच्छून्यता प्राग् इत्यलं पुनः प्रसङ्गेन ।

१–प्रसङ्गादस– ज० । २ भिन्नस्वभावानु–ब०, ज० । ३ तद्भेदेऽपि आ० । ४ पृ० ३६० पं० १ । ५ "ननु विरुद्धौ भेदाभेदौ कथमेकत्र स्याताम् ? न विरोधः; सह दर्शनात् । यदि हि इदं रजतं नेदं रजतमिति वत् परस्परोपमर्देन भेदाभेदौ प्रतीयेतां न तु तयोः परस्परोपमर्देन प्रतीतिः । इयं गौरिति बुद्धिद्वयमपर्यायेण प्रतिभासमानमेकं वस्तु द्व्यात्मकत्वं व्यवस्थापयति । सामानाधिकरण्यं हि अभेदमापादयति अपर्यायत्वञ्च भेदम् अतः प्रतीतिबलादविरोधः, अपेक्षाभेदाच्च; तथाहि···।" शास्त्रदी० १।१।५ । प्रमेयक० पृ० १५८ । ६ "सदेव सर्वं को नेच्छेत् स्वरूपादिचतुष्टयात् । असदेव विपर्यासात् न चेन्न व्यवतिष्ठते ॥ १५ ॥" आप्तमी० । "स्वपररूपाद्यपेक्षं सदसदात्मकं वस्तु न विपर्यासेन ।" अष्टश०, अष्टसह० पृ० १३५ । "स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ॥१२॥" मीमांसाश्लो० अभावपरि० । ७ भावः स्व– आ० । "स्वरूपादिव पररूपादपि सत्त्वे चेतनादेरचेतनादित्वप्रसङ्गात् तत्स्वात्मवत्, पररूपादिव स्वरूपादप्यसत्त्वे सर्वथा शून्यतापत्तेः । स्वद्रव्यादिव परद्रव्यादपि सत्त्वे द्रव्यप्रतिनियमविरोधः···।" अष्टसह० पृ० १३१ । ८–षङ्गात् ब०, ज० ।

न च स्वरूपादिना सत्त्वमेव पररूपादिना असत्त्वम्, पररूपादिनाऽसत्त्वमेव च स्वरूपादिना सत्त्वमित्यभिधातव्यम्; तदपेक्षणीयनिमित्तभेदात्, स्वद्रव्यादिकं हि निमित्तमपेक्ष्य अर्थे सत्त्वं व्यवस्थाप्यते परद्रव्यादिकं तु अपेक्ष्य असत्त्वम्, अतो विभिन्ननिमित्तनिबन्धनत्वात् सत्त्वाऽसत्त्वयोर्भेदः। यस्य विभिन्ननिमित्तनिबन्धनत्वं तस्य भेदः यथा एकत्वादिसंख्यायाः, विभिन्ननिमित्तनिबन्धनत्वश्च सत्त्वाऽसत्त्वयोरिति। न चाऽयमसिद्धो हेतुः; उक्तप्रकारेण समर्थितत्वात्। नापि दृष्टान्तस्य साध्यसाधनवैकल्यम्; एकत्र द्रव्ये स्वरूपमात्रापेक्ष-एकत्वसंख्यातः द्रव्यान्तरापेक्षद्वित्वादिसंख्याया विभिन्ननिमित्तनिबन्धनत्वस्य भेदस्य च सुप्रसिद्धत्वात्। सर्वथा अभेदे तु अनयोः तन्निबन्धनत्वानुपपत्तिः, यत् सर्वथाऽभिन्नम् न तत्र विभिन्ननिमित्तनिबन्धनत्वम् यथा सत्त्वे असत्त्वे वा, सर्वथाऽभेदश्च सत्त्वाऽसत्त्वयोर्भवद्भिरिष्टः इति। प्रतिनियतसदसत्प्रत्ययगोचरचारित्वाऽनुपपत्तिश्च अनयोः, तत एव, तद्वत्। अभिन्ननिमित्तनिबन्धनत्वे च तत्प्रत्ययभेदयोः 'सर्वत्र हेतुभेदात् फलभेदः' इत्यभ्युपगमो विरुद्ध्येत। प्रतिनियतवस्तुव्यवस्थाविलोपश्च सत्त्वाऽसत्त्वयोः सर्वथाऽभेदे; घटो हि यथा स्वद्रव्यादिना सन् नैवं परद्रव्यादिनाऽपि तत्सत्त्वाऽव्यतिरिक्तत्वात् तदसत्त्वस्य, तेन असत्त्वे वा स्वद्रव्यादिनापि असत्त्वं स्यात् तदसत्त्वाऽव्यतिरिक्तत्वात् सत्त्वस्य, अतः प्रतिनियतवस्तुस्वरूपाऽव्यवस्थितेः सिद्धः प्रतिनियतवस्तुव्यवस्थाविलोपः। वस्तुसत्त्वमेव अन्यविविक्तताविशिष्टं तद्व्यवस्थाहेतुः; इत्यपि अन्धसर्पविलप्रवेशन्यायानुसरणम्; असत्त्वस्यैव 'विविक्तता' इति नामान्तरकरणात्। ततः स्वपररूपाभ्यां सदसदात्मकाः सर्वे भावाः प्रतिपत्तव्याः, प्रतिनियतरूपव्यवस्थाऽन्यथाऽनुपपत्तेः, प्रतिनियतकार्यकारित्वान्यथाऽनुपपत्तेर्वा।

अथ इतरेतराऽभाववशात् तद्व्यवस्था भविष्यति इत्युच्यते; ननु किंस्वभावोऽयम् इतरेतराभावः—स्वतन्त्रः, भावधर्मो वा? न तावत् स्वतन्त्रः; तथाविधस्यास्य अग्रे निराकरिष्यमाणत्वात्। अथ भावधर्मः; कस्य पुनः भावस्य धर्मोऽसौ—घटस्य, भूतलस्य, उभयस्य वा? यदि घटस्य; तत्रापि किं घटस्वरूपस्य निषेधकः, न वा? निषेधकश्चेत्; किं घटे एव, भूतले वा? प्रथमपक्षे कथं घटधर्मोऽसौ धर्मिण एव असत्त्वात्? कथं वा 'भूतले घटो नास्ति' इति प्रतीतिः घटे एव तत्प्रतीतिप्रसङ्गात्? द्वितीयपक्षे तु अस्मन्मतसिद्धिः, घटाभावस्य घटधर्मस्यैव सतो भूतले घटस्वरूपप्रतिषेधकत्वेन अस्माभिरभ्युपगमात्। अथ अनिषेधकः; तदा भूतलेऽपि घट-

---

१ "स्वपररूपादिचतुष्टयापेक्षायाः स्वरूपभेदात् सत्त्वाऽसत्त्वयोः एकवस्तुनि भेदोपपत्तेः···।" अष्टसह० पृ० १३२। प्रमेयक० पृ० १५८ पू०। २ एकद्रव्ये ब०, ज०। ३–दे च तयोः श्र०। ४ पटो ब०, ज०। ५–ना अस्तीति नै– ब०, ज०। ६ तत्सत्त्वमेव ब०, ज०। ७–मेव विवि– आ०। ८ "स्यात्सदसदात्मकाः पदार्थाः सर्वस्य सर्वाऽकरणात्···।" अष्टश०, अष्टसह० पृ० १३३। ९ "यच्चेदं स्वदेशादिषु सत्त्वं परदेशादिष्वसत्त्वमिष्यत एव इतरेतराभावाऽभ्युपगमात्···।" प्रश० व्यो० पृ० २० (ङ)। १० तथा आ०।

स्वरूपप्रसङ्गाद् अभावकल्पनावैयर्थ्यम्। अथ भूतलधर्मोऽसौ ; तन्न ; 'घटो नास्ति' इति[1] सामानाधिकरण्येन प्रत्ययप्रवृत्तितो घटधर्मत्वस्य अत्र उपपत्तेः भाववत्, यथैव हि 'घटोऽस्ति' इति सामानाधिकरण्यप्रतीतेः भावः घटधर्मः तथा अभावोऽपि। अभावस्य आधारधर्मत्वेऽपि आधेयसामानाधिकरण्याऽविरोधे भावस्यापि तद्धर्मत्वेऽपि तदविरोधोऽस्तु, इति उभयधर्मशून्यो घटादिः खपुष्पात् न[3] विशिष्येत। एतेन उभयधर्मताऽपि असत्त्वस्य प्रत्युक्ता; सत्त्वस्यापि तद्धर्मताप्रसङ्गात्।

यदप्युक्तम्[4]–'भावरूपता ग्रासीकृता' इत्यादि ; तत्र किमिदम् अभावरूपतया ग्रासीकरणं नाम–स्वरूपापहारः, एकाश्रयप्रतिषेधो वा ? न तावत् स्वरूपापहारः ; सत्त्वाऽसत्त्वयोः तुल्यबलतया अन्योन्यस्वरूपापहारकत्वाऽयोगात्। नापि एकाश्रयप्रतिषेधः; स्वपररूपाभ्यां भावाऽभावयोः एकत्राप्याश्रये सद्भावप्रतिपादनात्।

यच्चान्यदुक्तम्[6]–'उत्तरपदार्थ' इत्यादि; तत्सत्यम्; नयप्रतीत्यां[7] निश्चिते एव एकान्ते नञः प्रयोगाऽभ्युपगमात्। न चैवं 'सर्वमनेकान्तात्मकम्' इत्यभ्युपगमविरोधः; प्रमाणविषयापेक्षया सर्वस्य तदात्मकत्वप्रतिज्ञानात्, नयगोचरापेक्षया तु एकान्तात्मर्कस्यापि अभ्युपगमात्।

"अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनैः।" [बृहत्स्वयं० श्लो० १०३] इत्यभिधानात्।

"धर्मिणोऽनेकरूपत्वं न धर्माणां कथञ्चन।" [ ] इति वचनाच्च।

यदप्यभिहितम्[10]–'तदात्मकत्वे संशयादिदोषः' इत्यादि; तदपि मनोरथमात्रम्; वस्तुनः सदसदाद्यनेकधर्मात्मकत्वेन प्रतीतौ संशयाऽनुपपत्तेः। यद् यद्धर्मात्मकत्वेन प्रतीयते न तस्य [11]तदात्मकत्वे संशयः यथा स्वगतधर्मात्मकत्वेन प्रतीयमानस्य स्थाणु-पुरुषद्वयस्य, सदसदाद्यनेकधर्मात्मकत्वेन प्रतीयन्ते च सर्वे भावा इति। न चायमसिद्धो हेतुः ; तदात्मकत्वेन तत्प्रतीतेः प्राक् प्रतिपादितत्वात्। नापि दृष्टान्तः साध्यविकलः; स्थाणुत्वादिधर्मप्रतीतौ स्वप्नेऽपि स्थाण्वादौ संशयाऽप्रतीतेः, तदप्रतीतावेव तत्र तद्दर्शनात्। चलिता च प्रतीतिः संशयः, न च सदाद्यात्मकत्वेन प्रतीतिः तथा। न खलु वस्तुनः स्वपररूपाभ्यां सदसद्रूपतया प्रतीतिः कस्यचिदनुपहतचेतसो दोलायते। अथ अनुपजायमानोऽपि संशयः अत्र बलादापाद्यते; नन्वेवं कस्यचिदपि प्रतिनियतरूपव्यवस्था न स्यात्, सर्वत्र तस्य [12]आपादयितुं [13]सुशकत्वात्। घटादेरपि हि घटादिरूपता 'किं निरंशाऽवयविरूपस्य, क्षणिकपरमाण्वात्मनः, ज्ञानप्रचयस्वभावस्य, परमात्मस्वरूपस्य वा स्यात्' इत्यादि संशयसंभवात् न सिद्ध्येत्। ततो घटादेः प्रतिनियतरूपव्यवस्थामिच्छता नानुपजायमानोऽपि [14]संशयोऽत्र बलादापाद्यः। तन्न सदसदात्मकत्वे वस्तुनि संशयो युक्तः।

---

१ इति प्रतीतिः सा–ब०, ज०। २ आधेयेन सा–ब०, ज०, श्र०। ३ विशिष्यति ब०, ज०। ४ पृ० ३६० पं० ३। ५ अभावरूप–श्र०। ६ पृ० ३६० पं० ४। ७–त्याधिष्ठिते एव आ०। ८–कत्वस्यापि श्र०। ९ 'अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात्' इति उत्तरार्द्धम्। "अनेकान्ते तदभावादव्याप्तिः इति चेन्न; तत्रापि तदुपपत्तेः।" तत्त्वार्थराज० पृ० २५। १० पृ० ३६० पं० ६। ११ तदात्मकत्वेन सं–ब०, ज०,। १२ उत्पादयितुं आ०। १३ सुशक्य–ब०, ज०। १४ संशयो बलादा–ब०, ज०, भां०।

नापि विरोधः; सत्त्वाऽसत्त्वयोस्तत्र भिन्ननिमित्तनिबन्धनत्वात्, ययोर्भिन्ननिमित्तनिबन्धनत्वं न तयोः एकत्र धर्मिणि विरोधः यथा एकत्वाऽनेकत्वयोः सूक्ष्मत्वस्थूलत्वयोर्वा, भिन्ननिमित्तनिबन्धनत्वञ्चैं एकत्र धर्मिणि सत्त्वासत्त्वयोरिति। किञ्च, विरोधः सर्वत्र अनुपलम्भसाध्यो भवति। यत् खलु यत्र उपलब्धिलक्षणप्राप्तं सत् नोपलभ्यते तत् तत्र विरुद्धम् यथा तुरङ्गभोत्तमाङ्गे शृङ्गम्, न च स्वरूपादिना वस्तुनि सत्त्वोपलम्भे पररूपादिना असत्त्वस्य अनुपलम्भोऽस्ति इति। तत्र उपलभ्यमानयोरपि अनयोः विरोधाऽभ्युपगमे स्वस्वभावेनापि वस्तुनो विरोधाऽनुषङ्गात् निःस्वभावतापत्तिः स्यात्। यदि चैकत्र विधिप्रतिषेधात्मकत्वं विरुद्ध्यते तदा कथम् अनुवृत्तव्यावृत्तप्रत्ययहेतुशक्तिद्वयात्मकत्वं सामान्यविशेषस्य स्यात्, एकाऽनेकस्वभावात्मकत्वं मेचकस्य वा? कथञ्च एकस्य नरसिंहत्वम् उमेश्वरत्वं वा स्यात्? जात्यन्तरत्वान्न दोषः इत्यन्यत्रापि समानम्। उक्तञ्च— ५ १०

"तदेव च स्यान्न तदेव च स्यात् तथाप्रतीतेस्तव तत्कथञ्चित्।" [बृहत्स्वयं० श्लो० ४२]

"दृष्टत्वान्न विरोधोऽपि कथ्यते युक्तिशालिभिः।
विरोधोऽनुपलम्भो हि यतो जैनमते मतः॥
दृश्यते मेचकादौ हि नीलपीतादिसंविदः।
पञ्चवर्णं यतो रत्नं मेचकं परिकीर्तितम्॥ १५
न नरः सिंहरूपत्वात् न सिंहो नररूपतः।
शब्दविज्ञानकार्याणां भेदात् जात्यन्तरं हि तत्॥
न नरो नर एवेति न सिंहः सिंह एव वा।
सामानाधिकरण्येन नरसिंहः प्रकीर्तितः॥

१—स्थूलतयोर्वा ब०, ज०। २—च्च उक्तध—आ०, ब०, ज०। ३ उभयोः ब०, ज०। ४ "एकत्र बहुभेदानां संभवान्मेचकादिवत्॥" न्यायविनि० २।४५। "यथा कल्माषवर्णस्य यथेष्टं वर्णनिग्रहः॥५७॥ चित्रत्वाद्वस्तुनोप्येवं भेदाभेदावधारणम्। यदा तु शबलं वस्तु युगपत्प्रतिपद्यते॥६२॥ तदान्यानन्यभेदादि सर्वमेव प्रलीयते॥" मीमांसाश्लो० आकृतिवाद। ५ "नात्यन्तमन्यत्वमनन्यता च विधेर्निषेधस्य च पूर्वदोषात्।" इत्युत्तरार्द्धम्। ६ 'न नरः सिंहरूपत्वात्' 'न नरो नर एवेति' इमे द्वे कारिके अनेकान्तवादप्रवेशटिप्पणके (पृ० १५) 'न नरः सिंहरूपत्वात्' इति च तत्त्वार्थभाष्यव्याख्यायाम् (पृ० ३७७) 'संज्ञाविज्ञानकार्याणाम्' इति पाठभेदेन च जैनतर्कवा० वृत्तौ (पृ० ११६) उद्धृताऽस्ति। "किमिव? नरसिंहवत्। यथा नरस्याकारो प्रस्त्यः (?) सिंहस्याकारः शिरोभागः तदुभयाभेदगतेः नरसिंह इत्युच्यते।" नयचक्रवृ० पृ० ५५ पू०। "भागे सिंहो नरो भागे योऽर्थो भागद्वयात्मकः। तमभागं विभागेन नरसिंहं प्रचक्षते॥" तत्त्वोपप्लव० पृ० ९६। नरसिंहस्य दृष्टान्तरूपेण उल्लेखः तत्त्वार्थराजवा० पृ० २२५, मीमांसाश्लो० पृ० ८८१, वाक्यप० द्वि० काण्ड पृ० १२१, तत्त्वसं० पृ० १२२, हेतुबि० टी० पृ० १०५ इत्यादिषु वर्त्तते। ७ प्रतीतितः भां०, अनेकान्तवादप्र० टि० पृ० १५।

द्रव्यात् स्वस्मादभिन्नाश्च व्यावृत्ताश्च परस्परम् ।
उन्मज्जन्ति निमज्जन्ति जलकल्लोलवत् जले ॥" [ ] इति ।

किञ्च, विरोधः अविकलकारणस्य एकस्य भवतः द्वितीयसन्निधानेऽभावाद् अवसीयते शीताग्निवत् । न च सत्त्वसन्निधाने असत्त्वस्य तत्सन्निधाने वा सत्त्वस्य अभावः कदाचिदप्यनुभूयते । अपि च अनयोर्विरोधः सहाऽनवस्थानलक्षणः, परस्परपरिहारस्थितिस्वभावः, बध्यघातकस्वरूपो वा स्यात् ? न तावत् सहाऽनवस्थानलक्षणः; अन्योन्याऽव्यवच्छेदेन एकस्मिन् आधारे सत्त्वाऽसत्त्वयोः प्रतीयमानत्वात्, ययोस्तथा प्रतीयमानत्वं न तयोः तथा विरोधः यथा रूपरसयोः, तथा प्रतीयमानत्वञ्च सत्त्वाऽसत्त्वयोरिति । परस्परपरिहारस्थितिलक्षणस्तु विरोधः सहैकत्र आम्रफलादौ रूपरसयोरिव अनयोः संभवतोरेव स्यात्, न पुनरसंभवतोः शशाश्वविषाणवत्, संभवदसंभवतोर्वा वन्ध्या-स्तनन्धययोरिव ।

किञ्च, अयं विरोधः धर्मयोः, धर्मधर्मिणोर्वा ? प्रथमपक्षे सिद्धसाधनम्, एतल्लक्षणत्वाद् धर्माणाम् । न च एवंविधविरोधाक्रान्तानां तेषामेकाधिकरणत्वविरोधः ; तथाविधानामप्येषां तदधिकरणतया प्रतीतेः मातुलिङ्गे रूपादिवत् । धर्मधर्मिणोस्तद्विरोधे धर्मिणि धर्माणां प्रतीतिरेव न स्यात्, न चैवम्, अबाधबोधाधिरूढप्रतिभासत्वात् तत्र तेषाम् । बध्यघातकरूपोऽपि विरोधः फणिनकुलयोरिव बलवदबलवतोः प्रतीतः सत्त्वाऽसत्त्वयोस्तुल्यबलत्वात् नाऽऽशङ्कनीयः ।

अस्तु वा कश्चिद्विरोधः; तथाप्यसौ सर्वथा, कथञ्चिद्वा स्यात् ? न तावत् सर्वथा; शीतोष्णस्पर्शादीनामपि सत्त्वादिस्वरूपाऽव्यवच्छेदतः तद्रूपतया विरोधाऽसिद्धेः, यत् यत्स्वरूपाऽव्यवच्छेदकं न तत् तद्रूपतया विरुद्धम् यथा घटत्वादिना घटादि, सत्त्वादिस्वरूपाऽव्यवच्छेदकाश्च शीतोष्णस्पर्शादय इति । एकाधारतया प्रतीयमानत्वाच्च ; यद् एकाधारतया प्रतीयते न तत् सर्वथा विरुद्धम् यथा रूपरसादि एकतुलायां नामोन्नामादि वा, एकाधारतया प्रतीयते च धूपदहनादौ शीतोष्णस्पर्शादय इति । कथञ्चिद्विरोधस्तु रूपादावपि समानः इति एकस्य सदसद्रूपतावत् रूपादिस्वभावताऽपि न स्यात्, न चैतद् युक्तम् प्रतीतिविरोधात् ।

किञ्च, भावेभ्यो भिन्नो विरोधः, अभिन्नो वा ? यदि अभिन्नः; कथं विरोधको नाम स्वात्मभूतत्वात् तत्स्वरूपवत् ? अथ भिन्नः; तथापि न विरोधकः तत एव अर्थान्तरवत् । अथ अर्थान्तरभूतोऽपि विरोधो विरोधकः भावानां विशेषणत्वात्, न तु अर्थान्तरम् विपर्ययात् ; तदप्ययुक्तम् ; विरोधो हि तुच्छरूपोऽभावः, स यदि शीतोष्णद्रव्ययोर्विशेषणम् तर्हि तयोः अदर्शनापत्तिः । अन्यतरविशेषणत्वेऽपि एतदेव दूषणम् । तदेव च विरोधि स्यात् यस्यासौ विशेषणं

---

१ "द्विविधो हि पदार्थानां विरोधः—अविकलकारणस्य भवतोऽन्यभावे अभावाद् विरोधगतिः शीतोष्णस्पर्शवत् । परस्परपरिहारस्थितलक्षणतया वा भाववत् ।" न्यायबिन्दु पृ० ९६–९८ । प्रमेयक० पृ० १५८ उ० । सन्मति० टी० पृ० १३१ । २ शशखरविषा–श्र० । ३ चैव तद् श्र० । ४–रोधः स्वा–श्र० ।

नान्यत्, नचैकत्र विरोधो नाम अस्य द्विष्ठत्वात् अन्यथा सर्वत्र सर्वदा तत्प्रसङ्गः। अथ विरुद्धयमानत्व-विरोधकत्वापेक्षया कर्तृ-कर्मस्थोऽपि विरोधो विरोधसामान्यापेक्षया उभयविशेषणत्वात् द्विष्ठोऽभिधीयते ; नन्वेवं रूपादेरपि विरोधकत्वापत्तिः तत्सामान्यस्यापि द्विष्ठत्वाऽविशेषात्, तथा च विरोधकल्पनावैयर्थ्यम्। अभावस्वभावत्वे चास्य सामान्य-विशेषाभावाऽनुपपत्तिः, गुणादिरूपत्वे गुणादिविशेषणत्वाऽनुपपत्तिः। ५

यदि च षट्पदार्थव्यतिरिक्तत्वात् पदार्थविशेषो विरोधः अनेकस्थो विरोध्य-विरोधकप्रत्ययविशेषप्रसिद्धः समाश्रीयते; तदाप्यस्य असम्बद्धस्य द्रव्यादौ विशेषणत्वं स्यात्, सम्बद्धस्य वा ? न तावद् असम्बद्धस्य; अतिप्रसङ्गात्, दण्डादौ तथाऽप्रतीतेश्च, न खलु पुरुषेण असम्बद्धो दण्डः तस्य विशेषणं प्रतीतः येन अत्रापि तथाभावः स्यात्। अथ सम्बद्धः ; किं संयोगेन, समवायेन, विशेषणभावेन वा ? न तावत् संयोगेन; अस्य अद्रव्यत्वेन संयोगाऽनाश्रयत्वात्। नापि समवायेन; अस्य द्रव्य-गुण-कर्म-सामान्य-विशेषव्यतिरिक्तत्वेन असमवायित्वात्। नापि विशेषणभावेन; सम्बन्धान्तरेणाऽसम्बद्धे वस्तुनि तस्याऽसंभवात्, अन्यथा दण्ड-पुरुषादौ संयोगादिसम्बन्धाऽभावेऽपि स स्यात् इत्यलं संयोगादिसम्बन्धकल्पनाप्रयासेन। ततो विरोधस्य विचार्यमाणस्य अनुपपद्यमानत्वात् नाऽसौ सत्त्वाऽसत्त्वयोर्युक्तः। १०

नापि वैयधिकरण्यम्; एकाधारतया निर्बाधबोधे तयोः प्रतिभासमानत्वात्। नापि उभयदोषाऽनुषङ्गः; चौर-पारिदारिकाभ्यामचौर-पारदारिकवत् तदात्मकवस्तुनो जात्यन्तरत्वात्। न खलु सत्त्वाऽसत्त्वयोर्भेदाऽभेदयोर्वा अन्योन्यनिरपेक्षयोः एकत्वं जिनपतिमताऽनुसारिभिरिष्टम् येन अयं दोषः स्यात्; तत्सापेक्षयोरेव तदभ्युपगमात्, तथाप्रतीतेश्च। नापि सङ्कर-व्यतिकरौ; स्वस्वरूपेणैव अर्थे तयोः प्रतीयमानत्वात्। नाप्यनवस्था; धर्माणामपरधर्माऽसंभवात्, *"धर्मिणो ह्यनन्तरूपत्वं न धर्माणां कथञ्चन।"* [ ] इत्यभिधानात्। अभावदोषस्तु दूरोत्सारित एव; सदसदाद्यनेकान्तात्मनोऽर्थस्य अध्यक्षादिप्रमाणतः प्रसिद्धेः। १५ २०

१–था सर्वदा आ० । २–षणभावा– श्र० । ३ "....जात्यन्तरत्वादचौरपारदारिकवच्चौरपारदारिकाभ्याम्...।" अष्टसह० पृ० २०६ । ४ संशयाद्यष्टदोषाणां परिहारो निम्नग्रन्थेषु द्रष्टव्यः–"उदयस्थितिसंहारलक्ष (ण) स्य सतः प्रतिभासादिभेदाभेदाभ्यां भेदाभेदप्रसिद्धिः आत्मप्रतिबन्धेन तथापरिणामात्; संशयविरोधवैयधिकरण्योभयदोषप्रसङ्गानवस्थासङ्कराभावकल्पनामन्योन्याविवेकप्रतीतिरतिशेते।" प्रमाणसं० पृ० ६५ पू० । "न चास्य विरोधसङ्करानवस्थाप्रसङ्गदोषानुग्रहण..." नयचक्रवृ० पृ० ५८ उ० । न च स्वभावभेदोपलम्भेऽपि नानात्वविरोधसङ्कराऽनवस्थानुषङ्गः चेतसि ग्राह्यग्राहकाकारवत्। अष्टश०, अष्टसह० पृ० २०६। तत्त्वार्थश्लो० पृ० ४३५ । प्रमेयक० पृ० १५८ पू० । सन्मति० टी० पृ० ४५१ । स्या० रत्ना० पृ० ७४१ । प्रमेयरत्नमा० ४।१ । प्रमाणमी० पृ० ४४ । स्याद्वादमं० पृ० १९७ । सप्तभङ्गित० पृ० ८१ ।

यदप्युक्तम्[1]–'मुक्तोऽप्यमुक्त' इत्यादि; तदप्यनल्पतमोविलसितम्; यतः द्विविधो[2] हि अनेकान्तः–अक्रमाऽनेकान्तः, क्रमाऽनेकान्तश्च। तत्र ज्ञानसुखाद्यनेकाऽक्रमिधर्मापेक्षया अक्रमाऽनेकान्तः, युगपदपि एकत्रात्मनि[3] संभवात्। मुक्त-इतराऽनेककमिधर्मापेक्षया क्रमाऽनेकान्तः, अयुगपदेव तत्संभवात्। तथा च 'य एव आत्मा पूर्वममुक्तः स एव उत्तरकालं मुक्तः' इति न किञ्चिद् विरुद्ध्यते अनेकान्तक्षतिर्वा प्रसज्यते। एकरूपत्वे च आत्मनो बन्ध-मोक्षाऽभावः, बद्धस्य हि मुक्तत्वम्, न च सर्वथैकरूपस्य अवस्थाद्वययोगो युक्तः विरोधात्। तदेवम् एकान्तदुराग्रहग्रहाभिनिवेशं परित्यज्य प्रतीतिभूधरशिखरारूढमनेकान्तात्मकत्वं वस्तुनोऽभ्युपगन्तव्यम्। ततः स्थितमेतत्–'द्रव्यपर्याय' इत्यादि।

तदेवं नित्यत्वाद्येकान्तलक्षणगोचरस्य प्रत्यक्षग्राह्यत्वेन आत्मसमर्पणाऽभावात् न साक्षात्करणं संभवति[4]। 'न केवलम्' इत्यादिना अत्रैव दूषणान्तरमतिदिशन्नाह–**न केवलं साक्षात्करणम्** अध्यक्षीकरणम् **एकान्ते** नित्यत्वैकान्ते अनित्यत्वैकान्ते च **न संभवति, अपि तु**—

अर्थक्रिया न युज्येत नित्य-क्षणिकपक्षयोः।
क्रमाऽक्रमाभ्यां भावानां सा लक्षणतया मता ॥ ८ ॥

विवृतिः–अर्थक्रियासमर्थं परमार्थसत् (इति) अङ्गीकृत्य स्वपक्षे पुनः अर्थक्रियां स्वयमेव निराकुर्वन् कथमनुन्मत्तः? स्वभूतिमात्रमर्थक्रियां विपक्षेऽपि कथन्निरस्येत, मिथ्याव्यवहारं वा? संवित्तेरभेदेऽपि विषयाकारस्यैव विषयसाधनत्वं नाकारान्तरस्य। ततः—

अर्थस्य ज्ञानस्य अन्यस्य वा **क्रिया** करणम् **न युज्येत** न घटेत। क? **नित्यक्षणिकपक्षयोः।** एतदुक्तं भवति–यत एव अर्थसाक्षात्करणं तदेकान्ते न संभवति अत एव प्रत्यक्षाऽनुपलम्भसाधनः कार्यकारणभावोऽपि न संभवति। किञ्च, अर्थक्रिया क्रमयौगपद्याभ्यां व्याप्ता, न च नित्यैकान्ते क्षणिकैकान्ते वा क्रम-यौगपद्ये संभवतः; तथाहि–पूर्वमेकं कार्यं कृत्वा पुनः अन्यस्यं[6] करणं क्रमः, तेन नित्यस्य न तावत् कार्यकर्तृत्वं युक्तम्। येनँ[7] हि स्वभावेन तत् पूर्वं कार्यं करोति तेनैव यदि पाश्चात्यम्; तर्हि द्वयोरपि कार्ययोः एककालता स्यात्, तथा च पाश्चात्यमपि कार्यं पूर्व-

कारिकाव्याख्यानम्, नित्ये क्रमयौगपद्याभ्याम् अर्थक्रियाकारित्वाऽभावसाधनञ्च—

---

१ पृ० ३६१ पं० १। २ द्विविधोऽत्र हि आ०। "अनेकान्तो हि द्वेधा···।" प्रमेयक० पृ० ९३ उ०। ३–नि तत्सं–श्र०। ४ संभवति यत एव साक्षात्करणं संभवति न केवलं भां०, श्र०। ५ "अर्थक्रियासमर्थं यत्तदत्र परमार्थसत्।" प्रमाणवा० ३।३। ६ अन्यस्य वा क्रिया करणं भां०, श्र०। ७ "येन हि स्वभावेन आद्यामर्थक्रियां करोति तेनैव उत्तराणि कार्याणि समासादितस्वभावान्तरः करोति···।" तत्त्वोप० पृ० १२६।

कार्यकालमेव स्यात् पूर्वकालकार्यजननस्वभावजन्यत्वात्। यद् यत् तथाविधस्वभावजन्यम् तत् तत् पूर्वकार्यकालम् यथा तत्कालाभिमतं कार्यम्, पूर्वकालकार्यजननस्वभावजन्यश्च नित्यैकरूपस्य वस्तुनः पाश्चात्यं कार्यमिति। अथ येन स्वभावेन उत्तरं कार्यं तत् करोति तेनैव पूर्वम्; तर्हि पूर्वमपि कार्यं पाश्चात्यकार्यकालमेव स्यात् पाश्चात्यकालकार्यजननस्वभावजन्यत्वात् पाश्चात्यकालकार्यवत्। ५

अथ तज्जननस्वभावजन्यत्वाऽविशेषेऽपि तत्तत्सहकारिक्रमात्[1] तत्र कार्यक्रमोऽभ्युपगम्यते; सहकारिकृतमेव तर्हि तत् कार्यं स्यात्। नित्यस्यापि तत्र सन्निधानान्न दोषोऽयमिति चेत्; किम् अकिञ्चित्करसन्निधानेन? अन्यथा घटोत्पत्तौ रासभस्यापि सन्निधानात् तस्य तत्कृतत्वप्रसङ्गः। किञ्चित्करत्वे वा काचपच्यप्रसङ्गः, 'नित्यं हि वस्तु कार्यं पूर्वकालमेव कर्तुमिच्छति सहकारिणस्तु उत्तरकालम्' इति। अथ पूर्वमन्येन स्वभावेन तत् तज्जनयति पाश्चात्यञ्च अन्येन; १० ननु तत्स्वभावद्वयं तस्य सदा संभवति, कार्यवद्वा क्रमि स्यात्? प्रथमपक्षे स एव दोषः; 'पूर्वकार्यकाले पाश्चात्यम् तत्काले वा पूर्वं स्यात्' इति। द्वितीयपक्षे तु ततः स्वभावद्वयम् अभिन्नम्, भिन्नं वा? अभेदेऽपि किं नित्याद् वस्तुनः स्वभावद्वयम् अभिन्नम्, ततो वा नित्यं वस्तु? आद्यविकल्पे तस्य नित्यत्वप्रसक्तिः नित्यादभिन्नस्वभावत्वात्, यत् नित्यादभिन्नस्वभावं तत् नित्यं दृष्टम् यथा नित्यस्वात्मा, नित्यादभिन्नस्वभावश्च स्वभावद्वयमिति। द्वितीयविकल्पे तु १५ नित्यस्य अनित्यत्वप्रसक्तिः अनित्यादभिन्नस्वरूपत्वात्, यदनित्यादभिन्नस्वरूपम् तदनित्यं प्रतिपन्नम् यथा अनित्यस्वात्मा, अनित्यात् स्वभावद्वयाद् अभिन्नस्वरूपश्च नित्यत्वाभिमतं वस्तु इति। अथ स्वभावद्वयं ततो भिन्नमिष्यते तेनायमदोषः; कथमेवं 'तस्य इदं स्वभावद्वयम्' इति व्यपदेशः सम्बन्धाऽसंभवात्, समवायादेश्च प्रतिषिद्धत्वात्? तन्न क्रमेण नित्यस्य कार्यत्वं घटते।

नापि यौगपद्येन; एकस्मिन्नेव क्षणे सकलकार्योत्पत्तिप्रसङ्गतो द्वितीयादिक्षणे तस्य[4] अन- २०

---

१ तत्सह—भां०, श्र०। २ तत्कार्य—ज०, भां०। तत्तत्कार्य—श्र०। "क्रमेण युगपच्चापि यस्मादर्थक्रियाकृतः। न भवन्ति स्थिरा भावा निःसत्त्वास्ते ततो मताः ॥ ३९४ ॥ न तावत् स्थिरस्य भावस्य क्रमेणार्थक्रिया युक्तेति दर्शयति—कार्याणि हि विलम्बन्ते कारणासन्निधानतः। समर्थहेतुसद्भावे क्षेपस्तेषां हि किंकृतः ॥ ३९५ ॥ अथापि इत्यादिना परस्योत्तरमाशङ्कते—अथापि सन्ति नित्यस्य क्रमिणः सहकारिणः। यानपेक्ष्य करोत्येष कार्यग्रामं क्रमाश्रयम् ॥ ३९६ ॥ साध्वित्यादिना प्रतिविधत्ते—साध्वेतत् किन्तु ते तस्य भवन्ति सहकारिणः। किं योग्यरूपहेतुत्वादेकार्थकरणेन वा ॥३९७॥ योग्यरूपस्य हेतुत्वे स भावः तैः कृतो भवेत्। स चाशक्यक्रियो यस्मात् तत्स्वरूपं सदा स्थितम् ॥३९८॥ कृतौ वा तत्स्वरूपस्य नित्यताऽस्यावहीयते। विभिन्नोऽतिशयस्तस्माद् यद्यसौ कारकः कथम् ॥३९९॥" तत्त्वसं०। "नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिः विरुद्धयते।" प्रमाणवा० २।२६७। हेतुबि० टी० पृ० २१८। ३ "नापि यौगपद्येन इति दर्शयति—यौगपद्यं च नैवेष्टं तत्कार्याणां क्षयेक्षणात् ॥४१३॥ निःशेषाणि च कार्याणि सकृत्कृत्वा निवर्त्तते। सामर्थ्यात्मा स चेदर्थः सिद्धास्य क्षणभङ्गिता ॥ ४१४ ॥" तत्त्वसं०। ४ तस्याकार्यकारितस्यानर्थ—ज०।

र्थक्रियाकारित्वेन आकाशकुशेशयवद् असत्त्वप्रसक्तेः। अतः सर्वथा नित्यस्य वस्तुनः क्रमाऽक्रमाभ्यामर्थक्रियाकारित्वाऽसंभवादवस्तुत्वमेवायातम्। यत् क्रमाऽक्रमाभ्यामर्थक्रियाकारि न भवति न तद् वस्तु यथा गगनेन्दीवरम्, न भवति च क्रमाऽक्रमाभ्यामर्थक्रियाकारि सर्वथा नित्यम् आत्मपरमाण्वादिकम्, तस्मान्न वस्तु इति।

किञ्च, अस्य सर्वदा तत्कारित्वस्वभावता, कदाचिद्वा ? प्रथमपक्षे सर्वदैव अतः सकलकार्याणामुत्पत्तिः स्यात् सदैव तेषामविकलकारणत्वात्। यद् यदा अविकलकारणं तत् तदा उत्पत्तिमत् प्रसिद्धम् यथा समानसमयोत्पादा बहवोऽङ्कुराः, अविकलकारणानि च सर्वदा कार्यकारित्वस्वभावनित्यार्थकार्यतया अभिमतानि अखिलकार्याणि इति।

अथ कदाचित्; तर्हि 'पूर्वं कार्योत्पादनाऽसमर्थस्वभावं सत् तत् पश्चात् समर्थस्वभावं भवति' इत्यायातम्। तत्रापि तदुत्पत्तिसमये तद् असमर्थस्वभावं त्यजति, न वा ? यदि न त्यजति; तर्हि सर्वदा कार्याऽनुत्पादकत्वप्रसङ्गः। यत् खलु यदुत्पादने अपरित्यक्त-असमर्थस्वभावम् न ततस्तदुत्पत्तिः यथा यवबीजात् शाल्यङ्कुरस्य, कार्योत्पादने अपरित्यक्त-असमर्थस्वभावञ्च पूर्वमिव तदुत्पत्तिसमयेऽपि नित्याभिमतं वस्तु इति। अथ त्यजति; तन्न; नित्यैकरूपतया तस्य प्राक्तनतदुत्पादनाऽसमर्थस्वभावपरित्यागाऽसंभवात्। तत्संभवे वा अस्य नित्यैकरूपताव्याघातः, यत् परित्यक्तपूर्वस्वभावं न तद् एकरूपम् यथा अङ्गुल्यादि, परित्यक्तपूर्वाऽसमर्थस्वभावञ्च नित्यैकरूपतया अभिमतं वस्तु इति। अतः कथं तस्य नित्यैकरूपता ? परिणामित्वस्यैव उपपत्तेः असमर्थस्वभावपरित्यागेन समर्थस्वभावस्वीकारस्य तदन्तरेण अनुपपत्तेः, न खलु नित्यैकरूपे वस्तुनि पूर्वापररूपत्यागोपादाने घटेते। यत्र पूर्वापररूपत्यागोपादाने स्तः तत् परिणामि यथा कुण्डलेतरावस्थाक्रोडीकृतं सर्पादि, असामर्थ्येतरलक्षणपूर्वाऽपररूपत्यागोपादाने स्तश्च नित्यतयाऽभिमते वस्तुनि इति। 'नित्यैकरूपोऽप्यर्थः सहकारिसहितः कार्यं करोति न सर्वदा' इत्यभिदधताऽपि परिणामित्वमेव समर्थितम्; असाहित्यरूपत्यागेन साहित्यरूपोपादानात्, इति क्रमेण युगपद्वा अनेकधर्मात्मकस्यैव अर्थस्य अर्थक्रियाकारित्वं प्रतिपत्तव्यम्।

प्रत्येकञ्च आत्मादिनित्यद्रव्याणां प्रकृतेश्च अपरिणामित्वे एवम् अर्थक्रियाकारित्वाभावो द्रष्टव्यः। यथा च एषां तथाभूतानां तत्कारित्वं न घटते तथा षट्पदार्थपरीक्षायां प्रकृतिपरीक्षायाञ्च विस्तरतः प्रतिपादितम्। तन्न नित्यस्य वस्तुनः क्रमयौगपद्याभ्यामर्थक्रियाकारित्वं घटते।

---

१ "युगपदशेषाणि कार्याणि कृत्वा स किं तस्यार्थक्रियासमर्थःस्वभावो निवर्त्तते अहोस्विदनुवर्त्तते ? तत्र यदि निवर्त्तते इति पक्षः तदा तस्य क्षणभङ्गित्वं सिद्धम्···तद्रूपस्यानुवृत्तौ तु कार्यमुत्पादयेत् पुनः। अकिञ्चित्कररूपस्य सामर्थ्यं चेष्यते कथम् ॥४१५॥ सर्वसामर्थ्यशून्यत्वात्तारापथसरोजवत्। असन्तोऽक्षणिकाः सर्वे शक्तिर्यद्वस्तुलक्षणम् ॥४१६॥" तत्त्वसं०। २ वा तस्य श्र०। ३ सर्वदैव ब०,ज०। ४–कस्यैवार्थक्रिया ब०, ज०, भां०, श्र०। ५ "नित्यत्वैकान्तपक्षेऽपि विक्रिया नोपपद्यते। प्रागेव कारकाभावः क्व प्रमाणं क्व तत्फलम् ॥३७॥" आप्तमी०। "पूर्वापरस्वभावपरिहारावाप्तिलक्षणामर्थक्रियां कौटस्थ्येऽपिब्रुवाणः कथमनुन्मत्तः ?" अष्टश०,अष्टसह० पृ० १७९। तत्त्वार्थश्लो० पृ० ७६। प्रमेयक० पृ० ५४७ पू०।

नापि क्षणिकस्य; पूर्वापरस्वभावत्यागोपादानविकलत्वात्, सकृदनेकशक्तिरहितत्वाच्च । यत् यत् तथाविधम् तत् तत् क्रमयौगपद्याभ्यामर्थक्रियाकारि न भवति यथा खरविषाणम्, एकक्षणस्थायितया निरंशतया च पूर्वापरस्वभावत्यागोपादानविकलं सकृदनेकशक्तिरहितञ्च परपरिकल्पितम् एकान्तक्षणिकं[1] वस्तु इति। प्रतिषिद्धञ्चैं सन्तानप्रतिषेधाऽवसरे सर्वथा क्षणिकस्य अर्थक्रियाकारित्वम्, प्रतिषेत्स्यते चाग्रे । किञ्च, प्रमाणनिष्ठा प्रमेयव्यवस्था भवति, न च ५ क्षणिकत्वे किञ्चित् प्रमाणमस्ति ।

ननु इदमस्ति–'यत् सत् तत् सर्वं क्षणिकम् यथा घटः, सन्तश्च भावाः' इति। सत्त्वं हि अर्थक्रियाकारित्वमिति, अर्थक्रिया च क्रमयौगपद्याभ्यां व्याप्ता, सा च अक्षणिके न संभवति तद्व्यापकयोः क्रमयौगपद्ययोः असंभवात्, तदसंभवश्च अस्य सर्वदा एकरूपत्वात्, अतः अर्थ- १०

'सत्त्वादिहेतुभ्यः सर्वे भावाः क्षणिकाः तत्रैव च अर्थक्रिया संभवति न नित्ये' इति बौद्धस्य पूर्वपक्षः—

क्रियाऽपि अनेन सदैव कर्त्तव्या न वा कदाचिद् अविशेषात्। क्रमेण अस्य अर्थक्रियाकारित्वसंभवे वा किं येन रूपेण एकं कार्यं करोति तेनैव अपरम्, रूपान्तरेण वा ? तेनैव चेत्; तर्हि द्वितीयक्षणसाध्यकार्यस्य प्रथमक्षण एव उत्पादप्रसङ्गः तदुत्पादकस्वरूपस्य प्रागपि भावात्। रूपान्तरेण चेत्; तर्हि पूर्वरूपस्य निवृत्तत्वात् क्षणिकत्वम्। अथ तत्तत्क्रमवत्सहकारिसन्निधिमपेक्ष्य नित्यं तत्तत्कार्यं करोति; ननु ते सहकारिणः तस्य १५ उपकारं कुर्वन्ति, न वा ? कुर्वन्ति चेत्; किं ततो व्यतिरिक्तम्, अव्यतिरिक्तं वा ? यदि अव्यतिरिक्तम्; तदा 'तदेव कुर्वन्ति' इत्यायातम्, तस्य च पूर्वमेव निष्पन्नत्वान्न किञ्चित् सहकारिभिः क्रियेत[6]। अथ व्यतिरिक्तम्; तदा 'तस्य' इति व्यपदेशाऽभावः असम्बन्धात्, सम्बन्धान्तरकल्पने च अनवस्था। तन्न क्रमेण अक्षणिकः कार्यमारभते ।

नापि युगपत्; एकदैव अखिलकार्योत्पादकस्वभावतया प्रथमक्षण एव अखिलकार्योत्पा- २० दनात् क्षणान्तरे तदुत्पाद्यकार्याऽभावतः अनर्थक्रियाकारित्वेन अश्वविषाणवत् असत्त्वप्रसङ्गात्। किञ्च, उत्पादिताऽशेषकार्यग्रामस्य किमस्य असौ स्वभावो निवर्त्तते, न वा ? यदि न निवर्त्तते; तदा प्रथमक्षणवत् द्वितीयादिक्षणेऽपि तत्स्वभावाऽनिवृत्तेः समस्तस्य उत्पादितस्यापि उत्पादनप्रसङ्गात् पिष्टपेषणाऽनुषङ्गः। निवर्त्तते चेत्[5]; तर्हि तन्निवृत्तौ तस्यापि निवृत्तिः तस्य ततोऽभिन्नत्वात्, अतः कथमस्याऽक्षणिकत्वम् ? तस्य ततो भेदे वा 'तस्य' इति व्यपदेशाऽनुपपत्तिः २५ सम्बन्धाऽभावात्, तद्भावे वा अनवस्था तस्यापि अपरसम्बन्धपरिकल्पनप्रसङ्गात्।

किञ्च, कार्योत्पादनसमये तेषां प्राक्तनाऽऽकारस्वभावत्यागः अस्ति, न वा ? नास्ति चेत्; पूर्ववत् तदापि अतः कार्याऽनुत्पादप्रसङ्गः। अस्ति चेत्; क्षणिकत्वम्, प्रतिक्षणं पूर्वस्वभाव-

---

१ "क्षणिकैकान्तपक्षेऽपि प्रेत्यभावाद्यसंभवः । प्रत्यभिज्ञाद्यभावान्न कार्योरम्भः कुतः फलम् ॥४१॥" आप्तमी०, अष्टसह० १८१ । तत्त्वार्थश्लो० पृ० ७७ । प्रमेयक० पृ० १४७ । २ पृ० १० । ३–रित्वमर्थ–आ० । ४ अक्षणिकत्वे ब०, ज० । ५ तत्कार्यं आ० । ६ क्रियते आ०, भां० ।

विनाशेन उत्तरोत्पादेन च अन्यत्वात्। प्रयोगः—ये अकृत्वा कुर्वन्ति कार्यं ते प्रतिक्षणं नैकरूपाः यथा बीजादयः, अकृत्वा कुर्वन्ति च नित्यत्वेनाऽभिमताः पदार्थाः कार्याणि इति। तथा च एषां कृतकत्वप्रसिद्धेः ततोऽपि क्षणिकत्वं सिद्धम्; तथाहि—यत् [२]कृतकं तत् क्षणिकम् यथा विद्युत्-प्रदीपादि, कृतकाश्च विवादापन्नाः पदार्था इति। हेतोरुत्पद्यमानत्वं हि कृतकत्वम्, तच्च विनश्वरस्वभावनियतमेव। स्वहेतुतो हि भावाः समुत्पद्यमाना विनाशस्वभावनियता एव उत्पद्यन्ते अतः शिंशपात्व-वृक्षत्वयोरिव कृतकत्व-अनित्यत्वयोः तादात्म्यसिद्धिः। न च हेतुसामर्थ्यप्रभवत्वाऽविशेषेऽपि केचित् नित्याः केचिद् अनित्या भावा भविष्यन्ति इति नाऽनयोः तादात्म्यसिद्धिः इत्यभिधातव्यम्; कारणसामर्थ्याऽभेदात् पावकादिवत्। न खलु पावकोत्पादककारणकलापः कश्चित् [३]प्रँकाशोष्णस्पर्शसहितं पावकमुत्पादयति कश्चित् तद्विपरीतम् इति तत्सामर्थ्यभेदः प्रतीतिगोचरः, येन अत्रापि नित्य-अनित्यस्वभावभावोत्पादकत्वेन कारणानां सामर्थ्यभेदः [४]कँल्प्येत। अतो भावं भावाः प्रादुर्भावयन्तो विनाशस्वभावमेव आविर्भावयन्ति, इति सिद्धं कृतकत्व-अनित्यत्वयोस्तादात्म्यम्।

ननु विनश्वरस्वभावत्वेऽपि अर्थानां नैकक्षणस्थायित्वेन विनाशः, यदैव हि तद्धेतूपनिपातः तदैव असौ भविष्यति; इत्यप्ययुक्तम्; नश्वँरस्यापि प्रतिक्षणम् अनाशे कालान्तरेऽप्यविशेषतो नाशानुपपत्तेः, न हि प्रकाशस्य प्रतिक्षणम् अप्रकाशता तस्यां वा पुनः कालान्तरे प्रकाशता दृष्टा। अन्ते च अर्थानां नाशोपलम्भात् नाशित्वे[६] प्रकाशस्य प्रँकाशत्ववत् सिद्धः स्वरूपमात्राऽनुरोधी विनाशः अविलम्बेन आदावपि अविशेषात्।

किञ्च, शत-सहस्रक्षणस्थितिस्वभावो भावः प्रथमक्षणे जातः द्वितीयादिक्षणे तथैव आस्ते, न वा ? यदि आस्ते; तदा अन्त्यक्षणेऽपि अस्य तथैव अस्तित्वप्रसङ्गान्न कदाचित् नाशोत्पत्तिः स्यात्, तत्र तत्स्वभावत्यागे वा सिद्धं क्षणिकत्वम् प्रतिक्षणं स्वभावभेदलक्षणत्वात् तस्य। किञ्च, अक्षणिकत्वं नाम अर्थस्य अनेकक्षणस्थायिनी सत्ता, अनेकक्षणयोगित्वञ्च अस्य अनेककालक्षणाऽप्रतिपत्तौ दुरवबोधम्। न च वर्तमानार्थेन्द्रियसम्बन्धसामर्थ्यप्रभवं प्रत्यक्षं वर्त्तमानकालसम्बन्धिताव्यतिरेकेण अर्थस्य अनेककालक्षणव्यापित्वं प्रतिपत्तुं समर्थम्, यदि

१ अन्यत्वात् प्रसंगः भां०। २ "तत्र ये कृतका भावास्ते सर्वे क्षणभङ्गिनः। विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः॥ ३५३॥" तत्त्वसं०। "तदेवं विनाशं प्रति अन्यापेक्षामसामर्थ्यवैयर्थ्याभ्यां तद्धेत्वयोगेन कृतकत्वलक्षणस्य सत्त्वस्य पूर्वाचार्यप्रदर्शितां प्रतिपाद्य यथासौ विपर्यये बाधकप्रमाणमनुभवति तद्दर्शयन्नाह—तस्माद् विनाशः···।" हेतुबि० टी० पृ० २१३। ३ उष्णप्रकाशस—आ०, ब०, ज०, भां०। ४ कल्पेत आ०, ब०, ज०, भां०। ५ "अथ मृत्योरपक्रान्तः तस्य चेत् प्रथमः क्षणः। अविनाशस्वभावत्वादास्तां युगशतान्यपि॥" न्यायमं० पृ० ४४८। ६—त्वे प्रकाशकस्य भां०, ब०, ज०, श्र०। त्वे प्रकाशत्व—आ०। ७ प्रकाशतावत् भां०। प्रकाशकत्वत् ब०, ज०। ८—नुबन्धी भां०।

हि अनेककालक्षणैः सकृदेव अर्थस्य सम्बन्धः स्यात् तदा तत्सामर्थ्यप्रभवमपि प्रत्यक्षं तस्य तद्व्यापित्वं प्रतिपद्येत, न चाऽसौ सकृत् संभवति पूर्वाऽपरकालक्षणानां क्रमभावित्वात्। नापि स्मरणात् प्रत्यभिज्ञानाद्वा तत्प्रतिपत्तिः; तस्याप्रमाणत्वात्।

यदप्युक्तम्[1]–'विनाशहेतूपनिपाते स भविष्यति' इति ; तत्र विनाशहेतुः विनश्वरं भावं[2] विनाशयति, अविनश्वरं वा ? तत्र अनश्वरस्य विनाशहेतुशतोपनिपातेऽपि नाशाऽनुपपत्तिः, न हि स्वभावो भावानामन्यथा कर्तुं पार्यते। नश्वरस्य च नाशे तद्धेतूनां वैयर्थ्यम्, न हि स्वकारणादेव अवाप्तस्वभावस्यार्थस्य तदर्थः अर्थान्तरव्यापारः फलवान् तदनुपरतिप्रसङ्गात्।

किञ्च, भावात्[3] भिन्नो नाशः नाशहेतुंतः स्यात्, अभिन्नो वा ? यद्यभिन्नः; तदा भाव एव तद्धेतुभिः कृतः स्यात्, तस्य च स्वहेतोरेव उत्पत्तेः कृतस्य च करणाऽयोगात् तदेव तद्धेतुवैयर्थ्यं कारणभेदाऽनुपपत्तिश्च। अथ भिन्नः[4] ; तदाऽसौ भावसमकालभावी, प्राक्कालभावी, तदुत्तरकालभावी वा स्यात् ? तत्र सहभावित्वे युगपद् भावाऽभावयोरुपलम्भः स्याद् अविरोधात्, विरोधे वा अभावेन क्रोडीकृतत्वाद्[6] भावस्योपलम्भः स्वार्थक्रियाकारित्वञ्च न स्यात्। प्राक्कालभावित्वे भावस्यैव अभावात् कस्यासौ स्यात् ? सतो हि विनाशः, 'अलब्धसत्ताकस्य च विनाशः' इति महच्चित्रम् !

तदुत्तरकालभावित्वे घटादेः किमायातं येनाऽसौ स्वोपलम्भादिलक्षणामर्थक्रियां न कुर्यात् ? नहि तन्त्वादिभ्यः समुत्पन्ने पटे घटः तां कुर्वन् केनचित् प्रतिषेद्धुं शक्यः। ननु पटस्य अविरोधित्वान्न तदुत्पत्तौ घटस्य स्वार्थक्रियाकारित्वाभावः, अभावस्य तु तद्विपर्ययात् स स्यात्। अथ किमिदं विरोधित्वं नाम–नाशकत्वम्, नाशरूपत्वं वा ? नाशकत्वं चेत्; तर्हि मुद्गरादिवत् नाशोत्पादद्वारेण अनेन घटादिरुन्मूलयितव्यः, नाशान्तरेऽपि च अयमेव पर्यनुयोगः इत्यनवस्था। नाशरूपत्वं चेत्; ननु कथमर्थान्तरभूतोऽयं तस्य नाशः, अन्यथा पटो घटस्य नाशः स्यात् ? विरोधित्वाच्चेत्; चक्रकप्रसङ्गः। अर्थान्तरत्वाऽविशेषाच्च कथं घटस्यैव असौ स्यात्,

---

१ पृ० ३७६ पं० १३। २–वं नाशयति आ०, ब०, ज०। "इतश्च नाशहेतूनामकिञ्चित्करत्वं वक्तव्यम् ; तथाहि–भावः स्वहेतोरुत्पद्यमानः कदाचित् प्रकृत्या स्वयं नश्वरात्मैव उत्पद्यते, अनश्वरात्मा वा ? यदि नश्वरः ; न तस्य किञ्चिन्नाशहेतुना···अथानश्वरात्मेति पक्षः; तदापि नाशहेतुरकिञ्चित्कर एव, तस्य केनचित् स्वभावान्यथाभावस्य कर्तुमशक्यत्वात्···।" तत्त्वसं० पं० पृ० १४०। ३ स्वभावात् ब०, ज०। "तथाहि नाशको हेतुः न भावाऽव्यतिरेकिणः। नाशस्य कारको युक्तः स्वहेतोर्भावजन्मतः ॥३५८॥" तत्त्वसं०। ४–तुः तस्मादभिन्नो ब०, ज०। ५ "निर्हेतुकत्वे वस्तूत्पत्त्यनन्तरमात्मानमासादयति तदयुक्तम् ; अत्र पञ्च पक्षा भवन्ति–वस्तूत्पत्तेः पूर्वम्, सह वा, अनन्तरं वा, कालान्तरे वा भवनम्, न वा भवनम्।" तत्त्वोप० पृ० १२८। तत्त्वसं० पृ० १३६। ६ क्रोडीकृत्यतत्तद्धा–ब०, ज०। ७–णार्थ– आ०। ८ तन्त्वादेः भां०, श्र०। ९ "पदार्थव्यतिरिक्ते तु नाशनाम्नि कृते सति। भावे हेत्वन्तरैस्तस्य न किञ्चिदुपजायते ॥ ३६० ॥ तेनोपलम्भकार्यादि प्राग्वदेवानुषज्यते। तादवस्थ्याच्च नैवास्य युक्तमावरणादपि ॥ ३६१ ॥" तत्त्वसं०।

अविशेषात् अन्यस्यापि कस्मान्नोच्येत ? न च 'येन सम्बन्धः तस्यासौ' इत्यभिधातव्यम्; भेदाऽविशेषतः सम्बन्धस्यापि सर्वत्र प्रसङ्गात्। अथ मुद्गरादिना घटादेः प्राक्तनरूपविलक्षणं रूपान्तरं भङ्गुरत्वाख्यं विधीयते तेनासौ 'तस्य' इत्युच्यते; तत् किं स्वात्मनि तेनैव रूपेण अवस्थितस्य अस्य विधीयते, विनष्टस्य वा ? तत्र तेनैव रूपेण अवस्थितस्य विरोधान्न रूपान्तरं युक्तम्; नहि अवस्थितायां नीलरूपतायां पीतरूपता कर्तुं शक्या। विनष्टस्य च असत्त्वात् कथं रूपान्तरोत्पत्तिः शशविषाणवत् ? चक्रकप्रसङ्गश्च; घटादेर्विनष्टत्वे सति रूपान्तरोत्पत्तिः, सत्यां तस्यां विनाशसम्बन्धः, सति तस्मिन् विनष्टत्वम् इति। न च प्रसज्यप्रतिषेधात्मनो भावस्य कार्यत्वधर्माधारता; वस्तुरूपतापत्तेः। वस्तुनो हि कारणसामग्रीतो भावः अर्थक्रियाकारित्वञ्च स्वरूपम्, अभावोऽपि चेत् तत उत्पद्येत परोन्मूलनलक्षणाच्च अर्थक्रियां कुर्यात् तदा कोऽस्य भावाद् विशेषः स्यात् ? तुच्छरूपस्य च अभावस्य अभावनिराकरणप्रकरणे विशेषतो निराकरिष्यमाणत्वात् अलमिह अतिप्रसङ्गेन। पर्युदासप्रतिषेधे तु घटादेरन्यः कपालादिश्चेत् तदभावः; तस्य सहेतुकत्वं केन प्रतिषिद्धम् ? मुद्गरादीनां विसदृशसन्तानोत्पत्तौ व्यापारस्य अस्माभिरभ्युपगमात्, घटादयस्तु स्वोत्पत्तिक्षणानन्तरमस्थानशीलाः स्वकारणादेव संजाताः न कालान्तरमनुवर्त्तन्ते।

ततः सिद्धम्–'यो यद्भावं प्रति अन्याऽनपेक्षः स तत्स्वभावनियतः यथा अन्त्या कारणसामग्री स्वकार्योत्पादनं प्रति, विनाशं प्रति अन्याऽनपेक्षाश्च सर्वे भावाः' इत्यतोऽप्यनुमानात् उदयानन्तरमस्थायित्वं भावानाम्। तथा, 'यद् यथाऽवभासते तत तथैव सत् इत्यभ्युपगन्तव्यम् यथा नीलकुवलयं नीलतयाऽवभासमानं तेनैव रूपेण सत्, क्षणपरिगतेनैव रूपेण अवभासन्ते च सर्वे भावाः' इत्यनुमानतोऽपि। वर्त्तमानताग्रहणं हि "क्षणिकताग्रहणमुच्यते, तच्च अस्ति प्रत्यक्षे, नहि पूर्वाऽपरकालपरिगतेनात्मना भावाः प्रत्यक्षादिना गृहीतुं शक्यन्ते इत्युक्तं प्राक् इति।

१–च्यते श्र०। २ तस्य भविष्यति इ– ब०, ज०। ३ "अथ क्रियानिषेधोऽयं भावं नैव करोति हि। तथाप्यहेतुता सिद्धा कर्तुर्हेतुत्वहानितः॥ ३६३॥ तथाहि–प्रसज्यप्रतिषेधे सति नञः करोतिना सम्बन्धाद् अभावं करोति भावं न करोति इति क्रियाप्रतिषेधाद् अकर्तृत्वं नाशहेतोः प्रतिपादितम्...।" तत्त्वसं० पं० पृ० १३६। ४ कार्यध– ब०, ज०। ५–स्यातो विशे– श्र०। ६ "विधिनैवमभावश्च पर्युदासाश्रयात्कृतः। यस्तत्र व्यतिरेकादिविकल्पो वर्त्तते पुनः॥ ३६५॥...विवक्षावशाद्धि कुतश्चन भावाद्विलक्षणो भाव एव अभाव इत्याख्यायते, तत्र च व्यतिरेकादिविकल्पे प्राक्तनो दोषः पुनरावर्त्तते।" तत्त्वसं० पं० पृ० १३५। ७ "यद्भावं प्रति यन्नैव हेत्वन्तरमपेक्षते। तत्तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्॥३५४॥ निर्निबन्धा हि सामग्री स्वकार्योत्पादने यथा। विनाशं प्रति सर्वेऽपि निरपेक्षाश्च जन्मिनः॥ ३५५॥" तत्त्वसं०। हेतुबि० टी० पृ० २१३। ८ तत्स्वभावो यथा भां०। ९–मानग्रहणं ब०, ज०, भां०। १० क्षणिकग्र– ब०।

अत्र प्रतिविधीयते । यत्तावदुक्तम्[1]–'यत् सत्' इत्यादि, तत्र किमिदं सत्त्वं नाम–सत्ता-सम्बन्धः, प्रमाणविषयत्वम्, अर्थक्रियाकारित्वं वा ? प्रथमपक्षे भागाऽसिद्धत्वम्, सत्तासम्बन्धस्य सामान्यादिष्वसंभवात्। अपसिद्धान्तश्च, तल्लक्षणसत्त्वस्य सौगतैरनभ्युपगमात्। प्रमाणविषयत्वमपि प्रतिपदार्थं भिद्यते, न वा ? यदि भिद्यते; तदा अर्थ-[2] स्वरूपवद् विभिन्नस्वरूपत्वात् नैकप्रत्ययविषयम्, अतः अनन्वयात्[3] न हेतुत्वं स्यात्। अथ न भिद्यते; तदा प्रतीयते, न वा ? यदि न प्रतीयते; कथमस्ति ? प्रतीयते चेत्; तर्हि नामान्तरेण सत्तैव उक्ता स्यात्, तत्सम्बन्धे च उक्तदोषाऽनुषङ्गः। प्रमाणविषयत्वस्य च तदन्तरेण सत्त्वे अनवस्था। स्वतः सत्त्वे अर्थानामपि स्वत एव तदस्तु किं ततः तत्कल्पनया ? विरुद्धश्चेदम्–प्रमाणविषयत्वलक्षणं हि सत्त्वमक्षणिकसमस्तवस्तुविषयं प्रसिद्धम् तच्च अक्षणिकत्वमेव प्रसाधयति इति।

उक्तरीत्या बहिरन्तश्च क्षणिकत्वमुपवर्ण्यतः सौत्रान्तिकस्य विस्ततः प्रतिविधानम्—

अर्थक्रियाकारित्वलक्षणमपि सत्त्वम् असिद्ध-विरुद्ध-अनैकान्तिक-कालात्ययापदिष्टदोषदुष्टत्वान्न क्षणिकत्वसाधनायालम्। तत्र असिद्धत्वं तावत्–अर्थक्रियाकारित्वं हि अर्थक्रियाहेतुत्वमुच्यते, तच्च असत्यामर्थक्रियायां दुरवबोधम्। नहि भावानां नानाविधशक्तियुक्तानां दर्शनमात्रादेव तत्तत्कार्यकरणशक्तियुक्तत्वं[4] गृहीतुं शक्यम्। योग्यता-क्षणिकत्वे गृहीतेऽपि वस्तुसद्भावे न शक्येते निश्चेतुम् इति भवद्भिरेव अभ्युपगमात्। ननु संभावनामात्रेण अत्रार्थक्रियाकारित्वमवगम्यते, संभाव्यते हि एतत् 'करिष्यति अयमर्थक्रियाम्' इति; ननु संभावनाऽप्यत्र केनावष्टम्भेन प्रवर्त्तते ? तत्सजातीयस्य अर्थक्रियायां दृष्टायामिति चेत्; तत्रापि तुल्यः पर्य्यनुयोगः, तत्रापि तत्सजातीयेऽर्थक्रियादर्शनात् तत्कारित्वाऽवगमेऽनवस्था। भवद्दर्शने च अर्थानामत्यन्तभेदात् सजातीयत्ववार्त्ताऽपि दुर्लभा इत्युक्तं सामान्यपरीक्षाप्रघट्टके। अतः अर्थक्रियाकारित्वमसिद्धमेव।

विरुद्धश्च–अक्षणिक एवार्थे क्रमाऽक्रमाभ्यां तत्कारित्वस्य[6] संभवात्। नहि क्षणिकोऽर्थः क्रमेण अर्थक्रियां कर्त्तुं क्षमः देशकालस्वभावकृतक्रमाऽसंभवात्। एक एव हि पदार्थः किञ्चित् कार्यं विधाय पुनरपेक्षितसहकारिसन्निधेरुपात्तसामर्थ्यान्तरो देशकालभेदेन कार्यान्तरं कुर्वाणः 'क्रमेण करोति' इति युक्तम्, क्षणमात्रस्थायित्वे चार्थस्य एवंविधं क्रमकारित्वमयुक्तम्। निरंशत्वेन युगपदनेकशक्त्यात्मकत्वाभावतः तस्य अनेककार्याणां युगपत्करणमपि अतिदुर्लभम्, एतच्च सन्तानभङ्गार्वसरे प्रपञ्चतः प्रपञ्चितम्। ततः अर्थक्रियाव्यापकयोः क्रम-यौ-

---

१ पृ० ३७५ पं० ७। २ अर्थस्वरूपत्वान्नैकप्रत्ययत्वम् आ०। ३ अनन्वयहेतुत्वम् ब०, ज०। ४–त्वं शक्यम् आ०। ५ क्षणिक ब०, ज०। ६ असंभवात् ब०, ज०। ७–सन्निधि– आ०। ८ पृ० ९। ९ तयोऽर्थ– आ०। "क्षणिकेष्वपि इत्यादिना भदन्तयोगसेनमतमाशङ्कते–

गपद्ययोः क्षणिके विरोधात् यत् क्रमयौगपद्याभ्यामर्थक्रियाकारि तद् अक्षणिकमेव इति सिद्धमस्य विरुद्धत्वम्। अनैकान्तिकत्वञ्च–अक्षणिकेऽप्यर्थे तत्तत्सहकारिसन्निधाने क्रमाऽक्रमाभ्यामर्थक्रियाकारित्वोपपत्तेः।

यदप्युक्तम्[1]–'सहकारिणः तस्य उपकारं कुर्वन्ति न वा' इत्यादि; तदसत्; उपकारकाणामेव सहकारित्वाऽभ्युपगमात्, अन्योन्यसन्निधाने तेषामतिशयोत्पत्तेः। नहि असंजाताऽतिशयानां पूर्वरूपाऽविशेषात् कार्यजनकत्वं युक्तम्। धर्म-धर्मितया च उपकार-तद्वतोर्भेदः। न च भेदे तस्यैव जनकत्वात् तद्वतोऽजनकत्वम्; अत्यन्तभेदाऽप्रसिद्धेः। धर्मधर्मितया हि तयोर्भेदः, अशक्यविवेचनत्वेन च अभेदः, बुद्धि-तदाकारवत्। न च यो यदर्थमेव कल्पितः स तस्यैव बाधकः; बुद्धेः अर्थग्राहकत्वाऽभावप्रसङ्गात् आकारस्यैव अर्थग्राहकत्वाऽनुषङ्गात्। ननु प्रत्येकं तेषां सामर्थ्ये किमन्यापेक्षया ? इत्यप्यनुपपन्नम्; यावतां सद्भावे कार्यमुपलभ्यते अभावे च नोपलभ्यते तावतां तत्र कारणत्वाऽवधारणात्, कारणसामर्थ्याऽसामर्थ्ययोः कार्यभावाऽभावाऽवसेयत्वात्।

कथञ्च इत्थं क्षणिकस्य अर्थक्रियाकारित्वं घटते ? स हि सहकारिसापेक्षः, निरपेक्षो वा तत्र समर्थः ? यदि निरपेक्षः; तर्हि कुशूलस्थोऽपि बीजक्षणः अङ्कुरं जनयेत्। अथ पूर्वपूर्वक्षित्यादिक्षणपरम्परया आहितातिशयः अन्त्य एव बीजक्षणः तज्जनकः; तर्हि सिद्धं सापेक्षस्याऽस्य जनकत्वम्, तद्वत् नित्यस्याप्यस्तु अविशेषात्। अथ स्वोत्पत्तौ एव असौ सहकारिणोऽपेक्षते न कार्ये; तन्न; स्वोत्पत्तेरपि अन्येषां कार्यत्वात्, ततस्तैरपि अनपेक्षैः स्वकार्ये भवि-

---

क्षणिकेष्वपि भावेषु ननु चार्थक्रिया कथम्। विशेषाधायिनोऽन्योन्यं नह्याद्याः सहकारिणः ॥ ४२८ ॥ क्रमेण युगपच्चापि यतस्तेऽर्थक्रियाकृतः। न भवन्ति ततस्तेषां व्यर्थः क्षणिकताश्रयः ॥ ४३१ ॥ स हि आह–क्षणिकत्वेऽपि भावानां क्रमयौगपद्याभ्यामर्थक्रियाविरोध एव। यतस्ते स्वयं समर्था भवेयुरसमर्था वा ?'''' तत्त्वसं०।

१ पृ०३७५ पं० १५। २–वासाधकः श्र०। ३ "अत्रोच्यते–न सत्त्वं क्षणभङ्गसिद्धौ अङ्गम् असाधारणत्वात् सन्दिग्धव्यतिरेकित्वाद्वा। तथाहि–क्रमाक्रमाभ्यां व्याप्तं सत्त्वं तदनुपलम्भेन अक्षणिकाद् व्यावर्त्तते एवं तदेव सापेक्षत्वानपेक्षत्वाभ्यां व्याप्तं तदनुपलम्भेन क्षणिकादपि व्यावर्त्तते'''। अन्तक्षणप्राप्तानि क्षितिपवनपाथस्तेजोबीजानि'''परस्परानपेक्षाणि वा जनयेयुः सापेक्षाणि वा ?''''न्यायवा० ता० टी० ३।२।१४। पृ० ५५६। प्रश० किरणा० पृ० १४४। "क्षणिकस्यापि भावस्य सत्त्वं नास्त्येव सोऽपि हि। क्रमेण युगपद्वापि न कार्यकरणे क्षमः ॥ क्षणिकस्य क्रमः कीदृग्युगपत्करणेषु वः।" न्यायमं० पृ० ४५३। ४ "नन्वपेक्षते एव किन्तु स्वोत्पादे न पुनः स्वकार्ये। तत्र तस्य अनपेक्षत्वमुपेयते न तु स्वोत्पादे। ननु स्वोत्पत्तावपि अस्य जागर्त्ति स्वसन्तानवर्ती पूर्व एव निरपेक्षः क्षणः एवं पूर्वः पूर्वः क्षणः स्वसन्तानपतित एव अनपेक्षो जागर्त्त्युपजनन इति कुशूलनिहितबीज एव स्यात् कृती कृषीवलः कृतमस्य कृषिकर्मणा'''।" न्यायवा० ता० टी० ३।२।१४। पृ० ५५७।

तव्यम्, एवमन्यैरपि इति कुशूलस्थस्यापि बीजस्य अङ्कुरजनकत्वप्रसङ्गः। भूतिक्षणे एव च अखिलस्य निरपेक्षतया उत्पादप्रसङ्गात् सकलसन्तानोच्छेदः स्यात्। कारणे विनष्टे कार्यस्योत्पादात् न तदुच्छेदः इति चेत्; नन्वेवं कथं तत् तस्य कारणं स्यात्, यत्सद्भावे यन्नोत्पद्यते अभावे तु उत्पद्यते तस्य तत्कारणत्वाऽयोगात्? ततः 'तत्तत्सहकारिसन्निधाने कारणं तत्तत्कार्यं करोति' इति प्रेक्षादक्षैः प्रतिपत्तव्यम्। ५

यच्च–"द्वितीयादिक्षणसाध्यकार्यस्य प्रथमक्षणे एव उत्पादः स्यात्' इत्याद्युक्तम्[2]; तदप्ययुक्तम्; सामग्रीभेदात्, नहि द्वितीयक्षणादिसामग्री प्रथमक्षणसामग्री भवति। एकस्वभावेन च कार्यकारित्वमसिद्धम्, कारणस्वभावभेदमन्तरेण कार्याणां भेदाऽसम्भवात्[3]। न चैवं प्रतिस्वभावं तद्वतो भेदप्रसङ्गात् क्षणिकत्वं स्यादित्यभिधातव्यम्; अनुस्यूतस्य एकस्य[4] अनेकस्वभावात्मकत्वे विरोधाऽसंभवात्। न च विरुद्धधर्माध्यास एव एकस्य अनेकस्वभावात्मकत्वं विरुणद्धि; यतो विरोधः अनुपलम्भसाध्यः, न च एकस्मिन् अनेकात्मकत्वाऽनुपलम्भोऽस्ति चित्रज्ञानस्य एकस्यापि अनेकात्मकत्वोपलम्भात्, सहकारीतरभावेन च एकस्यापि रूपादिक्षणस्य अनेकस्वभावत्वविभावनात्। नहि "रूपं येनैव स्वभावेन रूपक्षणं जनयति तेनैव रसक्षणम्, तस्याऽपि रूपत्वप्रसङ्गात् रूपस्य वा रसत्वाऽनुषङ्गात्। स्वभावान्तरेण तज्जनने सिद्धं विरुद्धधर्माध्यासेऽपि एकस्यानेकस्वभावात्मकत्वम्। अपेक्ष्यमाणभेदादत्र तदविरोधे अक्षणिकस्यापि अत एव सोऽस्तु। १० १५

युगपच्च एकस्य अनेकस्वभावात्मकत्वाऽविरोधे क्रमेणाऽपि तदविरोधोऽस्तु अविच्छिन्नप्रतीतेरविशेषात्। तथा चायं हेतुः कालात्ययापदिष्टः क्षणिकपक्षस्य प्रत्यक्षबाधितत्वात् 'अश्राव्यः शब्दः' इति पक्षवत्। अनिमेषलोचनो हि अर्थानामक्षणिकत्वमेव प्रतिपद्यते। न च अनेनाऽपि क्षण एव अनुभूयते, पूर्वाऽपरक्षणविवेकाऽभावतः तत्र अक्षणिकत्वप्रतीतिः इत्यभिधातव्यम्; तस्य अनुभवविच्छेदाऽनुपलक्षणात्, अनेकक्षणस्थायी हि तस्य अर्थाध्यवसायोऽविच्छिन्नरूपोऽनुभूयते। न खलु 'ज्ञानेन एकक्षणस्थायिनैव भवितव्यम्' इति नियमोऽस्ति, स हि तथाप्रतीतेर्नान्यतो भवितुमर्हति, सा च अनेकक्षणस्थायित्वेऽपि समाना। न च भिन्नकालसम्बन्धितया तत्र तावद्धा भेदसंभवात् स्थायित्वाऽनुपपत्तिः इत्यभिधातव्यम्; एकानुभवसम्बन्धिनो यावदनुभवानुवृत्तेः कालस्य एकत्वात्। २० २५

तथा प्रत्यभिज्ञानेनाऽपि क्षणिकपक्षबाधा स्फुटतरैव अनुभूयते; 'स एवाऽयम्' इत्याकारेण

---

१ द्वितीयक्षण–ब०, ज०, श्र०। २ पृ० ३७५ पं० १३। ३ "नहि कारणशक्तिभेदमन्तरेण कार्यनानात्वं युक्तं रूपादिज्ञानवत्।" अष्टश०, अष्टसह० पृ० १८३। ४–स्याप्येनेक–श्र०। ५ "अपि च येन रूपेण रूपस्य रूपं प्रत्युपादानकारणता तेनैव यदि रसं प्रति सहकारिकारणता तदा पुनरपि रूपरसयोरविशेषः। अथ अन्येन रूपेण रूपोपादानता अन्येन च रससहकारितेति तर्हि स्वभावभेदाज्ञानात्वम्...।" न्यायमं० पृ० ४५५। ६ "अपि च प्रत्यभिज्ञा...सर्वतो जाज्वलीति कस्तस्यां सत्यां क्षणभङ्गिनो भावानभिदध्यात्...।" न्यायमं० पृ० ४५८। "सर्वं चेदं क्षणभङ्गसाधनं कालात्ययापदिष्टं प्रत्यभिज्ञाप्रत्यक्षेण प्रतीतस्य पुनः प्रतीतेः।" प्रश० कन्द० पृ० ८०।

प्रवर्त्तमानस्याऽस्य अतीतवर्त्तमानकालपरिगतत्वेन अर्थाऽवभासकत्वात्। ननु च अतीतदेशकालयोरतीन्द्रियत्वेन इन्द्रियसम्बन्धाऽभावात् कथं तद्विशिष्टत्वम् अतोऽर्थस्य प्रतीयेत ? इत्यप्ययुक्तम्; प्रत्यभिज्ञानस्य इन्द्रियजत्वाऽसंभवात् स्मृतिप्रत्यक्षप्रभवत्वात्तस्य, अतः अतीतग्रहणसमर्थस्य अत्र स्मरणस्य विद्यमानत्वात् युक्तमेव अतीतविषयतया 'सः' इति ग्रहणम्, वर्त्तमानग्रहणसमर्थकस्य प्रत्यक्षस्य सद्भावाच्च 'अयम्' इति वर्त्तमानतया, अतः अतीतत्वेऽपि देशकालयोः तत्सम्बन्धिनो देवदत्तस्य इदानीन्तनदेशकालसम्बन्धितया ग्रहणमविरुद्धम्। प्राचीनसाम्प्रतिककालविशिष्टतया भेदोऽपि न सर्वथा देवदत्तस्वरूपभेदकः; 'य एव मया पूर्वं प्रतिपन्नो देवदत्तः स एव इदानीं प्रतीयते' इति तत्स्वरूपैकत्वप्रतीतेः।

किञ्च, अभिज्ञाक्षणात् प्रत्यभिज्ञाक्षणं यावत् अर्थस्यास्थायित्वे प्रत्यभिज्ञानस्याप्रवृत्तिरेव स्यात्, नहि नीलाभावे नीलज्ञानस्य प्रवृत्तिरस्ति, प्रवर्त्तते चेदम्, अतः अर्थानां स्थायित्वसिद्धिः, अन्यथा नीलज्ञानात् नीलादेरपि सिद्धिर्न स्यात्, प्रामाण्यञ्चास्य अग्रे प्रसाधयिष्यते। यदि च कालव्यापित्वं देशव्यापित्वञ्च अर्थस्य न प्रतीयते किमेतावता तस्याभावः ? सर्वदर्शिनो हि दर्शननिवृत्तिः भावाऽभावं प्रसाधयति न अवाग्दृशः अतिप्रसङ्गात्। अर्थो हि स्वात्मना भवन् न ज्ञानेन अन्यथाकर्त्तुं पार्यते, नहि ज्ञानानामर्थान्यथात्वकरणे तथात्वकरणे वा सामर्थ्यम्, तत्स्वरूपप्रकाशनमात्रे तेषां व्यापारात्। नियतसामग्रीतः समुत्पद्यमानानि हि ज्ञानानि यदि अर्थं सर्वात्मना परिच्छेत्तुमसमर्थानि तदा तेषामेव अयमपराधः नाऽर्थस्य, न खलु प्रदीपो रसं न प्रकाशयति इति रसस्य अपराधः अभावो वा।

यदि च अर्थक्रियातः अर्थानां सत्त्वं स्यात् तदा अर्थक्रियायाः कथं सत्त्वं स्यात्—अर्थक्रियान्तरात्, स्वतो वा ? अर्थक्रियान्तराच्चेत्; अनवस्था। स्वतश्चेत्; अर्थानामपि स्वत एव तदस्तु किं ततस्तत्कल्पनया ? किञ्च, अर्थक्रियाकारित्वमेव सत्त्वम्, अर्थक्रियाकारित्वेन वा ? प्रथमपक्षे भेदाऽभावात् *"यदेवार्थक्रियाकारि तदेव परमार्थसत्।"* [ ] इति सत्त्व-अर्थक्रियाकारित्वयोः लक्ष्यलक्षणभावो न स्यात्, भेदे सत्येव अस्य संभवात्। अथ अर्थक्रियाकारित्वेन सत्त्वम् 'यो हि तां करोति तस्य सत्त्वम्' इति; तर्हि 'अन्यद् अर्थक्रियाकारित्वम्, अन्यत् सत्त्वम्' इत्यायातम्, तथा च 'सत्त्वं हि अर्थक्रियाकारित्वम्' इत्युक्तं विरुद्ध्यते।

---

१ वर्त्तमानस्या—आ०। २—समर्थकस्य ब०, ज०, आ०। ३—ग्रहणार्पकस्य श्र०। ४ "...बुद्ध्यसञ्चरदोषतः ॥५६॥" आप्तमी० अष्टसह० पृ० २०२। ५ "अर्थक्रियायाश्च अपरार्थक्रिया यदि सत्त्वव्यवस्थापिका...।" प्रमेयक० पृ० १४८ उ०। सन्मति० टी० पृ० ४०२। ६ "तदेव परमार्थसत्। अर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः।" न्यायवि० १।१४, १५। प्रमाणवा० ३।३। तत्त्वसं० पं० पृ० १४४। "अन्यत्संवृतिसत् प्रोक्ते ते सामान्यस्वलक्षणे।" इत्युत्तरार्द्धम्, अष्टसह० पृ० १२१। अभि० आलोक पृ० ५४७। ७ सत्त्वे यो हि ताःक—ब०, ज०।

साध्यविकलश्च दृष्टान्तः; घटादीनां क्षणमात्रस्थायित्वाऽप्रसिद्धेः। माभूद् दृष्टान्तः किं तेन साध्यम्, हेतोर्विपक्षे बाधकप्रमाणाद् गमकत्वोपपत्तेः ? नन्नु बाधकं प्रमाणं किं विपक्षाऽभावमवबोधयति, हेतोस्ततो व्यतिरेकम्, प्रतिबन्धं वा प्रसाधयति ? प्रथमपक्षे 'असन्तः अक्षणिकाः पदार्थाः क्रमयौगपद्याभ्यामर्थक्रियाकारित्वरहितत्वात् खपुष्पवत्' इत्यत्र बाधकाऽनुमाने हेतोः आश्रयासिद्धत्वम्। विकल्पारूढस्य आश्रयत्वे न कश्चिद्धेतुः आश्रयाऽसिद्धः स्यात् ५
सर्वत्र तथा तत्सिद्धिसंभवात्। नापि विपक्षाद् व्यतिरेकस्तेन प्रसाधयितुं शक्यः; अप्रतिपन्ने धर्मिणि तदाश्रयव्यतिरेकस्य गृहीतुमशक्यत्वात्। यदि च व्यतिरेकः कदाचित् कुतश्चित् प्रमाणात् प्रतिपन्नः स्यात्, तदा तदविनाभाविलिङ्गदर्शनात् असौ प्रसाधयितुं युक्तः अग्निधूमवत्, न च तत्प्रतिपत्तिः कुतश्चिदस्ति। सा हि प्रत्यक्षतः, अनुमानतो वा स्यात् ? न तावत् प्रत्यक्षतः; व्यतिरेकस्य व्यावृत्तिरूपतया अवस्तुत्वेन तदहेतुत्वतः तदगोचरत्वात्। तद्गोचरत्वे वा १०
तद्धेतुत्वेन वस्तुत्वापत्तौ अर्थक्रियाकारित्वलक्षणसत्त्वस्य तत्र अक्षणिकेऽपि गतत्वात् अनैकान्तिकत्वम्। न खलु व्यावृत्तेः भवताऽपि क्षणिकत्वम् इष्टम्, स्वलक्षणस्यैव तत्प्रतिज्ञानात्। अनुमानतस्तत्प्रतिपत्तावपि एतदेव दूषणम्।

नापि बाधकात् प्रतिबन्धसिद्धिः। सत्त्व-क्षणिकत्वयोः प्रतिबन्धोऽपि व्यतिरेकग्रहणपूर्वक एव, न च अगृहीतेऽपि विपक्षे तद्व्यतिरेको गृहीतुं शक्यते अतिप्रसङ्गात्। गृहीते च प्रति- १५
बन्धः तयोर्दुर्लभः स्यात्। किञ्च, क्षणिकत्वस्य अनुमानगम्यत्वे वस्तुत्वं न स्यात्; अनुमानस्य व्यावृत्तिविषयत्वात्, तस्याश्च अवस्तुत्वात्।

किञ्च, इदं क्षणिकत्वं नीलादन्यत्र अर्थान्तरे वर्त्तते, न वा ? यदि न वर्त्तते; कथं तस्य क्षणिकत्वं ? वर्त्तते चेत्; तद्वत् नीलमनुवर्त्तते, न वा ? नाऽनुवर्त्तते चेत्; कथं नीलादस्याऽभेदः ? अनुवर्त्तते चेत्; तर्हि तदपि नीलमेव स्यात् इति वस्तुव्यवस्थाविलोपः। न च वृक्षशिंशपादावपि अयं दोषः तुल्यः; सांशवस्तुवादिनः केनचिद् रूपेण शिंशपादितो वृक्षादेः अनुवृत्तेर्व्यावृत्तेश्च उपपद्यमानत्वात्। २०

किञ्च, क्षण-लव-मुहूर्त्तादयः कालविशेषाः, न चैते बौद्धैः कालोऽभ्युपगम्यते इति विशेषणस्य असिद्धत्वात् कथं 'क्षणोऽस्यास्ति' इति क्षणिकः अर्थः स्यात् ? परिकल्पितेन च क्षणेन क्षणिकत्वं न वास्तवं स्यात्, क्षणिकत्वस्य च अवास्तवत्वे अक्षणिकत्वमेव वास्तवं स्यात् २५
प्रकारान्तराऽसंभवात्।

किञ्च इदं क्षणिकत्वम्–क्षणस्थायित्वम्, क्षणानन्तरमभावो वा ? यदि क्षणस्थायित्वम्;

---

१ "संज्ञामात्रेण कालस्याभ्युपगमात्, न च संज्ञामात्रं वस्तु विशेषणत्वेन युक्तमिति।" तत्त्वसं० पं० पृ० १४२। २ परिकल्पिते च आ०। ३ स्यात् क्षणानन्तरक्षणिकत्वस्य च वास्तवत्वे भां०। स्यात् क्षणानन्तरक्ष–श्र०।

तद् अक्षणिकेऽप्यस्त्येव, तदपि हि क्षणमास्ते[1], अन्यथा अक्षणिकमेव तन्न स्यात्। अथ क्षणाऽनन्तरमभावः; तदा अशब्दार्थत्वम्, नहि क्षणानन्तरमभावः क्षणशब्दवाच्यः, यतस्तेन[2] तद्वत्ता स्यात्, 'क्षणानन्तरमभावश्च अर्थानां प्रत्यक्षादिविरुद्धः' इत्युक्तम्।

यदप्युक्तम्[3]–'उत्पादिताऽशेषकार्यग्रामस्य' इत्यादि; तत्र उत्पादिते कार्ये तदुत्पादकस्वभावः अस्य व्यावर्त्तते एव, अपरकार्योत्पादस्वभावस्वीकारात्। न चैवमस्य क्षणिकत्वप्रसङ्गः; स्वभावभेदेऽपि तद्वतः अभेदप्रत्यय[4]विषयत्वेन अक्षणिकत्वप्रतिपादनात्। एतेन 'येऽकृत्वा कुर्वन्ति' इत्यादि प्रत्युक्तम्।

यच्च कृतकत्वं क्षणिकत्वे साधनमुक्तम्; तत्रापि पक्षादिदोषः पूर्ववद् द्रष्टव्यः। कृतकत्वञ्च कार्यत्वमुच्यते, क्षणक्षयैकान्ते[5] च कार्यकारणभावस्य सन्ताननिषेधाऽवसरे प्रतिक्षिप्तत्वात् कथं तत् सिद्ध्येत्? अस्तु वा तत्र तद्भावः, तथापि अत्र [6]किमेकस्मात् कारणात् एकं कार्यमुत्पद्यते, किं वा अनेकस्मादेकम्, उतस्वित् एकस्मादनेकम्, आहोस्वित् अनेकस्मादनेकम् इति? तत्र आद्यपक्षोऽनुपपन्नः; एकस्मात् प्रदीपादिकारणात् दशाँननदाह-तैलशोष-अन्धकारापनयनाद्यनेककार्योदयदर्शनात्। द्वितीयपक्षोऽप्ययुक्तः; भवन्मते अनेकावयवनिवहनिर्मित[8]-अवयविस्वरूपैककार्याऽसंभवात्। [9]रूपाऽऽलोकाद्यनेककारणकलापात् ज्ञानादिलक्षणैककार्यं संभवति; इत्यप्यपेशलम्; [10]कारणभेदोपनीतस्वभावनानात्वयोगतः तस्य एकत्वाऽनुपपत्तेः, अर्थेन हि नीलाद्याकारः, समनन्तरप्रत्ययेन स्वसंविद्रूपता, आलोकेन स्पष्टता, चक्षुरादिना रूपादिनियतता ज्ञाने समर्प्यते इति। तदुपनीतविविधविरुद्धर्माध्यासेऽपि अस्य एकत्वे नानाकालयोगेऽपि एकत्वं किन्न स्यात् अविशेषात्? एतेन तृतीयपक्षोऽपि प्रत्युक्तः; अनेकं कार्यं सहकारीतरस्वभावेन एकस्य उत्पादयतः विरुद्धधर्माध्यासेन एकत्वाऽनुपपत्तेः, तदुपपत्तौ[11] वा अनेकक्षणयोगेऽप्यस्य एकत्वमुपपद्यतां विशेषाऽभावात्।

१–स्ते न वा अत्त– श्र०। २ तद्वत् तत् ब०, ज०। ३ पृ० ३७५ पं० २२। ४–प्रत्ययत्वेन आ०। ५ "क्षणक्षयेऽपि नैवास्ति कार्यकारणताञ्जसा। कस्यचित्कचिदत्यन्ताव्यापारादचलात्मवत् ॥ १२४ ॥" तत्त्वार्थश्लो० पृ० ७७। "न च क्षणिकत्वे सति कार्यकारणभावो घटते…।" प्रश० व्यो० पृ० ४०१। ६ "क्षणिकत्वपक्षे किमेकस्मादेकोत्पादः, उत बहुभ्यः एकोत्पत्तिः, अथ एकस्मादनेकनिष्पत्तिः, आहो बहुभ्यः बहुसंभव इति परीक्षणीयम्…।" न्यायमं० पृ० ४५३। सन्मति० टी० पृ० ४००। स्या० रत्ना० पृ० ७६१। अभि० आलोक पृ० ५४८। ७ वर्तिकामुखदाह। ८–यवनिर्मित–ब०, ज०। "नहि अस्माकमिव भवतामनेकावयवनिवहनिर्मितमवयविस्वरूपं कार्यमस्ति।" न्यायमं० पृ० ४५४। ९ "नीलाभासस्य हि चित्तस्य नीलादालम्बनप्रत्ययान्नीलाकारता, समनन्तरप्रत्ययात् पूर्वविज्ञानाद् बोधरूपता, आलोकात् सहकारिप्रत्ययाद्धेतोः स्पष्टतार्थता, चक्षुषोऽधिपतिप्रत्ययाद् रूपग्रहणप्रतिनियमः…।" ब्र० सू० शां० भा०, भाम० २।२।२१। १० "कारणभेदोपनतस्वभावनानात्वयोगादेकत्वमेव तावद् विरुद्धयते…।" न्यायमं० पृ० ४५४। ११ "विरुद्धधर्मयोगेऽपि यदि चैकत्वमिष्यते। अनेकक्षणयोगेऽपि भाव एकोऽभ्युपेयताम् ॥" न्यायमं० पृ० ४५४।

अथ चतुर्थः पक्षः समाश्रीयते–'रूपादिक्षणप्रचयरूपा[1] हि पूर्वा सामग्री सन्तानवृत्त्या प्रवर्त्तमाना स्वरूपामुत्तरोत्तरां सामग्रीमारभते विजातीयकारणाऽनुप्रवेशे तु विरूपाम्' इति; तदप्यसुन्दरम्; यतः समग्रेभ्योऽभिन्ना[2] सामग्री, भिन्ना वा स्यात्? न तावद्भिन्ना; अपसिद्धान्तप्रसङ्गात्। अथ अभिन्ना; तर्हि समग्रा एव सामग्री, तत्र च पूर्वसमुदायेन उत्तरसमुदायारम्भे तदन्तर्गतं समुदायिनम् एकैकम् एकैक[3] एव उत्पादयेत्, सर्वे संभूय वा[4]? तत्र आद्यपक्षोऽसङ्गतः; एकस्माद् एकोत्पत्तेः प्रतिषिद्धत्वात्, अनेकस्माद् अनेकोत्पत्तिप्रतिज्ञाक्षतिप्रसङ्गाच्च। ५

द्वितीयपक्षोऽप्ययुक्तः; यतः एकैकसमुदायिनिष्पत्तौ सर्वसमुदायिनां क्रमेण व्यापारः स्यात्, युगपद्वा? क्रमपक्षे क्षणिकत्वक्षतिः, ये हि तत्र पञ्चषाः[5] समुदायिनः क्षणा वर्त्तन्ते ते एकतमं समुत्पाद्य पुनः अपरमुत्पादयन्ति पुनः अन्यम् इति तावत्कालमवस्थानात् कथं क्षणिकाः? अथ युगपदेव सर्वनिष्पत्तौ सर्वे व्याप्रियन्ते; तर्हि निकुरुम्बरूपं[6] कार्यं निकुरुम्बरूपात् कारणादुत्पन्नम् इति कारणप्रविभागनियमाऽभावात् 'इदं रूपम् एष रसः' इत्येवं रूपादिकार्यप्रविभागो न स्यात्, सर्वं रूपं रसो वा स्यात् एकस्मान्निकुरुम्बविशेषादुत्पन्नत्वात्। अथ निकुरुम्बात् निकुरुम्बस्य उत्पत्तावपि न रूपादीनां स्वरूपसङ्करप्रसङ्गः पूर्वसामग्रीभूतैः रूपादिक्षणैः उपादानसहकारिभावेन उत्तरसामग्रीभूतरूपादिक्षणानामुत्पादनात्। यदि हि रूपक्षणो रूपवत् रसादिक्षणान्तरं प्रति उपादानं स्यात् तदा स्याद् रसस्यापि[7] रूपरूपता इति; तदप्यचारु; उपादान-सहकारिभावस्य उपादानेतरशक्तिभेदे सत्येव उपपत्तेः, तद्भेदश्च निरंशस्वलक्षणे न संभवति इत्युक्तम्। १०

ततः क्षणक्षयैकान्ते कार्यकारणभावाऽनुपपत्तेः असिद्धं[8] तत्र कृतकत्वम्। न च 'कृतकेन स्वसत्ताक्षणानन्तरमेव नष्टव्यम्' इति नियमः, 'कृतकश्च स्यात् कालान्तरे च नश्येत् विरोधाऽभावात्' इति सन्दिग्धाऽनैकान्तिकत्वम्। नाऽनैकान्तिकत्वम्[9], कृतकत्वाऽनित्यत्वयोः तादात्म्येन अनित्यत्वाऽव्यभिचारित्वात्तस्य; इत्यप्यसुन्दरम्; अनित्यत्वाऽव्यभिचारित्वेऽपि कालान्तरभावि-अनित्यत्वाऽव्यभिचारित्वं भविष्यति न तु उत्पत्त्यनन्तरभावि-अनित्यत्वाऽव्यभिचारि- १५ २०

१–प्रचयस्वरूपापि आ०, ब०, ज०। २ "अथ केयं सामग्री नाम? न समग्रेभ्यो भिन्ना पृथगनुपलम्भाद्, अव्यतिरेके तु समग्र एव सामग्री।" न्यायमं० पृ० ४५४। ३ एकैकष एव ब०, ज०। "तत्र पूर्वसमुदायेन उत्तरसमुदायारम्भे तदन्तर्गतं समुदायिनम् एकमेव एक उत्पादयेत्; एकं वा संभूयेति···।" न्यायमं० पृ० ४५४। "····एकैकमेकैक एव उत्पादयेत् सर्वे संभूय वा?" स्या० रत्ना० पृ० ७६६। ४ "अथ एकैकफलसमुदायिनिष्पत्तौ सर्वसमुदायिनं व्यापारयेत् क्रमेण, यौगपद्येन वा?" न्यायमं० पृ० ४५४। स्या० रत्ना० पृ० ७६६। ५ पंचैषाः ब०। "ये हि तत्र पंच दश समुदायिनः क्षणं तत्र वर्त्तन्ते···।" न्यायमं० पृ० ४५४। ६ "तर्हि निकुरुम्बरूपादेव कारणादुत्पन्नमिति कारणविवेकनियमाभावाद् रूपरसादिप्रविभागो न स्यात्···।" न्यायमं० पृ० ४५४। स्या० रत्ना० पृ० ७६६। ७–पि रूपता ब०, ज०। ८ न सिद्धं ब०, ज०। ९ 'नानैकान्तिकत्वम्' इति नास्ति आ०, भां०, श्र०।

त्वम्, कृतकत्वस्य अनित्यत्वमात्रेणैव अविनाभावसंभवात्। तथा च 'कृतकत्वाऽनित्यत्वयोस्तादात्म्यसिद्धिः' इत्यादि प्रत्युक्तम्। कुतश्च अनयोस्तादात्म्यप्रतिबन्धसिद्धिः ? न तावत् प्रत्यक्षात्; तस्य अविचारकत्व-सन्निहितार्थविषयत्वतः सार्वत्रिकप्रतिबन्धग्रहणे सामर्थ्याऽसंभवात्। नाप्यनुमानात्; प्रतिबन्धप्रसाधकाऽनुमानस्यैवासंभवात्। विपक्षे बाधकप्रमाणात् तत्सिद्धिश्च प्रागेव कृतोत्तरा।

यच्चाऽन्यदुक्तम्[2]–'कारणसामर्थ्याऽभेदात्' इत्यादि; तदप्युक्तिमात्रम्; यतः कारणानां सामर्थ्याऽभेदैः[3] किं विनश्वरमात्रस्वभावभावजनने, [4]उदयानन्तरास्थानशीलाऽर्थोत्पादनमात्रे वा ? प्रथमपक्षे सिद्धसाधनम्; यः कश्चित् कारणैर्जन्यते तस्य अनित्यतामात्रस्वभावतया इष्टत्वात्। द्वितीयपक्षस्तु अयुक्तः; कारणव्यापाराऽऽसादित-आत्मसत्ताकस्य उदयानन्तरमस्थानशीलत्वाऽप्रतीतेः। विचित्रा हि कारणसामग्री–काचित् उदयानन्तरमेव अयत्नसाध्यविनाशालिङ्गितं विद्युदादिभावम् आविर्भावयति, काचित् पुनः कालान्तरे प्रयत्नसाध्यं[6]-अभावक्रोडीकृतं घटादिरूपम्, अन्या तु प्रचुरतरकाले प्रयत्नसहस्रतोऽपि अस्मदादिभ्योऽनासादितविनाशोपेतं पर्वतादिकम्। विद्युदादेः खलु उदयाऽनन्तरमभावो न प्रतीतितोऽन्यतः सिद्ध्यति, सा च अन्यत्रापि भवन्ती किन्न तत्सद्भावं प्रसाधयेत् ? न खलु मुद्गरादिव्यापारात् प्राक् कलशादेरभावः प्रतीयते।

यदप्युक्तम्[7]–'अन्ते विनाशोपलम्भात्' इत्यादि; तदप्ययुक्तम्; अन्ते दृष्टधर्मस्य आदावपि अभ्युपगमे अन्ते सन्तानोच्छेदोपलम्भाद् आदावपि तदुच्छेदः स्यात्, अविद्यातृष्णाप्रक्षयस्य च अन्ते दर्शनात् आदावपि तत्सिद्धिप्रसङ्गतः सुगतस्य मार्गाऽभ्यासो व्यर्थः स्यात्। यदि च स्वहेतोः [8]'विनाशस्वभावो भावः समुत्पन्नः तर्हि मुद्गरादिप्रहारनिरपेक्षः तथाऽवभासेत। न हि प्रदीपादिः प्रकाशात्मकतया उत्पन्नः [9]परमपेक्ष्य तद्रूपतया [10]अवभासते। न च मुद्गरादिप्रहाराऽभावे घटादिप्रध्वंसः स्वप्नेऽपि प्रतीयते, अतः कादाचित्कः[11] सन् अन्वयव्यतिरेकाभ्यां मुद्गरादिहेतुक एव असौ व्यवतिष्ठते। नहि कादाचित्को निर्हेतुको युक्तः उत्पादवत्। नापि यो यस्माद्भवति [12]सोऽतद्धेतुकः; प्रतिनियतहेतुफलव्यवस्थाऽभावप्रसङ्गात्। न च विसदृशसन्तानोत्पादने एव तद्व्यापारस्य चरितार्थत्वम् इत्यभिधातव्यम्; घटाविनाशे कपालसन्ततेरपि [13]अनुपपत्तेः। नहि विद्यमाने घटे कपालसन्ततिः उपलभ्यते, अतः तद्विनाशद्वारेणैव सा उत्प-

---

१–न्धप्रसिद्धिः अ०। २ पृ० ३७६ ५० ८। ३–भेदैः ब० ज०। ४ उदयान्तरा–ब०, ज०। ५ कारणे ज–ब०, ज०। ६–ध्यभाव–ज०, ब०। ७ पृ० ३७६ पं० १६। ८ विनाशसद्भावभा–ब०, ज०। ९ परमपक्षा ब०, ज०। १० भासते भां०। ११ "निर्हेतुकत्वस्यापि कतिपय कालावस्थायित्वेन विरोधाऽभावात्। न च निर्हेतुकत्वं युक्तम्; भाव इव अभावेऽपि अन्वयव्यतिरेकाभ्यां हेतोर्व्यापारोपलम्भात्···।" प्रश० व्यो० पृ० ३९९। न्यायमं० पृ० ४५८। १२ स तद्धेतुः अ०। १३ अनुपपत्तिः ब०, ज०।

द्यते इति उभयोः तदन्वयव्यतिरेकानुविधानाविशेषात् विनाशेऽपि तज्जन्यतास्तु । कृतकानां ध्रुवभावित्वाद् विनाशस्य न हेत्वन्तरापेक्षा; इत्यपि कपालसन्तानेन अनैकान्तिकम्, स हि ध्रुवभावी न च मुद्गरादिहेत्वन्तराऽनपेक्षः ।

निर्हेतुकत्वे चास्य किम् आकाशादिवत् सदा सत्त्वमेव स्यात्, बन्ध्यास्तनन्धयादिवत् असत्त्वमेव वा ? प्रथमपक्षे भावाऽभावयोर्युगपदुपलम्भः स्यात्, तयोर्विरोधाऽभावतः सहावस्थानसंभवात् । विरोधे वा भावदर्शनमनवसरमेव प्राप्नोति, तद्विरोधिनोऽभावस्य सदा सत्त्वात् । द्वितीयपक्षे तु घटादेर्नित्यत्वमेव स्यात्, तत्प्रध्वंसस्य अहेतुकत्वेन सदाऽसत्त्वात् । न च भावकारणकत्वमभावस्य उपपद्यते; तत्कारणभेदप्रतीतेः, अन्यदेव हि मुद्गरादिकं घटविनाशे कारणम् अन्यदेव च मृत्पिण्डादिकं तदुत्पादे । भावकारणकत्वे च अभावस्य भावकाले एव अभावोऽपि स्यात्, तथा च प्रागिव भावोपलम्भो दुर्लभः स्यात् । तदा तदभावे वा न भावकारणकोऽसौ स्यात्, नहि एककारणोत्पन्नाऽर्थानां कालक्रमेण उत्पत्तिः प्रतीयते । अथ द्वितीयक्षणमपेक्ष्य अस्य प्रादुर्भावात् न तदैव उत्पत्तिः; कथमेवम् अहेतुकत्वम् अपेक्षस्यैव (अपेक्ष्यस्यैव) हेतुत्वात् ? अहेतुको हि न किञ्चिदपेक्षते ।

अथ भावकारणैः तथाभूतस्वभाव एव उत्पादितोऽसौ येन भावसत्तानन्तरं भवति इति; ननु तत्सत्ता किं क्षणानन्तरध्वंसिनी, रूपान्तरयुक्ता वा ? तत्र आद्यपक्षे प्रत्यक्षादिबाधा; द्वितीयादिक्षणेऽपि भावसत्तायाः प्रत्यक्षादिप्रमाणतः प्रतीयमानत्वात् । द्वितीयपक्षे तु कथमर्थानां क्षणिकता अनेकक्षणस्थायिसत्तानन्तरभाविनाशस्य अक्षणिकत्वे एव उपपत्तेः ? न च अपरं सत्तामात्रं किञ्चिदस्ति, यदनन्तरभावी स स्यात् ।

अहेतुकत्वञ्चास्य [10]अर्थोदयानन्तरभावित्वात्, व्यतिरेकाऽव्यतिरेकविकल्पाभ्यां तज्जन्यत्वाऽसंभवाद्वा ? न तावद् उदयानन्तरभावित्वात्; उक्तदोषाऽनुषङ्गात् । व्यतिरेकाऽव्यतिरेकविकल्पाभ्याञ्च अस्य मुद्गराद्यहेतुता सिद्ध्येत् न तु उत्पादानन्तरभाविता । यदा हि असौ दृश्यते तदैव [11]अहेतुकोऽभ्युपगन्तुं युक्तः, न च मुद्गरादिव्यापारात् प्राक् उपलब्धो घटादीनां विनाशः ।

१–विधाननाशेऽपि तज्जन्यवास्तु ब०, ज० । २–पेक्षेऽपि ब०, ज० । ३–सन्तानैका–ब०, ज० । ४ "विनाशहेतुर्नास्तीति ब्रुवाणः पर्यनुयोक्तव्यः–किमकारणत्वाद् विनाशो नास्ति, उत अकारणत्वान्नित्य इति ?···यद्यकारणत्वान्नित्यो विनाशः; कार्यस्य उत्पादो न प्राप्नोति विनाशेन सहाऽवस्थानमिति च दोषः···अथ असन् विनाशः; एवमपि सर्वनित्यत्वं विनाशाभावात् ।" न्यायवा० ३।२।१४ । पृ० ४१४ । ५–रप्रहारादिकं श्र० । ६ क्षणान्तर–आ०, ब०, ज०, भां० । "असौ एकक्षणसङ्गता वा भवेत् अनेकक्षणपरिगता वा ?" सन्मति० टी० पृ० ३८९ । ७–विनोऽसत्त्वस्य ज० ।–विनोंऽशस्य ब० ।–विनो विनाशस्य श्र० । ८–नन्तरे भा–ज० । ९ "किञ्च उदयानन्तरध्वंसित्वं भावानां भिन्नाभिन्नविकल्पाभ्यामन्येन ध्वंसस्याभावादवसीयते, प्रमाणान्तराद्वा ?" प्रमेयक० पृ० १४५ पू० । "एवं च व्यर्थमेवेह व्यतिरिक्तादिचिन्तनम् । नाश्यमाश्रित्य नाशस्य क्रियते यद्विचक्षणैः ॥ ४२४ ।" शास्त्रवा० । १० अर्थानन्तरं भा–श्र० । ११ अहेतुकोप्युपग–श्र० ।

न च 'तथाऽनुपलभ्यमानोप्यस्ति' इति अभिधातुं युक्तम्; उपलम्भनिबन्धनत्वाद् वस्तुव्यवस्थायाः। प्रतीयमानश्च कालान्तरे हेतुव्यापाराद्[1] विनाशस्य जन्मानभ्युपगम्य अप्रतीयमानमुदयानन्तरमहेतुकत्वमभ्युपगच्छतोऽस्य महती प्रेक्षापूर्वकारिता स्यात्!

कथञ्च उत्पादोऽपि एवमहेतुको न स्यात्? नहि सोऽपि कार्यस्य स्वयमुत्पद्यमानस्य अनुत्पद्यमानस्य वा, तथा ततो भिन्नोऽभिन्नो वा कारणैर्विधातुं पार्यते। यथा च मुद्गरादिभ्यो घटाद्यभावो नोपपद्यते तथा स्वरूपतोऽपि। स हि स्वरूपतो भवन् 'स्वयं नश्वरस्य अनश्वरस्य वा, व्यतिरिक्तोऽव्यतिरिक्तो वा' इत्यादिविकल्पान् नाऽतिक्रामति।

ननु नाऽस्माकं दर्शने भावस्य किञ्चिद् भवति, केवलम् एकक्षणस्थितिधर्मा स्वस्वकारणाज्जातः क्षणानन्तरे 'न भवति' इति व्यपदिश्यते, तदुक्तम्–"*न तस्य किञ्चिद् भवति न भवत्येव केवलम्।*" [प्रमाणवा० १।२८१] इति। नन्वेवं नष्टशब्दस्य कश्चिदर्थोऽस्ति, न वा? नास्ति चेत्; किं तेनोक्तेन? अस्ति चेत्; किं सत्त्वाद् भिन्नः, अभिन्नो वा? भेदपक्षोऽयुक्तः; सम्बन्धाऽभावात् अनभ्युपगमाच्च। यद्यभिन्नः; तदा अस्ति-नास्तिशब्दयोः तत्प्रतीत्योश्च पर्यायता स्यात्। तथा च 'क्षणक्षयिणो भावा निरन्वयविनाशाः, न तस्य किञ्चिद्भवति, न भवत्येव केवलम्' इत्येवंविधवचनविशेषा न सत्त्वाऽतिरेकिणं कमप्यर्थमभिदध्युः इत्येषामुच्चारणवैयर्थ्यम्, सत्त्वे विप्रतिपत्त्यभावात्। तस्माद् भावस्य यथा स्वकारणादवाप्तजन्मनः प्रमाणपरिच्छेद्या सद्रूपता तथा असद्रूपताऽपि।

कीदृशश्च अयं विनाशो निर्हेतुकत्वेन अभिप्रेतः–किं विनशनं विनाशः अभावमात्रं प्रसज्यप्रतिषेधरूपम्, विनश्यतीति वा विनाशः अनवस्थायिभावस्वरूपं पर्युदासप्रतिषेधरूपं वा? न तावत् प्रसज्यप्रतिषेधरूपस्य अस्य अहेतुकत्वम्; तद्रूपाऽभावस्यैव भवताऽनभ्युपगमात्। नापि पर्युदासप्रतिषेधरूपस्य; अनवस्थायिभावस्वरूपस्य अस्य अहेतुकत्वेन कैश्चिदपि अनभ्युप-

---

१–रादिना तस्य जन्मा–भां०, श्रा०। २–तुकत्वमप्युपग–श्र०। ३ "यथा विनाशं प्रत्यनपेक्षं विनश्वरम् तथा स्थितिं प्रत्यनपेक्षं स्थास्नु तद्हेतोरकिञ्चित्करत्वात्, तद् व्यतिरिक्ताऽव्यतिरिक्ताऽकरणाद् इत्यादि सर्वं समानम्।" अष्टसह० पृ० १८५। सिद्धिवि० टी० पृ० १६९ उ०। "उत्पत्तावपि तुल्योऽयं प्रलापः…।" न्यायमं० पृ० ४५८। प्रमेयक० पृ० १४६ पू०। ४ क्षणान्तरे आ०, ब०, ज०, श्र०। ५ उद्धृतश्चैतत्–अष्टश०, अष्टसह० पृ० २००। हेतुबि० टी० पृ० १२०। प्रश० व्यो० पृ० ४००। स्या० रत्ना० पृ० ७८८। ६ "नष्टशब्दस्य कश्चिदर्थोऽस्ति न वा?…" स्या० रत्ना० पृ० ७९०। ७–विधाः वचन–श्र०। ८ "तथा च त्रिलोचनः प्रकीर्णके…किं विनश्यतीति विनाशः अनवस्थायिभावस्वभावः पर्युदासप्रतिषेधरूपः, किं वा विनशनं विनाशः अभावमात्रं प्रसज्यप्रतिषेधरूपम्? नाद्यः कल्पः; अनवस्थायिभावस्वभावस्य अहेतुकत्वेन केनाप्यनभ्युपगतत्वेन असिद्धत्वात्।…" स्या० रत्ना० पृ० ७८८। ९–रूपस्याहेतु–श्र०।

गमात्। ततो विनाशं प्रति अन्याऽनपेक्षत्वम् असिद्धं भावानाम्; मुद्गरादेः तं प्रति तैरपेक्षणात्। 'यो यद्भावं प्रति अन्याऽनपेक्षः' इति च अनैश्वरत्वेऽपि समानम्।

किञ्च, अत्र अन्याऽनपेक्षत्वमात्रं हेतुः, तत्स्वभावत्वे सति अन्याऽनपेक्षत्वं वा ? प्रथमपक्षे यवबीजादिभिः अनेकान्तः, शाल्यङ्कुरोत्पादनसामग्रीसन्निधानावस्थायां तदुत्पादने अन्याऽनपेक्षाणामपि एषां तत्स्वभावनियतत्वाऽभावात्। द्वितीयपक्षे तु विशेष्याऽसिद्धो हेतुः; तत्स्वभावत्वे सत्यपि अर्थानां विनाशं प्रति अन्याऽनपेक्षत्वाऽभावप्रतिपादनात्। भागे विशेषणाऽसिद्धश्च तत्स्वभावत्वे सति अन्यानपेक्षत्वम्; द्रव्यादीनां विनाशस्वभावाऽभावात्। दृष्टान्तश्च साधनविकलः; अन्त्यकारणसामग्र्याः स्वकार्योत्पादने द्वितीयक्षणाऽपेक्षया अनपेक्षत्वाऽसंभवात्, न हि अन्त्या कारणसामग्री स्वकार्योत्पादनस्वभावाऽपि द्वितीयक्षणाऽनपेक्षा तदुत्पादयति प्रतीतिविरोधात्।

यदपि 'शत-सहस्रक्षणस्थायि' इत्युक्तम्; तदप्ययुक्तम्; यतः स्वकारणकलापतः प्रथमक्षणादन्त्यक्षणं यावत् शतसहस्रक्षणस्थायी जातोऽर्थः द्वितीयादिक्षणेऽपि तत्स्वभावं न परित्यजति अन्त्यक्षणं यावत्।

यदप्यभिहितम्–'यद् यथाऽवभासते' इत्यादि; तदप्यभिधानमात्रम्; हेतोरसिद्धेः, नहि नीलमवभासमानं क्षणिकत्वेन अवभासते, अन्यथा नीलवत् 'क्षणिकोऽयम्' इत्यपि उल्लेखः स्यात्। 'यदेव विकल्पेन परामृश्यते तदेव अध्यक्षगोचरः' इत्यभ्युपगमात्। न च नीलावभास एव क्षणिकाऽवभासः; प्रत्ययवैलक्षण्यात्। तद्वैलक्षण्येऽपि अस्य क्षणिकत्वाऽवभासस्वभावत्वे अक्षणिकत्वाऽवभासस्वभावत्वमपि अस्तु विशेषाऽभावात्, न हि अन्याकारम् अन्यपरिच्छेदे समर्थम् अतिप्रसङ्गात्। न च वर्त्तमानताग्रहणमेव क्षणिकताग्रहणम्; अनिमेषलोचनस्य अक्षणिकतायामपि वर्त्तमानताग्रहणस्य प्रतिपादनात्।

तदेवं क्षणिकत्वस्य विचार्यमाणस्य अनुपपत्तेः 'प्रतिक्षणं विशरारवो रूपरसगन्धस्पर्शशब्दपरमाणवः ज्ञानञ्च' इति सौत्रान्तिकमतमपास्तम्, 'ज्ञानमात्रमेव क्षणस्थितिधर्मकं तत्त्वम्' इति योगाचार-माध्यमिकमतञ्च; बहिरर्थसिद्ध्या आत्मादितत्त्वान्तरसिद्ध्या च प्रत्येकतः तन्मतनिराकरणं प्रागेव विशेषतो विहितमिति नेह पुनरभिधीयते। वैभाषिकमतं तु क्षणभङ्गनिराकरणात् निराकृतमपि तन्मतप्रक्रियां प्रदर्श्य विशेषतो निराक्रियते। तथाहि—

---

१ "परिणामस्वभावः स्याद्भावः तत्रानपेक्षणात्। अयमर्थक्रियाहेतुः अन्तरेण निरन्वयम्॥" न्यायविनि० २।१३२। पृ० ४९१ उ०। २–पेक्षित्व–ब०, ज०। "किंच अन्यानपेक्षत्वमात्रं हेतुः, तत्स्वभावत्वे सति···" प्रमेयक० पृ० १४५ पू०। ३ इत्याद्युक्तम् श्र०। पृ० ३७६ पं० १८। ४ पृ० ३७८ पं० १७। ५ अक्षणिकाव–ब०, ज०।

विभाषाम् सद्धर्मप्रतिपादकग्रन्थविशेषं ये अधीयते ते वैभाषिकाः, ते च प्रतीत्यसमुत्पादम् अङ्गीकृत्य विश्ववैचित्र्यमाचक्षते; तथाहि–प्रतीत्य अन्योन्यं हेतूकृत्य तां तां सामग्रीमाश्रित्य हेतुप्रत्ययभावेन यस्मिन् संघातेभ्यः संघाताः प्रभवन्ति प्रधान-ईश्वरादिकारकनिरपेक्षाः सः प्रतीत्यसमुत्पादः। तस्य च द्वादश अङ्गानि हेतुफलभावेन व्यवस्थितानि; तथाहि–अविद्याप्रत्ययः संस्कारः, संस्कारप्रत्ययं विज्ञानम्, विज्ञानप्रत्ययं नामरूपम्, नामरूपप्रत्ययं षडायतनम्, षडायतनप्रत्ययः स्पर्शः, स्पर्शप्रत्यया वेदना, वेद-

द्वादशाङ्गं प्रतीत्यसमुत्पादमङ्गीकृत्य विश्ववैचित्र्यमभिदधतां वैभाषिकाणां पूर्वपक्षः—

---

१ "विभाषया दीव्यन्ति चरन्ति वा वैभाषिकाः, विभाषां वा विदन्ति वैभाषिकाः।" स्फुटार्थ० पृ० १२। २ "हेतून् प्रत्ययान् प्रतीत्य समाश्रित्य यः स्कन्धादीनामुत्पादः स प्रतीत्यसमुत्पादः।" तत्त्वसं० पं० पृ० १५। "तत्र प्रतीत्यसमुत्पादः शालिस्तम्बसूत्रेऽभिहितः। तत्र आध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः कतमः यदिदम्–अविद्याप्रत्ययाः संस्काराः यावज्जातिप्रत्ययं जरामरणमिति···।" शिक्षासमुच्चय पृ० २१९। "तद्यथोक्तमार्यशालिस्तम्बसूत्रे–एवमुक्ते मैत्रेयो बोधिसत्त्वो महासत्त्व आयुष्मन्तं शारिपुत्रमेतदवोचत्। यदुक्तं भगवता धर्मस्वामिना सर्वज्ञेन। यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति। यो धर्मं पश्यति स बुद्धं पश्यति। तत्र कतमः प्रतीत्यसमुत्पादो नाम। यदिदमविद्याप्रत्ययाः संस्काराः, संस्कारप्रत्ययं विज्ञानम्, विज्ञानप्रत्ययं नामरूपम्, नामरूपप्रत्ययं षडायतनम्, षडायतनप्रत्ययः स्पर्शः, स्पर्शप्रत्यया वेदना, वेदनाप्रत्यया तृष्णा, तृष्णाप्रत्ययमुपादानम्, उपादानप्रत्ययो भवः, भवप्रत्यया जातिः, जातिप्रत्ययाः जरामरणशोकपरिदेवदुःखदौर्मनस्यादयः।·····तत्राविद्या कतमा–एतेषामेव षण्णां धातूनां यैकसंज्ञा पिण्डसंज्ञा नित्यसंज्ञा ध्रुवसंज्ञा शाश्वतसंज्ञा सुखसंज्ञा आत्मसंज्ञा सत्त्वसंज्ञा जीवसंज्ञा जन्तुसंज्ञा मनुजसंज्ञा मानवसंज्ञा अहङ्काराममकारसंज्ञा एवमादिविविधमज्ञानमियमुच्यते अविद्या। एवमविद्यायां सत्यां विषयेषु रागद्वेषमोहाः प्रवर्त्तन्ते, तत्र ये रागद्वेषमोहा विषयेषु अमी अविद्याप्रत्ययाः संस्कारा इत्युच्यन्ते। वस्तु प्रतिविज्ञप्तिर्विज्ञानम्। चत्वारि महाभूतानि च उपादानानि रूपम् ऐकध्यरूपम्, विज्ञानसंभूताश्चत्वारोऽरूपिणः स्कन्धा नाम, तच्चामरूपम्। नामरूपसन्निश्रितानि इन्द्रियाणि षडायतनम्। त्रयाणां धर्माणां सन्निपातः स्पर्शः। स्पर्शानुभवो वेदना। वेदनाध्यवसानं तृष्णा। तृष्णावैपुल्यमुपादानम्। उपादाननिर्जातं पुनर्भवजनकं कर्म भवः। भवहेतुकः स्कन्धप्रादुर्भावो जातिः। जात्यभिनिर्वृत्तानां स्कन्धानां परिपाको जरा। स्कन्धविनाशो मरणमिति।" बोधिचर्या० पं० पृ० ३८६। शिक्षासमु० पृ० २२२। माध्यमिकका० पृ० ५६४। मध्यान्तवि० सू० टी० पृ० ४२। "पुनरपरं तत्त्वेऽप्रतिपत्तिं मिथ्याप्रतिपत्तिः अज्ञानम् अविद्या। एवम् अविद्यायां सत्यां त्रिविधाः संस्कारा अभिनिर्वर्तन्ते–पुण्योपगा अपुण्योपगा आनेञ्ज्योपगाश्च इम उच्यन्ते अविद्याप्रत्ययाः संस्कारा इति। तत्र पुण्योपगानां संस्काराणां पुण्योपगमे च विज्ञानं भवति, अपुण्योपगानां संस्काराणाम् अपुण्योपगमे च विज्ञानं भवति, आनेञ्ज्योपगानां संस्काराणाम् आनेञ्ज्योपगमे च विज्ञानं भवति। इदमुच्यते संस्कारप्रत्ययं विज्ञानमिति। एवं नामरूपम्। नामरूपविवृद्ध्या षडभिः आयतनद्वारैः कृत्यक्रिया प्रवर्त्तते, तत् नामरूपप्रत्ययं षडायतनमुच्यते···।" शिक्षासमु० पृ० २२३। पूर्वपक्षरूपेण तु–ब्रह्मसू० शां०

नाप्रत्यया तृष्णा, तृष्णाप्रत्ययम् उपादानम्, उपादानप्रत्ययो भवः, भवप्रत्यया जातिः, जातिप्रत्ययं जरामरणमिति । तत्र क्षणिक-निरात्मक-अशुचि-दुःखरूपेषु भावेषु तद्विपरीतज्ञानम् अविद्या । संस्काराः पुण्य-अपुण्य-अनुभयप्रकाराः शुभ-अशुभ-मिश्राचरणहेतवः अनेकप्रकारा रागादयः । वस्तुप्रतिज्ञप्तिः विज्ञानम् , तच्च षट् प्रकारम्–पञ्चेन्द्रियविज्ञान-स्मृतिविकल्पभेदात् ।

रूप-वेदना-संज्ञा-संस्कारलक्षणस्कन्धचतुष्टयं नामरूपम् । तत्र रूपस्कन्धः–'पञ्चेन्द्रियाणि, पञ्च तदर्थाः, अविज्ञप्तिश्च' इत्येकादशधा । तत्र अविज्ञप्तिः प्राणिनां शरीरोपादानभूता शुभ-अशुभ-अनुभयाचरणाज्जाता कञ्चुकप्रख्या, सा च अयोगिनामप्रत्यक्षत्वाद् 'अविज्ञप्तिः' इति अन्वर्थेन उच्यते । तदर्थाः पृथिव्यादिभूतानि 'भवन्ति भावयन्ति च अनुग्रह-उपतापरूपतया' इति भूतानि । आकाशं च छिद्रम्, तच्च आलोक-तमःपरमाणुभ्यो नाऽन्यत् इति न पृथक् परिगण्यते । तानि च 'पृथिवीधातुः' इत्यादि संज्ञान्तरमपि प्रतिपद्यन्ते, उत्पत्तिस्थानत्वात् ताम्रादिधातुवत् । सुख-दुःख-असुखदुःखानुभवो वेदना त्रिप्रकारा । पदार्थानां निमित्तोद्ग्रहणं संज्ञा विमर्शः, यथा 'रूपणात् रूपम्, धारणात् धातवः, अर्थक्रियायां घटनात् घटः' इत्यादिरनेकप्रकारा । संस्कारोऽपि रागादिभेदाद् अनेकधा । विज्ञानं तु नामरूपशब्दवाच्यमपि स्कन्धशब्देन उच्यते, राशीभूतत्वस्य पञ्चानामप्यविशेषात्; तथाहि–रूपम् एकादशात्मको राशिः, वेदना त्र्यात्मकः, संज्ञा संस्कारश्च अनेकात्मकः, विज्ञानं षडात्मकः इति ।

एते एवं च दुःखशब्दवाच्याः । साश्रवास्ते एव कारणभूताः समुदयः, आश्रवति संसारो येभ्यः ते आश्रवाः अविद्यारागादयः तैः सह वर्त्तन्ते इति साश्रवाः । निराश्रवास्ते एव मार्गः ।

भा० भामती २।२।१९ । तत्त्वार्थराजवा० पृ० ९ । अष्टसह० पृ० ३६४ । "सः प्रतीत्यसमुत्पादो द्वादशांगः त्रिकाण्डकः । पूर्वाऽपरान्तयार्द्वे द्वे मध्येऽष्टौ परिपूरणाः ॥ २० ॥ पूर्वक्लेशदशाऽविद्या संस्काराः पूर्वकर्मणः । सन्धिस्कन्धास्तु विज्ञानं नामरूपमतः परम् ॥ २१ ॥ प्राक् षडायतनोत्पादात् तत्पूर्वं त्रिकसंगमात् । स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः ॥ २२ ॥ वित्तिः प्राङ्मैथुनात् तृष्णा भोगमैथुनरागिणः । उपादानं तु भोगानां प्राप्तये परिधावतः ॥२३॥ स भविष्यद्भवफलं कुरुते कर्म तद्भवः । प्रतिसन्धिः पुनर्जातिः जरामरणमाविदः ॥ २४ ॥ क्लेशः त्रीणि द्वयं कर्म सप्तवस्तु फलं तथा । फलहेत्वभिसङ्क्षेपो द्वयोर्मध्यानुमानतः ॥ २६ ॥ अविद्या-तृष्णा-उपादानानि त्रीणि क्लेशः, संस्कार-भवौ कर्म, विज्ञाननामरूपषडायतनस्पर्शवेदनाजातिजरामरणानि वस्तूभूतान्येव अंगानि फलभूतान्यपि···आदिमयोः अविद्यासंस्कारयोः हेतुसंज्ञा, अन्त्ययोः जातिजरामरणयोः फलसंज्ञा च···॥ २६ ॥ हेतुरत्र समुत्पादः समुत्पन्नाः फलं मतम् ॥ २८ ॥" अभिधर्मकोश तृतीयकोश ।

१ "विज्ञानं प्रतिविज्ञप्तिः ।" अभिध० १।१६। २ "नाम त्वरूपिणः स्कन्धाः । रूपभिन्नाः चत्वारः स्कन्धाः (वेदनासंज्ञासंस्कारविज्ञानाभिधाः) 'नाम' इति पदेन व्यवहियन्ते ।" अभिध० ३।३० । ३ "रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाऽवज्ञप्तिरेव च । " अभिध० १।९ । ४ "छिद्रमाकाशधात्वाख्यम् आलोकतमसी किल ।" अभिध० १।२८ । ५ "वेदनाऽनुभवः । १।१४ ।" " सुखवेद्यादयस्त्रयः । ३।३१ ॥" अभिध० । ६ "संज्ञा निमित्तोद्ग्रहणात्मका ।" अभिध० १।१४ । ७ " सास्रवाऽनाश्रवा धर्माः संस्कृताः मार्गवर्जिताः । साश्रवा आश्रवास्तेषु यस्मात् समनुशेरते ॥ अनाश्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृताः ।" अभिध० १।४,५ ।

निरोधो द्विप्रकारः प्रतिसंख्यानिरोधः, अप्रतिसंख्यानिरोधश्चेति । तत्र दुःखादीनि आर्यसत्यानि प्रतिसंख्यायन्ते यथावन्निश्चीयन्ते येन प्रज्ञाविशेषेण तेन यः प्राप्यो निरोधः अविद्याद्युच्छेदः सः प्रतिसंख्यानिरोधः । रागादिसमुत्पादे अत्यन्तविघ्नभूतः समाधिसमापत्तिरूपः अप्रतिसंख्यानिरोधः । चक्षुरादीन्द्रियाणि षडायतनानि 'आयं तन्वन्ति' इति आयतनानि 'सर्वस्य आगच्छतः उपायाः' इत्यर्थः । 'चक्षुषा रूपं पश्यामि' इत्यादि विषयेन्द्रियविज्ञानसन्निपातः समूहः स्पर्शः । स्पर्शे सति अनुभवः वेदना । लोभः तृष्णा । तृष्णाया वैपुल्यम् उपादानम् । पुनर्भवजनककर्मलक्षणो भवः । अपूर्वस्कन्धप्रादुर्भावो जातिः । जातिस्कन्धपरिपाक-प्रध्वंसलक्षणं जरा-मरणम् इति । इत्थं भ्रमति भवचक्रम् । भवशब्देन चात्र काम-रूप-आरूप्यसंज्ञकाः त्रयो धातवोऽभिधीयन्ते । तत्र कामधातुः नरकादिस्थानः । रूपधातुः ध्यानरूपा । आरूप्यधातुः शुद्धचित्तसन्ततिरूप इति ।

अत्र प्रतिविधीयते । यत्तावदुक्तम्—'प्रतीत्यसमुत्पादम्' इत्यादि; तदसमीचीनम्; यतः प्रतीत्यसमुत्पादे अविद्यादिद्वादशाङ्गानि मुमुक्षूणामुपयोगित्वात् प्रदर्शितानि, किं वा एतावन्त्येव संभवन्तीति ? न तावद् 'इयन्त्येव' इत्यवधारयितुं शक्यम्; जगत्पर्यायवैचित्र्यस्य आनन्त्येन व्याप्तत्वात् । नापि मुमुक्षूणाम् एतावन्त्येव उपयुज्यन्ते;

वैभाषिकोक्तस्य अविद्यादिद्वादशांगस्य प्रतीत्यसमुत्पादस्य विस्तरतः खण्डनम्—

---

१ "प्रतिसंख्यानिरोधो यो विसंयोगः पृथक् पृथक्। उपादानात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया ॥ प्रतिसंख्या हि प्रज्ञा तया हेतुभूतयाऽयं निरोधो भवतीति प्रतिसंख्यानिरोधः । धर्माणामुत्पत्तेरत्यन्तं विरोधी योऽन्यः स्वरूपवियोगः स अप्रतिसंख्यानिरोधः ।" अभिध० १।६ । "विसंयोगः क्षयो धिया ॥" अभिध० २।५७ । "अशुभाद्यालम्बना रागादिप्रतिपक्षभूता प्रज्ञा प्रतिसङ्ख्यानम् । " तत्त्वसं० पं० पृ० ५४७ । २ "आयतनम् आगमनद्वारवत्···" अभिध० व्या० १।२० । ३ "तज्जाः षड् वेदनाः पंच कायिकी चैतसी परा ।" अभिध० ३।३२ । ४ "त्रयो धातवः कामरूपारूप्यावचरभेदेन ।" मध्यान्तवि० टी० पृ० २५ । ५ "नरकप्रेततिर्यंचो मानुषाः षड् दिवौकसः । कामधातुः स नरकद्वीपभेदेन विंशतिः ॥ १ ॥ नरका अष्टौ—संजीव-कालसूत्र-संघात-रौरव-महारौरव-तपन-प्रतपन-अवीचयः । द्वीपाः चत्वारः—जम्बूद्वीप-पूर्वविदेह—अवरगोदानीय-उत्तरकुरवः । षड् देवलोकाः—चातुर्महाराजिक-त्रयस्त्रिंश-याम-तुषित-निर्माणरति-परनिर्मितवशवर्तिनः इति देवाः । इत्थं नरकद्वीपभेदसंग्रहेण ८+४= द्वादश+षड् देवलोकाः=१८ प्रेत तिर्यंच=सर्वे विंशतिसंख्याकाः कामधातुशब्दवाच्याः ।" अभिध० व्या० ३।१ । ६ "ऊर्ध्वं सप्तदशस्थानो रूपधातुः पृथक् पृथक् । ध्यानं त्रिभूमिकं तत्र चतुर्थं त्वष्टभूमिकम् ॥ २ ॥ तत्र पृथक् पृथक् एकैकस्मिन् ध्याने त्रयो लोकाः; तद्यथा—प्रथमध्याने ब्रह्मकायिक-ब्रह्मपुरोहित-महाब्रह्मलोकाः । द्वितीयध्याने परित्ताभ-अप्रमाणाभ-आभास्वरलोकाः । तृतीयध्याने परित्तशुभ-अप्रमाणशुभ-शुभकृत्स्नलोकाः । चतुर्थध्यानं तु अष्टभूमियुक्तम्; तथाहि—अनभ्रक-पुण्यप्रसव-बृहत्फल-पंचशुद्धावासिकाः (अवृह-अतप-सुदृश-सुदर्शन-अकनिष्ठाः) । चतुर्षु ध्यानेषु सप्तदश लोकाः सप्तदश स्थानानि ।" अभिध० व्या० ३।२। ७ "आरूप्यधातुरस्थानः उपपत्त्या चतुर्विधः । निकायं जीवितं चात्र निश्रिता चित्तसन्ततिः ॥ ३ ॥ आरूप्यधातौ तृतीये अन्तिमे च स्थानभेदो नास्ति । सत्ताक्रमेण चत्वारो भेदा वक्तुं शक्याः । ते च आकाशानन्त्यायतन-विज्ञानानन्त्यायतन-आकिंचन्यायतन-नैवसंज्ञानासंज्ञायतनानि इति । अत्र च आरूप्यधातौ चित्तसन्तानो विज्ञानसन्तानः निकाये सभागतायां जीवितेन्द्रिये च निश्रितः आश्रितो भवति यतस्तत्र शरीरादेरभावः ।" अभिध० व्या० ३।३ । ८ पृ० ३९० पं० १ ।

मिथ्याज्ञानलक्षणाऽविद्यावत् विपरीतश्रद्धान-आचरणस्वरूपयोः मिथ्यादर्शन-चारित्रयोरपि संसारहेत्वोः हेयतया सम्यग्ज्ञानादेश्च मोक्षहेतोः उपादेयतया तेषामुपयोगात् । प्रसाधयिष्यते च ज्ञानादित्रयस्यैव असम्यग्रूपस्य संसारहेतुता, सम्यग्रूपस्य च मोक्षहेतुता मोक्षविचारावसरे प्रपञ्चतः । न च अविद्यायामेव तेषामन्तर्भावः इत्यभिधातव्यम्; ततोऽत्यन्तविलक्षणतया तत्र तेषामन्तर्भावासंभवात्, यद् यतोऽत्यन्तविलक्षणं न तत् तत्र अन्तर्भवति यथा जलेऽनलः, अत्यन्तविलक्षणाश्च अविद्यातो मिथ्यादर्शनादय इति । तत्र एषामन्तर्भावे वा परिगणितद्वादशाङ्गोपदेशोऽनुपपन्नः; चतुरार्यसत्येष्वेव अशेषस्य अन्तर्भावात् तदुपदेशस्यैव मुमुक्षूणामुपपत्तेः ।

यच्च अविद्यायाः 'क्षणिक' इत्यादिलक्षणमुक्तम्; तदयुक्तम्; क्षणिकादिज्ञानस्यैव अविद्यारूपत्वात् । अतत्त्वे तत्त्वज्ञानं हि अविद्या, सर्वथा क्षणिकत्वं नैरात्म्यञ्च अर्थस्याऽस्वरूपं प्रमाणाऽनुपपन्नत्वात् सर्वथा नित्यत्ववत् । तदनुपपन्नत्वञ्चास्य सन्तानभङ्गे क्षणभङ्गभङ्गे च प्रदर्शितम् ।

यदपि–'संस्कारा रागादयः' इत्युक्तम्; तदतीवाऽसङ्गतम्; यतो रागादीनां संस्काररूपता लौकिकेतरयोः तद्रूपतया प्रसिद्धत्वाद् अभिधीयते, व्युत्पत्तिमात्रेण वा ? तत्र आद्यपक्षोऽनुपपन्नः; लोके शास्त्रे च वेगादिस्वभावस्यैव संस्कारस्य प्रसिद्धेः । द्वितीयपक्षोऽप्यपेशलः; 'संस्क्रियन्ते इति संस्काराः' इति व्युत्पत्तिमात्रेण रागादिवत् निखिलार्थानां संस्कारत्वप्रसङ्गात्, तथा च अविद्यात एव अखिलार्थानां तद्रूपतया उत्पत्तिप्रसङ्गात् प्रदर्शिततत्कारणभेदप्रक्रिया विशीर्येत । पुण्यादिप्रकारता चैषामतीव दुर्घटा; नहि रागादीनां पुण्यादिव्यपदेशो लोके शास्त्रे वा क्वचित् प्रसिद्धः, सुखादिसाधनस्य धर्मादेरेव तत्र तत्प्रसिद्धेः । तत्कार्यत्वात् तेषामपि तद्व्यपदेशः; इत्यप्यसाम्प्रतम्; पुण्यादे रागादिकारणत्वाऽसंभवात्, आचरणविशेषनिबन्धनत्वात्तस्य । परम्परया तन्निबन्धनत्वात् तस्य तद्व्यपदेशे अविद्यादेरपि तद्व्यपदेशप्रसङ्गात् प्रतिनियतव्यवस्थाविलोपः स्यात् ।

यदपि 'संस्कारप्रत्ययं विज्ञानम्' इत्युक्तम्; तदप्यनल्पतमोविलसितम्; रागादीनां विज्ञानप्रतिपक्षभूततया तल्लक्षणसंस्कारेभ्यः प्रादुर्भावाऽसंभवात्, तत्प्रतिपक्षभूतता चैषामन्यैरपि उक्ता–

"अन्धादयं महानन्धो विषयान्धो कृतेक्षणः ।
चक्षुषाऽन्धो न जानाति विषयान्धो न केनचित् ॥" [आत्मानुशा० श्लो० ३५] इति ।

षट्प्रकारता चास्य खपुष्पप्रख्या; भवत्परिकल्पितस्य इन्द्रियप्रभवज्ञानस्य विकल्पज्ञानस्य च सविकल्पकसिद्धौ प्रत्याख्यातत्वात् ।

१–श्रद्धाचरण–ब०, ज० । २ प्रपञ्चेन ब०, ज०, श्र० । ३ दुःखसमुदयनिरोधमार्गलक्षणेषु । ४ पृ० ३९१ पं० २ । ५ अतत्त्वज्ञानं हि आ० । ६ पृ० ९ । ७ पृ० ३९१ पं० ३ । ८–त्र प्रसि–श्र० । ९ इत्यसा–श्र० । १०–शत्वप्रस–श्र० । ११ पृ० ३९० पं० ६ ।

यदपि–'विज्ञानप्रत्ययं नामरूपम्' इत्युक्तम्[1]; तदपि महाद्भुतम्; रूपादिस्कन्धचतुष्टय-लक्षणनामरूपस्य विज्ञानप्रभवत्वाऽसंभवात्, विज्ञानस्यैव तत्प्रभवत्वोपपत्तेः। तद्धि[2] अनेन उपादानभावेन जन्यते, सहकारिभावेन वा? न तावद् उपादानभावेन; इन्द्रियतदर्थानाम-त्यन्तविलक्षणतया तदुपादानत्वाऽसंभवात्। यद् यतोऽत्यन्तविलक्षणं न तस्य तद् उपादानम् यथा जलस्य अनलः, अत्यन्तविलक्षणश्च विज्ञानाद् इन्द्रियादिकमिति। नापि सहकारिभा-वेन; इन्द्रियादिभ्यो[3] विज्ञानस्यैव तथोत्पत्तिप्रतीतेः, सर्वैरिष्टत्वाच्च। सर्वेषामपि च अङ्गानां सहकारिभावेन विज्ञानादुत्पत्तिसंभवान्न नामरूपमेव विज्ञानप्रत्ययं स्यात्।

या च अविज्ञप्तिः कञ्चुकप्रख्या प्रतिपादिता[4]; सा किं चिद्रूपा, अचिद्रूपा वा स्यात्? न तावच्चिद्रूपा; अनभ्युपगमात्। अथ अचिद्रूपा; न किञ्चिदनिष्टम्, कार्मणशरीरस्य तथा नामान्तरकरणात्।

यदपि 'नामरूपप्रत्ययं षडायतनम्' इत्यभिहितम्[5]; तदप्यपर्यालोचिताऽभिधानम्; रूप-स्कन्धे एव अस्य अन्तर्भूतत्वेन पृथगभिधाने प्रयोजनाऽभावात्, तत्राऽन्तर्भूतस्याप्यस्य पृथक् प्रतिपादने प्रतिपादयितुः अप्रेक्षापूर्वकारित्वप्रसङ्गः। प्रतिपाद्यानां संक्षेप-विस्तररुचित्वात् तथा तत्प्रतिपादने किं तत्परिगणनेन; तदुचीनामानन्त्यसद्भावात्? 'विषयेन्द्रियविज्ञान-समूहः स्पर्शः' इत्यादि तु ठकभाषामात्रेण स्वप्रक्रियाप्रदर्शनमात्रं न क्वचिद् उपयुज्यते इत्युपेक्षते।

यदपि पृथिव्यादिधातुचतुष्टयं प्रतिपादितम्[6]; तदप्यविवादास्पदमेव; प्रतीतिसिद्धस्य पृथिव्यादेः अनेकप्रकाराऽर्थोत्पत्तिस्थानतया तद्व्यपदेशे विवादाऽभावात्। या तु तदुत्पत्तौ प्रक्रिया–परमाणुः उत्पद्यमानोऽष्टद्रव्यक उत्पद्यते, अष्टौ द्रव्याणि–चत्वारि महाभूतानि, चत्वारि च उपादानरूपाणि[7] रूप-रस-गन्ध-स्पृष्टव्यानि, यथा हि सांख्यस्य एक एव शब्दादिः सत्त्वरजस्तमोमयो जायते, एवम् अस्मन्मते अष्टद्रव्यकः परमाणुः इति; सा अतीवाऽसङ्गता; परमाणूनामेकैकशो रूपादिसंभवेऽपि पृथिव्यादिमहाभूताऽसंभवात्। तानि हि तत्र शक्ति-रूपतया परिकल्प्यन्ते, स्कन्धरूपतया वा? यदि शक्तिरूपतया; तदा अनन्तद्रव्यकोऽपि पर-

---

१ पृ० ३९० पं० ६। २ तद्धि उपा–ब०, ज०। ३ इन्द्रियेभ्यो–आ०, भां०। ४ पृ० ३९१ पं० ७। ५ पृ० ३९० पं० ७। ६ पृ० ३९१ पं० ७। ७ "कामेऽष्टद्रव्यकोऽशब्दः परमाणु-रनिन्द्रियः। कायेन्द्रियो नवद्रव्यः दशद्रव्योऽपरेन्द्रियः ॥२२॥ कामधातौ शब्दायतनरहितः (अश-ब्दः) इन्द्रियप्रवेशाऽनर्हश्च अष्टद्रव्यको भवति। अष्टौ द्रव्याणि चत्वारि महाभूतानि (पृथिव्यप्तेजो-वायवः) चत्वारि भौतिकानि (गन्धरसरूपस्पर्शाः) अशब्दः कायेन्द्रिय-कायायतनप्रवेशार्हः परमाणुः नवद्रव्यकः तत्र नवमं द्रव्यं स्प्रष्टव्यम्। अशब्दोऽकायेन्द्रियः चक्षुराद्यन्यतमेन्द्रियप्रवेशार्हः परमाणुः तदिन्द्रियेण सह दशद्रव्यकः।" अभिध० व्या० २।२२। पूर्वपक्षरूपेण-सर्वार्थसि० पृ० ७७। ८ उपादायरू–आ०। उपादानानि ब०, ज०।

माणुः किन्न स्यात्, तत्र अनन्तद्रव्यारम्भकशक्तीनामपि संभवात् ? अथ स्कन्धरूपतया; तन्न; एकैकशः परमाणूनां स्कन्धपरिणामाऽसंभवात्, तत्समूहसाध्यत्वात्तस्य ।

यच्चान्यदुच्यते–"*सवितर्कविचारा हि पञ्च विज्ञानधातवः ।*" [अभिध० १।३२][3]वितर्को हि चित्तस्य स्थूलो विमर्शः, विचारः सूक्ष्मः । न च इन्द्रियोत्थज्ञानानां वितर्कविचारसम्भवे निर्विकल्पकत्वं विरुद्ध्यते; निरूपण-अनुस्मरण-विकल्परहितत्वेन अविकल्पकत्वात् तेषाम् । तदुक्तम्–"*निरूपणाऽनुस्मरणविकल्पेनाविकल्पकाः ।*" [अभिध० १।३३] निरूप्यते हि अनेन इति निरूपणम् वाचकः शब्दः, अनुस्मरणं विकल्पः ।

सप्तधातवोऽपि षड् विज्ञानानि मनःसहितानि उच्यन्ते । मनश्च विज्ञानात् नाऽन्यत् "*षण्णामनन्तराऽतीतं विज्ञानं यद्धि तन्मनः ।*" [अभिध० १।१७] इत्यभिधानात् । 'एते एव सप्त, रूपस्कन्धधातवश्च एकादश' इति अष्टादश इत्यादि; तदप्यविचारितरमणीयम्; भवत्कल्पितविज्ञानधातूनां सविकल्पकत्वसिद्धौ प्रत्याख्यातत्वात्, रूपस्कन्धस्य च क्षणविशरारोः क्षणभङ्गभङ्गप्रसाधनादेव प्रतिषेधात् । ततो वैभाषिकोपकल्पितद्वादशाङ्गात्मकप्रतीत्यसमुत्पादस्य यथोपवर्णितस्वरूपतया विचार्यमाणस्य अव्यवस्थितेः नाऽस्य जगत्प्रपञ्चरचनालक्षणाऽर्थक्रियाकारित्वं घटते । तदेवं सौगतमतस्य चतुर्विधस्यापि क्षणिकस्वभावस्य विचार्यमाणस्य अनुपपत्तेः न क्षणिकेऽप्यर्थे अर्थक्रिया घटते ।

न च तदभावे भावानां सत्त्वमुपपद्यते इत्युपदर्शयति–**'भावानाम्'** इत्यादि । **भावानाम्**

---

१ तत्र आ०, ब०, ज०, भां० । २ "सवितर्कविचारा हि पञ्च विज्ञानधातवः । निरूपणानुस्मरणविकल्पेनाऽविकल्पकाः ॥" तत्त्वार्थश्लो० पृ० १८७ । 'विकल्पनविकल्पकाः' इति पाठभेदेन, तत्त्वार्थराज० पृ० ३९ । अभिधर्मकोशे तु–"सवितर्कविचारा हि पञ्च विज्ञानधातवः । अन्त्यास्त्रयः त्रिप्रकाराः शेषा उभयवर्जिताः ॥" इति । ३ "वितर्कविचारौदार्यसूक्ष्मते । चित्तस्य औदार्यं (स्थूलावस्था) वितर्कः, सूक्ष्मावस्था विचारः ।" अभिध० व्या० २।३३ । ४ इन्द्रियार्थ–ब०, ज० । ५–ल्पनाः भां०, श्र० । "निरूपणानुस्मरणविकल्पादविकल्पकाः । तौ व्यग्रा मानसी प्रज्ञा सर्वैव मानसी स्मृतिः ॥३३॥ ते निरूपणविकल्पाद् अनुस्मरणविकल्पाच्च अविकल्पकाः सन्ति । मानसी प्रज्ञा या असमाहिता सा एव निरूपणविकल्पः । सर्वा एव मानसी स्मृतिः समाहिता असमाहिता वा अनुस्मरणविकल्पः ।" अभिध० व्या० १।३३ । ६ "मताः ते धातवः सप्त षड्विज्ञानान्यथो मनः ।" अभिध० १।१६ । ७ विद्धि आ० । "षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः । षष्ठाश्रयप्रसिद्ध्यर्थं धातवोऽष्टादश स्मृताः ॥१७॥ चक्षुःश्रोत्रघ्राणजिह्वाकायमनोविज्ञानानां अनन्तरमतीतं पूर्वकालिकं च यद्विज्ञानं तदेव मन इत्युच्यते ।··· चक्षुर्विज्ञानादीनां पञ्चानां सन्ति चक्षुरादयः पञ्च आश्रयाः । षष्ठस्य मनोविज्ञानस्य तु न कोऽप्याश्रयः प्रसिद्धः तदर्थं मनसो ग्रहणम् । अष्टादश धातवः परिगण्यन्ते षट् चक्षुरादीनि इन्द्रियाणि, षट् चक्षुर्विज्ञानादीनि, षट् रूपादयो विषयाः ।" अभिध० व्या० १।१७ । ८–तधातूनां भां०, श्र० ।

परमार्थसताम् अर्थानाम् **सा** अर्थक्रिया **लक्षणतया मता** सौगतस्य, तदभावे तेषां परमार्थसत्त्वमेव न भवेत् इत्यर्थः ।

कारिकायाः सुगमत्वात् व्याख्यानमकृत्वा परोपहसनव्याजेन '**भावानाम्**' इत्यादि समर्थयमानः '**अर्थक्रिया**' इत्याद्याह । **अर्थस्य** स्वज्ञानस्य अन्यस्य वा दोहादेः[1] **क्रिया** निष्पत्तिः तस्याम् **समर्थं** योग्यम् **परमार्थसत्** *"यदेवार्थक्रियाकारि तदेव परमार्थसत् ।"* [ ] इत्यभिधानात् । **अङ्गीकृत्य** उररीकृत्य **स्वपक्षे पुनः** पश्चात् तत्रैव *"अशक्तं सर्वम् ।"* [ ] इति वचनात् **अर्थक्रियां स्वयमेव** आत्मनैव **निराकुर्वन्** सौगतः **कथमनुन्मत्तः** स्यात् पूर्वापरविरुद्धवचनत्वात् मदिराद्युन्मत्तवत् ?

विवृतिविवरणम्—

अत्र अपरः प्राह—न उत्तरकार्योत्पत्तिलक्षणा अर्थक्रिया भावलक्षणम् विरोधात् । नहि अन्यद् अन्यस्य लक्षणं भवति अतिप्रसङ्गात् । तस्मात् संवित्तेः स्वसंविदितायाः आत्मलाभः अर्थक्रिया इत्याह—'**स्व**' इत्यादि । **स्व**शब्देन स्वसंवेदनमद्वयं परामृश्यते तस्य **भूतिः** आत्मलाभः सैव **तन्मात्रम्**—नोत्तरकार्यम्, तदेव **अर्थक्रियां विपक्षेऽपि** पुरुषाद्वैतमतेऽपि **कथं निरस्येत ?** न कथञ्चित् तत्रापि तदविशेषात् । ननु पुरुषाद्वैते नगरग्रामादिभेदव्यवहारः कथम् ? संविदद्वैतेऽपि कथम् ? इति समानम् । तत्र अयं मिथ्या इति चेत्; तदितरत्र समानम् इत्याह—'**मिथ्या**' इत्यादि । **मिथ्या** भ्रान्तो यो नगरग्रामादिव्यवहारः तम् **वा** विपक्षे कथन्निरस्येत ? तन्न नित्य-क्षणिकपक्षयोः काचिंद् अर्थक्रिया इति कुतः साकारम् अन्यद्वा ज्ञानं तत्र प्रमाणं स्यात् ? अस्तु वा तत्तत्र, तथापि दूषणमाह—'**संवित्तेः**' इत्यादि । **संवित्तेः** अर्थाकारज्ञानस्य **अभेदेऽपि** निरंशत्वेऽपि **विषयाकारस्यैव** नीलाद्याकारस्यैव **विषयसाधनत्वं** नीलादिविषयव्यवस्थापकत्वम् **नाऽऽकारान्तरस्य** विषयाद्याकारादन्यः संवेदनाद्याकारः तदन्तरं तस्य न विषयसाधनत्वम् सर्वत्र तदविशेषात् इति भावः । **ततः** तस्माद् विषयाकारस्यैव[3] विषयसाधनत्वात्—

नाऽभेदेऽपि विरुद्ध्येत विक्रिया विक्रियैव वा ।

विवृतिः—परमार्थैकत्वेऽपि मिथ्याव्यवहारभेदात् ज्ञानस्य अनेकार्थक्रियाकारिणः प्रतिभासाः परस्परार्थसंवेदिनः तत्त्वं भेदाऽभेदात्मकं साधयन्ति ।

एवकारो भिन्नप्रक्रमः[4] '**न**' इत्यस्य अनन्तरं द्रष्टव्यः, **वा**शब्दः इवार्थः, ततोऽयमर्थः सम्पन्नः—**अभेदेऽपि** एकत्वेऽपि **नैव विरुद्ध्येत** ।

कारिकाविवरणम्—

काऽसौ ? **विक्रिया** विकारः, पूर्वाकारपरित्यागाऽजहद्वृत्तोत्तराकारगमनम् । केव ? इत्याह **विक्रियेव**, विविधा नाना-

---

१ दोहादेः ब०,ज० । २—चिदप्यर्थक्रिया श्र० । ३ तत्साधनत्वात् भा०,ब०,ज०,श्र० । ४—भिन्नक्रमः आ० ।

प्रकारा क्रिया कार्यकरणं सा इव । 'अविक्रियैव वा' इति क्वचित् पाठः, तत्र अयमर्थः—अविकारोऽपि न विरुद्ध्येत इति ।

'परमार्थैकत्वेऽपि' इत्यादिना 'विक्रियैव वा' इत्येतद्व्याचष्टे, शेषस्य सुगमत्वात् ।

विवृतिविवरणम्—

परमार्थेन एकत्वेऽपि अभिन्नस्वभावत्वेऽपि, कस्य ? **ज्ञानस्य** कथम्भूतस्य ? **अनेकार्थक्रियाकारिणः, अनेकार्थो** नीलादिः तस्य **क्रिया** परिच्छित्तिः **तत्कारिणः**, कुतः ? **मिथ्याव्यवहारभेदात्, मिथ्या** कल्पनाकल्पितो **व्यवहारः** अनीलाद्याकारव्यावृत्त्या नीलाद्याकारसामान्यपरिकल्पनलक्षणः तस्य **भेदात्** नानात्वात् । एतदुक्तं भवति—यदेव ज्ञानम् अनीलव्यावृत्त्या नीलाकारं सत् तत्परिच्छेदकं तदेव अपीतादिव्यावृत्त्या पीताद्याकारं सत् पीतादेः परिच्छेदकम् इति । तस्य के किं कुर्वन्ति ? इत्याह—**प्रतिभासाः** नीलाद्याकाराः **तत्त्वं भेदाऽभेदात्मकं साधयन्ति** । कथम्भूताः ? **परस्परार्थसंवेदिनः** अन्योन्यार्थग्राहिणः । तथाहि—य एव प्रतिभासो नीलं संवेत्ति स एव पीतं रक्तं शुक्लम्, तथा य एव पीतं स एव नीलं रक्तं शुक्लम्, एवम् अन्यत्राऽपि योज्यम् । अन्यथा 'युगपद् अहं नीलादिकं वेद्मि' इति प्रतीतेरनुपपत्तेः, एवमर्थश्च 'अनेकार्थक्रियाकारिणः' इत्युक्तम् । अतः सिद्धो वर्त्तमानाऽर्थग्राही प्रतिभासः अतीताऽनागतार्थग्राही, तद्ग्राही च वर्त्तमानार्थग्राहकः स्वव्यापकज्ञानापेक्षया । तथा च 'यदि वर्त्तमानग्रहणग्राह्यम् अतीतमनागतं च तर्हि तद् वर्त्तमानमेव स्यात् तद्ग्रहणग्राह्यत्वात् प्रसिद्धवर्त्तमानवत्' इति, तन्निरस्तम्; नीलादिग्रहणग्राह्यस्य पीतादेरपि नीलादित्वप्रसङ्गात् । तथाहि—पीतादिकं नीलं नीलग्रहणग्राह्यत्वात् अभिमतनीलवत्, प्रमाणबाधनम् उभयत्र तुल्यम् ।

एवं तावत् सौत्रान्तिकमतम् अनेकान्तनान्तरीयकं प्रदर्श्य साम्प्रतं योगाचारमतं तन्नान्तरीयकं प्रदर्शयन्नाह—

मिथ्येतरात्मकं दृश्याऽदृश्यभेदेतरात्मकम् ॥ ९ ॥
चित्तं सदसदात्मैकं तत्त्वं साधयति स्वतः ।

विवृतिः—चित्रनिर्भासिनः तत्त्वम् अविभागज्ञानस्य दृश्यं यदि क्रमेणाऽपि सदसदात्मकं विवर्त्तेत ततः सिद्धम्—द्रव्यपर्यायात्मकम् उत्पाद-व्यय-ध्रौव्ययुक्तं वस्तु तत्त्वम् अन्तर्बहिश्च प्रमेयम्, एकान्तस्य अनुपलब्धेः तदनेकान्तात्मा अर्थः इति ।

'बहिर्मुखाकारतया हि ज्ञानं मिथ्या, सच्चेतनाद्याकारतया तु सत्यम्' इत्येके । तान् प्रति इदमुत्तरम्—'मिथ्येतरात्मकम्' इति । **मिथ्या** च **इतरः** च **आत्मा** यस्य तत्तथोक्तम् । 'ग्राह्याकाराद् तस्य

कारिकाव्याख्यानम्—

१—कारणं श्र० । २ 'तद्ग्राही' इति नास्ति भा० । ३—गविज्ञानस्य ज० वि० । ४—कारस्य श्र० ।

विवेकः स तु तस्मिन् प्रतिभासमानेऽपि न प्रतिभासते भ्रान्तेः' इत्यपरे। 'ग्राह्यग्राहकसंवेदनात्मकत्वात् भेदाऽभेदात्मकं तत्' इत्यन्ये। तान् प्रति इदमाह–**दृश्यादृश्यभेदेतरात्मकम्**। किं तत्? **चित्तम्** ज्ञानं कर्तृ **एकं तत्त्वं** जीवादि **सदसदात्मकं** भावेतररूपं **साधयति, स्वतः** आत्मना इति।

कारिकां विवृण्वन्नाह–**'चित्रनिर्भासिनः'** इत्यादि। **चित्रः** शबलः मिथ्येतरादिस्वभावाऽपेक्षया यो **निर्भासः** स यस्य अस्ति तस्य **तत्त्वं** स्वरूपम्। कस्य? **अविभागज्ञानस्य दृश्यम्** उपलभ्यं यदि क्रमेणाऽपि न केवलम् अक्रमेण **सदसदात्मकं विवर्त्तेत 'तत्त्वम्'** इति सम्बन्धः। उक्तार्थोपसंहारमाह–**'ततः'** इत्यादि। यत एवं **ततः** तस्मात् **सिद्धं**[२] निश्चितम् **द्रव्यपर्यायात्मकं वस्तुतत्त्वं प्रमेयम्**। पुनरपि किं विशिष्टम्? **उत्पादव्ययध्रौव्ययुक्तम्**। क? **अन्तर्बहिश्च**।

विवृतिविवरणम्—

ननु उत्पाद-व्यय-ध्रौव्ययुक्तत्वेन जीवादिवस्तुनः सत्त्वे प्रत्येकम् उत्पादादेरपि अपरोत्पादादियोगात् सत्त्वेन भवितव्यम्, एवं च अनवस्था। स्वतः तस्य सत्त्वे वस्तुनोऽपि स्वत एव सत्त्वमस्तु अलं तद्योगात् सत्त्वकल्पनया; एतदप्यसमीचीनम्[३]; यतः सकलशून्यताम्, वस्तुनोऽन्यतः सत्त्वं वा अभिप्रेत्य एवं पर्यनुयुंज्येत? तत्र आद्यः पक्षोऽयुक्तः; सकलशून्यतायाः प्रागेव प्रपञ्चतः अपास्तत्वात्। द्वितीयपक्षेऽपि उत्पादादेरन्यतः सत्तासम्बन्धात्, अर्थक्रियातः, तत्कारित्वात्, तत्करणयोग्यतातः, प्रमाणसम्बन्धाद्वा वस्तुनः सत्त्वं स्यात्? तत्र न तावत् सत्तासम्बन्धात्; अव्यापकत्वात् तस्य, सामान्य-विशेष-समवायेषु[४] हि तत्सम्बन्धाऽभावेऽपि सत्त्वं संभवत्येव। न च यदभावेऽपि यद् भवति तत् तद्व्याप्यम् यथा अश्वाऽभावेऽपि भवन् रासभः न तद्व्याप्यः, सत्तासम्बन्धाऽभावेऽपि भवति च सामान्यादिषु सत्त्वमिति।

'सत्तासमवायात् सत्त्वम्' इति निराकरणपुरस्सरं उत्पादादित्रययोगादेव सत्त्वव्यवस्थापनम्—

न च साधनविकलो दृष्टान्तः; तत्सम्बन्धाऽभावेऽपि परैः तत्र सत्त्वस्याऽभ्युपगमात्। न

१–पकम् श्र०। २–द्धमेकं निश्चितम् आ०। ३ इत्यप्यस–ब०, ज०, भां०, श्र०। ४–युज्यते श्र०। "यथोत्पादादयः सन्तः परोत्पादादिभिर्विना। तथा वस्तु न चेत् केन अनवस्थादि निवार्यते ॥२॥ इत्यसत् सर्वथा तेषां वस्तुनः सदसिद्धितः।" तत्त्वार्थश्लो० पृ० ४३४। अष्टसह० पृ० ११२। ५ पृ० १३३। ६–वायानां सत्तासम्बन्धाभावेऽपि भां०, श्र०। "सत्तायोगाद् विना सन्ति यथा सत्तादयस्तथा। सर्वेऽर्थाः देशकालाश्च सामान्यं सकलं मतम् ॥" न्यायविनि० १।१५२। पृ० ३७८ पू०। "सत्तासम्बन्ध इष्टश्चेद् वस्तूनां लक्षणं न तत्। असिद्धेः समवायादेः कथं वाऽन्योऽन्यलक्षणम् ॥४१८॥" तत्त्वसं०।

खलु सत्तासम्बन्धाद् यौगैः सामान्यादौ सत्त्वमिष्टम् *"त्रिषु पदार्थेषु सत्करी सत्ता"* [ ] इति कुतान्तव्याघाताऽनुषङ्गात्। न च तत्सत्त्वात् द्रव्यादिसत्त्वं विलक्षणम् अतः तदेव सत्तासम्बन्धनिबन्धनम् नान्यदित्यभिधातव्यम्; यतः किमिदं तत्सत्त्वस्य वैलक्षण्यं नाम–विलक्षणप्रत्ययग्राह्यत्वम्, अबाधितत्वम्, गौणत्वं वा? तत्र आद्यविकल्पोऽनुपपन्नः; ततः तस्य विलक्षणप्रत्ययग्राह्यतया स्वप्नेऽपि प्रतीत्यभावात्। न खलु यथा गवादिभ्यो महिष्यादेः विलक्षणप्रत्ययग्राह्यतया प्रतिप्राणि प्रतीतिः प्रसिद्धा, तथा द्रव्यादिसत्त्वात् सामान्यादिसत्त्वस्यापि, भवतस्तु तथाप्रतीतिः स्वसिद्धान्ताऽऽग्रहग्रहाऽभिनिवेशनिबन्धना न वस्तुदर्शनबलप्रवृत्ता घटादेः पुरुषाद्यद्वैतरूपताप्रतीतिवत्। द्वितीयविकल्पोऽप्यनुपपन्नः; अबाधितत्वस्य उभयत्राप्यविशेषात्, नहि सामान्यादिसत्त्ववत् द्रव्यादौ सत्त्वं केनचित् प्रमाणेन बाध्यते तस्याऽसत्त्वप्रसङ्गात्। अथ गौणत्वम् सामान्यादिसत्त्वस्य द्रव्यादिसत्त्वाद् वैलक्षण्यम्; ननु गौणत्वमेव अस्य कुतः सिद्धम्? भिन्नविशेषणत्वाऽभावाच्चेत्; नहि यथा द्रव्यादौ सत्तालक्षणभिन्नविशेषणनिमित्तं सत्त्वम् तथा सामान्यादौ। न च अभिन्नविशेषणस्य मुख्यत्वं युक्तम् *"भिन्नविशेषणं मुख्यम् अभिन्नविशेषणं गौणम्।"* [ ] इत्यभिधानात्; इत्यप्यसत्; अन्योन्याश्रयप्रसङ्गात्–सिद्धे हि सामान्यादिसत्त्वस्य सत्तालक्षणभिन्नविशेषणनिबन्धनत्वाऽभावे गौणत्वसिद्धिः, तत्सिद्धौ च तन्निबन्धनत्वाऽभावसिद्धिरिति।

एतेन द्रव्यादौ सत्त्वस्य मुख्यत्वमपि चिन्तितम्; इतरेतराश्रयाऽविशेषात्; तथाहि–सिद्धे द्रव्यादौ सत्त्वस्य मुख्यत्वे सत्तालक्षणभिन्नविशेषणनिबन्धनत्वसिद्धिः, तत्सिद्धौ च तन्मुख्यत्वसिद्धिरिति। न च कश्चिदबालिशः 'स्वरूपनिबन्धनं सत्त्वमुपचरितम्, अर्थान्तरभूतसत्तानिबन्धनं तु मुख्यम्' इति मन्यते। नहि 'यष्टौ यष्टित्वमुपचरितम्, पुरुषे तु मुख्यम्' इति प्रेक्षावान् मन्यते।

किञ्च, सत्ता स्वयं सती अन्यस्य सत्त्वहेतुः स्यात्, असती वा? यदि असती; कथं स्वसम्बन्धेन अन्यस्य सत्त्वहेतुः? यद् असत् न तत् स्वसम्बन्धेन अन्यस्य सत्त्वहेतुः यथा खरविषाणम्, असती च सत्ता इति। अथ सती; किं स्वतः, सत्तान्तरसम्बन्धाद्वा? यदि स्वतः; तर्हि वस्तुनोऽपि स्वत एव सत्त्वमस्तु, किं तत्सम्बन्धात् सत्त्वकल्पनाप्रयासेन? यत् सत् तत् स्वात्मभूतेनैव सत्त्वेन यथा सामान्यविशेषसमवायाः, सन्ति च द्रव्यादीनि इति। अथ सत्तान्तरसम्बन्धात्; तदा अनवस्था। ननु च अनवस्थाया बाधिकायाः सद्भावादेव सामान्यविशेषसमवायेषु स्वतः सत्त्वमिष्यते द्रव्यादौ तु परतः तत्र तदभावात्, न खलु द्रव्यादौ परतः सत्त्वे अनवस्था अवतरति–सत्तातो हि द्रव्यादीनां सत्त्वं सत्तायास्तु स्वतः इति; तद-

---

१ "सदिति यतो द्रव्यगुणकर्मसु सा सत्ता।" वैशेसू० १।२।७। २–न्नः तस्य श्र०। ३ प्रतिपत्तिः ब०, ज०। ४–षाद्वैत–ब०, ज०। ५ सत्ताविशे–ब०, ज०। ६ इत्यसत् आ०, ब०, ज०।

प्यविचारितरमणीयम्; द्रव्यादीनामपि परतः सत्त्वे 'यत् सत् तत्स्वात्मभूतेनैव सत्त्वेन' इत्याद्यनुमानबाधस्य प्रतिपादितत्वात्।

अतिप्रसङ्ग-वैयर्थ्यलक्षणबाधप्रसक्तेश्च; तथाहि–स्वरूपेण सतः सत्तासम्बन्धात् सत्त्वं स्यात्, असतो वा ? न तावद् असतः; अतिप्रसङ्गात्, 'यत् स्वरूपेण असत् न तत्र सत्तासम्बन्धः तत्सम्बन्धात् सत्त्वं वा यथा गगनेन्दीवरे, स्वरूपेण असच्च परैरिष्टं द्रव्यादि' इत्यनुमानबाधप्रसङ्गाच्च। अथ स्वरूपेण सतः; तर्हि सत्तासम्बन्धवैयर्थ्यम्, यत् स्वयं सत् न तत्र सत्तासम्बन्धात् सत्त्वम् यथा सत्तायाम्, स्वयं सच्च सत्तासम्बन्धात् प्रागपि सकलं वस्तु इति। स्वयं सतोऽपि तत्सम्बन्धात् सत्त्वकल्पने सत्तायामपि तत्कल्पनप्रसङ्गात् सैव अनवस्था। अथ न तत्र स्वयं सत्त्वं किन्तु सत्तासम्बन्धादेव; ननु किं तयैव सत्तया सम्बन्धात् तत्र सत्त्वं स्यात्, तदन्तरेण वा ? यदि तयैव; तदा अन्योन्याश्रयः–सिद्धे हि तस्य सत्त्वे सत्तया सम्बन्धसिद्धिः, तत्सिद्धौ[3] च सत्त्वसिद्धिरिति। तदन्तरात् सत्त्वसिद्धौ च अनवस्था; तथाहि–सत्तान्तरेणाऽपि सम्बन्धः वस्तुनःसत्त्वे सिद्धे सिद्ध्येत्, तत्सत्त्वसिद्धिश्च अपरसत्तान्तरेण सम्बन्धात् इति। तन्न अर्थान्तरभूतसत्तासम्बन्धात् सत्त्वम् अर्थानां घटते।

नापि अर्थक्रियातः; तेभ्यो भिन्नत्वात् तस्याः। यद् यतो भिन्नं न ततः तस्य सत्त्वं सिद्ध्यति यथा घटात् पटस्य, अर्थेभ्यो भिन्ना च अर्थक्रिया इति। न च अर्थेभ्योऽस्याः भिन्नत्वमसिद्धम्; पूर्वोत्तरकालभावित्वेन अस्याः ततो भेदप्रसिद्धेः। पूर्वसिद्ध एव हि भावो यत्र कुत्रचिद् अर्थक्रियायां व्याप्रियते। अन्योन्याश्रयश्च–सिद्धे हि पूर्वम् अर्थस्य सत्त्वे उत्तरकालभाविन्याः तस्याः सिद्धिः, तत्सिद्धौ च तथाविधस्याऽर्थस्य सत्त्वसिद्धिरिति। एतेन अर्थक्रियाकारित्वात् तत्सत्त्वं प्रत्याख्यातम्; यतः अर्थक्रियाकारित्वम् अर्थक्रियाहेतुत्वमुच्यते, तच्च सत एव युक्तमित्यन्योन्याऽऽश्रयः–सिद्धे हि सत्त्वे अर्थक्रियाकारित्वसिद्धिः, ततश्च सत्त्वसिद्धिः इति। निरन्वयविनाशित्वे चार्थानाम् अर्थक्रियाकारित्वं प्रपञ्चतः प्रागेव प्रत्युक्तम्।

तत्करणयोग्यताऽपि एतेन प्रतिव्यूढा; प्रतिक्षणविनाशिन्यर्थे अर्थक्रियाकारित्वाऽसम्भवे तत्करणयोग्यतायाः नितरामसंभवात्। किञ्च, अर्थक्रियादिकं स्वयं सत् अन्यस्य सत्त्वहेतुः, असद्वा ? पक्षद्वयेऽपि सत्त्वाऽसत्त्वपक्षोक्तदोषा द्रष्टव्याः। तन्न अर्थक्रियादेरपि अर्थानां सत्त्वसिद्धिः।

१–वैयर्थ्यबाधकप्र– ब०, ज०। "द्रव्यगुणकर्मणां स्वरूपसत्त्वोपगमे सत्तासमवायस्य वैयर्थ्यात् सामान्यादिवत्, सामान्यादीनां वा सत्तासम्बन्धप्रसंगाद् द्रव्यादिवत्। तेषां स्वरूपसत्त्वानुपगमे कूर्मरोमादिभ्यो विशेषाऽभावात्।" अष्टसह० पृ० २२१। २ इत्याद्यनुमानबाधप्रसङ्गात् ब०, ज०। ३–द्धौस– आ०। ४ तत्सत्त्व–ब०, ज०, श्र०। ५ पूर्वसि–श्र० ६–यः सि–आ०। ७–विनाशत्वे आ०।

नापि प्रमाणसम्बन्धात्; भाववद् अभावेऽपि अस्य गतत्वात्, ततश्च अभावस्यापि भाववत् सद्रूपताप्रसङ्गः तत्सम्बन्धाऽविशेषात्। अथ तदविशेषेऽपि यस्य प्रमाणसम्बन्धेन सत्त्वं बोध्यते स एव सन् नाऽन्यः; कथमेवं प्रमाणसम्बन्धः सत्त्वलक्षणम्? किञ्च, यदि तत्सम्बन्धात् प्रागपि अर्थानां सत्त्वं सिद्धं स्यात्, तदा स्यादयं परिहारः। न च तत्सिद्धम्; तत्सम्बन्धेन अर्थानां सत्त्वकल्पनावैयर्थ्यप्रसङ्गात्। परस्पराश्रयश्च–प्रमाणसम्बन्धात् सत्त्वम्, सतश्च प्रमाणसम्बन्धः इति।

किञ्च, तत्सम्बन्धः स्वयं सन्, असन् वा? यदि असन्; कथं तत्सम्बन्धात् कस्यचित् सत्त्वम् अतिप्रसङ्गात्? अथ सन्; किं स्वतः, अपरप्रमाणसम्बन्धात्, अन्यतो वा कुतश्चित्? यदि स्वतः; पदार्थैः किमपराद्धं येन एषां स्वतः सत्त्वं नेष्यते? अपरप्रमाणसम्बन्धात्तु तत्सत्त्वे अनवस्था। अन्यतोऽपि–प्रमेयसम्बन्धात्, निमित्तान्तराद्वा तत्सत्त्वं स्यात्? यदि प्रमेयसम्बन्धात्; इतरेतराश्रयः। अथ निमित्तान्तरात्; तर्हि सर्वत्र तस्यैव अव्यभिचारिणः सत्त्वहेतुत्वमस्तु किं प्रमाणसम्बन्धकल्पनया? तच्च उत्पादव्ययध्रौव्ययुक्तत्वात् नान्यद् भवितुमर्हति।

किञ्च, सिद्धे अध्यक्षादिरूपे प्रमाणे तत्सम्बन्धेन अर्थानां सत्त्वसिद्धिर्युक्ता, तत्सिद्धिश्च इन्द्रियार्थसम्बन्धादिसामग्रीतो भविष्यति, एवञ्च चक्रकप्रसङ्गः; तथाहि–सिद्धे प्रत्यक्षादिप्रमाणे तत्सम्बन्धेन इन्द्रियार्थानां सत्त्वसिद्धिः, तत्सिद्धौ च सत्यां तत्सम्बन्धादिप्रमाणसामग्रीसिद्धिः, तस्यां सत्यां प्रत्यक्षादिप्रमाणसिद्धिरिति।

किञ्च, प्रमाणसम्बन्धेन अर्थानां सत्त्वं क्रियते, ज्ञाप्यते वा? न तावत् क्रियते; ततः प्रागपि अर्थानां लब्धात्मलाभत्वात्, यतः प्रागपि यत् लब्धात्मलाभं न तस्य सत्त्वं तेन क्रियते यथा पुत्रात्प्रागपि लब्धात्मलाभस्य पितुः पुत्रेण, प्रमाणात् प्रागपि लब्धात्मलाभाश्च घटादयो भावा इति। अथ ज्ञाप्यते; न किञ्चिदनिष्टम्, प्रमाणसाध्यत्वात् प्रमेयव्यवस्थायाः, नहि प्रमाणमन्तरेण प्रमेयव्यवस्था युक्ता अतिप्रसङ्गात्। तदेवम् अन्यतो वस्तुनः सत्त्वाऽनुपपत्तेः उत्पादव्ययध्रौव्ययुक्तत्वेनैव अस्य सत्त्वं प्रतिपत्तव्यम्। न च उत्पादादयो वस्तुनो भिन्नाः

---

१ "किन्त्वबाधितसद्बुद्धिगम्यता सत्त्वमिष्यते।" न्यायमं० पृ० ४५३। २–न्धः लक्ष्यते च स्वयं भां०, श्र०। ३ सन् एव किं ब०, ज०। ४ सत्त्वे हे–श्र०। ५–था सुतात् श्र०। ६ "द्रव्यं हि नित्यमाकृतिरनित्या''' सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकातिकृमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते, पुनरावृत्तः सुवर्णपिण्डः पुनरपरया आकृत्या युक्तः खदिराङ्गारसदृशे कुण्डले भवतः, आकृतिरन्या अन्या च भवति द्रव्यं पुनस्तदेव, आकृत्युपमर्देन द्रव्यमेवावशिष्यते।" पात० महाभा० १।१।१। योगभा० ४।१३। "घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्। शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥ ५९ ॥" आप्तमी०। "वर्धमानकभङ्गे च रुचकः क्रियते यदा। तदा पूर्वार्थिनः शोकः प्रीतिश्चाप्युत्तरार्थिनः ॥ २१ ॥ हेमार्थिनस्तु

येन तेषामपि अपरोत्पादादियोगतः सत्त्वेन भवितव्यम् इत्यनवस्था स्यात्, तत्तादात्म्येन तेषां व्यवस्थितत्वात्।

कुतः पुनः उत्पादाद्यनेकान्तात्मकमेव वस्तु प्रमेयम् ? इत्याह–**एकान्तस्य अनुपलब्धेः**। यत एवं **तत्** तस्मात् **अनेकान्तात्मा अर्थः**। इति परिच्छेदार्थोपसंहारे इति।

५ येनाऽशेषकुतर्कविभ्रमतमो निर्मूलमुन्मूलितम्,
स्फारागाधकुनीतिसार्थसरितो निःशेषतः शोषिताः।
स्याद्वादाऽप्रतिमप्रभूतकिरणैः व्याप्तं जगत् सर्वतः,
स श्रीमान् अकलङ्कभानुरसमो जीयात् जिनेन्द्रः प्रभुः॥ १॥

इति प्रभाचन्द्रविरचिते न्यायकुमुदचन्द्रे लघीयस्त्रयालङ्कारे द्वितीयः परिच्छेदः समाप्तः।

ग्र० ४३००।



माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम् ॥ २२ ॥ न नाशेन विना शोको नोत्पादेन विना सुखम्। स्थित्या विना न माध्यस्थ्यं तेन सामान्यनित्यता ॥ २३ ॥" मी० श्लो० पृ० ६१९।

१ "अथ भिन्नास्तर्हि प्रत्येकं स्थित्यादीनां त्रिलक्षणत्वप्रसङ्गः सत्त्वात्, अन्यथा तदसत्त्वापत्तेः, तथा चानवस्थानान्न समीहितसिद्धिरिति कश्चित्; सोऽपि अनालोचितपदार्थस्वभावः; पक्षद्वयस्यापि कथञ्चिदिष्टत्वात्, तत्र ततः कथञ्चिदभेदोपगमे स्थित्यादीनां स्थितिरेव उत्पद्यते सामर्थ्याद् विनश्यति च, विनाश एव तिष्ठति सामर्थ्याद् उत्पद्यते च, उत्पत्तिरेव नश्यति सामर्थ्यात्तिष्ठतीति च ज्ञायते त्रिलक्षणाज्जीवादिपदार्थादभिन्नानां स्थित्यादीनां त्रिलक्षणत्वसिद्धेः। एतेनैव ततस्तेषां भेदोपगमेऽपि त्रिलक्षणत्वसिद्धिरुक्ता।" अष्टसह० पृ० ११२। सिद्धिवि० टी० पृ० १६९। २–प्रतिघ–आ०।

श्रवणबेलगोलीयायाः 'श्र०' संज्ञिकायाः प्रतेः पाठान्तराणि ।

पृ०	पं० मुद्रितपाठः	श्र०प्रतेःपाठः
२	५–दधौ प्र–	–दधिप्र-
,,	९ निखिलप्र–	अखिलप्र-
३	४–तनस्वभावो	–तननानास्वभावो
,,	६ ये ऋष–	ये ते वृष-
४	१ स्वपररू–	स्वरूपपररू-
,,	७–खिलं प्र–	–खिलप्र-
,,	१६ तत्र व्यु–	त्त्वव्यु-
५	१०–त्यत्ववत्	–त्यवत्
६	१६–णविश–	–णं विश-
७	४–रूपा सं–	–रूपसं-
८	५–रित्वानु–	–रितानु-
,,	८–त्पादहेतुरस्ति	–त्पादकमस्ति
९	१३ चासत्त्व–	भावासत्त्व-
,,	१८–क्षश्च	–क्षत्वश्च
,,	२२–थाऽस–	† –थाप्यस-
१०	५ वाऽतो	चाऽतो
,,	१५–द्रूपया	–द्रूपतया
,,	१८–काद्यचि–	–कादिचि-
११	१३–णिकवाद–	–णिकक्षणवाद-
,,	१५–प्यवस्थि–	† –प्यव्यवस्थि-
१२	९ तावत्का–	तत्का-
,,	११–भिज्ञानानामेवं–	† –भिज्ञानां ज्ञानानामेवं-
,,	२२–कारणक्षणयोः	–कारणयोः
१३	३ नतु	† नच
,,	९ चैत्रज्ञानं मित्रज्ञान–	मित्रज्ञानं चैत्रज्ञान-
१३	१७–सन्तानिको	–सन्तानको
१४	१४–त्वविरो–	–त्वनिरो–
१५	१–वत् सन्तानिवद्वा	–वत् तावद्वा
,,	३–ध्यानै–	–ध्यनै-
,,	७–पोऽप्यव–	–पोऽप्यस्याव-
,,	१३ भवतां	भवतः
१७	४–स्थातुः तद्द्वि–	–स्थातुः द्वि-
,,	९ अन्योन्यार्थ–	अन्यार्थ-
२१	७ त्रिधा	त्रिविधा
२२	९–स्था कुतः प्रमा–	–स्था प्रमा-
,,	११–मत्ता सि–	–मत्त्वं सि-
२५	५–यनि–	–यादिनि-
२६	८ शब्दातिशयता सुध–	† शब्दाभिधेयता संघ–
२७	२ वाऽपि नाना	वा नाना
२८	१५ तत्सद्भा–	तद्भा-
३०	१३–ताया अभा–	–ताभा-
३१	६–द्भावतोऽसं–	–द्भावासं-
,,	९–दिक्कालाकाशात्म–	–दिक्कालात्म-
,,	२३–न प्रसा–	–न साध-
३२	१–त् शब्दरसादौ	–त् रसादौ
,,	१ दिवाकर–	दिनकर-
,,	१२–चाभ्रपट–	–चाभ्रकपट-
,,	१३ 'कारकत्वात्'	बोधकत्वात्
,,	१५–भाग्यत्वादिव्या–	–भाग्यव्या-
३३	८–ष्णार्थोप–	† –ष्णविशिष्टार्थोप-
,,	१०–कत्वमुप–	† –कृतमत्त्वमुप-

पृ०	पं०	मुद्रितपाठः	श्र०प्रतेःपाठः
३३	१०	करणं च	करणत्वं च
३५	५	–कृतमत्वम्	–कत्वम्
,,	७	वाऽव–	चाव-
३७	१	तेऽस्यां	तस्यां
,,	६	–वानेकव्या–	–धाने तद्व्या-
३८	३	सदा	सर्वदा
,,	७	–त्तिः इत्य–	–त्तिःस्यादित्य-
,,	१९	–भ्यते	–भ्येत
३९	५	–ल्यस्य न	–ल्यं न
,,	१९	–ल्पकप्रमोत्प–	–ल्यपकोत्प-
४१	५	सुषुप्तादा–	सुप्तादा-
,,	१८	अर्थप्र–	† अर्थे प्र-
४२	४	–याविष्टं	–याविशिष्टं
४३	१	–संयोगजात्	–संप्रयोगजात्
४४	६	सर्वपदार्थ–	† सर्वदार्थ-
,,	१८	–या व्याप–	–या सा व्याप-
,,	२२	–त्वानु–	–तानु-
,,	२३	अचिद्रूपं	जडं
४५	४	अचिद्रूपमपि	जडमपि
,,	१०	–धाच्च	–धश्च
४७	१	रसज्ञानं	रासनज्ञानं
,,	६	–वृत्तज्ञानं	† –वृत्तंज्ञानं
,,	१५	–ल्पना अ–	–ल्पना नाम अ-
४८	२	–भासस्य	† –भासत्वस्य
,,	२०	–तनमुच्यते	–तनमुपपद्यते
५०	९	–नावसा–	† –नाध्यवसा-
,,	१७	यत् सवि–	यत्त्ववि-
,,	१९	निर्विकल्पकत्वसविकल्पकत्वा-	विकल्पाविकल्पत्वा-
५१	१५	अनन्यमन–	अज्ञानस्य मन-
५२	२०	–रसादिज्ञा–	–रसज्ञा-
५३	१९	स्वरूपेण	स्वस्वरूपेण
५४	४	–हारत्व–	–हारकत्व-
,,	८	–निवारणेन	–निराकरणेन
५५	४	–लापस्यैकस्यैव	–लापस्यैव
,,	१६	एतज्ज्ञान–	एकज्ञान-
,,	२०	तज्ज्ञानस्य	ज्ञानस्य
५६	२०	तथा	यथा
,,	२२	–चितव्य–	–चितस्य व्य-
,,	२६	एकमेव एवंरज–	एकमेव रज-
५७	२५	–ता पीतस्य	–ताऽपि तस्य
५८	९	–क्षविषया शु–	–क्षविषयतः शु-
,,	१५	नाप्यन्येन	नान्येन
,,	१८	अथ य–	अथ न य-
५९	२	मृत्पिण्डरूपतापरि–	तद्रूपपरि-
,,	३	–गेऽपि	–गे हि
६०	१४	–न्नतु अख्या–	–न्न पुनरख्या-
६२	८	–त्मस्वरू–	–त्मरू-
,,	१३	–थाऽध्यव–	–थाव्यव-
,,	१८	भ्रान्तित्व–	† भ्रान्तत्व-
६३	४	दर्शयति	प्रदर्शयति
,,	९	–सङ्गतस्तद्–	–सङ्गात्तद्-
६४	११	असद्रूपः	असद्रूपम्
	२०	अतो न तद्दोषः	अतोऽयमदोषः
६५	८	–तख्याति–	–तार्थख्याति-
,,	१५	–न स्वरू–	–न रू-
,,	१६	–स्य च द–	–स्य द-
६६	३	–च्यते तच्च	–च्यते एवं तच्च

पृ०	पं०	मुद्रितपाठः	श्र० प्रतेः पाठः
६६	४	–नेऽपि तज्ज्ञा–	–नेऽपि ज्ञा-
,,	१९	अपि तु तेनापि	निर्गुणिनावि-
६७	६	–त्वोपप–	–तोपप-
,,	९	सन्निकर्षादिर्वा	तत्सन्निकर्षादिवत्
,,	१३	–परस्वरूप–	–पररूप-
,,	२२	–श्रयात्मकं	–श्रायकं
६८	७	कालादिभे–	कालानां भे-
,,	७	शक्तिषु	व्यक्तिषु
,,	१४	–क्ततरै–	–क्ततमै-
७०	६	नियमश्चा–	नियतश्चा-
,,	१०	वेष्टवि–	चेष्टवि-
७१	१९	प्रतिक्षेप्स्यमा–	प्रतिसेत्स्यमा-
७२	८	–मानं वा	–मानं न
,,	१७	परिधृत्य	परिहृत्य
,,	१८	–नीयः	–नीयम्
,,	२४	न तावत्	न तत्
७३	१७	निमूलनिर्वृ–	निस्तलनिर्वृ-
७४	१६	–षान्वितार्था–	–षार्था-
७७	२	–न्धनः	–न्धकः
७८	११	तत्र च मनो–	तत्र मनो-
७९	२	प्रभासुर–	भासुर-
,,	६	–त्यप्यस–	–त्यस-
८०	२	प्रतीतिः	प्रतीतम्
,,	५	तत्तत्र	तत्र
,,	१४	–क्षुषोऽसि–	–क्षुषोऽप्रसि-
८१	५	विषयस्य गम–	†विषयस्याऽऽगम-
,,	१३	–त्वा च–	–त्वा नीला च-
८२	६	–कान्तं गत्वा	–कान्तरं गता
,,	१०	तदप्ययु–	तदयु-
८३	१	–द्ययुक्तमुक्तम्	–द्ययुक्तम्
८४	८	–न्धः इत्यादि व्य–	–न्धः व्य-
,,	२०	सताऽनेन	सता तेन
,,	२५	कांसपात्रासं–	कंसपात्र्यासं-
८५	१४	दूरत्वं	दूरवत्त्वं
,,	१६	–प्रतिपत्तिवत्	–प्रतीतिवत्
,,	२२	–स्मात्तद्ग्रह–	–स्माद्ग्रह-
८७	१०	–मानात्	–मानतः
८९	१	–पत्प्रतीतिः	† –पत्तत्प्रतीतिः
,,	१६	–कलं ज्ञेयं	–कलज्ञेयं
,,	१७	–कला पुरु–	–कलपुरु-
,,	१९	तस्यातद्विष–	तस्य तदविष-
,,	१९	तत्तत्र	तत्तद्
,,	२०	–षं ज्ञानं	–षविज्ञानं
९०	३	तस्याप्यभावो	तदभावो
,,	१०	–तस्यास्य नि–	–तस्य नि-
९२	५	–क्षे सर्व–	क्षे स सर्व-
,,	८	–त्वविधेर–	–त्वसिद्धेर-
,,	११	–ज्ञत्वस्य	–ज्ञस्य
,,	२३	–साधिका	–साधकः
९३	५	–धासंभवः	–धानुसंभवः
,,	८	तत्परिज्ञाने	तत्त्वज्ञाने
,,	११	शेषाभ्यनु–	अशेषाभ्यु-
,,	१९	व्याप्तिः त–	† व्याप्तिसिद्धिः त-
,,	२७	–षत्ववक्तृत्वादेर–	–षत्वादेर-
९४	१२	सादृश्या–	तत्सादृश्या-
,,	१५	–रुषः	† –रुषाः
,,	१९	अविलक्षणश–	अविशेषणश-
९५	६	–र्वज्ञेह–	–र्वज्ञ त्वे ह-

पृ०	पं०	मुद्रितपाठः	श्र०प्रतेःपाठः
९५	७	–र्वज्ञेऽपि	–र्वज्ञत्वेऽपि
,,	१८	–वानावेद–	–वावेद-
,,	२०	–वानावेद–	–वावेद-
९७	३	देशार्थस्य अ–	देशस्यापि अ–
,,	४	–देशता–	–देशार्थता-
९८	१	–रुद्धः नि–	–रुद्धो हेतुः नि-
,,	३	–वर्त्तकस्य हे–	–वर्त्तकहे-
,,	४	जगनिर्मा–	जगन्निर्मा-
,,	४	–शेषण वि–	–शेषवि-
९९	३	–तुं न श–	–तुमश-
,,	६	–चरमात्रेण	–चरत्वमात्रेण
,,	१३	तदीयज्ञा–	तदीया ज्ञा-
१००	१२	खातप्रतिपू–	खातपरिपू-
,,	१२	भुवि अक्रि–	भूमौ अक्रि-
,,	१९	–त्वानुप–	–त्वाद्यनुप-
,,	२०	सुखासुखरूपफ–	सुखदुःखरूपस्य फ-
१०१	८	–नेकान्तः	–नेकान्तम्
,,	१४	–त्वेऽस्य	–त्वेनास्य
,,	२०	–भावित्वं हि	–भावे हि
,,	२१	अविकारि–	अकारि-
,,	२१	–मतिदुर्घ–	–मपि दुर्घ-
,,	२५	–माण्वाद्यन्तर्ग–	–माण्वन्तर्ग-
१०२	१०	–कर्तृत्वा–	–कर्तृकत्वा-
,,	१३	वाष्पादिः	वाष्पादि
,,	२१	–शेषणसि–	–शेषसि-
१०३	५	खातप्रतिपू–	खातपरिपू-
,,	७	–त्रिमभू–	–त्रिमत्वभू-
,,	१४	–द्धत्वमि–	–द्धमि-
,,	१६	च अभासु–	वा भासु-
१०३	१७	प्रतीतिः	प्रतिपत्तिः
,,	२६	–कर्तृत्व–	–कर्तृकत्व-
१०४	३	–कार्यानिष्प–	–कार्यस्यानिष्प-
१०५	७	–तीयोऽपि प–	–तीयः प-
,,	१७	–रोधाच्च	†–रोधानुषङ्गाच्च
,,	१८	–चरमा–	–चरत्वमा–
१०६	११	–णामाऽनि–	–णामनि-
,,	१४	हीयते	हीयेत
,,	२४	क्रमिकत्वे	क्रमवत्त्वे
,,	२६	–मप्यसौ	–मसौ
१०८	८	अनादौ	आदौ
,,	२६	–णासंभवतोऽसंभ–	–णाऽसंभ-
१११	८	–श्राम्यति	–श्राम्यते
११२	४	नेश्वरस्य	न चेश्वरस्य
,,	१६	–द्वयस्यास्य स–	–द्वयस्य स-
११२	२१	–दयोः प्रस–	–दयोः पुनः प्रस–
११३	३	–त्यैकस्वभावता–	–त्यैकस्वरूपता–
,,	७	जायते	जायेत
११४	१४	–मासाद–	–मापाद–
,,	१५	वास्यां	चास्यां
,,	१६	–र्यश्चेत् स्वा–	–र्यश्च स्वा–
,,	१७	–नानवच्छिन्नं तज्ज्ञानं	–नावच्छिन्नं
,,	१७	तेनासौ ई–	तेनासावेव ई-
,,	२०	–ध्येनैश्वर्यं किञ्च	–ध्येत् किञ्च
११५	१	–वत् सा–	–वत् तत्सा–
,,	६	–त्रवा विषये बा–	–त्र बा–
,,	८	बाधकेतरयोः	बाधकाभावेतरयोः
,,		सन्देहादेव	सन्देहाभावादेव
११७	८	प्ररूप्यते	प्ररूप्येत

पृ०	पं०	मुद्रितपाठः	श्र० प्रतेः पाठः
११५	२०	–त्तौ ज्ञा–	–त्तौ हि ज्ञा–
११८	४	उपपद्यमान–	† अनुपपद्यमान–
११९	४	राश्यन्तरा–	गत्यन्तरा–
,,	५	–सिद्धिः	–सिद्धेः
,,	९	–प्रतिभासा	–प्रभासा
,,	१६	–शेषनियतो–	–शेषे घटानोपलष-नियतो–
,,	१८	अर्थसत्त्व–	अर्थस्य सत्त्व–
,,	२२	–द्धरूपा–	–द्धस्वरूपा–
१२०	२	भेदकस्या–	भेदस्या–
,,	४	ज्ञानरूपा–	ज्ञानस्वरूपा–
,,	४	रूपं	स्वरूपं
,,	१४	–लमर्थमुपल–	–लमर्थमुपाल–
,,	१६	कार्यः	कार्यम्
,,	२३	–रणानुप–	–रणत्वानुप–
,,	२६	–न्ताने खे के–	–न्ताने के–
,,	१७	–वे दे–	–वेऽपि दे–
१२१	२०	–संसाधकस्य	–संपादकस्य
१२२	१	–पि ज्ञानस्य	–पि तस्य
,,	१४	–याः स्वामि–	–याः प्रागेव प्रतिषेधात् स्वामि-
,,	१४	–क्षार्थस्य सि–	–क्षास्वार्थस्यापि सि-
१२३	४	च भेदो	च विभेदो
,,	१०	–भासित्वं	–भास्यत्वं
,,	१०	ज्ञानभेदा–	विज्ञानभेदा-
,,	१३	–द्वयप्रतिभा	–द्वयस्य प्रतिभा-
१२४	४	–दिष्टत्वञ्च	–दिष्टञ्च
,,	५	–न्धित्वस्य	–न्धत्वस्य
,,	९	.नीलसिता–	नीलपीता-
१२४	१८	–दिरूप–	–दिस्वरूप-
१२५	१	–भावि वा प्रथ–	†–भावि समकाल-भावि वा प्रथ-
१२७	११	ज्ञानाभिन्न–	ज्ञानादभिन्न-
१२८	१९	–ष्णता न	–ष्णता वा न
,,	२१	–त्रताऽप्र–	त्रतायाः अप्र-
,,	२२	–मेकमनेका–	–मेकमनंशमनेका-
१२९	१	–त्म्ये च	–त्म्ये वा
,,	५	–च्चिदभे	–च्चिद्भे-
,,	९	–हेतुजत्वं	–हेतुत्वं
१३०	४	चेतनद्र–	चेतनाद्र-
,,	१८	–त्वाऽप्र–	–तऽप्र-
,,	२४	–थं तच्चित्र–	–थं चित्र-
१३१	११	सैव शून्यता	सैव कथ्यते
१३२	१८	तथोत्पा–	यथोत्पा-
१३४	३	–मात्रप्र–	–मात्रतत्त्वप्र-
,,	५	–क्रियात्वे	–क्रियाकारित्वे
,,	१०	–साऽविशे–	–सविशे-
१३५	९	वा	च
,,	१७	–भिचरति	–भिचारीति-
,,	२२	–यत्वस्य	–यस्य
१३६	४	–थाप्यसि–	–थाऽप्रसि-
,,	७	–नङ्गत्वात्	–नङ्गात्
,,	११	इत्यादिः	इत्यादि
,,	१९	–दादेः आ–	–दादेश्च आ-
१३७	२	स्वाकार–	साकार-
,,	६	–दादीनां ज्ञानेन	–दानाञ्चानेन
१३८	६	वाऽसत्त्व–	चाऽसत्त्व–
,,	९	–मसत्त्वाभ्यु–	–मसद्भावाभ्यु-

पृ०	पं०	मुद्रितपाठः	श्र०प्रतेःपाठः
१३८	१३	प्रयुज्यते	प्रयुज्येत
१४०	११	–श्चिच्छब्दात् प्रबु–	–श्चिद्बु–
१४२	१२	–काशनेन ततः	†–काशने ततः
,,	२४	सत्त्वात्	सद्भावात्
१४३	१७	अतोऽस–	ततोऽस–
,,	१८	तत्र तद्रूप–	तत्र चैतद्रूप–
,,	२०	संवेद–	स्वसंवेद–
१४४	३	–न्वितत्वम–	–न्वितम–
,,	९	–न्धाभ्युपगमे चानयोः	–न्धार्थाभ्युपगमे वा तयोः
,,	२१	–दात्म्यासंभवे	–दात्म्याभावे
१४५	५	शाब्दव्य–	शब्दव्य–
१४७	६	सद्भावसिद्धेः	सद्भावाः ग्राहकासिद्धेः
१४८	१०	–सिद्धकर्म–	–सिद्धधर्म–
१४९	२	भेदेऽस्य	भेदेऽप्यस्य
१५०	२०	घटेत	घटते
,,	२४	प्रवर्तेत	प्रवर्त्तते
,,	२५	जडप्रवृ–	जडस्य प्रवृ–
१५१	२	स्वापादि–	स्वप्नादि–
,,	१३	–जादिभे–	–ज्ञादितिभे–
,,	१९	–श्चिदुत्पत्ति–	–श्चित्तदातदोत्पत्ति–

इतः श्र० प्रतेः पाठान्तराणि मुद्रणकाल एवोपलब्धत्वात् मूलग्रन्थेन सहैव मुद्रितानि ।

† एतच्चिह्नाङ्किताः पाठाः मुद्रितपाठात् शुद्धतराः भान्ति ।

शुद्धिपत्रम् ।

पृ०	पं०	अशुद्धपाठः	शुद्धपाठः
६	११	वस्तुनः	वस्तुतः
८	१७	सोप्यनक–	सोप्यनेक–
९	१८	–रूढ़–	–रूढ–
३३	२१	३–क्षसामर्थ्य–	३–क्षसामर्थ्य– ब०, ज० ।
३४	१४	–साकल्पस्य	–साकल्यस्य
३४	२८	चतुष्टं	चतुष्टवं
५१	२१	द्रष्टव्याम्	द्रष्टव्या
५५	२९	ह्यद–	८ ह्यद–
७१	३	–शब्दोपचरात्	–शब्दोपचारात्
११८	४	उपपद्य–	अनुपपद्य–
१२१	३१	–भासः । स्या०रत्ना०पृ०…	–भासः ।
३३३	२०	वृ० पृ०… ।	वृ० पृ० ९ ।
३४३	१२	–शक्तयभा–	–शक्तयभिव्यक्तयभा–
३७०	२	[ ]	[सिद्धिवि० पृ० १७४]
३७०	१५	वलवद–	बलवद–